00047294

NOT TO BE ISSUED
OUT OF THE LIBRARY.

BOMBAY BRANCH
OF THE
ROYAL ASIATIC SOCIETY.
TOWN HALL, BOMBAY.

Digitized with financial assistance from the
Government of Maharashtra
on 10 February, 2016

APRIL. [No. 4.

# BIBLIOTHECA INDICA;

A

## COLLECTION OF ORIENTAL WORKS

PUBLISHED UNDER THE PATRONAGE OF THE

Hon. Court of Directors of the East India Company,

AND THE SUPERINTENDENCE OF THE

ASIATIC SOCIETY OF BENGAL.

17294

EDITED BY DR. E. RÖER.




माधवाचार्य्यकृतभाष्यसहित ऋग्वेदसंहितायाः
प्रथमाष्टकस्य प्रथमावधि द्वितीयाध्याय पर्य्यन्तं।

THE FIRST TWO LECTURES OF THE SANHITA OF THE

# RIG VEDA,

WITH THE COMMENTARY OF MADHAVACHARYA, AND AN ENGLISH TRANSLATION OF THE TEXT.

BY DR. E. RÖER.

FASCICULUS IV.

2238

CALCUTTA:
PRINTED BY J. THOMAS, AT THE BAPTIST MISSION PRESS,
CIRCULAR ROAD.
1848.

ORI 294.1
Vod/Fi.
47294

ACSS

ORIENTAL SECTION—ASIATIC SOCIETY.

1848.

G. A. BUSHBY, Esq.
WELBY JACKSON, Esq.
BABU DEBENDRANA'THA THA'KURA.
H. M. ELLIOT, Esq.
W. SETON KARR, Esq.
BABU HARI'MOHANA SENA.
BABU RA'JENDRALA'L MITTRA.
Dr. E. ROER, Secretary, Oriental Department.

HONORARY (NON-RESIDENT) MEMBERS.

B. H. HODGSON, Esq., *Darjiling.*
WALTER ELLIOTT, Esq., *Madras.*
H. H. WILSON, Esq. Boden Professor of Sanscrit, *Oxford.*

00047294

# PREFACE.

THE present work is the first of a series of Oriental publications, which, as the title intimates, will be printed under the patronage of the Hon. Court of Directors and the superintendence of the Asiatic Society. It is to appear in the form of a Journal, in monthly numbers of 80 to 100 pages. Every work is intended to be accompanied with an English translation, and if taken from Sanscrit literature, with its commentary also. The works of this collection may be of any Oriental language, provided they relate to India; the greater part, however, will be taken from the Sanscrit, partly because the literature of that language in all its branches possesses a number of valuable works, not yet published, and partly because the Sanscrit is more intimately connected with India than any other Oriental language.

The idea of this publication is due to my friend, Mr. Laidlay, to whose minute on the Oriental Publications of the Asiatic Society (Annual Report of the Asiatic Society 1847,) I refer for further information.

Before entering upon an account of this edition of the collection of the Rig Véda Hymns, I have to premise a few words explaining to those of my readers who are not acquainted with the late proceedings of the Asiatic Society, the reason why it is to remain a fragment.

Requested by the Asiatic Society to obtain the suggestions of the Oriental Section with regard to the immediate adoption of measures to publish the Védas, I submitted to the Oriental Section, the 30th March 1847, a Report, proposing the publication of the Sanhitá of the Rig Véda with its commentary and a translation of the text. The Society approved of the proposition, and appointed me editor of the work, under the superintendence of the Oriental Section. The MSS. for the edition had been collected from the Libraries of Calcutta and the College

of Benares, and the first two lectures completed, when a letter from Professor Wilson announced to the Society, that the printing of the Rig Véda Sanhitá had been commenced upon at Oxford, at the expense of the Court of Directors, and that other parts of the Védas were preparing for the press in Germany and Russia. Upon receiving this information the Asiatic Society was obliged to abandon the undertaking, but at the same time resolved to publish the part of the work that had been completed.

The MSS. at my disposal for the text and commentary of the Rig Véda Sanhitá, are the following, (*a.*) for the text.

1. Nos. 8 to 36, from the Library of Bishop's College, on small leaves, a most carefully written and correct MS.

2. No. 443, from the Library of the Asiatic Society.

3. Nos. 1418 to 1428, from the Library of the Sanscrit College, in the most perfect preservation, and in every respect a most excellent and correct MS.

4. No. 1417, from the same, written in the Pada Pátha, a mode of writing the Véda Hymns, in which the compounds are separated into their elements, and each word is written independent of the rules of Sandhi.

(*b.*) For the commentary.

1. A MS. of the Asiatic Society, very incorrect and defective.

2. A MS. from the Sanscrit College, generally correct.

3. A MS. from Benares, also pretty correct, transcribed for the Asiatic Society from a MS. in the College through the kindness of Dr. Ballentyne; this MS., however, does not contain the two first chapters complete. All these MSS. are written in the Devanágarí character.

No difficulty was experienced in determining the text. The MSS. (with the exception of that of the Asiatic Society) are written with religious attention to the correctness of the text, and a comparison of all with Rosen's edition, gave very few variations; none of them of any importance.

The commentary on the other hand offered in this respect many difficulties. The MS. of the Asiatic Society, besides its numberless orthographical and grammatical errors, is written in so careless a manner, that frequently whole passages are misplaced or omitted. The Sanscrit and Benares College MSS. are much more careful trans-

cripts, although sometimes omissions occur also; they appear, however, to have been copied from one and the same original MS., for, with a few exceptions, they generally agree with each other. These remarks mainly apply to the introduction to the commentary; here discrepancies, omissions, &c. abound, evidently because it is in some passages difficult to understand, and the transcribers sometimes interpolate their own explanation. In the commentary to the hymns the MSS. agree better, and different readings are in fact of rare occurrence.

In giving the different readings it was not thought necessary to mark such deviations as are only variations of the same grammatical form, for instance अत्र for अस्मिन्, each of which might have been equally well chosen by the author, and which do not indicate a different shade of thought or expression. Nor was it deemed expedient to point out the omissions in one or the other MS.

The commentary in explaining the Védaic forms of grammar, generally refers to Páṇíni's Sútras, without, however, quoting the rules. I have added the references to Páṇíni, in which I derived the greatest assistance from Boethlinck's excellent edition of Páṇíni's Sútras. Sometimes the references to Yáska's Nirukta have also been noted, but as I received the Nirukta rather late, I was not able to give them all.

The commentary of Sáyana Áchárya is no doubt a mine of learning with regard to Védaic literature. It is in every respect a most substantial body of all the learning treasured up for so many centuries concerning the orthodox understanding of the Védas and the religious opinions derived from them. It exhibits a comprehensive knowledge of the different disciplines, connected with the study of the Védas, and also of the works of the author's predecessors. It was first my intention to give an analysis of Sáyana's work, but as my labours in this direction are superseded by Prof. Wilson's edition of the Rig Véda, I have given up the task, other labours now requiring my undivided attention.

With a view to facilitate the proper understanding of the hymns, the following remarks on the religion, as found in them, are offered.

It is first of all necessary to consider the religion of the hymn collections of the Védas independently of the doctrine taught by Sáyana and the Bráhmanas, or the parts of the Védas which contain religious precepts, the ritual, &c. Sáyana, who lived in the 14th century P. C.,

has of course an opinion of the deities in the Védas, which is formed according to the view of the learned Bráhmans of his own days.

Although the Bráhmanas were composed at a very early period, yet the philosophic doctrine of those who had for so many centuries studied the Védas, was then already fully established.

In the Bráhmanas we find a pantheistic system; there is one all-pervading spiritual substance of which the several gods, as well as all other beings, are parts. This system was adapted to the explanation of the Védaic deities. It is no doubt the prevailing belief of the most ancient period of the Hindu religion nearest to the composition of the Védas. Nay, this philosophical conception, attained in a very early age, has remained unchanged in all periods of Hindu history. In this respect, the religion taught in the Bráhmanas, is the same which the pandits of the present time entertain, the belief that all finite beings are emanations from one infinite substance. The religion of the people only has changed, as there is now a worship of Krishna, Shiva, &c., while before Indra, Agni, &c. were adored.

Referring, however, to the collections of the Véda hymns, we find a different belief. There is evidently a polytheistic worship of Indra, Agni, Aditi, &c., and no attempts as yet are made to form the idea of one infinite substance. The gods of the Védas are evidently elements, as fire, wind, or conspicuous objects of nature as clouds, lightning, &c. Such deities must have a double character, already noted by Yáska, viz. as elements, their attributes are elementary; as gods, they will receive attributes belonging to rational natures. Thus for instance, the fire in its elementary character consumes, gives light, &c.; as god it is the messenger from man to the gods in consuming the sacrifice; it is the keeper of treasure, the source of wisdom, &c.; it has a chariot and horses, &c.

If we want to reconcile the variety of gods with the idea of one universal being, the result is a monstrous combination of nonsense with philosophical doctrines. If, however, we consider this belief in itself, independently of the symbolical and allegorical explanations of a later period, we shall find it consistent and adapted to the primitive state of the mind of the people. The hymns are generally very simple in their composition; there are many beautiful conceptions, and on the

whole impress us with a favourable opinion of the moral and poetical susceptibility of the Hindus at an early period.

To introduce to the mythology of the hymns, I quote here a passage from Yáska's Nirukta, which gives a kind of systematic view of the gods that occur in the hymns, which is on the whole correct, and remarkable for the circumstance, that it exhibits the most ancient view, preserved to us, of the Hindus themselves on the religious system in the Véda hymns.

The gods are parts of *one* Átmá (universal soul). The Rishis (the sages who are supposed to have first pronounced the hymns) praise them for possessing a greater share of the nature of which all creatures participate, for it is said that all creatures have their origin from the all-embracing nature. The different creatures are produced either by action or by the Átmá. Átmá is like the chariot, Átmá like the horse, Átmá like the bow, Átmá like the arrow, Átmá is the substance of all the gods.

There are three deities: Agni (fire) who has his place on the earth; Váyu (wind), or Indra (who has his place in the atmosphere), and the sun (Aditi), who has his place in the heavens.

Although each of them is one, they have many names from their greatness, or from the multiplicity of their works; as one and the same priest has many names from the difference of his duties and praises, as the name of Hota (who sings the Rig Véda hymns), Adhwaryu (who arranges the sacrifice according to the Yajur Véda), Brámha, Udgata (who recites the Sáma Veda), or as many people perform the same work by division of its various parts. The identity of place and fruition must also be mentioned. Thus, on the earth animals, men and gods, have identity of place and fruition; thus the earth is object of fruition for the clouds, the wind and the sun; the other world also for fire.

The deities must be considered twofold, first, as far as they are like men by shape and understanding; in this respect their praises are made accordingly; and secondly, as far as they are like things; (unconscious substances) when their praises are also made accordingly.

The attributes of the gods are as follow:

1. The attributes of Agni. His place is in this world (the earth), his sacrifice the Prátasavana; his season the spring; the metre, in which he is praised, the Gáyatri. His wives are Ágnáyí (the personified power of fire), Prithibí (the earth), Ilá, his works, the conveying of the

sacrifice to the gods, and of the gods to the sacrifice, and to manifest (the visible things). The deities, which must be praised together with him, are: Indra, Varuna, Parjanya, the Ritus.

2. The attributes of Indra. His place the atmosphere; his sacrifice the Mádhyandina; the metre, in which he is praised, the Trishtubh; the part of the Sáma Veda, devoted to him, Vrihasáma; his hosts of gods are such, as are in the middle place, and also his wives. His works are the creating of vapour, the killing of Vrittra, and all such deeds as require great strength. The deities that are praised with him, are: Agni, Soma, Varuna, Pushan, Brihaspati, Bramhanaspati, Parvata, Kutsa, Vishnu, Váyu, with Mitra Varuna is praised, with Púshtan and Rudra Soma, with Váyu Púsha, with Váta Parjanya.

3. The attributes of Aditya.

His place the heaven; his sacrifice the Tritíya Savana; his season the rainy season, his metre the Saptadasástoma; his part of the Sáma Véda Vairupa; his hosts of gods those that dwell on the highest place, and also thus his wives. His works are the attraction of vapours by his rays, the keeping of them, and all such works as require great heat.

It was my endeavour to render the translation as literal as the idiom of the English language would admit, and I believe that the hymns in their English dress may be understood, as they are, without the cumbrous and tedious apparatus of explanatory notes. Independent of a number of words, not met with in the modern Sanscrit, and of some peculiar grammatical forms, the language of the Véda hymns, although elevated, is always simple. The only difficulty to understand it, arises sometimes from words that are omitted, evidently because they contained some allusions well known to the hearers. In such passages I found it necessary to insert one or the other word in the translation. Another cause for sometimes introducing words, not in the original, is a grammatical peculiarity in the ancient Sanscrit. Different from the modern Sanscrit, the language of the Védas may optionally separate a preposition from the verb with which it is compounded, and this liberty extends so far, that when in the first half of a Sloka the verb and preposition are given, the preposition alone is sometimes repeated in the second part of the distich. On such occasions the insertion of words was of course indispensable. All the words, thus introduced, have been marked by italics.

I have noted for each hymn the name of the deity which is praised, the name of the Rishi and the metre in which it is composed. The Rishi of a hymn, as known from Colebrooke, is the sage to whom it has first been revealed by Bráhma. The names of the Rishis as the seers of certain hymns, are handed down to us by the Anukramaniká, one of the most ancient works of Védaic literature, which enumerates all the hymns of the Rig-Véda. I observe here, that the parts of the Anukramaniká referring to the first two lessons, are given at their commencement.

With regard to the division of the collection of the hymns, I would in conclusion remark, that there are two modes of dividing it. According to one, it is divided into 10 Mandalas (circles) parted into more or less of Anavákas (chapters) containing somewhat more than a thousand hymns of unequal length. According to the other it has 8 Ashtakas (the eighth part of a whole), each of which is subdivided into 8 Adhyáyas (lessons). These again are divided into more or less Vargas (sections), each containing five Rigs or simple verses, of which there are somewhat more than 10,000 in the Sanhitá of the Rig-Véda.

32 f 38

# RIG VÉDA SANHITÁ.

## FIRST BOOK.

### FIRST CHAPTER.

#### FIRST HYMN.*

1. I praise Agni, the household priest, the divine offerer of the sacrifice, the inviter who keeps all treasures.

2. Agni, worthy of the praises of the ancient Rishis, and also of our's, do thou bring hither the Gods.

3. By Agni *the sacrificer* enjoys wealth, that grows from day to day, confers renown, and surrounds him with heroes.

4. Agni, the sacrifice which thou keepest from all sides uninvaded, approaches surely the Gods.

5. Agni, inviter, performer of gracious deeds, thou who art truthful, and who shinest with various glories, come thou, O God, with the Gods.

6. The prosperity which thou, O Agni, bestowest upon the worshipper, will be in truth *a prosperity* to thee, O Angiras.†

7. We approach thee in our minds, O Agni, day after day, by night and day, to offer thee our adoration,

8. Thee, the radiant guardian of the meet *reward* of the sacrifices, who is resplendent and increasing in his sacred house.

9. Be thou, O Agni, accessible to us, as a father is to the son; be near us for our welfare.

#### Second Hymn.‡

1. Come, O beautiful Váyu, the moonplant juice is prepared, drink of it, and listen to our invocation.

* Hymn in praise of Agni, Rishi Madhuchanda, the son of Visvamitra—Metre Gáyatri.

† A name of Agni.

‡ Hymn in praise first of Váyu, then of Indra and Váyu, and lastly of Mitra and Varuna; the same Rishi and Metre.

2. The chanters, holding the ready libation and knowing the *sacred* days, chant thee here with hymns, O Váyu.

3. Váyu, thy approving voice approaches the worshipper, *it approaches* to many for the drinking of the moonplant juice.

2.

1. Indra and Váyu, this *juice* is prepared, come with the viands, for the libations long for you.

2. Váyu and Indra, come ye with speed, *and* seated near the sacrifice, attend ye to the prepared libation.

3. Váyu and Indra, approach to the *libation* which adorns the *priest* who prepares it; *after your approach,* O men, the libation will soon *be purified* by the pious rite.

3.

1. I invoke Mitra of holy strength, Varuna also, the destroyer of foes, ye who hear the prayer for rain.

2. Mitra and Varuna, ye, that collect and shed the rain, have accepted this great sacrifice for the due *reward of the pious rites.*

3. Mitra and Varuna, ye wise, born as a help and refuge to many, preserve *our* strength *and our* pious rites.

## Third Hymn.*

1.

1. O Aswins, whose hands are swift, ye lords of the pure *sacrifice,* accept, ye long-armed of the sacrificial food.

2. O Aswins, performers of many pious works, ye men and wise, hear our prayer with approving minds.

3. Ye destroyers *of foes,* ye truthful, come on the road, that causes lamentations;† for the libation, placed on the sacred grass, is ready.

2.

1. Come, O resplendent Indra, these *libations* which long for thee, and are always purified by the fingers of the priest, are prepared.

2. Approach, O Indra, moved by our invocation; thou who art obtained by the wise, come to the prayers of the priest, holding the libation in his hands.

* Hymn in praise first of the Aswins, then of Indra, thirdly of the Viswadévas, and lastly of Saraswatí; Rishi and Metre the same.

† Viz. to our foes.

3. Indra, lord of the golden coloured horses, with celerity approach, *and hearken* to our supplications. Take our food with the libation.

3.

1. Viswadévas, ye protectors, preservers of man, ye bestowers of gifts, come to the prepared *libation* of the worshipper.

2. O Viswadévas, givers of rain, swiftly approach the prepared *libation*, as the sunbeams *approach* the days.

3. Ye all-wise Viswadévas, whom nought can destroy or injure, attend, O givers *of riches*, to the *sacred* butter.

4.

1. O, purifying Saraswatí, who rejoicest in offered food, with the food, *given by the priest*, be pleased with our sacrifice, thou who grantest wealth to prayer.

2. Saraswatí who inspires with friendly words, and explains true thoughts, has accepted the sacrifice.

3. Saraswatí by *her* impulse moves the great ocean *and* irradiates all minds.*

## Fourth Hymn.†

1. We call day after day Indra, the performer of glorious deeds, for assistance, as milch-cows are *called to the herdsman* who milks them.

2. Come to our oblations, drink of the juice, O drinker of the juice, O thou, that is rich, it is *thy* delight to grant the gift of cows.

3. Then‡ let us see thee among those that are thy near companions, among those that are wise; do not, by passing us over, manifest *thyself rather to* others, than us, *but* come.

4. *O sacrificer*, draw near to the wise, uninvaded Indra, ask the experienced *priest;* for he, (Indra) *will grant* blessings to thy friends.

5. Let then our *priests* give praise *to Indra.* Ye slanderers, from this place depart, while they, (the priests) O Indra, perform this festal pomp.

6. O destroyer *of foes*, let then the men, that are our enemies, call us fortunate. May we live under this Indra's protection.

* The commentator makes the remark, that Saraswatí must be here considered in her double capacity as a goddess and a river.

† Hymn in praise of Indra; Rishi and Metre the same.

‡ Viz. after the drinking of the juice.

7. To the swift Indra offer this ready prepared juice, which adorns the sacrifice, cheers a man, receives the pious rites, and is the friend of the gladdening *Indra.*

8. Of this *juice* drinking, O Satakratu,* didst thou slay the Vrittras,† didst thou protect those fighting in battle.

9. For the obtaining of wealth, O Indra, we supply thee with food, O Satakratu, who fightest in our battles.

10. To him, the guardian of wealth, the great, the performer of illustrious deeds, the friend of the offering priest, to that Indra sing *praises.*

### Fifth Hymn.‡

1. Swiftly approach, the offerings in your hands, ye friends; sit down, and sing *praises* to Indra.

2. When the moonplant juice is prepared, let all join to sing *the praises of* Indra, the destroyer of many *foes and* the lord of manifold *and* desirable *treasure.*

3. May he then be near us for *our* wealth, be near us for the *acquiring* of various wisdom, may he with the food approach us.

4. Sing *praises to* that Indra, against whose golden-coloured horses, yoked to the chariot, no enemy can stand in battle fields.

5. This ready purified juice, *made* sacred with curdled milk, comes to be taken by the drinker of the libation.

6. Indra, performer of noble deeds, thou wast born at once full grown for the drinking of the moonplant juice and for the leading *of the gods.*

7. O Indra, praised in songs, the ready juice approaches thee, may it be thy delight, O wise.

8. Our praises have extolled thee, thee our songs, O Satakratu, our hymns also shall extol thee.

9. May Indra, whose protection never fails, enjoy this *sacrificial* food of thousand kinds, in which all manly virtues *dwell.*

10. May not any mortals injure our bodies; O mighty Indra, extolled in songs, avert *our* death.

* According to Sáyana, possessed of many sacrifices, or of manifold wisdom.

† The most eminent of the Asuras under the name of Vrittras. That the killing of the Vrittras has an allegorical meaning, is clearly shown by the 32d hymn.

‡ Hymn in praise of Indra; Rishi and Metre the same.

## Sixth Hymn.*

1. All *men*, wherever dwelling, adore in every work† the radiant uninvaded, moving *Indra; his* splendours are radiant on the sky.‡

2. *Charioteers* to each side of the car harness his desirable, powerful, red and golden coloured horses, that carry men.

3. Giving to the darkness light, to the shapeless shape, ye mortals, wast thou, *O Indra,*§ born with the dawning *rays of the morning.*

4. Forthwith after the *given* oblation, *the Maruts,* who have a sacred|| name, sent again the *turgid* cloud.

5. *Assisted* by the conveying *Maruts,* who broke the fastness, O Indra, didst thou find the cows in the cavern.**

6. The hymns, longing for the presence of the Gods (the Maruts) extolled the great, renowned *host of the Maruts,* who know all treasures, as the counsellor *of Indra.*

7. For thou (the host of the Maruts) art seen united with the fearless Indra; *you both are* joyous, and alike in splendour.

8. The sacrifice mightily calls for Indra, together with the blameless, desirable host (of the Maruts) that ascend to heaven.

9. O all-pervading *host of the Maruts,* approach from the heaven or from the sun above; here sings *the priest* the hymns.

* Hymn in praise partly of Indra, and partly of the Maruts (winds). Rishi and metre the same.

† The literal translation would be: all, &c. join Indra, which, as Sáyana explains, means they join him in their works with the kingdom of the worlds.

‡ Sáyana says, that in this hymn Indra in represented as the universal soul; the epithet radiant exhibiting him as the sun, uninvaded as the fire, moving as the wind, and his splendour on the sky as the stars. In what light such explanations of a later period are to be considered, I have already indicated in the preface.

§ The double vocative is in the original; although it is repugnant to the English idiom, I did not like to change it. Indra, reminds the commentator, appears here as the sun.

|| Literal, a sacrificial, or whose name bears witness, that the honour of the sacrifice is due to them.

** The fable alluded to, is given in the Anukramaniká. The Panis, a kind of Asurs, stole the cows from heaven, and threw them into darkness; Indra discovered their place by means of Saráma, the dog of heaven, and together with the Maruts, defeated the Asurs.

10. We pray Indra for wealth, either from here (the earth) or from the heaven above the earth, or from the wide expanded ether.

## Seventh Hymn.*

1. The chanters extolled Indra, the singers *praised* the great Indra with hymns, the voice of *the commanding priest called* Indra.

2. Indra is every where present with his golden coloured horses, yoked to the chariot by *his* word alone, Indra, the wielder of the thunderbolt, who shines with gold.

3. To *present* an expanded view, Indra raised the sun in the firmament and with his rays lighted the mountains.

4. Indra, protect us in our battles and *in the possession of* our manifold wealth, O terrible, *protect us* with thy fear-exciting power.

5. For *the obtaining of* great, as of little wealth, we invoke Indra, the helper among enemies, the wielder of the thunderbolt.

6. O thou fulfiller of our wishes, giver of rain, open that cloud for us; do not speak to us a refusing word.

7. All praises, *which are given* to other Gods, *are* Indra's, the wielder of the thunderbolt. I do not find a praise worthy of him.

8. The giver of rain approaches man in *his* might, as the bull does the herd; he, the lord, who does not refuse prayer.

9. Indra, who alone sways men and riches, *is also lord* of the five tribes.†

10. For you, O priests, we call Indra, who *is placed* above all men. May he belong alone to us.

## Eighth Hymn.‡

1. O Indra, for *our* protection grant *us* desirable wealth, which conquers equal foes; which none resists, which is all-powerful.

2. With which, assisted by thee, we shall from *our* horses repel *our* foes in the battle, hand to hand.

* Hymn in praise of Indra; Rishi and metre the same.

† The commentator explains it by the five castes.

‡ Hymn in praise of Indra; the same Rishi and metre.

3. Indra, by thee assisted, we shall seize our spears together with the club,* *and* slay our opponents in the battle.

4. Indra, by thee assisted, we shall with *our* warriors and spearmen defeat our enemies.

5. Great *is* Indra, he is supreme, be greatness to him; *his* power is like the heaven in vastness.

6. If warriors in battle, or men for the gift of a son, or sages in strife for knowledge *invoke thee*, they all obtain their wishes.

7. *Indra's* belly, which is the greatest quaffer of the moonplant juice, swells like the sea, is like the mouth from which saliva constantly flows.

8. For in truth his *word* is friendly, far-sounding, great, and promises cows; *it is* like the branch with ripe fruits to the worshipper.

9. For in truth, thy power *and* thy assistance, O Indra, are forthwith *vouchsafed* to a worshipper like me.

10. For in truth his own desirable praises and hymns must be sung *by the priests* for the sake of Indra, the drinker of the moonplant juice.

## Ninth Hymn.†

1. Come, Indra, enjoy the food and the various kinds of the juice; *be the* great conqueror *of foes* by thy majesty.

2. Pour out the gladdening *juice*, when ready *in the sacrificial vessel*, for the gladdening Indra, the potent *juice* for the all-potent *God*.

3. Indra, *lord* of all mankind, god of the majestic nose, enjoy the gladdening praises; *speed* to these libations together *with the Gods*.

4. O Indra, I composed thy praises, they drew near to thee, the donor of abundant gifts, the lord; thou hast accepted *them*.

5. In our presence, bestow *on us* desirable wealth of various kinds; for thou hast sufficient, *nay* abundant.

6. O Indra, thou keeper of immense riches, in this *sacrifice* direct us well, the striving, renowned, for *the obtaining of* wealth.

* Rosen's suggestion to take Ghaná as instrumentalis, appears to me preferable to Sáyana's explanation, who considers it as accusative.

† Hymn in praise of Indra; the same Rishi and metre.

7. O Indra, give us great, extensive wealth, which is rich in cows and food, which supports our life, and never decreases.

8. Give great renown to us, O Indra, *and* wealth of a thousand kinds, *and also* this food, carried on the chariot.

9. For the protection of our wealth we invoke Indra, praising with praises the lord of wealth, the friend of hymns, who goes *to the sacrifice.*

10. At every *libation* all sacrificers praise the great majesty of the great Indra, who is dwelling in his house.

### Tenth Hymn.*

1. The chanters chant thee, the singers of hymns sing thee, the bráhmans raise thee, O Satakratu, as *the workmen* raise a cane.†

2. When from one hill *the priest* ascended *another* hill and completed *his* arduous work,‡ then knew Indra *his* intention, and hastened with the host *of the Maruts* to fulfil his wishes.

3. Yoke then the full-maned, proud horses that fill their girths, *to the chariot,* then come, O drinker of the moonplant juice, Indra, to listen to our praises.

4. Approach, applaud our praises, accept of them, and be pleased with them. Do, Indra, thou establisher of home, increase our food and also our sacrifice.

5. Praises, that always increase, must be sung to Indra, who repels many *foes,* that Sakra resounds among *our* sons and companions.

6. We desire him for fellowship, him for wealth, him for manly deeds; for he, the mighty Indra, is able to bestow wealth on us.

7. The food, purified by thee, O Indra, *is* abundant and with ease to be obtained. Open the stable of the cows, confer wealth, O splitter of mountains.

8. For both heaven and earth, *are* unable to hold thee, the slayer of enemies. Conquer the heaven-born waters, and confer cows upon us.

* Hymn in praise of Indra; the same Rishi; metre Anustubh.

† According the explanation of Sáyana, as workmen raise a cane to dance before it, or as those who lead a good life, raise their family.

‡ Viz. to collect the plants for the preparing of the Sóma juice, the wood for the sacrifice, &c.

9. Indra, whose ear hears all, hear in speed *my* invocation and accept my praises. Be pleased with my praise and that of my companion.

10. For we know thou answerest all desires, thou hearest, when we invoke thee *for help* in battles; we implore the thousandfold assistance of him who answers desires.

11. Indra, Kusika's son, *come* in speed, drink with zest the ready *libation.* Prolong *my* life, which shall be worthy of praise, and bless the Rishi with a thousand goods.

12. O thou, praised in songs, may these hymns every where be sung around thee, may they grow after *thy* growing age, and giving pleasure may they be received with delight by thee.

## Eleventh Hymn.*

1. All songs extolled Indra who is like the ocean's vast expanse, who is the foremost among the heroes who fight from the war chariot, who is the giver of nourishment and the protector of the good.

2. Indra, O lord of strength, by thy friendship supplied with food we have no fear from foes. We extol thee, the conquerer who is ever victorious.

3. From time of old Indra's gifts of riches never failed, *nor will his* assistance *fail,* if *the giver of the sacrifice* spends on the offering priests wealth of food with the gift of cows.

4. Indra was born as the destroyer of towns,† the youth, the wise, whose power is unbounded, the upholder of all ceremonies, the praised wielder of the thunderbolt.

5. Thou, O splitter of rocks, burst open the cavern of Valu,‡ who retained the cows. When the terrified gods repaired to thee, they had no *longer* fear.

6. Extolling the distilling *moonplant juice,* I come again, O hero, for thy bounties. O thou, praised in songs, the priests adored thee *before* and know thee *now as giver of such bounties.*

* Hymn in praise of Indra, Rishi Jétri, the son of Madhuchanda, metre Anustubh.

† Viz. of the Asurs.

‡ One of the Asurs.

7. By magic didst thou slay, O Indra, Sushna,* who fought with magic arts. The wise know *that thou art possessed of such glory.* Do thou increase their food.

8. The hymns have extolled Indra who rules by glorious might, whose bounties are of a thousand kinds, nay are indeed more plentiful.

## Twelfth Hymn.†

1. Agni the inviter, the omniscient we chose as the good performer of this sacrifice.

2. *The priests* always call Agni with prayers; Agni, the lord of man, the conveyer of the sacrifice, who is beloved by many.

3. Agni, born *from the sacred wood,* bring hither the gods to the holy grass; for thou art our inviter worthy of praise.

4. Because thou art the messenger, O Agni, awake the *gods* who are desirous *of the sacrifice;* then sit down with the gods on the sacred straw.

5. O radiant Agni, called *hither* by the sacrifice, consume our enemies in league with the Rakshasas.

6. By Agni is lighted up Agni, the wise, the guardian of the house, the youth, the conveyer of the sacrifice, whose face is like a *flaming* tongue.

7. Praise, *O priest,* in the sacrifice the wise, truthful, divine Agni, the destroyer of foes.

8. Which ever sacrificer, Agni, God, adores thee as messenger, be thou his protector.

9. Which ever sacrificer in the offering of the Gods worships Agni, to him give joy, O purifier.

10. O purifier, resplendent Agni, for our sake bring hither the gods to the offering and sacrificial butter.

11. Agni, extolled by *this* new hymn, do thou supply us with food *and* wealth, that attracts heroes.

12. O Agni, *resplendent* with pure brightness, thou that goest on all the errands of the gods, listen to this our praise.

* One of the Asurs. The literal meaning of the word Sushna is one who dries up (exsiccator.)

† Hymn in praise of Agni, Rishi Médhatithi, the son of Kanwa, metre Gáyatri.

### Thirteenth Hymn.*

1. Well lighted Agni, thou inviter, purifier, bring for our sacrificer's sake hither the Gods, and perform the sacrifice.

2. O wise Tanunapad, to-day convey our sweet sacrifice to the Gods for their feast.

3. I call to this sacrifice the beloved glory of man, the sacrificer with the gracious speech.

4. Agni whose name is praise, convey *hither* the Gods on the blissful chariot; for thou art the inviter, installed by man.

5. Spread, ye priests, every where the hallowed straw above glistening with sacred butter, the straw, on which the immortals appear.

6. Ye splendent *temple*—doors, so long closed, ye fosterers of pious rites, open for this day's sacrifice.

7. I call to this sacrifice the lovely night and dawn to be seated on this our sacred straw.

8. I call the two wise immortal sacrificers who are of gracious speech. Offer ye this our oblation.

9. Ye three joy-inspiring unalterable goddesses, Ilá, Saraswatí, Mahí, be seated on the sacred straw.

10. I call hither the supreme Tashtri of manifold shapes. May he belong alone to us.

11. O God Vanaspati, offer the sacred butter to the Gods; *by thy favour may the sacrificer* receive wisdom.

12. For Indra's sake offer, *ye priests*, the oblation with the Swáhá in the house of the sacrificer. Hither I call the Gods.

### Fourteenth Hymn.†

1. With all these gods come, O Agni, to the festival rites and songs to drink the moonplant juice, and present the offering.

* Rishi and metre the same; hymn in praise of 12 divinities called Apri, all of which are representations of Agni. They are: 1. Susamiddha (lighted up). 2. Tanunapad (who consumes clarified butter). 3. Narásánsa (praised by men). 4. Jlita (praised). 5. Barshi (the sacrificial straw). 6. Dévidwara (temple-doors). 7. Ushasá-nakta (dawn and night). 8. Daivya Hotarau (divine sacrificers). 9. Ilá, Saraswatí and Mahí (three goddesses). 10. Twastri (the divine architect). 11. Vanaspati; and 12. Swáhá.

† Hymn in praise of the Viswadévas; Rishi and metre the same.

2. O Agni the wise, *thy* illustrious deeds praise thee, the sons of Kanwa invoke thee ; approach with the gods.

3. They (the sons of Kanwa) *call upon* Indra and Váyu, Vrihaspati, Mitra and Agni, Púshana and Bhagu, the Ádityas, *and* the host of Maruts.

4. To you are offered the gratifying, exhilarating liquors, distilling and sweet, that are kept in sacrificial vessels.

5. The sons of Kanwa, *holding* the purified grass, offering the sacred butter, *and* adorning *the sacrifice*, praise thee and implore thy help.

6. May the coursers with shining backs, that carry thee, yoked to the chariot *simply* by thy thought, *bring also* the gods to the drinking of the moonplant juice.

7. Give, Agni, wives to these *Gods*, who are worthy of the sacrifice and increase oblations. Let them, O thou whose word is pleasing, drink from the sweet juice.

8. With thy tongue, O Agni, may all the gods, that are worthy of sacrifice and praise, drink of the sweet libation at the sacrifice.

9. *To obtain the hallowed gift*, let *Agni*, the wise sacrificer, bring hither from the radiant sun all the dawn-awaking Gods.

10. Drink, O Agni, the sweet moon-plant juice with all *those gods, and* with Indra, Váyu, and Mitra in all his radiant forms.

11. Agni, thou sacrificer by man installed, seated at the sacrifice, do thou offer this oblation for us.

12. Yoke to the chariot, O God, the fleet red-coloured coursers. With them bring hither the Gods.

## Fifteenth Hymn.*

1. Indra, drink the moonplant juice with Ritu. The exhilarating libations that like to dwell in thee, approach thee.

2. Ye Maruts, drink with Ritu from the vessel of the priest, purify the sacrifice; for you are liberal donors.

3. O Neshtri,† united with thy wife, accept our sacrifice, drink with Ritu; for thou art the bestower of riches.

4. Agni, bring hither the Gods; let *them* be seated at the three places;‡ adorn *them*, and drink with Ritu.

5. O Indra, thy fellowship *with the Ritus* is ever unbroken, drink after them the moonplant juice from the overflowing vessel of the Brámhana.

6. Mitra and Varuna, ye who hear pious supplications, accept the great sacrifice, which no fire *of enemies* can consume.

7. *Drink*, O giver of wealth (Agni) the *juice*. *The priests*, asking for wealth, holding the *sacrificial* stones, extol the god at the sacrifice, and also at the oblations.§

8. Giver of wealth, give us riches, worthy of praise, which we may enjoy *by the favour* of the gods.

9. The giver of wealth with the Ritus longs to drink from Nestri's vessel. Go, *ye priests, to the place of the oblation*, perform the sacrifice and *thence* depart.

10. Be a bestower of wealth on us, O giver of wealth, because we offer to thee as to the fourth with the Ritus.

11. Ye Aswins, companions of the splendent Agni, ye performers of pious deeds, with the Ritus, the conveyers of offerings, drink the sweet *libation*.

12. O bestower of gifts, by thy office as guardian of the house, convey with Ritu the sacrifice; perform the oblation to the gods; *for the sacrificer*, devoted to the gods, longs for the gods.

* Hymn in praise of the Ritus, with whom other deities are associated, viz. Indra, the Maruts, Twastri, Mitra and Varuna, Dravinoda, the Aswins and Agni. Rishi and metre the same.

† Under Neshtri Twastri is meant according to Sáyana.

‡ At the three daily sacrifices.

§ That is, at the principal sacrifice, and at those oblations, that are connected with it.

## Sixteenth Hymn.*

1. May the golden-coloured *horses* carry thee, the fulfiller of all desires, to the drinking of the moonplant juice. *The priests,* splendent like the sun, *extol thee,* O Indra.

2. Let the golden-coloured *horses, that long for these roasted* grains and distil the liquid butter, bring Indra hither on the bliss-conferring car.

3. We call Indra in the morning, Indra when the sacrifice proceeds; Indra for the drinking of the moonplant juice.

4. Come, Indra, with the long-maned *horses* to our prepared *libation,* for we call thee to the all ready made *juice.*

5. Do thou come to our praises, come to our ready morning sacrifice. Drink, as the white antelope *drinks,* when thirsty.

6. This moonplant juice and these libations are ready on the *sacred* straw; for the sake of strength drink them, O Indra.

7. May this excellent praise touch thy heart, *and* be acceptable *to thee;* then drink of the ready libation.

8. The slayer of Vrittra, Indra approaches for *his* exhilaration the whole sacrifice to drink of the moonplant juice.

9. Do thou fulfil this our desire by *the gift of* cows and horses, Satakratu, *for,* we extol thee in devout contemplation.

## Seventeenth Hymn.†

1. I implore the help of Indra and Varuṇa, whose splendour is great. May they gladden us in such a *sacrifice as this.*

2. For ye, the upholders of men, for the sake of affording protection, are going to the prayer of a sage like myself.

3. O Indra and Varuṇa, satisfy us with riches according to our wish; we implore you, *to be* near *us.*

4. For mixed *is the libation* of the sacrifices, composed *are the praises* of men of exalted mind. May we be *the first* among the givers of food.

5. Indra is supreme among the bestowers of a thousand gifts; Varuṇa is to be extolled among those that are worthy of praise.

* Hymn in praise of Indra, the same Rishi and metre.

† Hymn in praise of Indra and Varuṇa; Rishi and metre the same.

6. By their protection we enjoy *wealth*, and preserve *it ;* let there be abundance.

7. I invoke you, Indra and Varuṇa, for various wealth. Do ye render us victorious.

8. Indra and Varuṇa, lo our minds wish to adore you ; attend with speed to our welfare.

9. Indra and Varuṇa may the pleasing praise with which I invoke *you*, approach you ; may you increase the praise, offered to both of you.

## Eighteenth Hymn.*

1. Render me *among the Gods* a well known giver of the libation, O Brámhanaspati, as Kakshíwan *was*, the son of Ushjik.

2. May he who is wealthy, who destroys diseases, who is the possessor of riches, who increases happiness, who is swift, attend to us.

3. May the slandering word of mortal man that is our enemy, never affect us. Protect us, Brámhanaspati.

4. The mortal man whom Indra, Brámhanaspati *and* Soma uphold, does surely not perish.

5. O Brámhanaspati, Soma, Indra, *and* Dakshina, preserve such a mortal from sin.

6. For the sake of wisdom, I have approached the lovely Sadasapapati, the performer of wonderful deeds, the friend of Indra, the bestower of riches.

7. He, without whom no sacrifice succeeds, although *the priest* be wise, arranges the pious rites, to be performed with wisdom.

8. After *the offering of the sacrifice*, he renders the offerer of the sacred butter prosperous ; he makes that the sacrifice proceeds *without obstacle ; our* praise approaches the gods.

9. I beheld Narásansa, armed with unyielding strength, whose fame is widely spread, whose glory is resplendent as the sky.

* Hymn in praise of Brámhanaspati (from v. 1 to 5,) in common with Indra and Soma (v. 4 ;) with Dakshina (v. 5 ;) in praise of Sadanaspati (v. 6—8 ;) in praise of Narásansa and Sadasapati (v. 9 ;) Rishi and metre the same.

### Nineteenth Hymn.*

1. Thou art called to this beautiful sacrifice for the drinking of the moonplant juice. Come, O Agni, with the Maruts.

2. For thee, O powerful God, no mortal is able to defeat in thy work. Come, O Agni, with the friendly Maruts.

3. Come, O Agni, with the Maruts, who, attended by all the gods, know *the course* of the great waters.

4. Come, O Agni, with the fierce Maruts, who produce the waters, and whom none by strength can overcome.

5. Come, O Agni, with the lovely Maruts, who are fearful in shape, the possessors of wealth, the destroyers of enemies.

6. Come, O Agni, with the Maruts, the gods, that above the bliss-giving *sun*, dwell in the splendent skies.

7. Come, O Agni, with the Maruts, that chase the clouds *and* agitate the waving ocean.

8. Come, O Agni, with the Maruts, who fill the *sky* with the rays of the sun, who exceed in power the ocean.

9. Come with the Maruts, O Agni, to whom I have offered also in former times the sweet juice of the moonplant.

## SECOND LESSON.

### Twentieth Hymn.†

1. This hymn, conferring abundant wealth, was orally made by the sages in praise of the divine birth of the Ribhus.

2. *The Ribhus*, who created by their thoughts *alone* for Indra the golden coloured *horses* that by *his* command yoke themselves *to the chariot*, received the sacrifice with the pious rites.

3. They, together with the truthful *Aswins*, made the blissful chariot that approaches every place; they created the milk-giving cow.

4. The truthful Ribhus, gifted with efficacious prayer, possessing power, restored their parents to youth again.

* Hymn in praise of Agni and the Maruts; Rishi and metre the same.

† Hymn in praise of the Ribhus. Rishi and metre the same. About the Ribhus the commentator says, that they had been before men, but by their penances had become gods.

5. The exhilarating libations awaited you and Indra, attended by the Maruts, and the splendent Adityas.

6. And that new sacrificial vessel, made by the God Twastri, they again made fourfold.

7. You, *that are extolled* by worthy praises, successively bestow on us the three* kinds of treasures and the three times seven rites† for the giver of the libation.

8. The conveyers *of sacrifices* lived *before the life of mortals, but* by meritorious deeds obtained a place worthy of the sacrifice, among the Gods.

### Twenty-first Hymn.‡

1. I call Indra and Agni, their praise is our desire, they *are* the greatest quaffers of the moonplant juice.

2. Praise them at the sacrifices, extol, ye men, Indra and Agni; sing them in *your* hymns.

3. We call Indra and Agni to the hymn of *our* friend, *we call* the drinkers of the moonplant juice to the drinking of the moonplant juice.

4. We call the awe-inspiring gods; the libation is prepared, come hither, Indra and Agni.

5. Ye great protectors of assemblies, Indra and Agni, keep away the Rakshashas. May the voracious be without offspring.

6. On account of this *sacrifice*, of which the reward is sure, Indra and Agni, keep watch in a prominent place; bestow welfare *on us*.

### Twenty-second Hymn.§

1. *O priest*, in the morning awake the *always* united Aswins; may they come hither for the drinking of this libation.

2. We call the owners of the excellent chariot, the eminent charioteers, the two gods, the inmates of heaven, the Aswins.

3. With the well-cracking whip, wet with the perspiration of the horses, sprinkle the sacrifice, O Aswins.

* Viz. of the highest, mean, and lowest value.

† There are three classes of ceremonies, Haviryajna, Pakayajna and Somasanstha, each of them contains seven sacrificial rites.

‡ Hymn in praise of Indra and Agni; Rishi and metre the same.

§ Hymn in praise of the Aswins (v. 1—4;) of Savitri (v. 5 to 8;) of Agni (v. 9 to 10;) of Indráni, Varuñáni and Agnáyí (v. 11 to 12;) of the sky and earth (v. 13 to 14;) of the earth (v. 15,) and of Vishnu (v. 16 to 21.) Rishi and metre the same.

4. For not far from you is the sacrificer's dwelling, to which you go in the chariot, O Aswins.

5. I invoke the protection of the golden-handed* Savitri;† for the god shows the sacrificer's place.‡

6. *O priest,* for our protection praise Savitri, who destroys the waters. We desire *to perform* his rites.

7. We call upon Savitri, who gives light to man, and distributes the manifold wealth that provides a home.

8. Sit down, O friends, Savitri must now be praised by us. He will bestow riches, he is splendent.

9. Agni, for the drinking of the moonplant juice bring hither Twastri and the longing spouses of the Gods.

10. Agni, thou of loveliest youth, for our protection bring hither the wives of the Gods, bring Hotrá,§ Bhárati,‖ Varútrí¶ and Dhishaná.**

11. May the goddesses, who are the guardians of man, and who have indestructible wings, favour us with protection and great blessings.

12. For *our* welfare I call hither Indráni, Varuṇáni and Agnáyí, to partake of the moonplant juice.

13. May the great heaven and the earth moisten this our sacrifice; may they fill us with food.

14. In the firm place†† of the Gandharva sages lap at sacrifices the rich juice of them, (viz. of heaven and earth.)

15. Be wide, O earth, be a house without foes, offer us everywhere a refuge.

* Sayána explains this, he is called golden-handed, because he holds gold in his hands for the purpose of giving it to the sacrificers, or, from a circumstnce, that happened at a certain sacrifice performed by the gods, where Savitri himself was the priest, and performed the sacrificial duties. Then at a certain ceremony the Adwaryus gave to Savitri a part of the sacrifice, named Prásitra, which, when taken by him, cut off his hand. After this the priests who had given him the Prásitri, made him a hand of gold. Rosen well explains this word by aurimanum, i. e. aureis radiis, manuum instar, praeditum, and compares it to Homer's Rhododaktylos Aeos.

† Savitri, the sun.

‡ That is, the place which the sacrificer has to occupy during the offering.

§ The wife of Agni.

‖ The wife of Aditya under the name of Bharata.

¶ Who must be chosen.

** Dhishana, the goddess of riches.

†† The atmosphere, the place of the Yakshas, Gandharvas, Apsharas and Ganas.

16. May the gods *approaching* from the earth from which Vishnu *assisted* by seven hymns, proceeded, afford us protection.

17. Vishnu perambulated this *earth;* three times he set down his dust-raising foot, the *print* of which covered *the earth.*

18. Three steps hence made Vishnu, the uninviolable protector who upholds the sacred rites.

19. Lo, ye *priests,* Vishnu's sacred deeds, by which *the sacrificer* accomplishes his vows. He *is* the meet companion of Indra.

20. The sages always see that highest place of Vishnu, as is the wide expanded view of the eye under the sky.

21. The waking, praising sages proclaim Vishnu's supreme place.

## Twenty-third Hymn.*

1. This abundant moonplant juice, accompanied with prayers, is prepared, O Váyu. Approach and drink the ready libation.

2. We call the two heavenly gods, Indra and Váyu, to partake of the drinking of the moonplant juice.

3. For their protection sages invoke Indra and Váyu, the guardians of pious deeds, who are swift as thought, and look with a thousand eyes.

4. Mitra and Varuṇa, who are worthy of the sacrifice, and armed with sacred strength, we call to the drinking of the moonplant juice.

5. I invoke Mitra and Varuṇa, who by *their* faithful word increase the meet *reward of pious rites* and protect the true light.

6. Varuṇa be our guardian, *and* Mitra also with every help; both of you give us abundant wealth.

7. We call for the drinking of the moonplant juice Indra, attended by the Maruts; may he, together with the host, be satisfied.

8. Ye hosts of Maruts, headed by Indra, ye Gods, who have Púshana as their giver, hear ye all my invocation.

9. Ye donors of gifts, *O host of Maruts, united* with the fit, powerful Indra, kill ye Vritra, that the infame does not reign over us.

* Hymn in praise of Váyu (v. 1;) of Indra and Váyu (v. 2 to 3;) of Mitra and Varuṇa (v. 4 to 6;) of the Maruts (v. 7 to 9;) of the Viswadévas (v. 10 to 12;) of Púshan (v. 13 to 15;) and of the waters (v. 16 to 24.) The same Rishi; metre Gáyatrí (v. 1 to 18;) Puru Ushṇik (v. 19;) Anuṣṭubh (v. 20, 22 to 24).

10. We call for the drinking of the moonplant juice all the gods *and* the Maruts; for dreadful *are* the sons of Prishni.*

11. As the sound of victorious *warriors* proceeds with vigour; so the sound of the Maruts, when you, O men, come to the propitious *sacrifice.*

12. Ye Maruts, that are every where born from the shining, radiant *ether,* protect and bless us.

13. O resplendent Púshan, *coming* from the sky, bring the libation, shining from various straw, as *the herdsman by searching recovers the lost* cattle.

14. The resplendent Púshan found in a cavern the hidden libation, placed on various coloured, shining straw.

15. He indeed brought again and again to me the six *seasons,* adorned with libations, as *the husbandman for the sowing* of barley with *his* oxen every year again and again ploughs *the field.*

16. The mothers (the waters represented as mothers) who are the friendly companions of the sacrificers and give sweetness to the milk, proceed on the roads *of the oblations.*

17. May the *waters,* that are near the sun, and the *waters* along which he *moves in his course,* be pleased with our sacrifice.

18. I call the goddesses of the waters which our cows use to drink. We must sacrifice to the rivers.

19. Among the waters is the nectar; among the waters the healing herb; for the praise of the waters, O priests, be speedily prepared.

20. In the waters, told me Soma, are all healing herbs, there is Agni who cheers the whole world, and the waters that possess all healing power.

21. Ye waters, give healing herbs removing *disease* from my body, that we without disease may speedily see the sun.

22. Ye waters, take from me all that I sinned by ignorance and by malice, what I sinned by cursing and by speaking falsehood.

23. I worshipped to-day the waters; we have met with their liquid. Come, O Agni, attended by the Maruts; thus endow me with glory.

24. Endow me with glory, O Agni, endow me with wisdom, endow me with long life; let thus the Gods know me; let Indra know *me* together with Rishis.

* Prishni, the earth.

## Twenty-fourth Hymn.*

1. The fair name of which of the immortals shall we then pronounce? Who has restored us to the wide-expanded earth, *so that* I may see *again* father and mother?

2. We pronounce first of all the immortals the fair name of Agni: He has restored us to the wide-expanded earth, so that I may see again father and mother.

3. We ask thee for wealth, O divine Savitri, the lord of riches, who art always *our* protector,—

4. For such wealth as is worthy of praise, as free from blame and hatred, is held by thy hands.

5. By the assistance of thee, the keeper of treasures, we are bent upon the acquiring of riches.

6. For thy strength, thy power and thy wrath, is not possessed by *these* birds and these winged *hosts*, nor by these waters that unceasingly move; *the course* of the wind never exceeds thy speed.

7. In the bottomless *air* keeps Varuṇa of purified strength, abundance of lovely *light* above. *The rays* point downwards, although their origin is above; may our life be preserved by thee.

8. For the king Varuṇa made for the sun an extended path to travel *daily;* in the pathless sky, he made *a path* to set down the feet. May he then be an upbraider of *our enemies*, that wound *our* hearts.

* Hymn in praise of Agni (v. 1 to 2;) of Savitri (v. 3 to 5;) and Varuṇa (v. 6 to 15.) Rishi Sunahsépa, Ajigarta's son. Metre Trishtubh (v. 1, 2; 6 to 15.) Gáyatri (3 to 5). Rosen observes here. This hymn together with six others, contained in the sixth chapter of the 1st section is ascribed to Sunahsépa, the son of Ajigarta, who is said to have recited this hymn in praying for his life, when he was about to be offered to the gods. There is, however, nothing in these hymns, proving in any way, that they are connected with the fable first mentioned, and the circumstance, related in hymn 9th, v. 12 and 13, that Sunahsépa, when bound to the sacrificial pile, was liberated by Varuṇa, evidently shows, that this hymn at least cannot be ascribed to Sunahsépa. In none of these hymns however (with exception of the commencement of the 24th which may be understood in this manner) there is not the least indication of a person, who in danger of his life deprecates his death. To attribute these hymns to Sunahsépa, appears to have been occasioned by mentioning the bonds (H. 24, 15, and H. 25, 21) which Varuṇa is asked to open; but Varuṇa's bonds allude to the dangers which beset the navigator.

9. Thou hast, O King, a hundred, *nay* a thousand healing herbs; be thy grace great, profound *to us*. Fasten far from us *Nirritti** with averted face; save us from sin that we have committed.

10. Those *seven* stars,† placed on high, that are seen at night, go anywhere by day. The works of Varuṇa *are* not infested; the splendent moon moves at night.

11. With hymns *to thee*, I pray thee for this *life*; this asks the praising sacrificer by *his* offerings. Not disdaining *this sacrifice*, advert, O Varuṇa, to my prayer. O thou, praised by many, do not destroy our life.

12. This (praise of Varuṇa) told me *sages*, at night indeed, this indeed by day; this pronounced my heart's impulse. May Varuṇa, the king, whom Sunahsépa called, when chained *to the pillar*, save us *at present*.

13. For chained Sunahsépa called upon Aditi's son, fastened to three posts of wood; king Varuṇa liberated him; may the wise, whom none can infest, open the fetters.

14. We avert thy anger, O Varuṇa, by pious rites, by sacrifices *and* offerings. Attending *to this sacrifice*, O Asur, thou wise king, remove the sins, committed by us.

15. Take from us, O Varuṇa, our *three-fold* fetters, that bind the head, the waist and the feet. Then, O Aditi's son, we shall be safe without sin at the sacrifice.

* The deity of sin.

† Riksha, according to Sáyana either the constellation, called the Great Bear, or all constellations.

## Twenty-fifth Hymn.*

1. Which ever sacrifice, O God Varuna, we may spoil day by day *by heedlessness,* as men *are wont to do, do thou remove the fault and complete it.*

2. Do not, O destroyer of sin, devote us, in contempt, to destruction, nor to thy anger, O wrathful..

3. For *our* happiness we satisfy thy mind with hymns, O Varuna, as the charioteer *satisfies* his jaded horse *with food.*

4. For my thoughts, free from anger, tend to the acquiring of a life that is rich in wealth, as birds to *their* nests.

5. When shall we call hither for *our* happiness Varuna, the guardian of strength, the leader of men, whose eye is far-seeing?

6. May *Mitra and Varuna* enjoy this sacrifice which is in common to both; desiring the welfare *of the worshipper,* who performs the pious rites, they are not heedless.

7. May he who knows the path of the birds, roaming through the ether, knows the sea built ships,

8. Who, honoured by the performance of pious rites, knows the twelve months, fertile with offspring, who knows *also the month* which is born after them,

9. Who knows the course of the far moving, mighty, lovely, wind, knows the *Gods* who dwell above, *may he liberate us from our fetters.*

10. Varuna, to whom pious rites are performed, who enjoys the unblemished sacrifice, dwells among his subjects for dominion's sake.

11. The sage beholds all the wonderful *works, hitherto* performed by him (Varuna) and those *also,* which he is to perform in *future.*

12. May Aditi's son, worshipped with unblemished sacrifices, give that every day we walk a good path; may he give us a long life.

13. Varuna, wearing a golden mail-coat has protected with it his stout *body;* rays that touch the *gold,* are every where reflected.

14. Those that rejoice in injury, do not wish to injure him, nor those that rejoice in the mischief of mortals, nor those that are sinful.

15. He also satisfies men with abundance of food, *satisfies* our hunger.

16. *To him,* worthy to be beheld by many, turn my longing prayers, as cows to the stable.

* Hymn in praise of Varuna. Rishi Sunahsépa, Metre Gáyatrí.

17. We shall indeed converse again, since by me the sweet *libation* is prepared, and *since* thou, like the priest, partakest of the welcome *food.*

18. Of a truth I beheld him, worthy to be beheld by all, I beheld *his* chariot on the earth, he listened to these my praises.

19. Hear, Varuna, this my invocation, do gladden us this day, for *my* protection I pray thee.

20. Thou, O wise, swayest over all the heavens and all the earth; for *our* welfare hear *us.*

21. Save us, for the sake of our life, from the fetters of the head, of the waist, and of the feet.

## Twenty-sixth Hymn.*

1. Dress thee then, O guardian of food, who art worthy of the sacrifice, dress thee with thy clothes *of flames, and* perform this our sacrifice.

2. *O sit down,* lovely Agni, sacrificer of eternal youth, resplendent with glory, extolled by words of praise.

3. For a father gives to *his* son, a relation to *his* relation, a lovely friend to *his* friend, *do thou in like manner fulfil* our *wishes.*

4. Let the destroyers of enemies, Varuna, Mitra and Aryaman be seated on our *sacred* straw, as a man *sits at the sacrifice of the king.*

5. O ancient sacrificer, be glad by our *offering* and *our* companionship. Do thou listen well to our praises.

6. Although we daily perform ample sacrifices to other and other gods, yet to thee is offered the oblation.

7. Be our friend, O protector of man, thou lovely sacrificer, who rejoicest. May we *also,* possessors of auspicious fire, be his friends.

8. For shining *priests,* possessed of auspicious fire, hold our lovely *sacrifice;* possessed of auspicious fire, we pray to thee.

9. Then let there be mutual praises of both, *of thee,* the immortal, and of us, the mortals.

10. Agni, with all fires accepting this sacrifice and praise, bestow food on us, thou son of strength.

* Hymn in praise of Agni. Rishi and metre the same.

## Twenty-seventh Hymn.*

1. We *are ready* to praise thee with pious songs, O Agni, the sole lord of sacrifices, as *we would praise a long-tailed* horse.†

2. May the son of strength who proceeds with wide strides, *be* gracious to us; may he be a donor of riches to us.

3. O all-pervading *Agni*, near and far always protect us from mortals that are our enemies.

4. Do, O Agni, proclaim to the gods this our sacrifice and this new hymn.

5. Let us enjoy the food of the highest and of the middle places (of the heaven and the atmosphere,) give *us* the wealth of the nearest *earth.*

6. O thou of various splendour, thou dividest *wealth*, as the waves of a river near *the banks divide themselves.* Thou givest forthwith rain to the worshipper.

7. The mortal, whom thou defendest in battle, whom thou encouragest to the field, can always bestow food.

8. O destroyer, there is no conqueror of the sacrificer, *who trusts in thee*, his power is renowned.

9. Worshipped by all mortals, may he finish the battle with the horses; called by sages, may he be a donor.

10. O thou, known by praise, attend this sacrifice for the accomplishment of the rites which every man has to perform. *The sacrificer* offers thee, the terrible, worthy praise.

11. May for the sake of the pious rite *and* the food, the great infinite Agni whose standard is smoke, whose lustre is great, favour us.

12. May the radiant Agni, the divine messenger, hear us *who approach him* with praises, as a wealthy king *hears the praises of his bards.*

13. Adoration *be* to the great *gods*, adoration to the lesser, adoration to the youths, adoration to the old. We sacrifice to the gods, while we are able; ye gods, may I not interrupt the praise of any god that is great.

* Hymn in praise of Agni from v. 1 to 12 of the Viswa Dévas V. 13. The same Rishi Tristubh metre.

† The meaning is as a long-tailed horse drives easily away flies, so thou drivest away with the fire thy foes.

## Twenty-eighth Hymn.*

1. Where the wide-based stone is raised for the preparing of the libation, there, O Indra, knowest thou the *taste* of the liquid, prepared by the mortar, and drinkest.

2. Where like two hips, the sacrificial vessels are expanded, there, &c.

3. Where the housewife knows the egress and the entrance (of the house,) there, &c.

4. Where they apply the wood *to light fire by friction*, as reins are applied to tame a horse, there, &c.

5. Although thou, O mortar, art used for every work in every house, here emit a mighty *sound* as the drums of the conquerors.

6. And before thee, O wood, a strong wind is raised *by the blows of the pestle*, therefore, O mortar, prepare the moonplant juice for the drinking of Indra.

7. *You mortar and pestle*, may ye that perform the sacrifice and give abundant food, again emit a clear sound like the golden coloured horses *of Indra* that eat their food.

8. May ye two pieces of excellent wood, together with the excellent *priests*, offering the libation, prepare the sweet *sacrifice* for Indra.

9. What of the sacrifice remains, carry away in vessels, place the libation in vessels of *Kusa*, keep it in the skin of the cow.

## Twenty-ninth Hymn.†

1. Although we are, as it were, without renown, O truthful drinker of the moonplant juice, yet speedily render thou us renowned, O wealthy Indra, by the gift of cows and of a thousand horses.

2. O god of the majestic nose, mighty lord of food, thy power *is manifest every where*. Speedily, &c.

3. Let fall asleep Yama's two *messengers* that are seen together. Let them unawakened sleep. Speedily, &c.

* Hymn in praise of Indra, (v. 1 to 4) of the mortar used for preparing the sacrifice, (v. 5—6) of the mortar and pestle, (v. 1 to 8,) and lastly of the God Harichandra, or of the skin used for the libation, or of the libation itself. The same Rishi. Metre Anustubh (1 to 6,) Gáyatri (7 to 9.)

† Hymn in praise of Indra. The same Rishi, Metre Pankti.

4. Let sleep those *our foes*, not offering gifts, let our friends, offering gifts, be awake. Speedily, &c.

5. Slay, O Indra, the ass praising thee with that vicious voice. Speedily, &c.

6. Let the storm in its tortuous path fall afar on the forest. Speedily, &c.

7. Kill every slanderer, slay the cruel *enemy*. Speedily, &c.

## Thirtieth Hymn.*

1. In desire of food we sprinkle with *our* libation, like a well, your Indra, the powerful Satakratu,

2. Who *like water, running* into a valley, approaches a hundred, nay a thousand, of purified well prepared libations.

3. For the pleasure of the mighty Indra, do *the libations* approach *him*, he holds them all in his belly, like the sea the *water*.

4. This *libation* also *is ready* for thee, do thou attend to it like the pigeon to his pregnant *mate*, thou hast also accepted of this our praise.

5. Guardain of wealth, praised in songs, O hero, mayest thou, whose praise is *proclaimed by us*, be gracious to *us* with thy might.

6. Assist us, O Satakratu, with thy help in this fight. In other things *also*, thou and I, meet in converse.

7. We, the friends of Indra, invoke in every rite, in every fight the help of the mightiest Indra.

8. If he hears our invocation, he will indeed approach us with a thousand helps and with food.

9. In sight of the ancient house (the heaven,) I invoke the man who goes to many *sacrificers*, thee, whom of old *my* father invoked.

10. We implore thee, beloved by all, called by many, thee, O friend, who vouchsafest a home, to *grant thy favour* to those who praise thee.

11. Bestow, drinker of the juice, on us, the drinkers of the juice, thy friends, *abundant cows* with wide jaws, *bestow them*, O friend, wielder of the thunderbolt.

12. Let thus it be, O drinker of the juice, friend, armed with the

* Hymn in praise of Indra, (v. 1 to 8,) of the Aswins, (v. 17 to 19,) of the dawn (v. 20 to 22,) the same Rishi. Metre Gáyatri (v. 1 to 15 and 17 to 22,) v. 16 Tristubh.

thunderbolt, do thou thus act that we wish *thy favour* for the sake of *our* desire.

13. When Indra rejoices with *us*, let us, possessed of food, have *cows* that give abundant milk, that are strong, in which we rejoice.

14. Let *another god*, like thee, O powerful, by thy *grace* obtained, implored by the praising *priests*, bring *us* the fulfilment of our wishes, as a wheel is brought to the chariot.

15. What wealth is desirable, do thou, O Satakratu, be pleased to bring it for those who praise *thee*, as a wheel *is brought* by the labour *of the artisan.*

16. Always conquered Indra with his foaming, neighing, panting horses, the wealth *of foes.* Through *our* worship he has given the golden chariot, *he has given* us gifts for *our* enjoyment.

17. O Aswins, come with food, bestowed *by you*, that renders us rich in horses. May, *by your favour*, O donors, *our house* be rich in cows, be rich in gold.

18. For your immortal chariot *to which the horses are* yoked for both of you, proceeds, ye donors, through the atmosphere.

19. You rested one wheel of your chariot on the summit of the immoveable *mountain*, the other rolls through the heavens.

20. Which mortal is now thy delight, O immortal dawn, who lovest praise? Whom doest thou approach, mighty goddess?

21. We indeed, do not know from nigh or from afar thy shape, O many-coloured, radiant, all-pervading *dawn.*

22. Approach thou, O daughter of Heaven, with this food; bestow wealth upon us.

## Thirty-first Hymn.*

1. Thou, Agni, *wast* first the Rishi Angiras, then thou becamest a god, the lovely companion of the gods. The wise Maruts, in shining armour clad, who know the sacred rites, were born at thy sacrifice.

2. Thou, O Agni, first the sage Angiras, adorn at the ceremonies of the gods, thou who, for the favour of all the worlds, art every where spread, thou wise, from two parents born, who for the sake of man dwellest at every place.

* Hymn in praise of Agni; Rishi Hiranyastúpa, the son of Angiras. Metre Tristubh, (v. 1 to 7; 9 to 15 and 17,) Yayatí, (v. 8, 16 and 18.)

3. Thou, O Agni, prior than the wind, be manifest to *the sacrificer*, who, desirous of propitious rites, adores thee. *Seeing thy might*, heaven and earth shook; thou broughtest the sacred utensils to the sacrifice for which the priest is elected; thou, O guardian of the house, didst manifest the great gods.

4. Thou, O Agni, hast opened the heaven to Manu; to Pururavasa who performed pious rites, wast thou a great benefactor. When thou, by friction art emitted from thy parents, then they carry thee to the east, and again to the west.

5. Thou, O Agni, the donor of gifts, the increaser of wealth, art worthy to be praised *by the sacrificer* who raises the vessel, who knows well the invocation and the ceremonial prayers. Thou, O Agni, who suppliest food, doest protect man.

6. Thou, O Agni, makest that a man walking in the path of vice, is leading a worthy life, thou O Sage, who, when the battle, so welcome to heroes, is near, with a few killest many.

7. Thou, O Agni, for the sake of food keepest that man in an immortal state from day to day who is anxious *to obtain* the twofold kind of *living wealth* (man and cattle.) To such a sage thou givest happiness and food.

8. Thou, O Agni, worthy of praise, render for the sake of my wealth, render *my son a renowned* performer of pious rites. Let us increase by a new son, given *by thee*, the *sacred* rites. Ye heaven and earth, with the other gods, do protect us.

9. Thou blameless Agni, dwelling near the parents (heaven and earth) who a god, under the gods, art watching, do thou, creating the bodies *of our children*, attend to us; be gracious to the performer of rites; thou, O wealthy, bestowest all riches.

10. Thou, O Agni, art gracious; thou art a father *to us*, thou a preserver of our life; we are thy family, O thou whom nought can injure, to thee, surrounded by heroes, the preserver of the ceremonies, flow riches, a hundredfold, nay, a thousandfold.

11. The gods at first made thee, O Agni, when thou livedst in human shape, the general of the man Nahusha. They made Ila, the *daughter* of Manu, his teacher, when the son of my father was born.

12. Thou, O praiseworthy god Agni, with thy help protect us, the wealthy, and the life *of our sons*. Do watch over the cows of the son of my son; *for* he always watches over thy rites.

13. Thou, O Agni, the ready guardian of the untiring sacrificer, burnest with four eyes. Thou indeed art longing in thy mind for the hymn of the praising *priest* who offers the sacred butter to thee, who doest no harm, who doest protect.

14. Thou, O Agni, wishest for the praiseworthy sacrificer excellent wealth, that is desirable. Thou intent to protect the weak sacrificer, art called a father; thou, O wise, watch over the infant and the heavenly quarters.

15. Thou, O Agni, as an unpierceable breast-plate protects *the warrior*, guardest every where the man who gives to the priest the due reward; he who with sweet food delighting the *guest* in his home offers the victim, is alike heaven.

16. Forgive us, O Agni, this deviation from the rite and this path which we walk far from thy worship; for thou, to be obtained as a providing father, settest aright *the ceremonies* of the sacrificer manifesting *thyself*.

17. Like a man, O Agni, like Angiras, O Angiras, like Yayáti, like men of old, come hither *to the sacrifice*, bring the divine host; let them sit on the sacred straw, and offer the welcome *sacrifice*.

18. Do thou, O Agni, increase with this prayer, which we offered thee according to *our* power and our wisdom; do thou guide us to greater wealth, and confer on us provident wisdom, that bestows food.

## Thirty-second Hymn.*

1. I shall now proclaim the mighty deeds which Indra, armed with the thunderbolt, performed of old. *First* he slew Ahi (the cloud), then he poured out the waters, divided the torrents of the mountains.

2. He slew Ahi, who took refuge to the mountain. Tashtri made him the praiseworthy thunderbolt; as cows to their calves, *so* the rivers hurried to the sea.

3. Indra, going forth as the bull, desired the libation; he drank at the three sacrificers the ready juice. Maghavan, seizing *his* weapon, the thunderbolt, struck the first-born of the clouds.

4. When thou, O Indra, didst strike the first-born of the clouds, then didst thou indeed destroy the delusions of the deluders (the Asurs),

* Hymn in praise of Indra; the same Rishi; metre Tristubh.

then producing the sun, the sky and the dawn, didst thou in truth not discover *any* more a foe.

5. Indra struck with his thunderbolt Vrittra, veiled in night, with mighty blow shattering his shoulders, as trees are felled by the axe; down to the earth was Ahi thrown.

6. Vrittra, like *a warrior* whom none equals, with wicked joy called out *Indra*, the mighty hero, who slays many, the destroyer of foes; he did not escape to be counted with the number of his slain. Indra's foe raised the rivers *by his fall.*

7. Without hands and feet he provoked to battle Indra, who dashed *his* thunderbolt on *Vrittra's* neck; Vrittra, like a eunuch aping a man, was stretched with mangled members *to the ground.*

8. The waters gladdening the heart of man, rush over him, as he lies there stretched, as over the broken banks of a river. Ahi lies stretched at the feet of the waters, which Vrittra by his vastness held embraced.

9. The mother of Vrittra was lying athwart (to protect her son) above her struck Indra *his* fatal weapon. Above was the parent, underneath the son, Dana (the mother) slept the sleep of death, as with the calf *sleeps* the cow.

10. The waters rush over Vrittra's headless body, thrown in the midst of the restless, never-ceasing waves; the foe of Indra sleeps the profound darkness *of death.*

11. The waters, whose husband was the oppressor, whose guardian was Ahi, were held refrained, as the cows by Pani. Having slain Vrittra, Indra brust open the cavern of the waters that was locked up.

12. Thou wast like the horse's tail (which easily drives off flies) O Indra, when that one god *without equal* attacked thee with his weapon, thou didst seize the cows, seize, O hero, the libation, thou gavest leave to the seven rivers to run *their course.*

13. Not the lightning, made against Indra, not the thunder, not the rain and lightning, which Vrittra brought forth, kept Indra back, when Indra and Ahi fought. Maghavan, although attacked *with other delusions,* was victorious.

14. If fear approached thy heart, after thou hadst slain Ahi, whom sawest thou else as the slayer of Ahi, for like the terrified falcon thou crossedst over nine and ninety rivers.

15. Indra the king of the moveable and immoveable, and of the tamed horn-headed *cattle*, Indra the thunderbolt in his hands, dwells in heaven as the king of men; like the wheel the spokes, so embraces Indra that all.

ॐ तत्सत् ॐ ।

# ऋग्वेदप्रथमाध्यायानुक्रमणिका ।

श्रीगणेशाय नमः ॥ ॐ ॥ अग्निं नवमधुच्छन्दावैश्वामित्रो, वायोवायव्यै, न्द्रवायवमैत्रावरुणास्तृचा, अश्विनाद्वादशा, श्विनैन्द्रवैश्वदेवसारस्वतास्तृचाः,सप्तताः प्रउगदेवताः, सुरूपकृत्नुं दशैन्द्र, मातुयुंजंत्यादहेत्येताः, षण्मारुत्यो वीलुचिदिन्द्रेणे, त्यैन्द्र्यौचेन्द्रमिदेन्द्रसानसिमिं, द्रेहि गायन्ति द्वादशानुष्टुभन्त्विन्द्रमष्टौ, जेतामाधुच्छन्दसो, ऽग्निं द्वादशमेधातिथिःकाण्व, आग्नेयमग्निनेति, पादोद्यग्निदैवतो, निर्म्मंथ्या आहवनीयश्च, सुसमिद्धइतीध्मः समिद्धोवाग्नि, स्तनूनपा न्नराशंस इलोवर्हि, र्देवीर्द्वारउषासानक्ता, दैव्यौ होतारौ प्रचेतसौ ,तिस्रोदेव्यः सरस्वतीलाभारत्य, स्त्वष्टावनस्पतिः स्वाहाकृतय इति, प्रत्यृचंदेवता, एतदाप्रीसूक्त, मेतेनान्यान्युक्तदेवता, न्येकादशकानि, त्वनाराशंसान्याप्रशब्दोक्तानि, त्वतनूनपांत्यैभिर्वैश्वदेव, मिन्द्रसोममृतव्यं, तत्रैन्द्रीमारुती, त्वाष्ट्र्याग्नेय्यैन्द्रीमैत्रावरुणी, चतस्रोद्रविणोदस, आश्विन्याग्नेय्यृतुदेवताः, सर्वत्रात्वानवेन्द्रावरुणयोरैन्द्रावरुणं, युवाकुपादनिघृता, विन्द्रोह्रसीयसीवा, सोमानमिति पञ्चब्राह्मणस्पत्य, श्चतुर्थ्यामिन्द्रश्च सोमश्च, पञ्चम्यां दक्षिणाचान्याः, सादशस्पत्यानाराशंसीवान्त्या, प्रतित्यमाग्निमारुतं ॥ हरिः ॐ ॥

# ॐ नमः परमात्मने ॥

श्रीगणेशाय नमः ॥ वागीशाद्याः सुमनसः सर्व्वार्थानामुपक्रमे। यं नत्वा कृतकृत्याः स्युस्तं नमामि गजाननं ॥ १ ॥ यस्य निश्वसितं वेदा, यो वेदेभ्योऽखिलं जगत्। निर्म्ममे तमहं वन्दे विद्यातीर्थमहेश्वरं ॥ २ ॥ यत् कटाक्षेण तद्रूपं दधदुक्तमहीपतिः। आदिशन्माधवाचार्यं वेदार्थस्य प्रकाशने ॥ ३ ॥ ये पूर्वोत्तरमीमांसे, ते व्याख्यातिसंग्रहात्। कृपालुर्माधवाचार्यो वेदार्थं वक्तुमुद्यतः ॥ ४ ॥ आध्वर्यवस्य यज्ञेषु प्राधान्याद्याज्ञतः पुरा। यजुर्व्वेदोऽय हौत्रार्थमृग्वेदो व्याकरिष्यते ॥ ५ ॥ एतस्मिन् प्रथमोऽध्यायः श्रोतव्यः सम्प्रदायतः। व्युत्पन्नस्तावता सर्वं बोद्धुं शक्नोति बुद्धिमान् ॥ ६ ॥

अत्र केचिदाहुः, ऋग्वेदस्य प्राथम्येन सर्व्वत्राम्नातत्वात्, अभ्यर्हितं पूर्वमिति न्यायेनाभ्यर्हितत्वात्तद्व्याख्यानमादौ युक्तं, प्राथम्यञ्च पुरुषसूक्ते विस्पष्टं, तस्माद्यज्ञात् सर्वज्ञतऋचः सामानि जज्ञिरे। छन्दांसि जज्ञिरे तस्माद्यजुस्तस्मादजायतेति। सहस्रशीर्षापुरुष इत्युक्तत्वात्। परमेश्वरात्, यज्ञात् यजनीयात् पूजनीयात्, सर्वज्ञतः सर्वैर्ह्रियमानात्। यद्यपि इन्द्रादयस्तत्रतत्र ह्रियन्ते, तथापि परमेश्वरस्यैवेन्द्रादिरूपेणावस्थानादविरोधः। तथाच मन्त्रवर्णः, इन्द्रं मित्रं वरुणमग्निमाहुरथो दिव्यः ससुपर्णो गरुत्मान्। एकं सद्विप्रा बहुधा वदन्ति अग्निं यमं मातरिश्वानमाहुरिति ॥

वाजसनेयिनश्चामनन्ति, तद्यदिदमाहुरमुं यजामुं यजेत्येकैकं देवमेतस्यैव सादिविस्तृष्टिरेष उ ह्येव सर्वे देवा इति; तस्मात् सर्वैरपि परमेश्वर एव ह्रियते। न केवलमृचां पाठप्राथम्येनाभ्यर्हितत्वं, किन्तु यज्ञाङ्गदार्ढ्ये हेतुत्वादपि। तथाच तैत्तिरीया आमनन्ति * यद्वै यज्ञस्य साम्ना यजुषा क्रियते श्रिथिलं तत् यदृचा तद्दृढमिति, तथा सर्वे, वेदगतानि ब्राह्मणानि स्वाभिहितेऽर्थे विश्वासदार्ढ्याय तदेतदृचाभ्युक्तमित्यृचमेवोदाहरन्ति। मन्त्रकाण्डेष्वपि यजुर्वेदगतेषु तत्रतत्राध्वर्युणा प्रयोज्या ऋचो

---

* यद्यपि कां, सं।

बहव आम्नाताः, साम्नान्तु सर्व्वेषामृगाश्रितत्वं प्रसिद्धं। आथर्वणिकैरपि स्वकीयसंहितायामृच एव बाहुल्येनाधीयन्ते, अतोऽन्यैः सर्वै र्वेदैरादृतत्वादभ्यर्हितत्वं प्रसिद्धं। छन्दोगास्तु प्राथम्येन सनत्कुमारं प्रति नारदवाक्यमेवमामनन्ति, ऋग्वेदं भगवोऽध्येमि यजुर्वेदं सामवेदमाथर्वणञ्चेति। मुण्डकोपनिषद्यप्येवमेवाम्नायते, यत् ऋग्वेदो यजुर्वेदः सामवेदोऽथर्ववेद इति। तापनीयोपनिषद्यपि मन्त्रराजपादेषु क्रमेणाध्ययनमेवमामनन्ति, ऋग्यजुःसामाथर्वाणश्चत्वारो वेदाः साङ्गाः सशाखाश्चत्वारःपादा भवन्तीति, एवं सर्व्वत्रोदाहरणीयं, तस्मादृग्वेदस्याभ्यर्हितस्यादौ व्याख्यानमुचितमिति तान् प्रत्येतदुच्यते। अस्त्वेव सर्ववेदाध्ययनतत्पारायणब्रह्मयज्ञजपादौ ऋग्वेदस्यैव प्राथम्यं, अर्थज्ञानस्य तु यज्ञानुष्ठानार्थत्वात् तत्र यजुर्व्वेदस्यैव प्रधानत्वात्तद्व्याख्यानमेवादौ युक्तं तत्प्राधान्यञ्च काचिदृगेवाह, ऋचान्त्वः पोषमास्ते पुपुष्वान् गायत्रं त्वो गायति शक्वरीषु ब्रह्मा त्वो वदति जातविद्यां यज्ञस्य मात्रां विमिमीत उ त्व इति। एतस्या ऋचस्तात्पर्य्यं निरुक्तकारो यास्कः सङ्क्षिप्य दर्शयति इत्यृत्विक् कर्म्मणां विनियोगमाचष्ट इति, पुनरपि सएव प्रथमं पादं विवृणोति, ऋचामेकः पोषमास्ते पुपुष्वान् होतर्गर्चतीति,। अस्यायमर्थः त्वशब्द एकपर्य्यायो होतृविशेषणं, होतृनामक एक ऋत्विग् यज्ञकाले स्वकीयवेदगतानामृचां पुष्टिं कुर्व्वन्नास्ते, भिन्नप्रदेशेष्वाम्नातानां ऋचां * संघातमेकत्र सम्पाद्यैतावदिदं शास्त्रमिति † पुष्टिं करोति, सेयं पुष्टिः अर्च्यतीत्यमुमर्थमृक्शब्दआचष्टे। अर्च्यते प्रशस्यतेऽनया देवविशेषः क्रियाविशेष स्तत्साधनविशेषो वेत्यृक्शब्दव्युत्पत्तिरिति। अथ द्वितीयपादं विवृणोति, गायत्रमेको गायति शक्वरीषूद्गाता, गायत्रं गायतेः स्तुतिकर्म्मणः शक्वर्य्याऋचः शक्नोते स्तद्यदाभिर्वृत्रमशकद्धन्तुं तच्छक्वरीणां शक्वरीत्वमिति विज्ञायत इति। अस्यायमर्थः। उद्गातृनामक एक ऋत्विक् गायत्रशब्दाभिधेयं साम शक्वर्य इति शब्दाभिधेयास्वृक्षु गायति, धातूनामनेकार्थत्वेन स्तुतिक्रियावाचिनो गायतिधातोरुत्पन्नो गायत्रशब्दः। शक्वरीशब्दस्तु शक्नोतिधातोरुत्पन्नः। वृत्रं शत्रुं हन्तुं शक्नोत्याभिर्ऋग्भिरित्येषा व्युत्पत्तिः कस्मिंश्चिद्ब्राह्मणे विज्ञायत इति। अथ तृतीयपादं विवृणोति, ब्रह्मैको जाते जाते विद्यां वदति ब्रह्मा सर्वविदिति सर्वं वेदितुमर्ह-

---

* संघं कां सं। † क्लृप्तिं कां सं।

तीति। अस्यार्थः ब्रह्मा नामैक ऋत्विक् जाते जाते तदा तदोत्पन्ने यज्ञे प्रस्तुते प्रणवनादिकर्म्मणि विद्यामनुज्ञां वदति, ब्रह्मन्नपः प्रणेष्यामीत्येवं सम्बोधितः सन् ओं प्रणयेत्यनुजानाति, सच ब्रह्मा वेदत्रयोक्तसर्वकर्म्माभिज्ञः, तस्माद्योग्यतां दृष्ट्वा तत्तदनुज्ञातुं सति प्रमादे समाधातुञ्च समर्थ इति तत्त्वं। तच्च सामर्थ्यञ्छन्दोगा आमनन्ति, एषएव यज्ञस्तस्य मनश्च वाक्च वर्त्तनी, तयोरन्यतरां मनसा संस्करोति ब्रह्मा, वाचा होताध्वर्युरुद्गातान्यतरामिति, छत्स्नो यज्ञः प्रमादराहित्याय मनसा सम्यगनुसन्धेयः, वाचा च वेदत्रयोक्तमन्त्राः पठनीयाः; तत्र होत्रादयस्त्रयो मिलित्वा वाङ्मयं यज्ञमार्गं संस्कुर्वन्ति। ब्रह्मा त्वेकएव मनोरूपं यज्ञमार्गं छत्स्नमपि संस्करोति, तस्मादस्यास्ति सामर्थ्यमिति। अथ चतुर्थपादं विवृणोति, यज्ञस्य मात्रां विमिमीते, एकोऽध्वर्युरध्वर्युरध्वरं युनक्ति अध्वरस्य नेतेति। अस्यायमर्थः अध्वर्युनामक एव ऋत्विक् यज्ञस्य मात्रां स्वरूपं विमिमीते विशेषेण निष्पादयति; मीयते निर्म्मीयत इति मात्रां स्वरूपं तन्निष्पादकत्वञ्चाध्वर्य्योर्नामनिर्व्वचनादवगम्यते। अध्वर्युरित्यत्र छान्दस्या प्रक्रियया लुप्तमकारं पुनः प्रक्षिप्याध्वर्युरितिनाम सम्पादनीयं। अध्वरं युनक्तीत्यवयवार्थः, अध्वरस्य नेतेति तात्पर्य्यार्थ इति

एतदेवाभिप्रेत्याध्वर्युर्वेदस्य यागनिष्पादकद्योतकं निर्व्वचनं यास्को दर्शयति, मन्त्रामननात् छन्दांसि छादनात्, स्तोमः स्तवनात्, यजुर्यजनादिति, एवं सति अध्वर्युसम्बन्धियजुर्वेदनिष्पन्नं यज्ञशरीरमुपजीव्य तदपेक्षितौ स्तोत्रशस्त्ररूपावयवौ इतरेण वेदद्वयेन पूर्य्यत इत्युपजीव्यस्य यजुर्वेदस्य प्रथमतो व्याख्यानं युक्तं, तत ऊर्द्धं साम्नामृगाश्रितत्वादुभयोर्मध्ये प्रथममृग्व्याख्यानं युक्तमित्यृग्वेद इदानीं व्याख्यायते। ननु वेद एव तावन्नास्ति कुतस्तदवान्तरविशेषात् ऋग्वेदस्तथाहि कोऽयं वेदो नाम नहि तत्र लक्षणं प्रमाणं वास्ति, नच तदुभयव्यतिरेकेण किञ्चिदस्तु सिध्यति, लक्षणप्रमाणाभ्यां हि वस्तुसिद्धिरिति न्यायविदां मतं। तत्र प्रत्यक्षानुमानागमेषु प्रमाणविशेषेष्वन्तिमो वेद इति तल्लक्षणमिति चेन्न, मन्वादिस्मृतिष्वतिव्याप्तेः। समयसंज्ञासंज्ञिसङ्केतसमयबलेन सम्यक्परोक्षानुभवसाधनमित्येतस्यागमलक्षणस्य तास्वपि सद्भावात्, अपौरुषेयत्वे सतीतिविशेषणादोष इतिचेत्, न, वेदस्यापि परमेश्वरनिर्म्मितत्वेन पौरुषेयत्वात्। शरीरधारिनिर्म्मितत्वाभावादपौरुषेयत्वमितिचेत्, न, सहस्रशीर्षा पुरुष इत्यादिश्रुतिभिः

परमेश्वरस्य शरीरित्वात् कर्म्मफलरूपशरीरधारिजीवनिर्म्मितत्वाभाव-मात्रेण पौरुषेयत्वं विवक्षितमिति चेत्, न, जीवविशेषैरग्निवाय्वा-दित्यैर्वेदानामुत्पादितत्वात् ऋग्वेद एवाग्नेरजायत, यजुर्वेदो वायोः, सामवेद आदित्यादिति श्रुतेः ईश्वरस्याग्न्यादिप्रेरकत्वेन निर्म्माटत्वं द्रष्टव्यं। मन्त्रब्राह्मणात्मकः शब्दराशिर्वेद इतिचेत्, न, ईदृशो मन्त्र ईदृशं ब्राह्मणमित्यनयोरद्याप्यनिर्णीतत्वात्, तस्मान्नास्ति किञ्चिद्वेदस्य लक्षणं, नापि तत्सद्भावे प्रमाणं पश्यामः। ऋग्वेदं भगवोऽध्येमि, यजुर्वेदं, सामवेदमाथर्व्वणञ्चतुर्थमित्यादिवाक्यं प्रमाणमितिचेत्, न, तस्यापि वाक्यस्य वेदान्तःपातित्वेनात्माश्रयत्वप्रसङ्गात्, न खलु निपुणो-ऽपि स्वस्कन्धमारोढुं प्रभवेदिति। वेद एव द्विजातीनां निःश्रेयसकरः परः इत्यादि स्मृतिवाक्यं प्रमाणमितिचेत्, न, तस्याप्युक्तश्रुतिमूलकत्वेन निराकृतत्वात्. प्रत्यक्षादिकं शङ्कितुमप्ययोग्यं, वेदविषया लोकप्रसिद्धिः सार्व्वजनीनापि नीलनभ इत्यादिवद्भ्रान्ता, तस्माल्लक्षणप्रमाणरहि-तस्य वेदस्य सद्भावो नाङ्गीकर्त्तुं शक्यत इति पूर्वपक्षः। अत्रोच्यते, मन्त्र-ब्राह्मणात्मकत्वं तावद्दुष्टं लक्षणं, अतएवायस्तम्बो यज्ञपरिभाषायामे-वाह, मन्त्रब्राह्मणयोर्वेदनामधेयमिति, तयोस्तु स्वरूपमुपरिष्टान्निर्णेष्यते। अपौरुषेयवाक्यत्वमितीदमपि यादृशमस्माभि र्विवक्षितं, तादृशमुत्तरत्र स्पष्टीभविष्यति। प्रमाणान्यपि यथोक्तानि श्रुतिस्मृ त लोकप्रसिद्धिरूपाणि वेदसद्भावे द्रष्टव्यानि। यथा घटपटादिद्रव्याणां स्वप्रकाशत्वाभावेऽपि सूर्य्यचन्द्रादीनां स्वप्रकाशत्वमविरुद्धं, तथा मनु-ष्यादीनां स्वस्कन्धारोहासम्भवेऽप्यकुण्ठितशक्तेर्वेदस्येतरवस्तुप्रतिपाद-कत्ववत् स्वप्रतिपादकत्वमप्यस्तु। अतएव सम्प्रदायविदोऽकुण्ठितां-शक्तिं वेदस्य दर्शयन्ति, चोदना हि भूतं भवन्तं भविष्यन्तं सूक्ष्मं व्यव-हितं विप्रकृष्टमित्येवं विजातीयकमर्थं शक्नोत्यवगमयितुमिति; तथा सति वेदमूलायाः स्मृतेस्तदुभयमूलाया लोकप्रसिद्धेश्च प्रामाण्यं दुर्व्वारं, तस्माल्लक्षणप्रमाणसिद्धो वेदो न केनापि चार्व्वाकादिनापोढुं शक्यत इति स्थितं। नन्वस्तु नाम वेदाख्यः कश्चित् पदार्थस्तथापि वासौ व्याख्येय * इति, अप्रमाणत्वेनानुपयुक्तत्वात्। नहि वेदःप्रमाणं तल्लक्ष-णस्य तत्र दुःसम्पादत्वात्, तथाहि सम्यगनुभवसाधनं प्रमाणमिति केचिल्लक्षणमाहुः। अपरे त्वनधिगतार्थगतं प्रमाणमित्याचक्षते। नचै-

* व्याख्यानमर्हतीतिपाठः। (का सं)।

तदुभयं वेदे सम्भवति, मन्त्रब्राह्मणात्मको हि वेदः। तत्र मन्त्राः केचिदबोधकाः, अम्यक्सात इन्द्रऋष्टिरित्येको मन्त्रः। यादृश्मिन्धयितमपस्ययाविददित्यन्यः। शृण्वेव जर्भरी तुर्फरीतू इत्यपरः। आयान्तमन्यस्तृपुलप्रभुर्मेत्यादय उदाहार्य्याः। नह्येतैर्मन्त्रैः कश्चिदप्यर्थोऽवबुध्यते। एतेष्वनुभव एव यदा नास्ति, तदा तत्साम्यक्त्वं तदीयसाधनत्वञ्च दुरापेतं, अधःस्विदासीदुपरिस्विदासीदिति मन्त्रस्य बोधकत्वेऽपि, स्थाणुर्वा पुरुषो वेत्यादिवाक्यवत् * सन्देहबोधकत्वान्नास्ति प्रामाण्यं। ओषधे त्रायस्वैनमिति मन्त्रो दर्भविषयः। स्वधिते मैनं हिंसीरिति क्षुरविषयः। शृणोत ग्रावाण इति पाषाणविषयः। एतेष्वचेतनानां दर्भक्षुरपाषाणानां चेतनवत् सम्बोधनं श्रूयते। ततो द्वौ चन्द्रमसाविति वाक्यवद्विपरीतार्थबोधकत्वादप्रामाण्यं। एक एव रुद्रो न द्वितीयोऽवतस्थे, सहस्राणि सहस्रशो ये रुद्रा अधिभूम्यामित्यनयोस्तु मन्त्रयोर्यावज्जीवमहं मौनीतिवाक्यवद्व्याघातबोधकत्वादप्रामाण्यं। आप उन्दन्त्विति मन्त्रो यजमानस्य क्षौरकाले जलेन शिरसः क्लेदनं *श्रूयते। शुभिके शिर आरोह शोभयन्ती मुखं ममेति मन्त्रोविवाहकाले मङ्गलाचरणार्थं पुष्पनिर्म्मितायाः शुभिकाया वरवध्वोः शिरस्यवस्थानं ब्रूते, तयोश्च मन्त्रयोर्लोकप्रसिद्धार्थानुवादित्वादनधिगतार्थगन्तृत्वं नास्ति, तस्मान्मन्त्रभागो न प्रमाणं। अत्रोच्यते, अम्यगादिमन्त्राणामर्थो यास्केन निरुक्तग्रन्थेऽवबोधितः, तत्परिचयरहितानामनवबोधो न मन्त्राणां दोषमावहति। अतएवात्रलोकन्यायमुदाहरन्ति, नैष स्थाणोरपराधो † येनैनमन्धः पश्यति, पुरुषापराधः सम्भवतीति। अधःस्विदासीदित्यादिमन्त्रश्च न सन्देहप्रबोधनाय प्रवृत्तः किन्तर्हि जगत्कारणस्य परवस्तुनोऽतिगम्भीरत्वं निश्चेतुमेव प्रवृत्तः, तदर्थमेव हि गुरुशास्त्रसम्प्रदायरहितैर्दुर्बोधकत्वमधःस्विदित्यनयावचोभङ्ग्योपन्यस्यति। सएवाभिप्राय उपरितनेषु को अद्धा वेदेत्यादिमन्त्रेषु स्पष्टीकृतः, ओषध्यादिमन्त्रेष्वपि चेतना एव तत्तदभिमानिदेवतास्तेनतेननाम्ना सम्बोध्यन्ते। ताश्च देवता भगवता वादरायणेन अभिमानिव्यपदेशस्त्विति सूत्रे सूत्रिताः। एकस्यापि रुद्रस्य स्वमहिम्ना सहस्रमूर्त्तिस्वीकारान्नास्ति परस्परव्याघातः। जलादिद्रव्येण शिरःक्लेदनादेर्लोकसिद्धत्वेऽपि तदभिमानिदेवतानुग्रह-

---

* संन्दिग्धार्थ इति का-सं-प-पाठः। † यदेनमन्धः इति का-सं-पाठः।

* ब्रूते इति का-सं-पाठः।

स्याप्रसिद्धत्वात्तद्बोधकत्वेनाज्ञातार्थज्ञापकत्वं, ततो लक्षणसम्भवादस्ति मन्त्रभागस्य प्रामाण्यं। एतदेवाभिप्रेत्य भगवान् जैमिनिर्मन्त्राधिकरणे मन्त्राणां विवक्षितार्थमसूचयत्। तानि च सूत्राणि क्रमेणोदाहृत्य व्याख्यास्यामः, तत्र पूर्वपक्षं सूचयति, तदर्थशास्त्रादिति। यस्यार्थस्याभिधाने समर्थो मन्त्रः सएवाभिधेयो यस्य शास्त्रस्य ब्राह्मणवाक्यस्य तदिदं वाक्यं तदर्थशास्त्रं तस्माच्छास्त्रादविवक्षितार्थो मन्त्र इत्यवगम्यते, तथाहि उरुप्रथस्वेतिमन्त्रेण पुरोडाशप्रथनमभिधीयते, पुरोडाशःप्रथयतीति ब्राह्मणेनापि तदेवाभिधीयते,तथा सति मन्त्रेणैव प्रतीतत्वात् तदर्थबोधनाय प्रवृत्तं ब्राह्मणमनर्थकं स्यात्, मन्त्रस्याविवक्षितार्थत्वे तु विनियोगबोधनाय ब्राह्मणमुपयुक्तं. तस्मान्मन्त्रा उच्चारणेनैवानुष्ठान उपकुर्वन्ति। ननूच्चारणार्थत्वे सत्यदृष्टप्रयोजनं परिकल्पेत, अर्थाभिधायकत्वे तु दृष्टं लभ्यते, तस्माद्ब्राह्मणस्यानुपयुक्तत्वमभ्युपेत्यापि मन्त्रस्याभिधानार्थत्वमेवेत्याशङ्क्य, उत्तरं सूचयति, वाक्यनियमादिति। अग्निर्मूर्द्धादिवः ककुदित्येवमेव वाक्यं पठितव्यमिति मन्त्रे नियम उपलभ्यते, अर्थप्रत्यायनन्तु मूर्द्धाग्निरित्येवं व्युत्क्रमपाठेऽपि भवत्येव, तस्मान्नियतपाठक्रमं साफल्यायोच्चारणमेव प्रयोजनं। ननु पाठक्रमनियममात्रस्यादृष्टार्थत्वेऽपि मन्त्रपाठोऽर्थबोधार्थ एवेत्याशङ्क्य तत्र दोषान्तरं सूचयति, बुद्धशास्त्रादिति। अग्नीदग्नीन् प्रणयेति प्रैषमन्त्रः प्रयोगकाले पठ्यते, तच्चाग्निन्नग्निविहरणाद्याग्नीध्रेणाध्ययनकाल एव स्वकर्त्तव्यत्वेन बुद्धं, तस्यच बुद्धार्थस्य पुनर्मन्त्रोच्चारणेन शासनमनर्थकं, नहि सोपानत्के पादे पुनरप्युपानहं प्रति * भवति। ननु बुद्धस्यार्थस्य पुनर्मन्त्रोच्चारणं प्रामादिकविस्मरणपरिहाराय मन्त्रेण स्मारणमस्त्वित्याशङ्क्यान्यं दोषं सूचयति, अविद्यमानवचनादिति। चत्वारि शृङ्गा त्रयोऽस्य पादाः द्वे शीर्षे, सप्तहस्तासोऽस्य, त्रिधाबद्धो वृषभो रोरवीति महोदेवो मर्त्यां आविवेशेतिमन्त्र आम्नायते, न खलु चतुःशृङ्गत्वाद्युपेतं किञ्चिद्यज्ञसाधनं विद्यते यन्मन्त्रपाठेनानुस्मर्य्यते। नन्वीदृशी काचिद्देवतास्यादित्याशङ्क्यान्यं दोषं सूचयति, अचेतनेऽर्थबन्धनादिति। ओषधे त्रायस्वैनं, शृणोत ग्रावाण इत्यादावचेतने द्रव्ये चेतनोचितं रक्षणश्रवणाद्यर्थं बध्नाति, सचायुक्तः। नन्वभिमानिव्यपदेशः स्यात् वैयासकिशास्त्रे सूचितत्वात् ओषध्याद्यभिमानिचेतनादेवता अत्र विवक्षिता इत्या-

---

* प्रतिमुंचति इति क-ग-सं-पाठः।

शङ्क्य दोषान्तरं सूत्रयति अर्थविप्रतिषेधादिति। अदितिर्द्यौरदितिरन्तरीक्षमिति मन्त्र आम्नायते, यदेव द्यौस्तदेवान्तरीक्षमित्ययमर्थो विप्रतिषिद्धः। एकएव रुद्रः सहस्राणि सहस्रशो ये रुद्रा इत्यादिकमप्युदाहर्त्तव्यं। ननु त्वमेव माताच पिता त्वमेव इत्यादिवदन्तरीक्षादिरूपत्वे नादितिः स्तूयते।

एवमेकस्यापि रुद्रस्य योगसामर्थ्याद्बहुमूर्त्तिस्वीकारोऽस्तु, ततो नार्थविप्रतिषेध इत्याशङ्क्य दोषान्तरं सूत्रयति, स्वाध्यायवदवचनादिति। पूर्णिका नाम काचिद्योषिदवघातं करोति, तत्समीपे माणवकः स्वाध्यायग्रहणार्थं कदाचिदवघातमन्त्रमधीते नच तस्यार्थप्रकाशनविवक्षास्ति, प्रति मुसलप्रहारं तस्य मन्त्रस्यापठ्यमानत्वादक्षरग्रहणायव तं मन्त्रं अन्यांश्च मन्त्रानभ्यस्यति। तत्र स्वाध्यायकाले पठितोऽप्यवघातमन्त्रो यथा पूर्णिकां प्रति स्वार्थं न ब्रूते, तथा कर्म्मकालेऽपि स्वार्थं न वक्ष्यति। ननु तत्र माणवकस्यार्थे विवक्षा नास्ति, पूर्णिकाप्यवबोद्धुमक्षमा, कर्म्मणि त्वध्वर्योरर्थविवक्षा विद्यते, बोधश्च सम्भवतीत्याशङ्क्य दोषान्तरं सूत्रयति, अविज्ञेयादिति। केषाञ्चिन्मन्त्राणामर्थं ज्ञातुं न शक्यते, तद्यथा अम्यक्सात इन्द्रऋष्टिरस्मै इत्येको मन्त्रः। शृण्वेव जर्भरी तुर्फरीतु-इत्यप्येको मन्त्रः।

नन्वीदृशमन्त्रार्थबोधाय निगमनिरुक्तव्याकरणानि प्रवृत्तानीत्याशङ्क्य दोषान्तरं सूत्रयति, अनित्यसंयोगान्मन्त्रानर्थक्यमिति। किन्ते कृण्वन्ति कीकटेष्विति मन्त्रे कीकटो नाम जनपद आम्नातः। तथा नैचाशाखं नाम नगरं, प्रमगन्दो नाम राजेत्येते, अर्था अनित्या आम्नाताः। तथाच सति प्राक् प्रमगन्दान्नायं मन्त्रो भूतपूर्व्व इति गम्यते, तदेवमेतैस्तदर्थशास्त्रादिभिर्हेतुभि र्मन्त्राणामर्थप्रत्यायनार्थत्वं नास्ति, * किन्तूच्चारणार्थत्वाद्दृष्टार्थ एवेति पूर्व्वपक्षः।

तत्र सिद्धान्तं सूत्रयति, अविशिष्टस्तु वाक्यार्थ इति। तुशब्देन मन्त्राणामदृष्टार्थमुच्चारणमात्रं वारयति, क्रियाकारकसम्बन्धेन प्रतीयमानो वाक्यार्थो लोकवेदयोरविशिष्टः, तथासति यथा लोकेऽर्थप्रत्यायनायैव वाक्यमुच्चार्य्यते, तथा वैदिके यागप्रयोगेऽपि द्रष्टव्यं, मन्त्रेण प्रकाशितस्त्वर्थोऽनुष्ठातुं शक्यते नत्वप्रकाशितः, तस्मान्मन्त्रोच्चारणस्यार्थप्रकाशनरूपं दृष्टमेव प्रयोजनं।

---

* उच्चारणादितिपाठः कां, सं।

नन्वभ्रिरसि नारिरसीत्यारभ्य, त्रैष्टुभेन त्वा छन्दसाददुरिति मन्त्र आम्नातः, तेनैव मन्त्रेण प्रतीते अभ्यादाने पुनर्ब्राह्मणे ताञ्चतुर्भिरभ्रिमादत्त इति विधीयते, तदेतद्विधानं त्वत्पक्षे व्यर्थं स्यादित्याशङ्क्योत्तरं सूत्रयति, गुणार्थेन पुनः श्रुतिरिति। मन्त्रेण प्रतीतस्यैवार्थस्य ब्राह्मणे यत्पुनः श्रवणं, तदेतच्चतुःसङ्ख्यालक्षणकगुणविधानार्थत्वेनोपयुज्यते, एतस्य विधानस्याभावे चतुर्णां मन्त्राणां मध्ये येन केनाप्येकेन मन्त्रेणाभ्रिरादीयते। नन्विमामगृह्णन्रशनामृतस्येत्यश्वाभिधानीमादत्ते इत्यत्र मन्त्रसामर्थ्यादेव प्राप्तस्य रशनादानस्य पुनर्ब्राह्मणवाक्यं विनियोजकमाम्नायते, तदेतत्त्वन्मते व्यर्थमित्याशङ्क्योत्तरं सूत्रयति, परिसङ्ख्येति। गर्द्दभाभिधानीं नादत्त इति निषेधः परिसङ्ख्या तदर्थमिदं ब्राह्मणवाक्यं। ननु परिसङ्ख्यायां त्रयो दोषाः प्राप्नुयुः, आदत्त इति रशनादानलक्षणं स्वार्थं जह्यात्, निषेधलक्षण एव परार्थोऽस्य शब्दस्य कल्प्येत, रशनात्वसामान्येनच प्राप्तं गर्द्दभरशनायामादानं बाध्येत इति त्रयो दोषाः, मैवं, गर्द्दभरशनाया अप्राप्तत्वात्। तथाहि त्वत्पक्षे प्रकरणपाठान्यथानुपपत्त्या मन्त्रेणादानेऽनादानं कुर्य्यादिति वाक्यं प्रकल्प्यते, तेनच वाक्येन मन्त्रादानयोः सम्बन्धे सति, पश्चात् किम्विषयकमादानमिति विवक्षायां लिङ्गाद्रशनामात्रस्यादानमुपेत्य गर्द्दभरशनायाः प्राप्तिर्वक्तव्या, साच न लभ्यते * इत्यश्वाभिधानीमिति प्रत्यक्षेण वाक्येन मन्त्रादानयोः सम्बन्धे सति लिङ्गाद्रशनामात्रप्राप्तमादानमश्वाभिधानीमिति श्रुत्या विशेषो व्यवस्थाप्यते, ततो मन्त्रस्य निराकाङ्क्षत्वात् गर्द्दभरशनाया अप्राप्तत्वान्नास्ति प्राप्तबाधः, अतएव निषेधार्थो न कल्प्यते, विध्यर्थश्च न त्यज्यते, तत्र कुतो † ऽत्रदोषत्रयं। ईदृशमप्राप्तिरूपमेव गर्द्दभरशनाया निवारणमभिप्रेत्य परिसङ्ख्येति सूचितं। ननु उरुप्रथस्वेति, प्रथयतीति, ब्राह्मणस्य वैयर्थ्यं तदवस्थमेवेत्याशङ्क्योत्तरं सूत्रयति, अर्थवादो वेति। वा शब्दो वैयर्थ्यं वारयति। अस्त्यत्रार्थवादः, यज्ञपतिमेव तत्प्रथयतीति, तेनार्थवादेन सम्बन्धाय ब्राह्मणे विधिः पठ्यते। ननु प्रथयतीत्यनेनैव शब्देन प्रथनमनूद्य, यज्ञपतिमेवेत्यादिनार्थवादेन ‡ सम्बद्धव्यन्तदेव प्रथनं कुतः प्राप्तमित्याशङ्क्योत्तरं सूत्रयति, मन्त्राभिधानादिति। अध्वर्य्युः पुरोडाशमुद्दिश्य मन्त्रे प्रथस्वेत्येवमभिधत्ते, तस्मा-

---

* सं, कां पुस्तकेविलम्ब तइतिपाठः। † अत्रेतिपाठः उक्तपुस्तकेनास्ति।
‡ स्तोतव्यं कां सं।

दभिधानादध्वर्य्युकर्त्तृकं प्रथनं प्राप्तं, यथा लोके यः कुर्व्विति ब्रूते स कारयत्येव, तथाचापि यः प्रथस्वेति ब्रूते स प्रथयत्येव। यदुक्तं अग्निमुर्डा* इति पाठक्रमनियमाददृष्टार्थो मन्त्र इति, तत्रोत्तरं सूचयति, अविरुद्धं परमिति। परं द्वितीयसूचोक्तमस्मत्पक्षेऽप्यविरुद्धं, नहि वयं पाठक्रमनियमाददृष्टं निवारयामः, किन्तर्हि मन्त्रोच्चारणेन जायमानमर्थप्रत्यायनं दृष्टप्रयोजनत्वात् नोपेक्षितव्यमित्येतावदेव ब्रूमः। ननु ब्राह्मणो रासादयेति मन्त्रो बुद्धमेवार्थमभिधत्ते, तदयुक्तं, सोपानत्कस्योपानदन्तरासम्भवादित्युक्तमितिचेत्, तस्य परिहारान्तरं सूचयति, सम्प्रैषकर्म्मणो गर्हानुपलम्भः संस्कारत्वादिति। सम्प्रैषकर्म्मणो गर्हात्वदुक्तदोषो नोपलभ्यते बुद्धस्याप्यर्थस्य मन्त्रेणैवानुस्मरणे सति नियमादृष्टलक्षणस्य संस्कारस्य सद्भावात्। यच्चोक्तं चत्वारि शृङ्गेति मन्त्रोऽसङ्गतमेवार्थमभिधत्त इति तस्योत्तरं सूचयति, अभिधानेऽर्थवाद इति। असतोऽर्थस्याभिधाने वाक्ये गौणस्यार्थस्योक्तिर्दृष्टा, तद्यथा चत्वारो ह्येवाध्वर्य्वृद्गात्रह्माणोऽस्यकर्म्मणः शृङ्गाणि, प्रातःसवनादयस्त्रयः पादाः, पत्नीयजमानौ द्वे शीर्षे, गायत्र्यादीनि सप्त छन्दांसि हस्ताः, ऋग्वेदादिभिस्त्रिभिर्वेदैस्त्रेधाबन्धनं, कामान् वर्षतीति वृषभः, रोरवीति स्तोत्रशस्त्रादिशब्दान् पुनः पुनः करोति, महादेवः सोऽयं प्राविशो यज्ञरूपो देवो मर्त्यानाविवेशेति, लोकेऽप्येवं गौणप्रयोगा दृश्यन्ते। चक्रवाकस्तनी, हंसदन्तावलीकाशवस्त्रा, शैवालकेशिनीत्येवं नद्याः स्तूयमानत्वात्। एवमोषधे त्रायस्व, शृणोत ग्रावाण इत्याद्यचेतनसम्बन्धनानि स्तुतिपरत्वेन योजनीयानि, यस्मिन् वपने ओषधिरपि त्रायते, तत्र वपनकर्त्ता त्रायत इति किं वक्तव्यं, तथा ग्रावाणोऽपि प्रातरनुवाकं शृण्वन्ति, किमुत विद्वांसो ब्राह्मणा इत्यामन्त्रणाभिप्रायः। योऽप्यदितिर्द्यौरदितिरन्तरिक्षमिति विप्रतिषेध उक्तः तस्योत्तरं सूचयति, गुणादप्रतिषेधः स्यादिति। यथा त्वमेव पिता त्वमेव मातेत्यत्र गौणप्रयोगादविरोधस्तद्वत्, एवमेकरुद्रदेवत्येकर्म्मण्येको रुद्रः, शृतरुद्रदेवत्ये शृतं रुद्रा इत्यविरोधः। यदप्युक्तं स्वाध्यायमधीयानो माणवकः पूर्णिकाया अवघातं करोतीति, न प्रकाशयितुमिच्छतीति, तत्रोत्तरं सूचयति, विद्यावचनमसंयोगादिति। वेदविद्याग्रहणकालेऽर्थस्य यद्वचनं तद्यज्ञसंयोगादुपपद्यते, नहि

---

* केवलं क्रमादिति उक्तपुं।

पूर्णिकाया अवघातो यज्ञसंयुक्तः, नापि माणवको यज्ञमनुतिष्ठति, अतो यज्ञानुपकारात् न तत्रार्थविवक्षा। यदप्युक्तं अम्यक्सातइन्द्र, मृत्खेव जर्भरी तुर्फरीतू इत्यादौ, अर्थस्य ज्ञातुमशक्यत्वान्नास्त्येवार्थ इति, तत्रोत्तरं सूत्रयति, सतः परमविज्ञानमिति। विद्यमान एवार्थः प्रमादालस्यादिभि र्न ज्ञायते तेषां निगमनिरुक्तव्याकरणवशेन धातुतोऽर्थः परिकल्पयितव्यः। तद्यथा जर्भरी तुर्फरीतू इत्येवमादीन्यश्विनोरभिधानानि, तेषु हि द्विवचनान्तत्वं लक्ष्यते, अश्विनश्चेदं सूक्तं, अश्विनौ क्राममप्रा इति दर्शनात्, एतदेवाभिप्रेत्य निरुक्तकारो व्याचष्टे, जर्भरी भर्त्तारावित्यर्थः, तुर्फरी हन्तारावित्यर्थ, इत्येवमम्यक्सात इत्यादावप्युन्नेयं। यदप्युक्तं प्रमगन्दाद्यनित्यार्थसंयोगान्मन्त्रस्यानादित्वं न स्यादिति, तत्रोत्तरं सूत्रयति, उक्तश्चानित्यसंयोग इति। प्रथमपादस्यान्तिमाधिकरणे सोऽयमनित्यसंयोगदोष उक्तः परिहृतः। तथाहि तत्र पूर्वपक्षे वेदानां पौरुषेयत्वं वक्तुं, काठककालापकमित्यादिपुरुषसम्बन्धाभिधानं हेतुं कृत्वानित्यदर्शनाच्चेति हेत्वन्तरं सूचितं। तस्यायमर्थः ववरः प्रावाहणिरकामयतेत्यनित्यानां ववरादीनामर्थानां दर्शनात्, ततः पूर्वमसत्त्वात्पौरुषेयो वेद इति तस्योत्तरमेवं सूचितं, परं श्रुतिसामान्यमात्रमिति। तस्यायमर्थः। यत् काठकादिसमाख्यातं तत्प्रवचननिमित्तं। यत्तु परं ववराद्यनित्यदर्शनं तच्छब्दसामान्यमात्रं। ननु तत्राभिप्रेतो ववराख्यः कश्चित् पुरुषो विवक्षितः किन्तु ववर इति शब्दानुकृतिः, तथा सति ववर इति शब्दं कुर्व्वन् वायुरभिधीयते, स च प्रावाहणिः प्रकर्षेण वहनशीलः, एवमन्यत्रापि ऊहनीयं। तदेवं कस्यचिदपि दोषस्यासम्भवात् विवक्षितार्थामन्त्राः सार्थप्रकाशनायैव प्रयोक्तव्याः। नन्वर्थप्रकाशनार्थत्वे सति दृष्टं प्रयोजनं लभ्यत इति युक्तिमात्रमिदमुच्यते। नन्वेतदुपोद्बलकं किञ्चिच्छ्रौतं लिङ्गं पश्याम इत्याशङ्क्योत्तरं सूत्रयति, लिङ्गोपदेशश्च तदर्थवदिति। आग्नेय्याग्नीध्र मुपतिष्ठेतेति श्रूयते। तस्यायमर्थः अग्निर्देवता यस्या ऋचः सेयमाग्नेयी, तथाग्नीध्रस्थानमुपतिष्ठेतेति। अत्र ह्युपस्थानमुपदिशद्ब्राह्मणं अग्नेनयेत्यनयोपतिष्ठेतेति मन्त्रप्रतीकं पठित्वा नोपदिशति। यदा यस्यामृच्यग्निः प्राधान्येन प्रतिपद्यते, तदा तस्या ऋचोऽग्निर्देवता भवति, तथा सति आग्नेय्येति देवतावाचितद्धितान्तनिर्देश उपपद्यते, तस्मादयमुपदेशस्तन्मन्त्रवाक्यमर्थवदिति बोधयति, अतो विवक्षार्थत्वादर्थप्रत्यायनार्थं प्रयोगकाले मन्त्रोच्चारणं। तस्मिन्नेव विवक्षितार्थत्वे लिङ्गा-

न्तरं सूचयति, ऊह इति। प्रकृताम्नातस्य मन्त्रस्य विकृतौ समवेतार्थत्वाय तदुचितपदान्तरस्य प्रक्षेपणपाठ ऊहः। तद्यथा अन्वेनं माता मन्यतामनुपितानुभ्रातास्मिति प्रकृतेः पशुविषयो मन्त्रपाठः, तस्य च मन्त्रस्य विकृतौ पशुद्वये सति अन्वेनौ माता मन्यतामित्यूहः। पशुबहुत्वे सति अन्वेतान् माता मन्यतामित्यूहः कर्त्तव्यः। एतन्मन्त्रव्याख्यानरूपं ब्राह्मणमेवमाम्नायते, न माता वर्द्धते न पितेति, तत्रेदं चिन्तनीयं, किमत्र शरीरवृद्धिर्निषिध्यते, आहोस्विच्छब्दवृद्धिरिति, एकवचनान्तस्य मातृशब्दस्य, मातराविति द्विवचनान्तत्वेन वा, मातर इति बहुवचनान्तत्वेन वा प्रयोगः शब्दवृद्धिः, न तावच्छरीरवृद्धि र्निषेद्धुं शक्यते, बाल्यकौमारयौवनादिवयोनुसारेण तद्वृद्धेः प्रत्यक्षत्वात्, अतः शब्दवृद्धिनिषेध एव परिशिष्यते। मातृशब्दपितृशब्दयो र्विशेषाकारेण वृद्धिनिषेधादितरस्यैनमिति शब्दस्यार्थानुसारिणी वृद्धिसूचिता भवति, तत्र यद्यर्थो न विवक्ष्येत्, तदा पशुद्वित्वे द्विवचनं, पशुबहुत्वे बहुवचनञ्च कथमूह्येत, तस्माद्विवक्षितार्था मन्त्राः। तस्मिन्नेवार्थे लिङ्गान्तरं सूचयति, विधिशब्दाच्चेति। मन्त्रव्याख्यानरूपो ब्राह्मणगतः शब्दो विधिशब्द इत्युच्यते। सचैवमाम्नायते, शतं हिमाः शतं वर्षाणि जीवत्येवैतदाहेति। तत्र शतं हिमा इत्येतद्व्याख्येयमन्त्रस्य प्रतीकं, अवशिष्टन्तु तस्य तात्पर्य्यव्याख्यानं। मन्त्रस्य विवक्षितार्थत्वेतु किंनाम तात्पर्य्यं मन्त्रे व्याख्यायते, तस्माद्विवक्षितार्था मन्त्राः प्रयोगकाले स्वार्थप्रकाशनायैवोच्चारयितव्याः। तत्र संग्रहश्लोकौ, मन्त्रा उरुप्रथस्येति किमदृष्टैकहेतवः। यागेषूत पुरोडाशप्रधनादेश्च भासकाः। ब्राह्मणेनापि तद्भानान्मन्त्राः पुण्यैकहेतवः। न तद्भानस्य दृष्टत्वादृष्टं वरमदृष्टतः। नन्वस्तु मन्त्रभागस्य प्रामाण्यं, ब्राह्मणभागस्य न तदुच्यते। तथाहि द्विविधं ब्राह्मणं, विधिरर्थवादश्चेति। तथाचापस्तम्बः कर्म्मचोदना ब्राह्मणानि, ब्राह्मणशेषोऽर्थवाद इति। विधिरपि द्विविधः, अप्रवृत्तिप्रवर्त्तकोऽज्ञातज्ञापकश्चेति। आग्नेयवैष्णवं पुरोडाशं निर्व्वपति दीक्षणीयायामित्याद्याः कर्म्मकाण्डगता विधयोऽप्रवृत्तप्रवर्त्तकाः। आत्मा वा इदमेक एवाग्र आसीदित्यादयो ब्रह्मकाण्डगता अज्ञातज्ञापकाः। तत्र कर्म्मकाण्डगतानां जर्त्तिलयवागूवा जुहुयाद्गवीधुकयवागूवेत्यादि विधीनां नास्ति प्रामाण्यं, प्रवृत्त्ययोग्यकर्त्तव्यविधानेन सम्यगनुभवसाधनत्वाभावात्, अयोग्यत्वञ्च वाक्यशेषे समाम्नातं, अनाऋतिर्वै जर्त्तिलाश्च गोधूमाश्चेति, तत्र ह्यारण्यति-

स्नानमारण्यगोधूमानाञ्चाऽऽतिद्रव्यत्वं निषिद्धं, तस्माद्बाधितो जर्त्तिलादिविधिरप्रमाणं। एवमैतरेयतैत्तिरीयादिब्राह्मणेषु तत्तदनादर्त्तव्यं. तत्तथा न कार्य्यमिति वाक्याभ्यां बहवो विधयो निषिद्धाः। अपि चैतरेयब्राह्मणे अनुदितहोमं बहुधा निन्दित्वा, तस्मादुदिते होतव्यमित्यसक्तन्निगदितं। तैत्तिरीयाश्च तथैवामनन्ति, यदनुदिते सूर्य्ये प्रातर्जुहुयादुभयमेवाग्नेयं स्यात्, उदिते सूर्य्ये प्रातर्जुहोति, पुनरपि तत्रच, उदितहोमे दोषमामनन्ति। यदुदिते प्रातर्जुहुयात्, तं यथातिथये पक्वतायासूर्य्यायावसथायाहार्य्यं हरन्ति तादृगेव तदिति। तथैवातिरात्रे षोडशिनं गृह्णातीति विधिः, नातिरात्रे षोडशिनं गृह्णातीति निषेधेन बाध्यते। ज्योतिष्टोमादिष्वपि अनुष्ठानानन्तरमेव स्वर्गादिफलं नोपलभ्यते, नहि भोजनानन्तरं तृप्तेरनुपलम्भोऽस्ति, तस्मात् कर्म्मविधिषु प्रामाण्यं दुःसम्पाद्यं। अज्ञातज्ञापकेषु ब्रह्मविधिष्वपि परस्परविरोधान्नास्ति प्रामाण्यं। आत्मा वा इदमेक एवाग्र-आसीदित्यैतरेयिन आमनन्ति। असद्वा इदमग्र आसीदिति तैत्तिरीयाः, सोऽयं विरोधः, तस्माद्वेदे विधिभागः सर्व्वोऽप्यप्रमाणमिति प्राप्ते ब्रूमः। अस्त्येव जर्त्तिलादिविधेरप्रामाण्यं, तदर्थस्याननुष्ठेयत्वात्, अनुष्ठेयस्वर्थ उपरितने अजाक्षीरेण जुहोतीति वाक्ये विधीयते, तत्प्रशंसार्थमत्र जर्त्तिलादिकमनूद्य निन्द्यते, यथा गवामश्वानां प्रशंसार्थमपशवो वाऽन्ये गोभ्योऽश्वेभ्य इति वाक्येनार्थवादरूपेणाजादीनां पशुत्वं निन्द्यते तद्वत्। एवं तर्हि अजादेर्यथा वस्तुतः पशुत्वमस्ति, तथा जर्त्तिलादिविधिरत्र निन्द्यमानोऽपि क्वचिच्छाखान्तरे भवेत् इतिचेत्, भवतु नाम प्रामाण्यमपि तच्छाखाध्यायिनं प्रति भविष्यति, यथा गृहस्थाश्रमे निषिद्धमपि परान्नभोजनं आश्रमान्तरेषु प्रामाणिकं तद्वत्, अनेन न्यायेन सर्व्वत्र परस्परविरुद्धौ विधिनिषेधौ पुरुषभेदेन व्यवस्थापनीयौ, यथा मन्त्रेषु पाठभेदः, शाखाभेदेन व्यवस्थितत्वात्। तैत्तिरीयाः वायवस्थोपायवस्थेति मन्त्रमामनन्ति। वाजसनेयिनस्तु उपायवस्थेत्येतं भागं नामनन्ति, प्रत्युत शतपथब्राह्मणे स भागोऽनूद्य निराकृतः। तथा सूक्तवाकमन्त्रे शाखान्तरपाठं निराकृत्य पाठान्तरं तैत्तिरीया आमनन्ति, यद्ब्रूयात् सूपावसानाः सध्यवसानाश्चेति, प्रमायुको यजमानः स्यादिति निराकरणं, सूपचरणा च स्वधीचरणा चेति एवं ब्रूयादिति पाठान्तरोपदेशः, तत्रानुष्ठातृपुरुषभेदेन व्यवस्था, तद्वद्विधिषु द्रष्टव्यं, षोडशिग्रहणादिदूषणंत्वश्रुतमीमांसावृत्तान्तस्यैव

तवैव शोभते, पूर्व्वमीमांसायां दशमाध्यायस्याष्टमे पादे षोड़शिनो ग्रहणाग्रहणविकल्पो निर्णीतः। द्वितीयस्याध्यायस्य प्रथमे पादे कालान्तरभाविफलसिद्ध्यर्थमपूर्व्वं निर्णीतं, तदुत्तरमीमांसायां प्रथमाध्यायस्य चतुर्थे पादे कारणत्वेन चाकाशादिषु यथा व्यपदिष्टोक्तेरित्यस्मिन् सूत्रे जगत्कारणे परमात्मनि श्रुते र्विप्रतिपत्तिर्निराकृता। द्वितीयाध्यायस्य प्रथमपादारम्भाधिकरणे त्वसद्व्यपदेशेनेति चेत्, न, धर्म्मान्तरेण वाक्यशेषादिति सूत्रे, तैत्तिरीयवाक्यगतस्यासच्छब्दस्य न शून्यपरत्वं किन्त्वव्यक्तावस्थापरत्वमिति निर्णीतं, तथा जैमिनिश्चोदना सूत्रे विधिवाक्यं धर्म्मे प्रमाणमिति प्रतिज्ञाय, औत्पत्तिकसूत्रे तत् प्रामाण्यं समर्थयामास। व्यासोऽपि शास्त्रयोनित्वसूत्रे वेदान्तानां ब्रह्मणि प्रामाण्यं प्रतिज्ञाय, तत्तु समन्वयादित्यादिसूत्रैः समर्थयामास। तस्मादमीमांसकस्य तव पूर्व्वोक्तस्यैवम्बिधन्यायो दुष्परिहरः, अतो विधिभागस्य प्रामाण्यं सुस्थितं। अर्थवादभागस्य प्रामाण्यं महता प्रयत्नेन जैमिनिः समर्थयामास, तत् सूत्राणि व्याख्यास्यन्ते, तत्र पूर्व्वपक्षं सूत्रयति, आम्नायस्य क्रियार्थत्वादानर्थक्यमतदर्थानां तस्मादनित्य मुच्यत इति। आम्नायस्य सर्वस्य क्रियाप्रतिपादनाय प्रवृत्तत्वादक्रियाप्रतिपादकानामर्थवादानां नास्ति कश्चिद्विवक्षितः स्वार्थः। ते चार्थवादा एवमाम्नायन्ते, सोऽरोदीद्यदरोदी त्तद्रुद्रस्य रुद्रत्वं, स आत्मनोवपामुदखिदत्, देवावैदेवयजनमध्यवसायदिशो न प्राजानन्निति, यस्मादीदृशस्य वाक्यस्य विवक्षितोऽर्थः कश्चिदपि नास्ति तस्मादिदं वाक्यमनित्यमुच्यते। यद्यप्यनादित्वात्स्वरूपेण नित्यत्वं * नास्ति तथापि धर्म्मावबोधलक्षणस्य नित्यकार्य्यस्याभावात्, अनित्यैः काव्यालापैः समानत्वादप्रमाणमित्यर्थः। ननूदाहृतानामर्थवादानामनुष्ठेये धर्म्मे प्रामाण्याभावेऽपि स्वार्थे प्रामाण्यमस्तु, तत्प्रत्यायकत्वेन स्वतः प्रामाण्यस्यापवदितुमशक्यत्वादित्याशङ्क्य, अन्येषु केषुचिदर्थवादेषु मानान्तरविरोधदर्शनादप्रामाण्ये सति, तद्दृष्टान्तेन सर्वेषामप्यर्थवादानामप्रामाण्यमित्यभिप्रेत्य सूत्रयति, शास्त्रदृष्टविरोधाच्चेति। शास्त्रविरोधो, दृष्टविरोधः शास्त्रदृष्टविरोध इति त्रिविधोऽर्थवादेषूपलभ्यते। तथाहि स्तेनं मनो नृतवादिनी वागित्यत्र, श्रूयमाणं मानसं चौर्य्यं, वाचिकं अनृतवचनञ्च प्रतिषेधशास्त्रेण निषिद्धं तस्माद्धूम एवाग्नेर्दिवाददृशे नार्चिस्तस्माद-

---

* नास्तित्ययं पाठो नास्ति सं.कां

र्चिरेवाग्नेर्नक्तं दृश्ये न धूम इत्यत्र दृष्टविरोधः, तथा न चैतद्विद्मो वयं ब्राह्मणाः स्मोऽब्राह्मणा वा, इत्यत्रप्रत्यक्षविरोधः। को हि तद्वेदयद्यमुष्मिल्लोकेऽस्ति वा न वेतीत्यत्र शास्त्रदृष्टविरोध इति। स्वर्गकामो यजेतेत्यादि शास्त्रे ह्यामुष्मिकं फलं दृश्यते तस्मादविरोधादर्थवादानामप्रामाण्यं। ननु सोरोदीदित्यादीनां निष्प्रयोजनत्वात् स्तेनं मन इत्यादीनाच्च विरोधादप्रामाण्येऽपि फलप्रतिपादकानामर्थवादानां तदुभयवैलक्षण्यादस्तु प्रामाण्यं, इत्याशङ्क्योत्तरं सूचयति, तथा फलाभावादिति। यथा मानान्तरविरुद्धमर्थवादैरुक्तं, तथा फलमप्यविद्यमानमेव तैरुच्यते, तथाहि गर्गात्रिरात्रं प्रकृत्य श्रूयते, श्रीभतेऽस्य मुखं य एवं वेदेति, दर्शपौर्णमासयोर्वेदाभिमर्शनं प्रकृत्य श्रूयते, आस्य प्रजायां वाजी जायते य एवं वेदेति, नचे वयं वेदितृणां तत्फलमुपलभामहे। नन्वैहिकफलवाक्यानां विसम्वादादप्रामाण्येऽपि, आमुष्मिकफलवाक्यानामस्तु प्रामाण्यमित्याशङ्क्योत्तरं सूचयति, अन्यानर्थक्यादिति। एवं हि श्रूयते पूर्णाऊत्या सर्वान् कामानवाप्नोति, पशुबन्धयाजी सर्वान् लोकानभिजयति, तरति मृत्युं तरति पाप्मानं, तरति ब्रह्महत्यां योऽश्वमेधेन यजते, य उचैनमेवं वेदेति, तत्राग्न्याधेयगतया पूर्णाऊत्या सर्वकामप्राप्तेरन्यान्यग्निहोत्रादीन्युत्तरकालीनानि अनर्थकानि स्युः, तथा निरूढपशुबन्धानुष्ठानेन सर्वलोकाभिजयने * ज्योतिष्टोमादीनामानर्थक्यं, अध्ययनकालीनेनैवाश्वमेधवेदनेन ब्रह्महत्यादितरणात् तदनुष्ठानञ्च व्यर्थं स्यात्, तस्मादामुष्मिकफलवाक्यानामप्यप्रामाण्यं। ननु माभूत् फलवाक्यानां प्रामाण्यं, तथापि निषेधवाक्येषु विरोधानुपलम्भादस्तु प्रामाण्यमित्याशङ्क्योत्तरं सूचयति, अभागिप्रतिषेधादिति। न पृथिव्यामग्निश्चेतव्यो नान्तरीक्षे न दिवीत्यान्तरीक्षस्य च दिवश्च प्रतिषेधभागित्वं नास्ति, तत्र चयनप्रसङ्गस्याभावान्नाभूत्तर्हि निषेधानां प्रामाण्यं। ववरः प्रावाहणिरकामयतेत्यादीनां पूर्वपुरुषवृत्तान्ताभिधायिनां विरोधानुपलम्भादस्तु प्रामाण्यमित्याशङ्क्योत्तरं सूचयति, अनित्यसंयोगादिति। ववरादिरूपेणानित्येनार्थेन संयोगे सत्यस्य वाक्यस्य ततः पूर्वमभावात् कालिदासादिवाक्यवत् पौरुषेयत्वं प्रसज्येत, किम्बहुना सर्वथा नास्त्येवार्थवादानां प्रामाण्यं। वायव्यं श्वेतमालभेतेत्यादिना विधिना सह प्रामाण्यमिति पूर्वपक्षः। सिद्धान्तं सूचयति, विधिनात्वेक-

* जयादिति पुस्तकान्तरे (का-सं)।

वाक्यत्वात् स्तुत्यर्थेन विधीनां स्तुरिति । तु शब्दोऽर्थवादानामप्रामाण्यं वारयति । वायु वै क्षेपिष्ठादेवता, इत्येवमादीनामर्थवादानां, वायव्यं श्वेतमालभेतेत्यादिना विधिना सहैकवाक्यत्वादस्ति धर्म्मे प्रामाण्यं । नच विधिवाक्यस्यार्थवादनैरपेक्ष्येण पदान्वये सम्पूर्णे तत्रार्थवादानां नास्त्युपयोग इति शङ्कनीयं, ते ह्यर्थवादाः पुरुषप्रवृत्तिमाकाङ्क्षयता । विधिना स्तुत्यर्थेनोपयुक्ताः स्युः, स्तुत्या च प्रलोभितः पुरुषस्तत्र प्रवर्त्तते । नन्वर्थवादानां प्रमादपठितत्वेनोपेक्षणीयत्वात् किमनेनैकवाक्यप्रयासेनेत्याशङ्क्य सूत्रयति, तुल्यञ्च सामादायिकमिति । अनध्यायवर्ज्जनादिनियमपुरःसरं गुरुसम्प्रदायादध्ययनं यत्तत् सामादायिकं, तच्च विधीनामर्थवादानां समानं, तस्माद्विधिवदेतेषामपि प्रमादपाठो न भवति । ननु शास्त्रदृष्टविरोधाच्चेत्येवमर्थवादेष्वनुपपत्तिरुक्तेत्याशङ्क्याह, अप्राप्ता चानुपपत्तिः प्रयोगे हि विरोधः स्याच्छब्दार्थत्वप्रयोगभूतस्तस्मादुपपद्यत इति । तत्र वार्त्तिके तत् सूत्रमध्याहृत्य त्रिधा व्याख्यातं । तां प्राप्ताच्चानुपपत्तिमिति, स्तेनं मन इत्यादौ शास्त्रविरोधार्थानुपपत्तिरप्राप्ता, प्रयोगस्यानुक्तत्वात्, प्रयोगे हि स्तेयादीनामुच्यमाने शास्त्रविरोधः स्यात् । न चात्र स्तेयं कर्त्तव्यमिति प्रयोग उच्यते, किन्तु स्तेयशब्दार्थ एवोच्यते, नच शब्दार्थः प्रयोगभूतस्तस्माच्छब्दार्थवचनमात्रेण शास्त्रविरोधाभावादयमर्थवाद उपपन्न एव । ननु स्तुत्यर्थेन विधीनां स्तुरिति यदुक्तं, तदसत्, वैयधिकरण्यात् । वेतसशाखया श्रवकाभिश्चाग्निं विकर्षत्यापो वै शान्ता, इत्यत्र वेतसावके विधीयेते, आपश्च स्तूयन्ते, इति वैयधिकरण्यमित्याशङ्क्याह, गुणवादस्त्विति । तु शब्दो वैयधिकरण्यं दोषं वारयति, गुणवादो ह्यत्र विवक्षितः, यथा लोके काश्मीराभिजनो देवदत्तः काश्मीरदेशेषु स्तूयमानेषु स्तुतमात्मानं मन्यते, एवमत्रापि, अद्भ्यो जाते वेतसावके, अप्सु स्तुतासु स्तुते एव भवतः, शान्ताभ्योऽद्भ्यो जातत्वात्, वेतसावके स्वयमपि शान्ते सत्यौ यजमानस्यानिष्टं शमयतः, इत्येतादृशस्य गुणस्य वादोऽत्राभिप्रेतः । सोऽरोदीदित्यत्रापि रजतस्य पतिताश्रुरूपत्वाद्रजतदाने गृहेऽपि रोदनप्रसङ्गात् वर्हिषि रजतं न देयमिति तन्निषेधेन विधेयेनार्थवादस्यैकवाक्यत्वात्, तत्र रजतदानाभावे रोदनाभावरूपो गुणोऽत्र विवक्षितः, तेन च गुणेन रजतदाननिवारणरूपो विधिः स्तूयते । यद्यपि रजतस्याश्रुप्रभवत्वमत्यन्तमसत्, तथापि यथोक्तरीत्या विधेयस्तुतिः सम्पद्यते । यः प्रजाकामः पशुकामः स्यात् स एतं प्राजापत्यं अजं

तूपरमालभेतेत्ययं विधिः प्रजापति वपोत्खेदेन स्तूयते, यस्मात् प्रजापतिः स्ववपामप्युत्खिद्याग्नौ प्रहृत्य, ततो जातं तूपरमजमात्मार्थमालभ्य प्रजाः पशूंश्च लब्धवान्, तस्मात् प्रजादिसम्पादकोऽयं तूपरमिति तूपरगुणस्य वादोऽत्र विवक्षितः। आदित्यः प्रायणीयश्चरुरित्येष विधिः, दिशो न प्राजानन्नित्यनेन दिङ्मोहः स्तूयते, यदि यमदितिर्देवता दिङ्मोहमप्यपनीय दिग्विशेषं ज्ञापयति, तथा बहुविधकर्म्मसमुदायरूपे सोमयागेऽनुष्ठानविषयं भ्रममपनयतीति, किमु वक्तव्यमित्येवमदितिदेवतागतस्य गुणस्य वादोऽत्र विवक्षितः। स्वकीयवपोत्खेदो, देवयजनाध्यवसानमात्रेण दिङ्मोहश्चेत्युभयमस्तु वा मा वा, सर्व्वथापि स्तुतिपरत्वमप्युपगच्छतामस्माकं न किञ्चित् क्षीयते, * शिखाते वर्द्धते वत्स गुडूचीं श्रद्धयापिबेत्यादावेव विद्यमानेनाप्यर्थेन लोकस्तुतिदर्शनात्। अथ पूर्व्वपक्षिणा शास्त्रविरोधं दर्शयितुं यदुदाहृतं, स्तेनं मनोऽनृतवादिनी वागिति, तत्रोत्तरं सूत्रयति, रूपात् प्रायादिति। हिरण्यं हस्ते भवति, अथ गृह्णातीत्येवं विधं स्तोतुमयमर्थवाद उच्यते। यथा लोके किमृषिणा देवदत्त एव पूजयितव्य इत्यत्र देवदत्तपूजां स्तोतुमेवौदासीन्यमृषावुपन्यस्यते, नतु पूज्यत्वमृषेर्वारयितुं, एवमत्रापि हस्ते हिरण्यग्रहणं प्रशंसितुं मनसः स्तेनरूपत्वं, वाचामनृतवादिनीत्वञ्चोपन्यस्यते, तत्र गुणवादेन शब्दार्थो योजनीयः, यथा स्तेनाः प्रच्छन्नरूपा एवं मनोऽपीति प्रच्छन्नरूपत्वमत्रगुणः, प्रायेण वागनृतं वक्तीति प्रायिकत्वं तत्र गुणः, हस्तस्तु न प्रच्छन्नः, नाप्यनृतबहुलः, अतो हस्ते हिरण्यधारणं प्रशस्तमिति स्तूयते। यद्यपि दृष्टविरोधाय धूम एवाग्नेर्दिवा ददृश इत्याद्युदाहृतं, तत्रोत्तरं सूत्रयति, दूरभूयस्त्वादिति। अग्निर्ज्योतिर्ज्योतिरग्निः स्वाहेति सायं जुहोति, सूर्य्यो ज्योतिर्ज्योतिः सूर्य्यः स्वाहेति प्रातरिति, एतौ विधी स्तोतुं सोऽर्थवादः, यस्मादर्च्चिर्द्दिवा न दृश्यते, तस्मात् सूर्य्यमन्त्र एव प्रातः प्रयोक्तव्यः, यस्माद्रात्रावर्च्चिरेव दृश्यते, तस्मादग्निमन्त्रो रात्रौ प्रयोक्तव्यः, सूर्य्यमन्त्रश्च दिवा, इत्येवं तयोर्मन्त्रयोः स्तुतिः, धूमार्च्चिषोरदर्शनोपन्यासस्तु दूरभूयस्त्वगुणनिमित्तः, भूयसि हि दूरे पर्व्वताग्रे वृक्षादयोऽपि न विस्पष्टं दृश्यन्ते, किन्तु तृणसादृश्येन तेषां दर्शनाभास एव, तद्वदत्रापि, यदाप्यन्यद्दृष्टविरोधायैवोदाहृतं, नचैतद्विद्मो वयं ब्राह्मणा वा स्मोऽब्रा-

---

* हीयतइतिपाठः क॰-सं।

ह्मणावेति, तत्रोत्तरं सूत्रयति, स्त्र्यपराधात् कर्त्तुश्च पुत्त्रदर्शनादिति। प्रवरे प्रव्रियमाणे ब्रूयात्, देवाः पितर इत्यस्य विधेस्तावकोऽयमर्थवादः। यदि यजमानो देवाः पितर इत्यादिमन्त्रेण प्रवरमनुमन्त्रयेत्, तदानीमब्राह्मणोऽपि ब्राह्मणो भवेदित्यनुमन्त्रणस्य स्तुतिः। नचैतद्विद्म इत्येतदज्ञानवचनं दुर्ज्ञानत्वगुणेन तत्र प्रयुज्यते, यत्र स्त्रियोऽपराधो भवति, तत्र कर्त्तुरुत्पादयितुर्जारस्यापि पुत्त्रो दृश्यते, अतः पत्युपपत्योरुभयोः पुत्त्रदर्शनात् स्वकीयं जन्म कीदृशमिति दुर्ज्ञानं, अनेनाभिप्रायेण प्रयुक्तत्वान्नास्ति तत्र दृष्टविरोधः, नहि तत्र दृश्यमानं स्वब्राह्मण्यमपवदितुं न चैतद्विद्म इत्युपन्यस्तं, यदपि शास्त्रीयदर्शनविरोधायोदाहृतं, को हि तद्वेद यदमुष्मिंल्लोकेऽस्ति वा न वेति, तत्रोत्तरं सूत्रयति, आकालिकेप्सेति। दिक्ष्वती काशान् करोतीति प्राचीनवंशस्य द्वारविधिः, तस्य शेषोऽयं को हि तद्वेदेति। धूमाद्युपद्रवपरिहरणेन प्रत्यक्षेण फलेन द्वारविधिः स्तूयते, स्वर्गप्राप्तिरूपन्तु फलमाकालिकं विप्रकृष्टकालीनं न त्विदानीन्तनमित्यर्थः, तस्येप्सा तस्य प्राप्तुमिच्छा सा च, को हि तद्वेदेत्यनिश्चयोपन्यासे कारणं, यथा भाविकालीनः पौत्त्रप्रपौत्त्रादिवृत्तान्तो निश्चेतुं न शक्यते, तद्वत् स्वर्गप्राप्तिर्हि भाविनीति गुणयोगादनिश्चयोपन्यासः, धूमादिपरिहारस्तु प्रत्यक्षत्वान्निश्चित इत्यभिप्रायः। यद्यप्यन्यद्दृष्टविरोधायोदाहृतं शोभतेऽस्य मुखं य एवं वेदेति, तत्रोत्तरं सूत्रयति, विद्याप्रशंसेति। सोऽयं गर्गत्रिरात्रविधेःशेषः, तद्विषयकम्वेदनमपि मुखशोभाहेतुः किमुतानुष्ठानमिति स्तूयते, यथा कस्यचित् कर्णाभरणादिना मुखं शोभितं भवति, एवं वेदितुरुत्साहेनैव विकसितं वदनं शोभितमिव लोकैरुद्वीक्ष्यते, अतः शोभासादृश्यगुणयोगात् शोभत इत्युच्यते। यद्यप्यन्यद्दृष्टविरोधायोदाहृतं आस्य प्रजायां वाजी जायते य एवं वेदेति। सोऽपि वेदानुमन्त्रणविधेः शेषः, अत्रापि कैमुतिकन्यायेन स्तुतिः पूर्व्ववद्योजनीया, वेदितुः पुत्त्रः पितृशिक्षया स्वयमपि विद्वान् भवति, ततः प्रतिग्रहेणान्नं प्राप्नोति, तस्मादीदृशं गुणमभिप्रेत्य वाजी जायत इत्युक्तं यद्यप्यन्यानर्थक्यायोदाहृतं पूर्णाहुत्या सर्वान् कामानवाप्नोतीति, तत्रोत्तरं सूत्रयति, सर्व्वत्वमाधिकारिकमिति। पूर्णाहुतिं जुहुयादित्यस्य विधेः शेषोऽयं, सर्व्वकामावाप्तिहेतुत्वात् प्रशस्तेयमाहुतिरिति

---

* भाविकालीनतिपाठः, कां-सं। * शिष्यैः कां-सं।

स्तूयते, यथा सर्व्वे ब्राह्मणा भोजयितव्या इत्यत्र सर्व्वत्वं स्वगृहागत-ब्राह्मणविषयं, एवं पूर्णाऽऽहुत्या कर्म्मसाङ्गत्वं यत्फलं तस्मिन्नधिकार-प्रस्तावे सम्भावितं तद्विषयमेव सर्व्वत्वं द्रष्टव्यं, पूर्णाऽऽहुतेरभावे सत्याधा-नरूपं कर्म्माङ्गं विकलं भवति, तच्च वैकल्यं पूर्णाऽऽहुत्या समाधीयत इत्येकः कामः, तस्मिन् समाहिते सत्याहवनीयाद्यग्नयोऽग्निहोत्रादिकर्म्मसु योग्या भवन्तीत्ययमन्यः कामः, तैश्च कर्म्मभिस्तत्फलं प्राप्यत इति कामान्तरं, ईदृशी सर्व्वकामावाप्तिराऽऽहुत्यन्तरेष्वपि इति चेत्, विद्यतां नाम किन्नश्छिन्नं, न खल्वेतावता पूर्णाऽऽहुतिस्तुतेः काचिद्धानिरस्ति। ननु पूर्णाऽऽहुतेरङ्गभावत्वात् तदीयफलश्रुतेरर्थवादत्वेन स्तावकत्वं भवतु, द्रव्यसंस्कारकर्म्मसु परार्थत्वात् तदीयफलश्रुतेरर्थवाद इति सूत्रेण निर्णीतत्वात् पशुबन्धवाक्यस्य तु कर्म्मविधायकत्वात् सर्व्वलोकाभिजयस्य मुख्यफलत्वादन्यानर्थक्यं दुर्व्वारमित्याशङ्क्योत्तरं सूत्रयति, फलस्य कर्म्म-निष्पत्तेः, तेषां लोकवत् परिमाणतः सारतो वा फलविशेषः स्यादिति। पृथिव्यन्तरिक्षद्युलोकेष्वन्यतमलोकाभिजयरूपं फलं पशुबन्धकर्म्मणा निष्पद्यते, तेषाञ्च पृथिव्यादीनां फलानां कर्म्मान्तरेण परिमाणाधिक्यं, सारवत्त्वं वा सम्पद्यते, ततः फलविशेषः स्यादिति नास्त्यानर्थक्यं, लोकवदित्यत्रार्थे दृष्टान्तः, यथा लोके निष्क्रेण खारीपरिमितव्रीहीन् विक्रीय निष्क्रान्तरेण पुनः क्रये सति परिमाणाधिक्यं भवति, यथा वा निष्क्रेण वस्त्रमात्रं लभ्यते, निष्कद्वयेन तु सारभूतं दुकूलं, यथा भोगाधिक्यं भोगसारत्वं वा कर्म्मान्तरेण द्रष्टव्यं, ब्रह्महत्याया अपि मानस्यास्वल्पाया वेदनमात्रेण तरणं, कायिक्यास्तु महत्या अश्वमेधेनेति नास्त्यानर्थक्यं। योऽपि नान्तरिक्षे न दिवीत्यप्रसक्तप्रतिषेध उदाहृतः, तथा ववरः प्रावाहणिरित्यनित्यसंयोग उदाहृतः, तत्रोभयत्रोत्तरं सूत्रयति, अन्ययोर्यथोक्तमिति। अन्ययोरनयोरुदाहरणयोरुत्तरं पूर्व्वोक्तमेव द्रष्टव्यं, अन्तरिक्षादौ चयननिन्दारूपेऽर्थवादे हिरण्यं निधाय चेतव्यमित्यस्य विधेः शेषः, अतोऽत्र स्तुत्यर्थेन विधीनां स्युरि-त्युक्तमेवोत्तरं, अन्तरिक्षे चयनप्रसक्त्यभावात्तन्निन्दा नित्यानुवादोऽस्तु, तेनापि विधिः स्तोतुं * न शक्यते, नित्यसिद्धार्थानुवादिना वायोः श्रेष्ठिष्ठत्वेन, पशुविशेषस्य स्तुतत्वात्। ववरः प्रावाहणिरकामयते त्यत्रापि ववरनामकः कश्चिदनित्यः पुरुषो मनुष्यो * न विवक्षितः,

---

* नेति नास्ति कां-सं। * मनुष इति नास्ति पं-कां-सं।

किन्तु ववरध्वनियुक्तः प्रकर्षेण वहनशीलो वायुर्यववहारदशायां नित्य एवार्थो विवक्षित, इत्येतदुत्तरं प्रथमपादस्याम्नातिमाधिकरणे प्रोक्तं, तस्मात् सम्भावितदोषाणां परिहृतत्वादर्थवादानामस्ति प्रामाण्यं, तत्र सङ्गृहश्लोकाः, वायुर्वा इत्येवमादेरर्थवादस्य मानता, न विधेयेऽस्ति धर्म्मे किं किं वासौ तत्र विद्यते। विध्यर्थवादशब्दानां मिथोपेक्षापरिक्षयात्, नास्त्येकवाक्यता धर्म्मे प्रामाण्यं सम्भवेत् कुतः। विध्यर्थवादौ साकाङ्क्षौ प्राशस्त्यं पुरुषार्थयोः। तेनैकवाक्यतस्तस्माद्वादानां धर्म्ममानतेति। तदेवं वेदे विद्यमानानां त्रयाणां मन्त्रविध्यर्थवादभागानामप्रामाण्यकारणाभावाद्बोधकानान्तेषां प्रामाण्यस्य स्वतस्त्वङ्गीकारात् कृत्स्नस्यापि वेदस्य प्रामाण्यं सिद्धं। नन्वेवमपि वेदस्य पौरुषेयत्वेन विप्रलम्भकवाक्यवदप्रामाण्यं स्यात्, पौरुषेयत्वञ्च प्रथमपादे पूर्व्वपक्षत्त्वेन जैमिनिः सूत्रयामास, वेदांश्चैके सन्निकर्षं पुरुषाख्येति। एके वादिनो वेदान् प्रति सन्निकर्षं मन्यन्ते, कालिदासादिभिर्निर्म्मितानां रघुवंशादिग्रन्थानां समुच्चयार्थश्चकारः, ते ह्यत्र दृष्टान्ततया समुच्चीयन्ते। यथा रघुवंशादय इदानीन्तनाः, तथा वेदा अपि। ननु वेदा अनादयः, अतएव वेदकर्त्तृत्वेन पुरुषा आख्यायन्ते, वैयासिकं भारतं, वाल्मीकीयं रामायणमित्यत्र यथा भारतादिकर्त्तृत्वेन व्यासादय आख्यायन्ते, तथा काठकं कौथुमं तैत्तिरीयमित्येवं, तत्तद्वेदशाखाकर्त्तृत्वेन काठकादिना समाख्यातत्वाद्वेदाः पौरुषेयाः, नतु नित्यानामेव सतां वेदानामुपाध्यायवत् सम्प्रदायप्रवर्त्तकत्वेन काठकादिसमाख्यास्यादित्याशङ्क्य युक्त्यन्तरं सूत्रयति, अनित्यदर्शनाच्चेति। अनित्या जननमरणवन्तो ववरादयो वेदार्थे श्रूयन्ते, ववरः प्रावाहणिः कामयत। कुसुरुविन्दौद्दालकिरकामयतेति, तथा सति ववरादिभ्यः पूर्व्वमभावादनित्या वेदाः, विमतं वेदवाक्यं पौरुषेयं वाक्यत्वात्, कालिदासादिवाक्यवदित्याद्यनुमानसमुच्चयार्थश्चकारः, सिद्धान्तं सूत्रयति, उक्तन्तु शब्दपूर्व्वत्वमिति। तु शब्दो वेदानामनित्यत्वं वारयति, शब्दस्य वेदरूपस्य काठादिपुरुषेभ्यः पूर्व्वत्वमनादित्वं प्राचीनैरेव सूत्रैरुक्तं, औत्पत्तिकस्तु शब्दस्यार्थेन सम्बन्ध इति। अस्मिन् सूत्रे औत्पत्तिकशब्देन सर्वेषां शब्दानां वेदानां तदर्थानां तदुभय सम्बन्धानाच्च नित्यत्वं प्रतिज्ञायोत्तराभ्यां शब्दाधिकरणवाक्याधिकरणाभ्यामुपपादितत्वात्, का तर्हि काठकाद्याख्यायिकाया गतिरित्याशङ्क्य, सम्प्रदायप्रवर्त्तनात् तीयमुपपद्यत इत्युत्तरं सूत्रयति, आख्या

यप्रवचनादिति। अस्त्वियमाख्यायिकाया गतिः, ततः परं ववरादि-नित्यदर्शनं यदुक्तं तस्य किमुत्तरमित्याशङ्क्योत्तरं सूचयति, परं श्रुतसामान्यमात्रमिति। यत्परं ववरादिकं तच्छब्दसामान्यमेव, नतु मनुष्यो ववरनामकोऽत्र विवक्षितः ववरध्वनियुक्तस्य प्रवक्तृत्वस्वभावस्य वायोरत्र वक्तुं शक्यत्वात्। ननु वेदे क्वचिदेवं श्रूयते, वनस्पतयः सत्रमासत, सर्पाः सत्रमासतेति, तत्र वनस्पतीनामचेतनत्वात् सर्पाणाञ्चेतनत्वेऽपि विचारहितत्वान्न * तदनुष्ठानं सम्भवति, अतो जरद्गवो गायति, मद्रकाणीत्याद्युन्मत्तबालवाक्यसदृशत्वात् केनचित् कृतो वेद इत्याशङ्क्योत्तरं सूचयति, कृते चाविनियोगः स्यात् कर्म्मणः समत्वादिति। यदि ज्योतिष्टोमादिवाक्यं केनचित्पुरुषेण क्रियेत, तदानीं कृते तस्मिन् वाक्ये स्वर्गसाधनत्वे ज्योतिष्टोमस्य विनियोगो न स्यात्, साध्यसाधनभावस्य पुरुषेण ज्ञातुमशक्यत्वात्, श्रूयते तु विनियोगः ज्योतिष्टोमेन स्वर्गकामो यजेतेति, न चैतदुन्मत्तवाक्यसदृशं, लौकिकानित्यविधिवाक्यवत्, भाष्यकरणा, इतिकर्त्तव्यतारूपैस्त्रिभिरंशैरुपेतायाभावनाया अवगमात्, लोके हि ब्राह्मणान् भोजयेदिति विधौ, किं केन कथमित्याकाङ्क्षायां दध्निमुद्दिश्यौदनेन द्रव्येण शाकरूपादिपरिवेषणप्रकारेणेति यथोच्यते, ज्योतिष्टोमविधावपि स्वर्गमुद्दिश्य सोमेन द्रव्येण दीक्षणीयाद्यङ्गोक्तप्रकारेणेत्युक्ते कथमुन्मत्तवाक्यसदृशं भवेदिति, वनस्पत्यादिसत्रवाक्यमपि न तत्सदृशं, तस्य सत्रकर्म्मणो ज्योतिष्टोमादिना समत्वात्। यत् परोहि शब्दः सशब्दार्थ इति न्यायविद आहुः, ज्योतिष्टोमादिवाक्यस्य विधायकत्वादनुष्ठाने तात्पर्य्यं, वनस्पत्यादिसत्रवाक्यस्यार्थवादत्वात् प्रशंसायां तात्पर्य्यं, सा चाविद्यमानेनापि कर्त्तुं शक्यते, अचेतना अविद्वांसोऽपि सत्रमनुष्ठितवन्तः तत् किं पुनश्चेतना विद्वांसो ब्राह्मणा, इति सत्रस्तुतिश्चकार, पूर्व्वपक्षोक्तस्य वाक्यत्वहेतोः कर्त्रनुपलम्भेन पराहृतं समुच्चिनोति, तस्मान्नास्ति वेदस्य पौरुषेयत्वं। अचैतौ सङ्गृहश्लोकौ, पौरुषेयं नवा वेदवाक्यं स्यात् पौरुषेयता। काठकादिसमाख्यानाद्वाक्यत्वाच्चान्यवाक्यवत्। समाख्यानं प्रवचनाद्वाक्यत्वन्तु परोहृतं। तत्कर्त्रनुपलम्भेन स्यात्ततोऽपौरुषेयता। ननु भगवता बादरायणेन वेदस्य ब्रह्मकार्य्यत्वं सूचितं, शास्त्रयोनित्वादिति। ऋग्वेदादिशास्त्रकारणत्वात् ब्रह्म सर्व्वज्ञमिति

---

* सत्रानुष्ठानमिति का-सं।

सूत्रार्थः, वाढं, नहि तावता पौरुषेयत्वं भवति मनुष्यनिर्म्मितत्वाभावात् । ईदृशमपौरुषेयत्वमभिप्रेत्य व्यवहारदशायामाकाशादिवन्नित्यत्वं बादरायणेनैव वेदनित्यताधिकरणे सूचितं, अतएव च नित्यत्वमिति । श्रुतिः स्मृतिश्चात्र भवतः, वाचा विरूपनित्यया इति श्रुतिः, अनादिनिधना नित्या वागुत्सृष्टा स्वम्भुवेति स्मृतिः, तस्मात् कर्त्तृत्वदोषशङ्काया अनुदयान्मन्त्रब्राह्मणात्मकस्य वेदस्य निर्व्विघ्नं प्रामाण्यं सिद्धं । ननु मन्त्रब्राह्मणात्मकस्य वेदस्य प्रामाण्यं न युक्तं, तयोः स्वरूपस्य निर्णेतुमशक्यत्वात्, मैवं, द्वितीयाध्यायस्य प्रथमे पादे सप्तमाष्टमयोरधिकरणयोर्निर्णीतत्वात् । सप्तमाधिकरणमारचयति, अग्ने वुधियमन्त्रं म इति मन्त्रस्य लक्षणं नास्ति अस्ति, वास्तु नास्त्येतदव्याप्त्यादेरवारणात् नास्त्यतिव्याप्तेरस्त्येतदव्याप्त्यादेरवारणात्, अत्र याज्ञिकानां समाख्यानं लक्षणं दोषवर्जितं । तेऽनुष्ठानस्मारकादौ मन्त्रशब्दं प्रयुञ्जते । आधान इदमाम्नायते, अग्ने वुधिय मन्त्रं मे गोपायेति, तत्र मन्त्रस्य लक्षणं नास्ति, अव्याप्त्यतिव्याप्त्योर्वारयितुमशक्यत्वात् । विहितार्थाभिधायको मन्त्र इत्युक्ते, वसन्ताय कपिञ्जलानालभेतेत्यस्य मन्त्रस्य विधिरूपत्वादव्याप्तिः । मननहेतुर्मन्त्र इत्युक्ते ब्राह्मणेऽतिव्याप्तिः । एवमसिपदान्तो मन्त्र उत्तमपुरुषान्तो मन्त्र इत्यादि लक्षणानां परस्परमव्याप्तिरिति चेत्, मैवं, याज्ञिकसमाख्यानस्य निर्दोषलक्षणत्वात् । तच्च समाख्यानमनुष्ठानस्मारकादीनां मन्त्रत्वं गमयति । उरुप्रथ खेत्यादयोऽनुष्ठानस्मारकाः, अग्निमीळे पुरोहितमित्यादयः स्तुतिरूपाः । इषेत्वेत्यादयस्वान्ताः । अग्न आयाहि वीतय इत्यादय आमन्त्रणोपेताः । अग्नीदग्नीन्विहरेत्यादयः प्रैषरूपाः । अधःखिदासीदुपरिखिदासीदित्यादयो विचाररूपाः । अम्बे अम्बाल्यम्बिकेनमानयति कश्चनेत्यादयः परिदेवनरूपाः । पृच्छामि त्वा परमन्तं पृथिव्या, इत्यादयः प्रश्नरूपाः । वेदिमाहुः परमन्तं पृथिव्या, इत्यादय उत्तररूपाः, । एवमन्यदप्युदाहार्यं । ईदृशेष्वन्यविजातीयेषु समाख्यानमन्तरेण नान्यः कश्चिदनुगतो धर्म्मो, ऽस्ति यस्य लक्षणमुच्यते, लक्षणस्योपयोगः पूर्व्वाचार्यैर्दर्शितः । ऋषयोऽपि पदार्थानां नान्तं यान्ति पृथक्त्वशः । लक्षणेन तु सिद्धानामन्तं यान्ति विपश्चित इति, तस्मादभियुक्तानां मन्त्रोऽयमिति समाख्यानं लक्षणं अष्टमाधिकरणमारचयति, नास्त्येतद्ब्राह्मणेत्यत्र लक्षणं विद्यते ऽथवा, नाम्नोयन्त वेदभागा इति क्लृप्तेरभावतः । मन्त्रश्च ब्राह्मणञ्चेति द्वौ भागौ तेन मन्त्रता, अथद्ब्राह्मणमित्येतद्ब्रह्मवेद्ब्राह्मणलक्षणं चातु-

मांसेष्विदमाम्नायते एतद्ब्राह्मणान्येव पञ्चहवींषीति, तच्च ब्राह्मणस्य लक्षणं नास्ति, कुतो वेदभागानामियत्तानवधारणेन ब्राह्मणभागेष्वन्यभागेषु च लक्षणस्याव्याप्त्यतिव्याप्तेः प्रेोधयितुमशक्यत्वात्, पूर्वोक्त मन्त्रभाग एकः, भागान्तराणि कानिचित् पूर्वैरुदाहर्त्तुं सङ्गृहीतानि हेतुर्निर्वचनं निन्दा प्रशंसा संशयोविधिः। परक्रिया पुरा कल्पो व्यवधारणकल्पनेति। लेह्यमन्नं क्रियत इति हेतुः। तद्धो दधित्वमिति निर्वचनं। अमेध्या वै माषा इति निन्दा। वायुर्वै क्षेपिष्ठा देवता इति प्रशंसा। तद्यचिकित्स ज्युहवानीश्माहैाषाश्मिति संशयः। यजमानेन सम्मितौदुम्बरी भवतीति विधिः। माषानेव मह्यं पचतीति परक्रतिः। पुरा ब्राह्मणा अभैषुरितिपुराकल्पः। यावतोऽश्वान् प्रतिगृह्णीयात्, तावतो वारुणांश्चतुष्कपालान्निर्वपेदिति त्रिप्रेषावधारणकल्पना। एवमन्यदप्युदाहार्यं। नच हेत्वादीनामन्यतमं ब्राह्मणमिति लक्षणं, मन्त्रेष्वपि हेत्वादिसद्भावात्, इन्दवो वा मृष्णन्तिहीतिहेतुः। उदानिषुर्महीरिति, तस्मादुदकमुच्यत इति निर्वचनं। मोघमन्नं विन्दते अप्रचेता इति निन्दा। अग्निर्मूर्द्धादिव इति प्रशंसा। अधः खिदासीदुपरिखिदासीदिति संशयः। वसन्ताय कपिञ्जलानालभेतेति विधिः। सहस्रमयुतं ददामीति परक्रतिः। यज्ञेन यज्ञमयजन्त देवा इति पुराकल्पः। * इतिकरणवज्जलं ब्राह्मणमितिचेत्, न, इत्यदद इत्ययजथा इत्यपठ इति ब्राह्मणो गायेदित्यस्मिन् ब्राह्मणेन गातव्ये मन्त्रेऽतिव्याप्तेः। इत्याहेत्यनेन वाक्येनोपनिबद्धं ब्राह्मणमितिचेत्, न, राजा चिद्यमभगमित्याह, यो मायात्तं यातुधानेत्याह, ये वा वक्षाः शुचिरसीत्याहेत्यनयोर्मन्त्रयोरतिव्याप्तेः, आख्यायिकारूपं ब्राह्मणमितिचेन्न, यमयमीसंवादसूक्तादावतिव्याप्तेः, तस्मान्नास्ति ब्राह्मणस्य लक्षणमिति ब्रूमः, मन्त्रब्राह्मणरूपौ द्वावेव वेदभागाविति स्वीकारात्, मन्त्रलक्षणस्य पूर्वमभिहितत्वात्, अवशिष्टवेदभागो ब्राह्मणमित्येतल्लक्षणं भविष्यति। तदेतल्लक्षणद्वयं जैमिनिः सूचयामास, तच्चोदकेषु मन्त्राख्या शेषे ब्राह्मणशब्द इति। तच्चोदकेषु तदभिधायकेषु वाक्येषु मन्त्र इति समाख्या सम्प्रदायविद्भिर्व्यवह्रीयते, मन्त्रानधीमह इति। मन्त्रयति-

---

* अत्रविशेषावधारणकल्पनाया विस्तरणं कर्त्तुमुचितं। किन्तु आदर्शे तदभावान्न लिखितं पुस्तकचयेष्वेवमभावः।

रिक्ते भागे तु ब्राह्मणशब्दस्तैर्व्यवहृत इत्यर्थः। ननु ब्रह्मयज्ञप्रकरणे मन्त्रब्राह्मणव्यतिरिक्ता इतिहासादयो भागा आम्नायन्ते, यद्ब्राह्मणानीतिहासान् पुराणानि कल्पान् गाथा नाराशंसीरिति, मैवं, विप्रपरिव्राजकन्यायेन ब्राह्मणाद्यवान्तरभेदानामेवेतिहासादीनां पृथगभिधानात्। देवासुराः संयत्ता आसन्नित्यादय इतिहासाः। इदं वा अग्रेनैव किञ्चिदासीन्नद्योराश्रिरित्यादिकं जगतः प्रागवस्थामुपक्रम्य स्वर्गप्रतिपादकं वाक्यजातं पुराणं। कल्पस्तु आरुणकेतुकचयनप्रकरणे समाम्नायते, इति मन्त्राः, कल्पोऽत ऊर्द्धं, यदि बर्हिं हरेदित्यग्निचयने यमगाथाभिः परिगायतीति विहिता मन्त्रविशेषा गाथाः। मनुष्यवृत्तान्तप्रतिपादका ऋचो नाराशंस्यः। तस्मान्मन्त्रब्राह्मणव्यतिरिक्तभागाभावान्मन्त्रब्राह्मणस्वरूपस्य च लक्षितत्वात्तदुभयात्मकत्वं वेदस्य सुस्थितं। मन्त्रावान्तरविशेषश्च तस्मिन्नेव पादे इत्थमेव विचारितः, ऋक्सामयजुषां लक्षणं साङ्कर्य्यादिति शङ्कते। पादोऽस्यगीतिः प्रश्लिष्टपाठ इत्यस्वसङ्करः। इदमाम्नायते, अग्ने बुध्रिय मन्त्र मे गोपाय यमृषयस्त्रयीविदा विदुः ऋचः सामानि यजूंषीति। त्रीन् वेदान् विदन्तीति त्रिवेदः, त्रिविदां सम्बन्धिनोऽध्येतारस्त्रयीविदः तेच यं मन्त्रभागमृगादिरूपेण त्रिविधमाज्यस्तोपायेति योजना, तत्र त्रिविधानामृक्सामयजुषां व्यवस्थितं लक्षणं नास्ति कुतः, साङ्कर्य्यस्य दुष्परिहरत्वात्, अध्यापकप्रसिद्धेषु ऋग्वेदादिषु पाठतो मन्त्र इति हि लक्षणं वक्तव्यं, तच्च सङ्कीर्णं, देवो वः सवितोत्पुनात्वच्छिद्रेण पवित्रेण वसोः सूर्य्यस्य रश्मिभिरित्ययं मन्त्रो यजुर्व्वेदे सम्मतिपन्नो यजुषां मध्ये पठितः, नच तस्य यजुष्त्वमस्ति तद्ब्राह्मणे सावित्र्यर्चेत्युक्तेन व्यवहृतत्वात्। एतत्सामगायन्नास्त इति प्रतिज्ञाय, किञ्चित् सामयजुर्वेदेगीतं। अच्छितमस्यच्युतमसि, प्राणं शंसितमसीति त्रीणि यजूंषि सामवेदे समाम्नातानि, तथा गीयमानस्य साम्न आश्रयभूता ऋचः सामवेदे समाख्याताः तस्मान्नास्ति मन्त्रलक्षणमितिचेत् न, पादादीनामसङ्कीर्णलक्षणत्वात्। पादेनार्द्धर्चेनचोपेता वृत्तबद्धा मन्त्रा ऋचः, गीतिरूपा मन्त्राः सामानि, वृत्तगीतवर्जितत्वेन प्रश्लिष्टपठिता मन्त्रा यजूंषीत्युक्ते न क्वापि सङ्करः। तदेतत्त्रैविध्यं जैमिनिना सूत्रचयेन लक्षितं, तेषामृग्यत्रार्थवशेन पादव्यवस्था, गीतिषु सामाख्या,

---

* सामाम्नायन्ते कां, सं। * पाठार्थ सां।

शेषे यजुः शब्द इति। एतमेव मन्त्रावान्तरविशेषमुपजीव्य वेदानामृग्वेदो यजुर्वेदः सामवेद इति त्रैविध्यं सम्पन्नं। तेषाञ्च वेदानां सर्वेषामन्यतमस्य वा स्वप्रज्ञानुसारेणाध्ययनमुपनीतेन कर्त्तव्यं। तथाच याज्ञवल्क्यः स्मरति, वेदानधीत्य वेदौ वा वेदं वापि यथाक्रमम्। इति। एकवेदपक्षेऽपि पितृपितामहादिपरम्पराप्राप्तएववेदोऽध्येतव्यः, इत्यभिप्रेत्य स्वाध्यायोऽध्येतव्य, इति स्वशब्द आम्नातः। तच्चाध्ययनं न काम्यं. किन्तु नित्यं; अतएव पुरुषार्थानुशासने सूचितं, वेदाध्ययनं नित्यमनध्ययने पातादिपातित्यञ्चैवमाम्नायते, अपहतपाप्मा स्वाध्यायो वेदपवित्रं वा एतत्तं योऽनुत्सृजत्यभागो वाचि भवत्यभागो नाके तदेषाभ्युक्ता, यस्त्वित्याज सखिविदं सखायं, न तस्य वाच्यपि भागोऽस्ति, यदीं शृणोत्यलकं शृणोति, नहि प्रवेद सुकृतस्य पन्थामिति। तस्मात् स्वाध्यायोऽध्येतव्य इति अध्येतारं पुरुषं तदीयप्रयासाभिज्ञानेन सखिवत् पालयतीति सखिविदेदः; बहुद्रव्यप्रयाससाध्यक्रतुफलस्वाध्ययनमात्रेण सम्पादनं तत्पालनं, तदप्याम्नायते, यं यं क्रतुमधीते, तेन तेनास्येष्टं भवत्यमेर्वायोरादित्यस्य सायुज्यं गच्छतीति। यद्यप्येतद्ब्रह्मयज्ञस्वाध्यायफलं, तथापि ग्रहणार्थाध्ययनमन्तरेण ब्रह्मयज्ञासम्भवात् तदीयफलमपि सम्पद्यते। ईदृशं सखिविदं वेदरूपं स्वसखायं यः * पुमानध्ययनमकृत्वा परित्यजति, तस्य वाच्यपि भाग्यं नास्ति, फले भाग्यं नास्तीति। किमु वक्तव्यं सकलदेवतानां धर्म्मस्य परब्रह्मतत्त्वस्य प्रतिपादकश्चेदमनुचार्य्य परनिन्दान्तकलहहेतुकां लौकिकीं वार्त्तां सर्व्वत्रोच्चारयतः स्पष्ट एव वाचि भाग्याभावः। अतएवाम्नायते नानुध्यायान् बहून् शब्दान् वाचो विग्लापनं हि तदिति; यद्यप्यसौ काव्यनाटकादिकं शृणोति, तथापि व्यर्थकत्वेन तच्छ्रवणं, तेन सुकृतमार्गज्ञानाभावादित्यर्थः। स्मृतिरपि, योऽनधीत्य द्विजो वेदानन्यत्र कुरुते श्रमं, स जीवन्नेव शूद्रत्वमाशु गच्छति सान्वय इति; एवमन्यान्यपि बहूनि वचनान्युदाहर्त्तव्यानि। नन्वधीते वेदे पश्चादध्ययनविध्यर्थं ज्ञानं, ज्ञाने सति पश्चादध्ययने प्रवृत्तिरित्यन्योन्याश्रय इतिचेत्, वाढं,। अतएव गुरुमतानुसारिणः, आचार्य्यकर्त्तृकादध्यापनप्रवृत्तिं माणवकाध्ययनस्य महता प्रयासेन सम्पादयन्ति। मतान्तरानुसारिणस्तु प्रकाशात्मादयोऽध्ययनात् प्रागेव सन्ध्यावन्दनादिविधिज्ञानवत् पित्रादिभ्यो ऽध्ययनविधिज्ञानं वर्णयन्ति।

---

* पुनः कां, सं।

यद्यप्यध्ययनविधिप्रयुक्तिः, यदिवा स्वविधिप्रयुक्तिः, सर्वथाप्युपनीतैरध्येतव्य एव वेदः, तस्य चाध्ययनस्यादृष्टार्थत्वमक्षरग्रहणान्तत्वञ्च पुरुषार्थानुशासने सूचितं। तानि सूत्राणि तद्वृत्तिञ्चोदाहरामः। अध्ययनस्यादृष्टार्थत्वं साधयितुं पूर्वपक्षयति, अदृष्टार्थात्वधीतिर्विहितत्वादिति। दृष्टफलसाधने भोजनादौ विध्यदर्शनादिहितमध्ययनमदृष्टार्थमवगन्तव्यं। अदृष्टविशेषो न श्रुत इतिचेत् तत्राह, घृतकुल्यादयतिदेशः स्वर्गकल्पनञ्चेति। ब्रह्मयज्ञजपाध्ययनार्थवादं नित्याध्ययनेऽतिदिश्य तत्रत्यं घृतकुल्यादिकं रात्रिसत्रन्यायेन फलत्वेन कल्पनीयं। ये त्वर्थवादातिदेशं नेच्छन्ति, तैर्विश्वजिन्न्यायेन स्वर्गः कल्पनीयः। दृष्टफलयोः संस्कारप्राप्त्योः सम्भवे कथमदृष्टकल्पनेत्यत आह, अयुक्तो संस्कारप्राप्ती इति। संस्कृतस्याध्यायस्य क्वचित् क्रतौ विनियोगादर्शनात् प्राप्तेः स्वयमपुरुषार्थत्वाच्चेत्यर्थः। स्वाध्यायप्राप्तिरर्थप्रमितिहेतुतया पुरुषार्थ इत्याशङ्क्य विषनिर्हरणादिकार्थविनियुक्तमन्त्रवदध्ययनाङ्गतया विनियुक्तानां ज्योतिष्टोमादिवाक्यानां न स्वार्थे प्रामाण्यमित्याह, अन्याङ्गं नार्थप्रमायकमिति। अध्ययनविधायकन्तु वाक्यं स्वविहिताध्ययनस्यैवाङ्गमिति कृत्वा स्वार्थे प्रामाण्यमित्याह, अध्ययनवाक्यमनन्याङ्गमिति। नन्वेवमदृष्टार्थत्वे कर्मकारकभूतस्वाध्यायगतफलाभावादध्येतव्य इति कर्मवाची तव्यप्रत्ययो विरुध्येतेत्यत आह, सक्तुवत् करणपरिणाम इति। * सक्तुभिर्जुहोतीत्यत्र कर्मत्वेन प्रधानभूतान् सक्तूनुद्दिश्य होमसंस्कारविधाने प्रतीयमानेऽपि होमसंस्कृतानां भस्मीभूतानां सक्तूनामन्यत्र विनियोगाभावात् कर्मप्राधान्यं हित्वा सक्तुभिर्जुहोतीति करणपरिणामः कृतः। एवमत्रापि कर्मभूतयोः संस्कारप्राप्त्योरसम्भवात्, स्वाध्यायेनाधीयीतेति वाक्यपरिणामः कर्त्तव्यः। इदानीं दृष्टफले सत्यदृष्टफलं न कल्प्यमिति सिद्धान्तयति, दृष्टे तु नादृष्टमिति। किन्तद्दृष्टफलमिति तदाह, दृष्टौ प्राप्तसंस्कारावितिः। अक्षरप्राप्तेः परम्परया पुरुषार्थमाह, प्राप्यार्थबोध इति, जायत इति शेषः। नच भोजनादिवदन्वयव्यतिरेकसिद्धत्वादविधिवैयर्थ्यमिति शङ्क्यं। अवघातादिवन्नियमादृष्टाय विध्युपपत्तेरित्याह, विधिर्नियत्या इति। यत्तूक्तं संस्कृतस्य विनियोगादर्शनान्न संस्कार इति तत्राह, संस्कारसिद्धिः क्रत्वध्ययनविधिद्वयोपादानादिति। क्रतुविधयो

---

* सक्तून् सं, कां।

हि विषयावबोधमपेक्षमाणास्तदवबोधे स्वाध्याये विनियुज्यन्ते, अध्ययनविधिश्च लिखितपाठादिव्यावृत्त्याध्ययनसंस्कृतत्वं स्वाध्यायस्य गमयति, अत उभयोपादानात्तत्सिद्धिः। ननु संस्कारो नामादृष्टातिशयः-सच्च न स्वाध्यायगतः. तथप्रत्ययेन स्वपदोपात्तप्रकृत्यर्थीभूताध्यय, नोपरक्तायाः * भावनायाः अपूर्व्वाभिधानात्, ततः कथं स्वाध्यायस्य संस्कृतत्वमिति, तत्राह, तथ्यः कर्म्मवाचयदृष्टवाचीति। तच्च तथ्यप्रत्ययस्य कर्म्माभिधायितया कर्म्मकारकस्य स्वाध्यायस्य तथ्यप्रत्ययार्थं प्रतिकृत्यर्थादध्ययनादपि प्रत्यासन्नत्वात् स्वाध्यायगतमेवापूर्व्वं तथ्यप्रत्ययो वक्ति, अपूर्वस्य धात्वर्थजन्यत्वनियमेऽपि तदुपरक्तत्वानियमादिति भावः। यच्चोक्तमन्याङ्गं नार्थप्रमापकमिति, तदसत्, यतो मन्त्राणां स्वतन्त्रादृष्टशेषाणां तथात्वं युज्यते, इहतु स्वाध्यायाश्रितमदृष्टं, तस्य च स्वाध्यायगताच्चरसामर्थ्यसिद्धार्थावबोधे फले सति फलान्तरकल्पनायोगात् प्रामाण्यस्योपबृंहकमेवादृष्टं नतु प्रतिबन्धकमित्याह, स्वतन्त्रादृष्टशेषत्वान्न स्वार्थप्रमा प्रतिबध्यत इति। सक्तुन्यायेन कर्म्मकारकप्राधान्ये परित्यक्ते स्वतन्त्रादृष्टमेवाचापि स्यादित्यत आह, यथा श्रुतोपपत्तेर्न सक्तुन्याय इति। सक्तुषु गत्यभावात् श्रुतं परित्यज्याश्रुतं कल्प्यतां नाम, नेह तद्युक्तं प्रदर्शितत्वादित्यर्थः। इत्यमध्ययनविधेर्दृष्टार्थत्वं प्रसाध्यार्थावबोधपर्य्यन्ततां निराकर्त्तुं पूर्व्वपक्षयति, वैधमर्थनिर्णयं भट्टगुरुर्विधेः पुमर्थावसानादिति। सर्वत्र विधेः पुरुषार्थपर्य्यवसायित्वनियमादत्रापि पुरुषार्थभूतं फलवदर्थनिश्चयमध्ययनविधिप्रयुक्तं भट्टगुरुर्मन्यते। ननु सकृदध्ययनादावृत्तिसहितादर्थनिश्चयो नोपलभ्यत इत्याशङ्क्य, तथा सति तस्मिन् सिद्धेऽयं स्वाध्यायविधिरर्थनिश्चयहेतुं विचारं कल्पयिष्यतीत्याह, सविचारमाक्षिपेदिति। ननु स्वाध्यायविधेय तदुपकारिणोरेव विधिः प्रयोजक इति सर्व्वत्र नियमः। तथा सत्येतादृशं विचारं कथमत्राध्ययनविधिराक्षेप्स्यतीत्यत आह, अविधेयानुपकार्य्यत्वेपेऽवघातावृत्तिवदिति, व्रीहीन वहन्तीत्यत्रावघातमात्रं विधेयं नतु तदावृत्तिः, तस्या अधात्वर्थत्वान्नापि साविधेयोपकारिणी, अन्तरेणावृत्तिं सकृन्मुषलमात्रादवघातसिद्धेः, तथापि तण्डुलनिष्पत्तिफलसिद्धये स विधिरावृत्तौ यद्वदाक्षेप स्तद्वत् प्रकृतेऽप्यपगन्तव्यं। ननु वेदमात्राध्यायिनोऽर्थावबोधानुदयेऽपि

---

* उपरक्तापूर्व्वाभिधानात् ख, क्रां।

व्याकरणाद्यङ्गसहितवेदाध्यायिनः तदुदयसद्भावात्, तं प्रति अर्थविचारविधिं न कल्प्येदित्याशङ्क्यार्थावबोधपरिहारापेक्षित एव विचार इत्याह, साङ्गाध्ययनात्तद्भावो विचारो विरोधापनुदिति। सिद्धान्तयति प्राप्तेस्तु गवादिवत् पुमर्थत्वाद्विधिस्तदन्त इति। यथा फलभूतस्य क्षीरादेर्हेतवो गवादयोऽपि पुरुषैरर्थ्यन्ते, तथा फलवदर्थावबोधहेतोरुत्तरप्राप्तेरपि पुरुषार्थत्वादध्ययनविधिरुत्तरप्राप्यवसानोऽवगन्तव्यः। नन्वुत्तरप्राप्तेः पुरुषार्थत्वं फलवदर्थावबोधप्रयुक्तं चेत्, तर्हि तद्बोधस्य मुख्यपुरुषार्थत्वात्, बोधान्त एव विधिः किं न स्यादित्यत आह, फलवद्बोधान्तत्वे अध्ययनकार्त्स्न्यमिति। बोधस्य हि फलं कर्मानुष्ठानं, तच्च सति यस्य ब्राह्मणादेर्यस्मिन् बृहस्पतिसवादावधिकारः, तस्य तद्वाक्यनाशाध्ययनं स्यात्, नतु राजसूयाद्यर्थवाक्याध्ययनं, तत्र प्रवृत्त्यादिफलाभावात्, स्वपक्षेतु नायं दोष इत्याह, छात्रप्राप्तिर्जपार्थेति। नचावबोधकत्वे विधेर्बोधकत्वाभावेनार्थावबोध एव न सिद्धेदिति शङ्कनीयं, प्रमाणस्य प्रमेयबोधत्वस्वाभाव्यात्, लौकिकानवाक्यानामन्यतरेणैव * विधिबोधकत्वदर्शनादित्याह, लोकवत्तेजो बोध इति। ननु बोधस्य विधिफलत्वे बोधकाममुद्दिश्य विधातुं शक्यत्वात् सुलभोऽधिकारी स्यादित्याशङ्क्य प्राप्तिपक्षेऽपि, प्राप्तिकाम उपनीताष्टवर्षब्राह्मणोऽधिकारी सुलभ एवेति परिहारं स्पष्टत्वादुपेक्ष्य बोधस्य काम्यत्वं दूषयति, सोऽकाम्यः प्राग्बोधभानाभानयोरिति। बोधस्याग्निहोत्रादिलक्षणवेदार्थस्याध्ययनात् प्राक् सन्ध्योपासनादिवत् पित्राद्युपदेशत एव भाने सिद्धत्वादेव सोऽर्थबोधो न काम्यः। अभाने कामयितुमशक्यः, ज्ञात एव विषये कामना नियमात् ननु सामान्यतो ज्ञाते विशेषतो बुभुत्सा सम्भवति, यद्वा विशेषतोऽपि पित्राद्युपदेशादवगते सति, औपदेशिकज्ञानस्य प्रामाण्यनिर्णयाय पुनर्बोधकामनायुक्तैवेत्याशङ्क्यैवमप्यर्थावबोधमुद्दिश्य स्वाध्ययनविधानं न सम्भवति, इत्याह उद्देश्ययोगादिति। अग्निहोत्रादिविशेषज्ञानानां न तावदेकबुद्ध्या विशेषाकारेणोद्देश्यः सम्भवति, अनन्तत्वात् सामान्याकारेणोद्देश्ये सामान्यमेव विधिफलं स्यान्नतु ज्ञानविशेषः, ततो नोद्देश्यो युक्तः। नन्वर्थावबोधमुद्दिश्योच्चारणाभावे वेदस्य स्वार्थे तात्पर्यं न स्यादित्याशङ्क्य, उपक्रमोपसंहारावभ्यासोऽपूर्वताफलं। अर्थवादो-

---

* मन्त्रेणैव कां, सं।

पपत्तीच लिङ्गं तात्पर्य्यनिर्णये, उपक्रमादिलिङ्गगम्यं तात्पर्य्यं शब्द-बलादेव सिद्धतीत्याह, तात्पर्य्यं शब्दादिति । तर्ह्यर्थज्ञानमुद्दिश्य शब्दोच्चारणं * व्यर्थं स्यादितिचेत्, न, पुरुषसम्बन्धश्रुतदोषाख्यप्रति-बन्धपरिहारार्थत्वादित्याह, उद्दिश्योच्चारणं दोषं * हन्ति लोक इति। नन्वध्ययनविधिर्बोधान्तत्वाभावे विचारशास्त्रं न प्रवर्त्तेत प्रयोज-नाभावादित्याशङ्क्याह, विचार उत्तरविधिप्रयुक्त उपपद्यत, इति क्रतुबोधविधयः साङ्गवेदाध्ययनादापात प्रतिपन्ना विरोधपरिहा-रेण प्रतिष्ठितं निर्णयज्ञानमन्तरेणानुष्ठापयितुमशक्नुवन्तः, तन्निर्णयाय क्रतुविचारं प्रयोजयन्ति, श्रवणविधिस्तु साक्षादेव ब्रह्मविचारं विधत्ते। एवञ्च सति श्रवणविधेः स्वविधेयप्रयोजकत्वं क्रतुविधीनाञ्च विधेयोपकारित्वप्रयोजकत्वं, इत्युपपद्यतेतरां, अध्ययनविधिप्रयुक्तिप-क्षेतु तद्विधेः क्रतुद्वारा स्वर्गसिद्धिपर्य्यन्तत्वात् क्रत्वनुष्ठानस्यापि तत्-प्रयुक्तौ क्रतुनिधिवैयर्थ्यमापद्येत। नन्वध्ययनविधे स्त्रैवर्णिकमात्रं प्रतिनित्यत्वात्तत्प्रयुक्तौ विचारस्यापि तल्लभ्येत, नान्यथेतिचेत् क्रतुवि-चारस्य त्रैवर्णिकमात्रेऽपि नित्यत्वसिद्धेः किं वा ब्रह्मविचारस्य, तत्रा-द्योऽस्मन्मतेऽपि सम इत्याह, अतो नित्यक्रतुविचारस्त्रैवर्णिकमात्रस्येति, यतोऽकरणे प्रत्यवायश्रवणात् क्रतवस्त्रैवर्णिकानां नित्या अत इत्यर्थः। द्वितीयोऽनिष्ट इत्याह, ब्रह्मविचारः पुनः परमहंसस्यैवेति नित्यो ऽनुषङ्ग इति । ननूक्तरीत्याध्ययनस्याक्षरग्रहणान्तत्वे ऽर्थज्ञानमवि-हितं स्यात् मैवं, वाक्यान्तरेण तद्विधानात्, ब्राह्मणेन निष्कारणो धर्म्मः षडङ्गो वेदोऽध्येयो ज्ञेयश्चेति तद्विधिः, तत्र निष्कारणशब्देनाध्ययन-ज्ञानयोः काम्यत्वं निवार्य्यते। अर्थज्ञाने पुरुषप्रवृत्तिकरं वचनद्वयं शाखान्तरगतं निरुक्तकारो यास्क एवमुदाजहार, अथापि ज्ञानप्र-शंसा भवत्यज्ञाननिन्दा च, स्थाणुरयं भारहारः किलाभूदधीत्य वेदं न विजानाति योऽर्थं; योऽर्थज्ञ इद्द * सकलं भद्रमश्नुते, नाकमेति ज्ञानविधूतपाप्मा यदृग्गृहीतमविज्ञातं निगदेनैव शब्द्यते अनग्नाविव शुष्कैधो न तज्ज्वलति कर्हिचिदिति। अस्मिन्मन्त्रद्वये योऽर्थज्ञ इत्य-नेनैवार्द्धेन वेदार्थज्ञानं प्रशस्यते, इतरेणार्द्धेनयेन ज्ञानराहित्यं निन्द्यते। यो वेदार्थं जानाति, सोऽयमिहलोके सकलं श्रेयः प्राप्नोति, तथा तेन ज्ञानेन प्रापञ्चये सति मृतः स्वर्गं प्राप्नोति। तदेतदैहिकामुष्मिकञ्च

---

* लोके कां, सं। * दोषघ्नं वैलोके, कां, सं। * इत् कां, सं।

ज्ञानफलं तैत्तिरीया मन्त्रोदाहरणेन तदीयतात्पर्य्याभिधायिब्राह्मणेन च स्पष्टीचक्रुः, तदेषाभ्युक्ता ये अर्व्वाङ्तवो पुराणे वेदं विदांसमभितो वदन्त्यादित्यमेव ते परिवदन्ति सर्व्वे अग्निं द्वितीयं वृतीयञ्च हंसमिति। यावती वै देवतास्ताः सर्व्वा वेदविदि ब्राह्मणे वसन्ति, तस्माद्ब्राह्मणेभ्यो वेदविद्भ्यो दिवेदिवे नमस्कुर्य्यान्नाश्लीलं कीर्त्तयेदेता एव देवताः प्रीणातीति। वेदविद्यानर्थाभिज्ञः पुरुषः, सच द्विविधः, अर्वाचीनकाले समुत्पन्नश्चतुर्दशविद्यास्थानकुशलः कश्चिदुपाध्यायः, पुरातनकाले समुत्पन्नो व्यासादिश्च, तमेतमुभयविधं विद्वांसं विद्यामदधनमदकुलमदोपेताः पण्डितं मन्या ये पुरुषा, अभितो विद्यासु दूषयन्ति, ते सर्वेऽप्यादित्यमेव प्रथमं दूषयन्ति, आदित्यापेक्षया द्वितीयमग्निं दूषयन्ति, तदुभयापेक्षया तृतीयं हंसं दूषयन्ति, हन्ति, सदा गच्छतीति हंसो वायुः, अग्न्यादिरूपत्वं वेदविदि आम्नातं, अग्नेर्वायोरादित्यस्य सायुज्यं गच्छतीति न केवलमेतद्देवतात्वं। किन्तु सर्व्वापि देवता वेदविदि निवसन्ति, तस्माद्ब्राह्मणान् वेदविदो दृष्ट्वा स्मृत्वा वा प्रतिदिनं नमस्कुर्य्यान्नतु तस्मिन् विद्यमानमपि दोषं कीर्त्तयेत्। एवं सति तत्तन्मन्त्रार्थभूताः सर्व्वा अपि देवता वेदार्थविदा स्मर्य्यमाणतया तदीयहृदयेऽवस्थिता अयं नमस्कर्त्ता तोषयति। नचैतदध्ययनस्यैव फलमिति शङ्कनीयं, विद्वांसमित्याम्नातत्वात्, अन्यथा वेदमधीयानमित्याम्नायेत, तस्मात् सर्वदेवताबुद्ध्या प्राणिभिः पूज्यस्य वेदार्थविदो लोकद्वयेऽपि श्रेयः प्राप्तिरुपपद्यते। यस्तु वेदमधीत्यार्थं न विजानाति, सोऽयं पुमान् भारमेव हरति, धारयति, स्थाणुरिति दृष्टान्तः छिन्नशाखं शुष्कमूलं वृक्षःस्थाणुशब्देनोच्यते; सच यथेन्धनार्थमुपयुज्यते नतु पुष्पफलार्थं, तथा केवलपाठकस्य ब्राह्मत्वं न भवतीत्येतावदेव नह्यनुष्ठानं स्वर्गादिफलसिद्धिर्व्वास्ति। किलेत्यनेन लोकप्रसिद्धिं द्योत्यते लोकेऽपि पाठकस्य यावन्ति धनानि पूजा च, ततोऽप्यधिका विदुषि दृश्यते। किञ्च यद्वेदवाक्यमाचार्य्याद्गृहीतमर्थज्ञानरहितं पाठरूपेणैव पुनः पुनरुच्चार्य्यते, तत् कदाचिदपि न ज्वलति, स्वर्गं न प्रकाशयति, यथा अग्निरहितप्रदेशे प्रक्षिप्तं शुष्ककाष्ठं न ज्वलति तद्वत्। तथा सति तस्य वाक्यस्य वेदत्वमेव मुख्यं नस्यात् अलौकिकं पुरुषार्थोपायं वेत्यनेनेति वेदशब्दनिर्व्वचनं, तथा चोक्तं, प्रत्यक्षेणानुमित्याद्या यस्तूपायो न बुध्यते। एतं विदन्ति वेदेन, तस्माद्वेदस्य वेदता। अतो मुख्यवेदत्वसिद्धये ज्ञातव्य एव तदर्थः। किञ्चात्र यास्केन काचिदन्याप्युपदा-

ह्रता, उतत्वः पश्यन्न ददर्श वाचमुतत्वः शृण्वन्न शृणोत्येनां। उतोतस्मैतन्वं विसस्रे जायेवपत्य उशती सुवासा इति। अस्य पूर्वार्द्धस्य तात्पर्य्यं स एव दर्शयति, अप्येकः पश्यन्न पश्यति, वाचमपिच शृण्वन् न शृणोत्येवमित्यविद्वांसमाहार्द्धमिति। अस्यार्थः, यः पुमानर्थं न वेत्ति, तं प्रति पूर्व्वार्द्धेन मन्त्रो ब्रूते, एकः पुरुषः पाठमात्रपर्य्यवसितः वेदरूपां वाचं पश्यन्नपि न सम्यक् पश्यति, एकवचनबहुवचनादिविवेकाभावे पाठशुद्धेरप्येवमेव कर्त्तुमशक्यत्वात्, वायुमेव स्वेन भागधेयेनोपधावति, स एवैनं भूतिं गमयति, आदित्यानेव स्वेन भागधेयेनोपधावति, त एवैनं भूतिं गमयन्तीत्यादावव्युत्पन्नः कथं पाठं निश्चिनुयात्। अन्यः कश्चिदर्थज्ञानाय व्याकरणाद्यङ्गानि शृण्वन्नपि मीमांसाराहित्यादेनां वेदरूपां वाचं न सम्यक् शृणोति। यावतोऽश्वान् प्रतिगृह्णीयात्, तावतो वारुणां चतुष्कपालान्निर्व्वपेदित्यत्र व्याकरणमात्रेण प्रतियहीतुरिष्टिः प्रतीयते, मीमांसायान्तु न्यायेन दातुरिति निर्णीतं, तस्मादुभयविधमप्यविद्वांसं प्रत्येवमाहेति। तृतीयपादतात्पर्य्यं दर्शयति, अप्येकस्मै तन्वं विसस्र, इति स्वमात्मानं विवृणुते ज्ञानं प्रकाशनमर्थस्याह अनया वाचा इति। अस्यार्थः, अपि शब्दपर्य्याय उतशब्दः, सच पूर्वोक्तानभिज्ञानवैलक्षण्येनात्र प्रयुक्तः निपातानामनेकार्थत्वात्, यः पुमान् व्याकरणाद्यङ्गैः स्वशब्दार्थं मीमांसया तात्पर्य्यञ्च शोधयितुं प्रवृत्तस्तस्मा एकस्मै वेदः स्वकीयान्तनुं विसस्रे, स्वमित्यादिकं पदव्याख्यानं, ज्ञानमित्यादिकं तात्पर्य्यव्याख्यानं वेदार्थप्रकाशनक्षमं सम्यक् ज्ञानमनया तृतीयपादरूपया वाचा मन्त्र आहेति। चतुर्थपादतात्पर्य्यं दर्शयति, उपमोत्तमया वाचा जायेवपत्ये कामयमाना सुवासा ऋतुकालेषु सुवासाः कल्याणवासाः कामयमाना ऋतुकालेषु यथा स एनां पश्यति, स शृणोतीति तात्पर्य्यार्थश्चार्थश्च प्रशंसेति। अस्यार्थः उत्तमया चतुर्थपादरूपया वाचा तृतीयपादार्थस्योपमोच्यते, उशतीत्येतस्य व्याख्यानं कामयमानेति। यद्यप्यङ्गि गृहकृत्यवेलायां मलिनवासाः, तथापि सम्भोगकालेषु कल्याणवासा भवति, तच्च हेतुः कामयमाना ऋतुकालेष्विति, यथा सपतिरेनां जायां साकल्येनादरयुक्तः पश्यति, किञ्च तयोक्तमर्थं हि बुद्ध्या शृणोति, तथाऽयं चतुर्दशविद्यास्थानपरिशीलनोपेतः पुरुषो वेदार्थरहस्यं सम्यक् पश्यति, वेदोक्तञ्च धर्म्मं ब्रह्मरूपञ्चार्थं हितबुद्ध्या स्वीकरोति, सेयमुक्तवेदार्थाभिज्ञस्य प्रशंसेति। पुनरप्युत्तरं याख्यं उदाजहार, तस्योत्तराभूयसेनिर्वचनाय, उतत्वं सख्ये स्थिरपीतमा-

ऊर्जमेनं हिन्वन्त्यपि वाजिनेषु। अधेन्वाचरति माययैषवाचं शुश्रुवां अफलामपुष्पामिति। अयमर्थः पूर्वोदाहृताया उतत्वः पश्यन्नित्यादिकाया ऋचोऽनन्तरमेषाम्नाता काचिदृक्, तस्य पूर्वोक्तमन्त्रार्थस्य भूयसे निर्वचनाय सम्पद्यते, तमर्थमतिशयेन प्रतिपादयितुं प्रभवति, कथमितिचेत्, तदुच्यते अपिचैकं चतुर्दशविद्यास्थानकुशलं पुरुषं वेदरूपाया वाचः सख्ये स्थित्वा, स्वैर्यया वेदोक्तार्थामृतपानयुक्तमाऽहुः, अभिज्ञाः कथयन्ति, सखिविदं सखायमिति मन्त्रे वेदस्य सखित्वमुदाहृतं, यद्वा स्वर्गलोके देवानां सख्ये स्थित्वातिशयेन पीतामृतमाऽहुः, वाचामिना ईश्वराः सभासु प्रगल्भा वा वाजिनास्तेषु मध्ये ऽप्येनं वेदार्थकुशलं चोदयितुं न हिन्वन्ति, न कोऽपि प्राप्नुवन्ति, तेन सह विवदितुमसमर्थत्वात्, यस्त्वन्यः पाठमात्रपरः, पुष्पफलरहितां वाचं शुश्रुवान् भवति, पूर्वकाण्डोक्तस्य धर्मस्य ज्ञानं पुष्पं, उत्तरकाण्डोक्तस्य ब्रह्मणो ज्ञानं फलं। यथा लोके पुष्पं फलस्योत्पादकं, तथा वेदानुवचनादिधर्मज्ञानं अनुष्ठानद्वारा फलात्मकब्रह्मज्ञानेच्छाजनयति, तमेवं वेदानुवचनेन ब्राह्मणा विविदिषन्ति यज्ञेन दानेन तपसा नासत्येनेति श्रुतेः। यथा च फलं तृप्तिहेतुः, तथा ब्रह्मज्ञानं कृतकृत्यत्वहेतुः, यत्पूर्णानन्दैकबोधस्वरूपब्रह्माहमस्मीति कृतकृत्यो भवतीति श्रुतेः। तादृशपुष्पफलरहितवेदपाठकः सएष पुमान् अधेन्वा मायया सह चरति, नवप्रसूतिका क्षीरदोग्ध्री गौः प्रीतिहेतुत्वाद्धिनोतीति व्युत्पत्त्या धेनुरित्युच्यते, पाठमात्रपरम्प्रति वेदरूपा वाक् धर्मब्रह्मज्ञानरूपं क्षीरं न दोग्ध्रीत्यधेनुः, अतएवासौ माया कपटरूपा ऐन्द्रजालिकनिर्मितगोसदृशगोरूपत्वात् तथा मायया सह चरन्नयं परमपुरुषार्थो न लभ्यत इत्यर्थः, इत्थं यास्केन ज्ञानस्तुत्यज्ञाननिन्दोदाहरणस्य प्रपञ्चितत्वात्। यच्च स्तूयते तद्विधीयत इति न्यायेनाध्ययनवदर्थज्ञानस्यापि विधिरप्युपगन्तव्यः, किञ्च नक्षत्रेष्टिकाण्डे प्रतीष्टिफलवाक्यं यागतद्वेदनयोः समानमेवाम्नायते, यथाहवा अग्निर्देवानामन्नादः, एवं ह्वा एष मनुष्याणां भवति, य एतेन हविषा यजते, यउचैतदेवं वेदेति, अतो यागवत् फलाय स्ववेदनमपि विधीयते, अनेन न्यायेन सर्वेष्वपि ब्राह्मणेषु वेदनविधयो द्रष्टव्याः। ननु विद्याप्रशंसेति सूत्रे वेदनफलानां प्रशंसारूपत्वं जैमिनिना सूचितमितिचेत्, अस्तु नाम विद्यमानेनापि फलेन प्रशंसितुं शक्यत्वात्

दर्शयागस्य पूर्णमासयागस्य * चातिपन्नस्य प्रायश्चित्तरूपां वैश्वानरेष्टिं विधातुं विद्यमानेनैव स्वर्गफलेन स्तुतिः क्रियते, सुवर्गाय लोकाय दर्शपौर्णमासाविज्येते, इत्येतच्चाचार्यैर्ब्रह्मज्ञानफलवाक्यस्य स्वार्थेऽपि तात्पर्यं दर्शयितुमुदाहृतं। इच्छाम्येवार्थवादत्वं वचसो ऽन्यपरत्वतः। यथा वस्त्वभिधायित्वान्नत्वभूतार्थवादता। इज्यते स्वर्गलोकाय दर्शादर्शौ यथा तथा। नच भूतार्थवादत्वं यावच्छ्रोका श्रुतिर्यथेति। नच वेदनमात्रेण फलसिद्धावनुष्ठानवैयर्थ्यमिति शङ्कनीयं। फलभूयस्त्वेन परिच्छेतत्वादुदाहृतं चात्र जैमिनिसूत्रं, फलस्य कर्म्मनिष्पत्तेस्तेषां लोकवत् परिमाणतः सारतो वा फलविशेषः स्यादिति। एतच्चास्माभिः, तरति ब्रह्महत्यां योऽश्वमेधेन यजते, य उचैनमेवं वेदेत्युदाहरणेन व्याख्यातं। छन्दोगाश्च केवलादनुष्ठानाद्विधानसहिते ऽनुष्ठाने फलातिशयमामनन्ति। तेनासौ कुरुते, यश्चैतदेवं वेद, यश्चन वेद, नाना तु विद्या चाविद्या च, यदेव विद्यया करोति, श्रद्धयोपनिषदा, तदेव वीर्य्यवत्तरं भवतीति। यद्यप्यङ्गावबोधोपास्तिरत्र विद्याशब्देन विवक्षिता, तथापि न्यायः सर्व्वासपि विद्यासु समानः, कुतस्त्वयि वेदने तवैषा भक्तिः, इतिचेत्, कुतो वा तावान् तवैषोऽत्र द्वेषः, प्रशंसात्वस्माभिर्भूयसी दर्शिता, निन्दान्तु न क्वाप्युपलभामहे, किन्तु कर्म्मजन्यमपूर्व्वं यथा मरणादूर्द्धं जीवेन सह गच्छति, तथा विद्याजन्यमप्यपूर्व्वं गच्छति। तथाच वाजसनेयिन आमनन्ति, ते विद्याकर्म्मणी समन्वारभते पूर्व्वप्रज्ञाश्चेति। तस्मादध्ययनवदर्थज्ञानस्यापि विहितत्वादर्थज्ञानाय वेदो व्याख्यातव्यः। विषयप्रयोजनसम्बन्धाधिकारिज्ञानमन्तरेण श्रोतृप्रवृत्त्यभावात्, विषयादयो निरूप्यन्ते। व्याख्यानस्य व्याख्येयो वेदो विषयः तदर्थज्ञानं प्रयोजनं, व्याख्यानव्याख्येयभावः सम्बन्धः, ज्ञानार्थी चाधिकारी। यद्यप्येतावत् प्रसिद्धं, तथापि वेदस्य विषयाद्यभावे व्याख्यानस्यापि परमविषयादिकं न स्यात्; अतो वेदस्य तच्चतुष्टयमुच्यते, वेदेषु पूर्व्वोत्तरकाण्डयोः क्रमेण धर्म्मब्रह्मणी विषयस्तयोरनन्यलभ्यत्वात्। तथाच पुरुषार्थानुशासने सूचितं, धर्म्मब्रह्मणी वेदैकवेद्ये इति। जैमिनीये च द्वितीये सूत्रे चोदनैव धर्म्मे प्रमाणं, चोदनाप्रमाणमेवेति नियमद्वयं सम्प्रदायविद्भिरभिहितं, चोदनैवेत्यमुमर्थमुपपादयितुं चतुर्थसूत्रे प्रत्यक्षविषयत्वं धर्म्मस्य निराकृतं, प्रत्यक्ष-

* अतिपाते सति (कां सं)।

मनिमित्तं विद्यमानोपलम्भनत्वादिति । अनुष्ठानाद्ऊर्द्ध्वमुत्पत्स्यमानस्य धर्म्मस्य पूर्व्वमविद्यमानत्वान्न प्रत्यक्षयोग्यतास्ति, उत्तरकालेऽपि रूपादिराहित्यान्नेन्द्रियैरवगम्यते, अतएवादृष्टमिति सर्व्वैरभिधीयते, लिङ्गराहित्यान्नानुमानविषयत्वमप्यस्ति । सुखदुःखे धर्म्माधर्म्मयोर्लिङ्गमिति चेत्, वाढं, अयमपि लिङ्गलिङ्गिभावो वेदेनैवावगम्यते; ततश्चोदनैव धर्म्मे प्रमाणं । वैयासिकस्य तृतीयसूत्रस्य द्वितीयवर्णके ब्रह्मणः सिद्धवस्तुनोऽपि शास्त्रैकविषयत्वं भाष्यकृद्भिर्व्याख्यातं, शास्त्रादेव प्रमाणाज्जगतो जन्मादिकारणं ब्रह्माधिगम्यत इत्यभिप्राय इति । श्रुतिश्च भवति, नावेदविन्मनुते तं बृहन्तमिति । तच्चोपपत्तिः पूर्वाचार्य्यैरेवमुदीरिता, रूपलिङ्गादिराहित्यान्न मानान्तरयोग्यतेति, तस्मादनन्यलभ्यत्वादस्ति धर्म्मब्रह्मणोर्वेदविषयत्वं, तदुभयज्ञानं वेदस्य साक्षात् प्रयोजनं । नच तस्य ज्ञानस्य सप्तद्वीपावसुमती राजासौ गच्छति, इत्यादिज्ञानवदपुरुषार्थपर्य्यवसायित्वं शङ्कनीयं, धर्म्मप्रयुक्तस्य पुरुषार्थस्य श्रूयमानत्वात् । धर्म्मो विश्वस्य जगतः प्रतिष्ठा, लोके धर्म्मिष्ठं प्रजा उपसर्पन्ति, धर्म्मेण पापमपनुदति, धर्म्मे सर्वं प्रतिष्ठितं, तस्माद्धर्म्मं परमं वदन्तीति । उद्दण्डस्य राज्ञो नियामकत्वादिवदमानयोः पुरुषयोर्मध्ये दुर्ब्बलस्यापि राजसाहाय्यवज्जयहेतुत्वाच्च धर्म्मः पुरुषार्थः । तथाच वाजसनेयिनः सृष्टिप्रकरणे समामनन्ति, तच्छ्रेयोरूपमत्यसृजत धर्म्मं, तदेतत् क्षत्रस्य क्षत्रं, यद्धर्म्मः, तस्माद्धर्म्मात् परं नास्त्यथोऽबलीयान् बलीयांसमाश्रयते, धर्म्मेण यथा राज्ञैवमिति । ब्रह्मविदाप्नोति परं, ब्रह्मविद्ब्रह्मैव भवति, तरति शोकमात्मविदित्यादिषु श्रुतिषु ब्रह्मज्ञानप्रयुक्तः पुरुषार्थः प्रसिद्धः । तदुभयज्ञानार्थी वेदेऽधिकारी, सच चैवर्णिकः पुरुषः । स्त्रीशूद्रयोस्तु सत्यामपि ज्ञानापेक्षायां उपनयनाभावेनाध्ययनराहित्यादेवेऽधिकारः प्रतिरुद्धः; धर्म्मब्रह्मज्ञानन्तु पुराणादिमुखेनोपपद्यते; तस्मात् चैवर्णिकपुरुषाणां वेदमुखेनार्थज्ञानेऽधिकारः । सम्बन्धस्तु वेदस्य धर्म्मब्रह्मभ्यां सह प्रतिपाद्यप्रतिपादकभावः, तदीयज्ञानेन सह जन्यजनकभावः, चैवर्णिकपुरुषैः सहोपकार्य्योपकारकभावः, तदेवं विषयाद्यनुबन्धचतुष्टयमवगत्य समाहितधियः श्रोतारो वेदव्याख्याने प्रवर्त्तन्तां । अतिगभीरस्य वेदस्यार्थमवबोधयितुं शिक्षादीनि षडङ्गानि प्रवृत्तानि; अतएव तेषामपरविद्यारूपत्वं मुण्डकोपनिषद्याथर्व्वणिका आमनन्ति, द्वे विद्ये वेदितव्ये इति ह स्म वै यद्ब्रह्मविदो वदन्ति परा चैवापराच, तत्रापरा ऋग्वेदो यजुर्वेदः सामवेदोऽथर्व्ववेदः, शिक्षा, कल्पो, व्याकरणं, निरुक्तं,

छन्दो, ज्योतिषमिति। अथ परा, यया तदक्षरमधिगम्यत इति साधन-भूतधर्म्मज्ञानहेतुत्वात् षडङ्गसहितानां कर्म्मकाण्डानामपरविद्यात्वं पर-मपुरुषार्थभूतब्रह्मज्ञानहेतुत्वादुपनिषदां परविद्यात्वं। वर्णस्वराद्यु-च्चारणप्रकारो यत्रोपदिश्यते, सा शिक्षा। तथाच तैत्तिरीया उपनि-षदारम्भे समामनन्ति, शिक्षां व्याख्यास्यामः, वर्णः स्वरः, मात्रा बलं, साम सन्तानः, इत्युक्तः शिक्षाध्याय इति। वर्णोऽकारादिः सचाङ्गभूत-शिक्षाग्रन्थे स्पष्टमुदीरितः, त्रिषष्टिश्चतुःषष्टिर्वा स्वराः स्वायम्भुवे मताः, प्राकृते संस्कृते चापि स्वराः प्रोक्ताः स्वयम्भुवेत्यादिना। स्वर उदात्तादिः, सोऽपि तत्रोक्तः, उदात्तश्चानुदात्तश्च स्वरितश्च स्वराश्रय इति। मात्रा ह्रस्वादिः सापि तत्रोक्ता, ह्रस्वो दीर्घः प्लुत इति कालतो नियमा अपीति। बलं स्थानप्रयत्नौ, तत्राष्टौ स्थानानि वर्णानामि-त्यादिस्थानमुक्तं, अचोऽस्पृष्टाः, यणस्त्वीषदित्यादिना प्रयत्न उक्तः। सामशब्देन साम्यमुक्तं, अतिद्रुतातिविलम्बितगीत्यादिदोषराहित्येन माधुर्य्यादिगुणयुक्तत्वेनोच्चारणं साम्यं, गीतीशीघ्रीशिरःकम्पी तथा लिखि-तपाठकः, अनर्थज्ञोऽल्पकण्ठश्च षडेते पाठकाधमाः। गीतीशीघ्रीशिरः-कम्पीत्यादिनोपांशुत्वं दृष्टं, त्वरितमित्यादिना दोषा उक्ताः, माधुर्य्यमक्ष-रव्यक्तिरित्यादिना गुणा उक्ताः। माधुर्य्यमक्षरव्यक्तिः पदच्छेदस्तु सुस्वरः धैर्यं लयसमर्थं च षडेते पाठकागुणाः, इति गुणा उक्ताः। सन्तानसहितो वायवायाहीत्यत्रावादेशः, इन्द्राग्नी आगतमित्यत्र प्रकृतिभावः, एतच्च व्याकरणेऽभिहितत्वात् शिक्षायामुपेक्षितं। शिक्ष्यमाणवर्णादिवैकल्ये बाध-स्तत्रोदाहृतः, मन्त्रोहीनः स्वरतो वर्णतो वा मिथ्याप्रयुक्तो न तमर्थमाह स वाग्वज्रो यजमानं हिनस्ति, यथेन्द्रशत्रुः स्वरतोऽपराधादिति। इन्द्र-शत्रुर्वर्द्धस्वेत्यस्मिन्मन्त्र इन्द्रस्य शत्रुर्घातक इत्यस्मिन्विवक्षितेऽर्थे तत्पुरु-षसमासः, समासस्येति सूत्रेण समासत्वादन्तोदात्तेन भवितव्यं, आद्यु-दात्तस्तु प्रयुक्तः। तथा सति पूर्वपदप्रकृतिस्वरत्वेन बहुव्रीहित्वा-दिन्द्रो घातको यस्येति तात्पर्य्यार्थः सम्पन्नः, तस्मात् स्वरवर्णाद्यपराध परिहाराय शिक्षाग्रन्थोऽपेक्षितः। कल्पस्त्वाश्वलायनापस्तम्बबोधाय-नादिसूत्रं कल्प्यते, समर्थ्यते यागप्रयोगोऽनेनेति व्युत्पत्तेः। नन्वाश्वलायनः किं मन्त्रकाण्डमनुसृत्य प्रवृत्तः किं ब्राह्मणमनुसृत्य, नाद्यः, दर्शपूर्णमासौ व्याख्यास्याम इत्येवं तेनोपक्रान्तत्वात्, नह्यग्निमीळ इत्यादयो मन्त्रा दर्शपूर्णमासयोः क्वचिदिनियुक्ताः। न द्वितीयः, अमावैष्णवमेकादशकपा-लं निर्व्वपति दीक्षणीयायामित्येवं दीक्षणीयेष्टेः ब्राह्मणे प्रक्रान्तत्वात्।

अत्रोच्यते, मन्त्रकाण्डो ब्रह्मयज्ञादिजपक्रमेण प्रवृत्तो, नतु यागानुष्ठान-क्रमेण प्रवृत्तो ब्रह्मयज्ञश्चैवं * विहितः, यः स्वाध्यायमधीयीतैकामप्यृचं यजुःसामे वा तद्ब्रह्मयज्ञ इति, सोऽयं ब्रह्मयज्ञजपः अग्निमील इत्या-म्नायक्रमेणानुष्ठेयः। तथा सर्वा ऋचः, सर्वाणि यजूंषि, सर्वाणि सामानि, वाचस्तोमे पारिप्लवं शंसन्तीति विधीयते, तथाश्विने शस्यमाने सूर्य्यो नोदियादपि सर्वादाशतयीरनुब्रूयादिति विधीयते, तथा रिच्यत इव वा एष प्रेवरिच्यते, यो याजयति, यो वा प्रतिगृह्णाति, याजयित्वा-प्रतिगृह्य वा, अनश्नन् त्रिः स्वाध्यायं वेदमधीयीतेति प्रायश्चित्तरूपं वेदपारायणं विहितमित्यादिषु कृत्स्नमन्त्रकाण्डविनियोगेषु सम्प्रदाय-पारम्पर्य्यागतक्रम एवादरणीयः। विशेषविनियोगस्तु मन्त्रविशेषाणां श्रुतिलिङ्गवाक्यादिप्रमाणान्युपजीव्याश्वलायना दर्शयति, अतो मन्त्र-काण्डक्रमाभावेऽपि न कश्चिद्विरोधः। इषेत्वेत्यादिमन्त्रास्तु क्रत्वनुष्ठान-क्रमेणैवाम्नाता, इत्यापस्तम्बादयस्तेनैव क्रमेण सूत्रनिर्म्माणे प्रवृत्ताः, आ-म्नातत्वादेव जपादिष्वपि स एव क्रमः। यद्यपि ब्राह्मणे दीक्षणीयेष्टि-रुपक्रान्ता, तथापि तस्या इष्टेर्दर्शपूर्णमासविकृतत्वेन तदपेक्षत्वा-दाश्वलायनस्यादौ तद्व्याख्यानं युक्तं; अतः कल्पसूत्रं मन्त्रविनियोगेन क्रत्वनुष्ठानमुद्दिश्योपकरोति, तर्हि प्रवोवाजा इत्यादीनां सामिधेनीना-मृचामेव विनियोगमाश्वलायनो ऽब्रवीत् नमःप्रवक्त्र इत्यादयस्त्वना-म्नाताः कुतो विनियुज्यन्त, इति चेन्नायं दोषः, शाखान्तरसमाम्नातानां ब्राह्मणान्तरे सिद्धस्य विनियोगस्य गुणोपसंहारन्यायेनात्र वक्तव्यत्वात्, सर्वशाखाप्रत्ययमेकं कर्म्मेति न्यायविदः, तस्माच्छिक्षावत्कल्पोऽप्यपे-क्षितः। व्याकरणमपि प्रकृतिप्रत्ययाद्युपदेशेन पदस्वरूपतदर्थनिश्च-यायोपयुज्यते, तथा चैन्द्रवायवग्रहब्राह्मणे समाम्नायते। वाग्वै पराच्य-व्याकृतावदत्, ते देवा इन्द्रमब्रुवन्, इमान्नोवाचं व्याकुर्व्विति, सोऽब्रवी-द्वरं वृणे, मह्यं चैवैष वायवेच सह गृह्याता इति, तस्मादैन्द्रवायवः सह गृह्यते, तामिन्द्रो मध्यतो ऽवक्रम्य व्याकरोत्, तस्मादियं व्याकृता वागु-द्यत इति। अग्निमीले पुरोहितमित्यादिवाक् पूर्व्वस्मिन् काले परा-चीसमुद्रादिध्वनिवदेकात्मिका सती अव्याकृता, प्रकृतिः प्रत्ययः पदं वाक्यमित्यादिविभागरहितासीत्, तदानीं देवैः प्रार्थित इन्द्र एक-स्मिन्नेव पात्रे वायोः स्वस्य च सोमरसग्रहणरूपेण तुष्टस्तामखण्डां वाचं

---

* ब्रह्मयागश्चैवं कां, सं।

मध्ये विच्छिद्य ते प्रकृतिप्रत्ययादिविभागं सर्वत्राकरोत्; तस्मादियं वाक् इदानीमपि पाणिन्यादिमहर्षिभिर्व्याकृता सर्वैः पठ्यत इत्यर्थः। तस्यैतस्य व्याकरणस्य प्रयोजनविशेषो वररुचिना वार्त्तिके दर्शितः, रक्षोहागमलघ्वसन्देहाः प्रयोजनमिति। एतानि रक्षादिप्रयोजनानि प्रयोजनान्तराणि च महाभाष्ये पतञ्जलिना स्पष्टीकृतानि। लोपागमवर्णविकारज्ञो हि सम्यग्वेदान् परिपालयिष्यति, वेदार्थञ्चाध्यवस्यति; तस्माद्रक्षार्थं वेदानामध्येयं व्याकरणं। ऊहः खल्वपि न सर्वलिङ्गैर्न सर्वाभिर्विभक्तिभिर्वेदमन्त्रा निगदिताः, ते चावश्यं यज्ञाङ्गत्वेन यथायथं विपरिणामयितव्याः, तान्नावैयाकरणः शक्नोति विपरिणामयितुं, तस्मादध्येयं व्याकरणं। आगमः खल्वपि ब्राह्मणेन निष्कारणो धर्म्मः षडङ्गो वेदोऽध्येयो ज्ञेयश्च, प्रधानञ्च षट्स्वङ्गेषु व्याकरणं, प्रधानेषु कृतो यत्नः फलवान् भवति, लघ्वर्थञ्चाध्येयं व्याकरणं। बृहस्पतिरिन्द्राय दिव्यं वर्षसहस्रं शब्दापशब्दपारायणं प्रोवाच, बृहस्पतिश्च वक्ता, इन्द्रश्चाध्येता, दिव्यं वर्षसहस्रमध्ययनकालः, अन्तञ्च न जगाम, अद्य तु पुनर्यदि परमायुर्भवति, स वर्षशतं जीवति, तत्र कुतः प्रतिपदपाठेन सकलपदागमः, कुतस्तरां प्रयोगेनासन्देहार्थं वाध्येयं व्याकरणं। याज्ञिकाः पठन्ति, एषतीं स्थूलएषतीमास्विवारुणीमनड्वाहीमालभेतेति। तत्र न ज्ञायते किं स्थूलानि एषन्ति यस्याः सा स्थूलएषती, किं वा स्थूला चासौ एषती च स्थूलएषतीति, तान्नावैयाकरणः स्वरतोऽध्यवस्यति। यदि समासान्तोदात्तत्वं तदा कर्म्मधारयः; अथ पूर्वपदप्रकृतिस्वरत्वं ततो बहुव्रीहिरिति, इमानि च भूयः शब्दानुशासनस्य प्रयोजनानीति। तेऽसुराः, दुष्टः शब्दः, यदधीतं, यस्तु प्रयुङ्क्ते, आहिताग्निरपशब्दं प्रयुज्य सारस्वतीमिष्टिं प्रायश्चित्तार्थं निर्वपेत् प्रायश्चित्तीयामाभूमेत्यध्येयं व्याकरणं। अविद्वांसो विभक्तिं कुर्व्वन्ति, यो वा इमां चत्वारि उतत्वः सक्तुमिव सारखता दशम्यां पुत्रस्य सुदेवो असिवरुण तेऽसुराः हेलयो हेलय इति कुर्व्वन्तः पराबभूवुः; तस्माद्ब्राह्मणेन न म्लेच्छितवै नापभाषितवै म्लेच्छो ह वा एष यदपशब्दः म्लेच्छामाभूमेत्यध्येयं व्याकरणं। दुष्टः शब्दः स्वरतो ह स वाग्वज्रोषाणि ते दुष्टान् शब्दान् मा प्रयुङ्क्ष्वहीत्यध्येयं व्याकरणं। यदधीतमविज्ञातं निगदेनैव शब्द्यते, अनग्वाविव शुष्कैन्धोऽनलो ज्वलति कर्हिचित्, अविज्ञातमनर्थकमाथगीघ्रहीत्यध्येयं व्याकरणं। यस्तु प्रयुङ्क्ते कुशलो विशेषेणशब्दान्यथावद्व्यवहारकाले, सोऽनन्तमाप्नोति, जयं परत्र। वाग्यो-

गवित्, दुष्यति चापशब्दैः, को वाग्योगवित् यो हि शब्दान् जानाति, अपशब्दानप्यसौ जानाति, यथैव शब्दज्ञाने धर्म्मः, एवमपशब्दज्ञानेऽप्यधर्म्मः प्राप्नोति, अथवा भूयानधर्म्मः प्राप्नोति; भूयांसो ह्यपशब्दा अल्पीयांसः शब्दाः, एकैकस्य हि शब्दस्य बहवोऽपभ्रंशाः, गौरित्यस्य शब्दस्य गावी गोणी गोतेत्येवमादयः * । अवाग्योगवित्, अज्ञानं तस्य शरणं, नात्यन्ताज्ञानाय शरणं भवितुमर्हतीति । यो ह्यजानन् ब्राह्मणं हन्यात्, सुरां वा पिबेत्, सोऽपि मन्ये पतितः स्यात्, एवं तर्हि कः अवाग्योगविदेव । अथ यो वाग्योगवित्, ज्ञानन्तस्य शरणं, अविद्वांसः प्रत्यभिवादे नाम्नो ये न श्रुतिं विदुः कामन्तेषु तु विप्रोष्य स्त्रीष्विवायमहं वदेदिति स्त्रीवन्माभूमेत्यध्येयं व्याकरणं । विभक्तिं कुर्व्वन्ति, याज्ञिकाः पठन्ति, प्रयाजाः सविभक्तिकाः कर्त्तव्या इति । नचान्तरेण व्याकरणं प्रयाजाः सविभक्तिकाः शक्त्या कुर्व्वन्ति, * तस्मादध्येयं व्याकरणं । यो वा इमां पदशः स्वरशोऽक्षरशो वर्णशो वाचं विदधाति, स आर्त्विजीनो भवति, आर्त्विजीनाः स्यामेत्यध्येयं व्याकरणं । चत्वारिशृङ्गास्त्रयोऽस्य पादा, द्वे शीर्षे सप्तहस्तासो अस्य । त्रिधाबद्धो वृषभो रोरवीति महोदेवो मर्त्यां आविवेश । चत्वारिशृङ्गा चत्वारिपदजातानि नामाख्यातोपसर्गनिपाताश्च । त्रयो अस्य पादाः, त्रयः कालाः, द्वे शीर्षे सुशब्दोऽपशब्दश्च, सप्तहस्तासः, सप्तविभक्तयः, त्रिधाबद्धः, त्रिषु स्थानेषु बद्धः उरसि कण्ठे शिरसि च । वृषभो वर्षणात् सर्व्वकामानां रोरवीति, रौतिः शब्दकर्म्मा, महोदेवो मर्त्यां आविवेश, महता देवेन नस्तादात्म्यं स्यादित्यध्येयं व्याकरणं । अथवा चत्वारिवाक्परिमिता पदानि; तानि विदुर्ब्राह्मणा ये मनीषिणः । गुहा त्रीणि निहितानि नेङ्गयन्ति तुरीयं वाचो मनुष्या वदन्ति, ये मनीषिणो मनस ईषिणो मनीषिणो गुहायां त्रीणि निहितानि नेङ्गयन्ति, न चेष्टन्ते, तुरीयं वाचो मनुष्या वदन्ति, तुरीयं ह्येवैतद्वाचो यन्मनुष्येषु वर्त्तते । उतत्वः पश्यन्नददर्शं, वाचमुतत्वः शृण्वन्न शृणोत्येनां । उतोत्वोऽस्मै तन्वं विसस्रे जायेव पत्य उशती सुवासाः । अपि खल्वेकः पश्यन्नपि न पश्यति, शृण्वन्नपि न शृणोत्येनां अविद्वांसमाहार्षन्तस्मै अन्यस्मै तन्वं विसस्रे तनुं विकृणुते, जायेव पत्य उशती सुवासाः, यथा जायापत्येकामयमाना सुवासाः स्वमात्मानं

---

* गोपोतलिका का., सं। * कर्त्तुं का., सं।

विदथुते, एवं वाग्विदेवमात्मानं विदथुते, वाङ्मे विदथुयादित्यध्येयं व्याकरणं। सक्तुमिव, सक्तुमिव तितउनापुनन्तो यत्र धीरामनसा वाचमक्रत। अचासख्यायः सख्यानि जानते भद्रैषां लक्ष्मीर्निहिताधिवाचि। सक्तुः सचते उद्धारो भवति * कसतेर्वास्या विपरीतस्य विकासितो भवति, तित उपरि पवनं भवति, वाचमक्रत वाचमक्रषत सख्यानि जानते भद्राह्येषा लक्ष्मीर्निहिताधिवाचि। दशम्यां पुत्रस्य, दशम्यां पुत्रजातस्य नाम विदध्यात्, घोषवदाद्यन्ताक्षरमभिनिष्ठान्तं * द्व्यक्षरं चतुरक्षरं वा कृतं नाम कुर्य्यात्। न तद्धितमिति न चान्तरेण व्याकरणं कृतस्तद्धिता वा शक्या विज्ञातुं, तस्मादध्येयं व्याकरणं। सुदेवो असि, सुदेवो असिवरुण यस्य ते सप्तसिन्धवः। अनुक्षरन्ति काकुदं सूर्म्मं सुषिरामिव। सप्तसिन्धवः सप्तविभक्तयः, काकुद्जिह्वा सा अस्मिन्विद्यत इति काकुदं तालु सुर्म्मिसूणा लोहप्रतिमेति, एवं सिद्धे शब्दार्थसम्बन्ध इत्यादिवार्त्तिकोक्तान्यन्यान्यपि प्रयोजनान्यनुसन्धेयानि। अथ निरुक्तप्रयोजनमुच्यते, अर्थावबोधनिरपेक्षतया पदजातं यत्रोक्तन्निरुक्तं, गौः, ग्मा, ज्मा, क्ष्मा, क्ष्मेत्यारभ्य वसवः, वाजिनः देवपत्न्यो देवपत्न्य इत्यन्तो यः पदानां समाम्नायः समाम्नातः, तस्मिन् यस्मिन् पदार्थावबोधाय परापेक्षा न विद्यते, एतावन्ति पृथिवीनामानि, एतावन्ति हिरण्यनामानि, इत्येवं तत्र तत्र विस्पष्टमभिहितत्वात्। तदेतन्निरुक्तं त्रिकाण्डं तच्चानुक्रमणिकाभाष्ये दर्शितं। आद्यं नैघण्टुकं काण्डं, द्वितीयं नैगमन्तथा, तृतीयन्दैवतञ्चेति समाम्नायस्त्रिधा मतः। गौराद्यपारे पर्य्यन्तमाद्यं नैघण्टुकं मतं। जह्नाद्युब्मज्जीषान्तं नैगमं सप्त चक्षते। अग्न्यादिदेवपत्न्यन्तं देवताकाण्डमुच्यते, अग्न्यादिदेवी ऊर्ज्जाऊत्यन्तः क्षितिगतो गणः। वाय्वादयो भगान्ताः स्युरन्तरिक्षस्थदेवताः, सूर्य्यादिदेवपत्न्यन्ता द्युस्थाना देवतागणा इति। गवादिदेवपत्न्यन्तं समाम्नाय मधीयत इति। एकार्थवाचिनां पर्य्यायशब्दानां सङ्घो * यत्र प्रायेणोपदिश्यते, तत्र निघण्टुशब्दः प्रसिद्धः। तादृश्येष्वमरसिंहवैजयन्तीहलायुधादिषु दशनिघण्टव इति व्यवहारात्, एवमत्रापि पर्य्यायशब्दसन्दुपदेशादाद्यकाण्डस्य निघण्टुकत्वं; तस्मिन् काण्डे त्रयोऽध्यायाः; ते प्रथमे पृथिव्यादिलोकदिक्यावादिद्रव्यविषयाणि

---

* दुर्द्धावो भवति कां. सं। * दाद्यन्तरत्नस्याभिनिष्ठानान्तं सं, कां।
* संघोगा कां, सं।

नामानि। द्वितीये मनुष्यतदवयवादिद्रव्यविषयाणि। तृतीये तदुभयद्रव्यगत * बऋत्वक्रखत्वादिधर्म्मविषयाणि। निगमशब्दो वेदवाची, यास्केन तत्र तत्रापि निगमो भवतीत्येवं वेदवाक्यानामवतारितत्वात्, तस्मिन्निगम एव प्रायेण वर्त्तमानानां शब्दानां चतुर्थाध्यायरूपेण द्वितीयेऽस्मिन् काण्ड उपदिष्टत्वात्। तस्य काण्डस्य नैगमत्वं। पञ्चमाध्यायरूपस्य तृतीयकाण्डस्य दैवतं विस्पष्टं, पञ्चमाध्यायरूपकाण्डत्रयात्मक एतस्मिन् ग्रन्थे परनिरपेक्षतया पदार्थस्योक्तत्वात्तस्य ग्रन्थस्य निरुक्तत्वं; तद्व्याख्यानञ्च समाम्नायः समाम्नात इत्यारभ्य तस्यास्तस्य तद्भाव्यमनुभवत्यनुभवतीत्यन्तै र्द्वादशभिरध्यायैर्यास्को निर्म्ममे, तदपि निरुक्तमित्युच्यते। एकैकस्य पदस्य सम्भाविता अवयवार्थास्तत्र निःशेषेणोच्यन्त इति व्युत्पत्तेः। तत्र हि चत्वारि पदजातानि नामाख्याते चोपसर्गनिपाताश्चेति प्रतिज्ञायोच्चावचेष्वर्थेषु निपतन्तीति निपातस्वरूपं निरुच्यैवमुदाहृतं, नेति प्रतिषेधार्थीयो, भाषायामुभयमन्वध्यायं नेन्द्रं देवममंसतेति प्रतिषेधार्थीय इति, दुर्म्मदासो न सुरायामित्युपमार्थीय इतिच, तच्च लोके केवलप्रतिषेधार्थीयस्यापि नकारस्य वेदे प्रतिषेधोपमाभयोभयार्थोदाहरणं यस्मिन् ग्रन्थेऽवगम्यते; एवं ग्रन्थकारेणोक्तास्तत्तत्पदनिर्वचनविशेषाः, तत्तन्मन्त्रव्याख्यानावसर एवास्माभिरुदाहरिष्यन्ते, नच निर्वचनानां निर्म्मूलत्वं शङ्कनीयं; एतद्युत्पत्त्यर्थमेव ब्राह्मणेषु पदनिर्वचनानां केषामुक्तत्वात्तदाऊतीनामाऊतित्वमिति, तमिन्द्रंसन्तमिन्द्र इत्याचक्षते इति, यदप्रथयत्, तत् पृथिव्यै पृथिवीत्वमितिच। ग्रन्थकारोऽपि तत्र तत्र स्वोक्तनिर्वचनमूलीभूत ब्राह्मणान्युदाहरिष्यति, केषाञ्चिन्निर्वचनानां व्याकरणबलेन सिद्धावपि न सर्व्वेषां सिद्धिरस्ति, अतएव ग्रन्थकार आह तदिदं विद्यास्थानं व्याकरणस्य कार्त्स्न्यं स्वार्थसाधकत्वेति, तस्मादेदार्थावबोधायोपयुक्तं निरुक्तं। तथा छन्दोग्रन्थोऽप्युपयुज्यते छन्दोविशेषाणां तत्र तत्र विहितत्वात्, तस्मात् सप्तचतुरुत्तराणि छन्दांसि प्रातरनुवाकेऽनूच्यन्त इति ह्याम्नातं, गायत्र्युष्णिग् अनुष्टुप् बृहती पङ्क्तिस्त्रिष्टुप् जगतीत्येतानि सप्तछन्दांसि। चतुर्व्विंशत्यक्षरा गायत्री, ततोऽपि चतुर्भिरक्षरैरधिकाष्टाविंशत्यक्षरोष्णिक्, एवमुत्तरोत्तराधिकानुष्टुबादयोऽवगन्तव्याः। अथान्यत्रापि श्रूयते गायत्रीभिर्ब्राह्मणस्यादध्यात्,

---

* तनु इति कां सं।

त्रिष्टुग्भीराजन्यस्य, जगतीभिर्वैश्यस्येति। तत्र मगणयगणादिसाधो गायत्र्यादिविवेकः छन्दोग्रन्थमन्तरेण न सुविज्ञेयः। किञ्च, यो ह वा अविदितार्षेयच्छन्दोदैवतब्राह्मणेन मन्त्रेण याजयति, वाध्यापयति, वा, स्थाणुं वर्च्छति गर्त्तं वा पद्यते प्रवामीयते पापीयान् भवति, तस्मादेतानि मन्त्रे मन्त्रे विद्यादिति श्रूयते। तस्मात्तावद्वेदनाय छन्दोग्रन्थ उपयुज्यते। ज्योतिषस्य प्रयोजनं तस्मिन्नेवग्रन्थेऽभिहितं, यज्ञकालार्थसिद्धय इति। कालविशेषविधयः श्रूयन्ते। संवत्सरमेतद्व्रतं चरेत्, संवत्सरं पशव्यं लभेत्येवमादयः संवत्सरविधयः। वसन्ते ब्राह्मणोऽग्निमादधीत, ग्रीष्मे राजन्य आदधीत, शरदि वैश्य आदधीतेत्याद्या ऋतुविधयः। मासि मासि * एष्टान्युपयन्ति, मासि मास्यतिग्राह्या गृह्यन्ते, इत्याद्या मासविधयः। यं कामयेत वशीयान् स्यादिति तं पूर्वपक्षे याजयेदित्याद्याः पक्षविधयः। एकाष्टकायां दीक्षेरन्, फल्गुनीपौर्णमासे दीक्षेरन् इत्याद्यास्तिथिविधयः। प्रातर्जुहोति, सायं जुहोतीत्याद्याः प्रातःकालादिविधयः। कृत्तिकास्वग्निमादधीतेत्याद्या नक्षत्रविधयः। अतः कालविशेषानवगमयितुं ज्योतिषमुपयुज्यते। एतेषाञ्च वेदार्थोपकारिणां षण्णां ग्रन्थानां वेदाङ्गत्वं शिक्षायामेवमुदीरितं। छन्दः पादौ तु वेदस्य, हस्तौ कल्पोऽथ पठ्यते। ज्योतिषामयनं चक्षुर्निरुक्तं श्रोत्रमुच्यते। शिक्षा घ्राणन्तु वेदस्य, मुखं व्याकरणं स्मृतं। तस्मात् साङ्गमधीत्यैव ब्रह्मलोके महीयत इति। षडङ्गवत् पुराणादीनामपि वेदार्थज्ञानोपयोगं दृष्ट्वा विद्यास्थानत्वं याज्ञवल्क्येन स्मर्य्यते, पुराणन्यायमीमांसा धर्म्मशास्त्राङ्गमिश्रिताः। वेदाः स्थानानि विद्यानां धर्म्मस्य च चतुर्दशेति। इतिहासपुराणाभ्यां वेदं समुपबृंहयेदिति। * बिभेत्यल्पश्रुताद्वेदो मामयं प्रहरेदिति। अन्यत्रापि स्मर्य्यते। ऐतरेयतैत्तिरीयकाठकादिशाखासूक्तानि हरिश्चन्द्रनाचिकेताद्युपाख्यानानि धर्म्मब्रह्मावबोधोपयुक्तानि तेषु तेष्वितिहासग्रन्थेषु स्पष्टीकृतानि। उपनिषदुक्ताः सृष्टिस्थितिलयादयो ब्राह्मवैष्णवादिपुराणेषु स्पष्टीकृताः। सर्गश्च प्रतिसर्गश्च वंशो मन्वन्तराणिच। वंशानुचरितं चेति पुराणं पञ्चलक्षणमिति। सृष्ट्यादेः पुराणप्रतिपाद्यतयावगमात्, न्यायशास्त्रे प्रमाणप्रमेयसंशयप्रयोजनदृष्टान्तादीनां षोडशपदार्थानां निरूपणात् तदनुसारेणेदं वाक्यमस्मिन्नर्थे प्रमाणं भवति,

---

* सवष्टानि, कां सं। * बिभेत्यल्पदित्याद्येतत्पादद्वयं काशीस्थपुस्तके प्राप्तं।

नेतरदिति निर्णयः कर्त्तुं शक्यते । पूर्वोत्तरमीमांसयोर्वेदार्थोपयोगितेति स्पष्ट एव । मन्वत्रिविष्णुहारीतादिप्रोक्तस्मृतिषु वेदोक्तसन्ध्यावन्दनादिविधयः प्रपञ्चिताः, तदुक्त्वा एते ब्रह्मवादिनः पूर्वाऽभिमुखाः सन्ध्यायां गायत्रियाभिमन्त्रिता आपऊर्द्धं विक्षिपन्तीत्यादिकः सन्ध्यावन्दनविधिः । यज्ञ वा एते महायज्ञा महान्त इति प्रतीयन्त इत्यादिको महायज्ञविधिः । एवं विधयन्तराणि द्रष्टव्यानि । उक्तप्रकारेण पुराणादीनां वेदार्थज्ञानोपयोगाद्विद्यास्थानत्वं युक्तं । एतैः पुराणादिभिश्चतुर्दशविद्यास्थानैरुपबृंहिताया विद्याया ग्रहणमधिकारिविशेषेण शाखान्तरगतैश्चतुर्भिर्मन्त्रैरुपदर्शितं । तांश्च मन्त्रान् याज्ञ उदाजहार । तत्रायं प्रथमो मन्त्रः । विद्या ह वै ब्राह्मणमाजगाम, गोपाय मा शेवधिष्टेऽहमस्मि, असूयकायानृजवेऽयतायन मा ब्रूया वीर्यवती तथा स्यामिति । विद्याभिमानिनी देवता ब्राह्मणमुपदेष्टारमाचार्यमाजगाम, आगत्यैवं प्रार्थयामास, हे ब्राह्मण, अनधिकारिणेऽनुपदिश्य मां पालय, तवाहं निधिवत् पुरुषार्थहेतुरस्मि, तादृश्यां मयि तदुपदेष्टरि त्वयि च योऽसूयां करोति, यश्चार्जवेन विद्यां नाभ्यस्यति, योऽपि स्नानाचमनाद्याचारनियतो न भवति, तादृशेभ्यः शिष्येभ्यो * न मां ब्रूयाः, * तथा सति त्वद्धृदये स्थित्वा फलप्रदा भवेयं । अथ द्वितीयो मन्त्रः । य आदृणात्यवितथेन कर्णावदुःखं कुर्वन्नमृतं सम्प्रयच्छन्, तं मन्ये पितरं मातरञ्च, तस्मै न द्रुह्येत् कतमचनाहेति । पूर्वस्मिन्मन्त्रे आचार्यस्य नियममभिधायास्मिन्मन्त्रे शिष्यस्य नियमो विधीयते । वितथमनृतमपुरुषार्थभूतं लौकिकं वाक्यं, तद्विपरीतं सत्यं वेदवाक्यं । तादृशेन वाक्येन य आचार्यः शिष्यस्य कर्णावादृणात्ति सर्वतस्तर्दनं पूरणं करोति, उपसर्गवशादौचित्याच्च दृणातिधातोरर्थान्तरे वृत्तिः, सर्वदा वदन् यः आवयतीत्यर्थः । किं कुर्वन्, अदुःखं कुर्वन्, मन्दप्रज्ञस्य मानवकस्यार्द्धर्चमृचं वा ग्रहीतुमशक्यस्य यथा दुःखं न भवति, तथा पादं पादैकदेशं वा ग्राहयन्, किञ्चामृतं संप्रयच्छन्, अमृतस्य देवत्वजन्मनो मोक्षस्य वा प्रापकत्वादमृतं वेदार्थस्तस्य दानं कुर्वन्, तत्तादृशमाचार्यं सच्छिष्यो मुख्यमातापितृरूपं मन्येत, पूर्वसिद्धौ तु मातापितरावधमस्य मनुष्यस्य शरीरस्य प्रदानादमुष्मै तस्मै मुख्यमातापितृरूपाचार्याय कथमपि द्रोहं न कुर्यात् । अथ तृतीयो मन्त्रः । अध्यापिता ये गुरुं नाद्रियन्ते

---

* १ शिष्याभासेभ्य इति पाठः कां-सं। * २ माब्रूया इति कां-सं।

विप्रा वाचा मनसा कर्म्मणा वा। यथैव ते न गुरोर्भोजनीयास्तथैव तान्नभुनक्ति श्रुतन्तदिति। ये त्वधमा विप्रा गुरुणाध्यापिताः सन्तो विनयोक्त्या तदपहितचिन्तनेन शुश्रूषया वा गुरुं नाद्रियन्ते, आदररहितास्ते शिष्याभासा गुरोर्न भोजनीया अनुभवयोग्या न भवन्ति; नहि तेषु गुरुः कृपां करोति, यथैव गुरुणा ते न पालनीयाः, तथैव तानधमान् शिष्यान् तच्छ्रुतं गुरूपदिष्टं वेदवाक्यं न फलयति, फलप्रदं न भवतीत्यर्थः। अथ चतुर्थमन्त्रः। यमेव विद्याः शुचिमप्रमत्तं मेधान्वितं ब्रह्मचर्य्योपपन्नं। यस्ते न द्रुह्येत् कतमच्चनाह, तस्मै मा ब्रूयानिधिपाय ब्रह्मन्निति। हे आचार्य्य, यमेव मुख्यशिष्यं शुचित्वादिगुणोपेतं जानीयाः, किञ्च यो मुख्यशिष्यस्तुभ्यं कदाचिदपि न द्रुह्येत्, तस्मै मुख्यशिष्याय त्वदीयनिधिपालकाय ब्रह्म वेदरूपामिमां विद्यां ब्रूयाः। इत्थं विद्यादेवतया प्रार्थितेनाचार्य्येण मुख्यावेदविद्योपदेष्टव्या, तदर्थमृग्वेदोऽस्माभिः षडङ्गानुसारेण व्याख्यायते। तत्र मन्त्रब्राह्मणात्मके वेदे ब्राह्मणस्य मन्त्रव्याख्यानोपयोगित्वादादौ ब्राह्मणमारण्यकाण्डसहितं व्याख्यातं। अथ तत्र ब्राह्मणोदाहरणेन मन्त्रात्मकः संहिताग्रन्थो व्याख्यातव्यः; स चाग्निमील इत्यारभ्य, यथावत्सुसहासतीत्यन्तोऽष्टकाण्डैर्दशमण्डलैश्चतुःषष्ट्यध्यायैरीषदधिकसहस्रसूक्तैरीषदधिकद्विसहस्रवर्गैरीषदधिकद्विदशसहस्रसङ्ख्याभिर्ऋग्भिश्चोपेतः। तस्य च ग्रन्थस्य कृत्स्नस्याप्याम्नातक्रमेणैव सामान्यविनियोगो ब्रह्मयज्ञजपादौ पूर्वमेवाभिहितः। विशेषविनियोगस्तु तत्तत्क्रतौ सूत्रकारेण प्रदर्शितः। सच त्रिविधः, सूक्तविनियोगः, * तृचादिविनियोगः, एकैकस्या ऋचो विनियोगश्चेति। तत्राग्निमील इति सूक्तं प्रातरनुवाके आग्नेयक्रतौ विनियुक्तं; सच विनियोग आश्वलायनेन चतुर्थाध्यायस्य त्रयोदशखण्डे सूत्रितः, * एवानो अग्न इति षट्, अग्निमीले, अग्निं दूतमिति द्वयं, तत्र हीनपादग्रहणात् सूक्तनिश्चयाय सूक्तं, सूक्तादौ हीनपाद इति परिभाषितत्वात्। तस्मिन् सूक्ते प्रथमाया ऋचो द्वितीयस्यां पवमानेष्टौ स्विष्टकृतो याज्यात्वेन विनियोगः, सच द्वितीयाध्यायस्य प्रथमखण्डे सूत्रितः, साह्वान् विश्वा अभियुजोऽग्निमीले पुरोहितमिति संयाज्ये इति। तत्र कृत्स्नपादग्रहणादृगित्यवगम्यते, ऋचं पादग्रहण इति परिभाषितत्वात्, तथा संयाज्य इत्युक्ते एते सौविष्ट-

---

* स्तवादिविनियोगः सों। * अवानो अग्नइति कां-सं।

क्षति प्रतीयादिति परिभाषितत्वात् खिष्टकृत् सम्बन्धनिश्चयः, तत्रापि द्वितीयमन्त्रत्वेनोदाहृतत्वाद्याज्यात्वं। यद्यपि साक्षान्नित्येतया पुरोवाक्ययैव देवताया अनुस्मरणरूपसंस्कारसिद्धिः, तथापि याज्यानुवाक्ययोः समुच्चयो द्वादशाध्याये चतुर्थपादे मीमांसितः। पुरोऽनुवाक्यायाज्ययोर्विकल्पो वा समुच्चितः। विकल्पोऽन्यतरेणैव देवतायाः प्रकाशनात्। पुरोऽनुवाक्यासमाख्यानाद्वचनाच्च समुच्चयः। देवताप्रकाशनकार्य्यस्यैकत्वाद्युग्मयोर्यथा विकल्पः, तथैवैकयुग्मगतयोरेतयोरिति चेत्, मैवं, पुरोऽनुवाक्येतिसमाख्याया उत्तरकालीनयाज्यामन्तरेणानुपपत्तेः, किञ्च पुरोऽनुवाक्यामनूच्य याज्यया जुहोतीति प्रत्यक्षवचनेन देवतोपलक्षणाद्धविःप्रदानकार्य्ये भेदोक्तिपुरःसरं साहित्यं विधीयते, तस्मात् समुच्चय इति। एतच्चाग्निमीळ इत्यादि सूक्तं नवर्चं ऋग्निं नव मधुच्छन्दो वैश्वामित्र इत्यनुक्रमणिकायामुक्तत्वात्, विश्वामित्रपुत्रो मधुच्छन्दोनामकस्तस्य सूक्तस्य दृष्टत्वादादाद्यृषिः, ऋषगतार्वितिधातुः सर्वधातुभ्यइन्, इगुपधेति क प्रत्ययः, वेदप्राप्त्यर्थं तपोनिष्ठितपुरुषान् स्वयम्भुर्वेदपुरुषः प्राप्नोत्। तथाच श्रुतिः * अजातान् ह्वै एभ्यस्तपस्यमानान् ब्रह्म स्वयम्भुरभ्यावर्षत तदृषयोऽभवन्निति। तथातीन्द्रियस्य वेदस्य परमेश्वरानुग्रहेण प्रथमतो दर्शनाद्दृषित्वमभिप्रेत्य स्मर्य्यते। युगान्ते तर्हि तान् वेदान्महर्षयो लेभिरे तपसा पूर्व्वमनुज्ञातान् स्वयम्भुवेति। ऋष्यादिज्ञानाभावे प्रत्यवायः स्मर्य्यते, अविदित्वा ऋषिच्छन्दो दैवतं योगमेव च। योऽध्यापयेज्जपेद्वापि पापीयान् जायते तु सः। ऋषिच्छन्दोदैवतानि ब्राह्मणार्थं स्वराद्यपि। अविदित्वा प्रयुञ्जानो मन्त्रकण्टक उच्यत इति। वेदनविधिश्च स्मर्य्यते। स्वरवर्णाद्यरं मात्रा विनियोगार्थमेव च। मन्त्रं जिज्ञासमानेन वेदितव्यं पदेपद इति। अग्निमित्यादिसूक्तस्य छन्दोऽनुक्रमणिकायां यद्यप्यत्र नोक्तं, तथापि परिभाषायामेवमुक्तं, आदौ गायत्रं प्राक् हिरण्यस्तूपादिति। हिरण्यस्तूपऋषिर्येषां मन्त्राणां वक्ष्यते, ततः प्राचीनेषु मन्त्रेषु सामान्येन गायत्र्यं छन्द इत्यर्थः। पुरुषस्य पापसम्बन्धं वारयितुमाच्छादकत्वाच्छन्द इत्युच्यते। तत्तारण्यकाण्डे समाम्नायते। छादयन्ति ह्वा एनं छन्दांसि पापात्कर्म्मण इति। अथवा चीयमानाग्निसन्तापस्य छादकत्वाच्छन्दस्त्वं तच्च तैत्तिरीया आमनन्ति, प्रजापतिरग्निं चिनुते,

---

* अजान् कां-सं।

*सच्चुरयाविर्भूत्वा तिष्ठन्, तं देवा बिभ्यतोपायन्, ते छन्दोभिरात्मानं छादयित्वोपायन्, तच्छन्दसां छन्दस्त्वमिति। यद्वा अमर्त्यं वारयितुमाच्छादयतीति छन्दस्तदपि छान्दग्योपनिषद्याम्नातं। देवा वै मर्त्यो बिभ्यु स्त्रयीं विद्यां प्राविशन्, तेछन्दोभिरात्मानमाच्छादयन्, यदेभिराछादयंस्तच्छन्दसाञ्छन्दस्त्वमिति। तथा द्योतनार्थदीव्यतिधातुनिमित्तो देवशब्दः, एतदाम्नायते दिवा वै नो भूदिति तद्देवानां देवत्वमिति अतो दीव्यतीति देवः मन्त्रेण द्योत्यत इत्यर्थः॥

---

* चुरपदि कां, सं।

# ॥ ऋग्वेदसंहिता ॥ १

## ॥ प्रथममण्डलं ॥

### ॥ प्रथमानुवाकः ॥

### ॥ प्रथमाष्टकः ॥

## ॥ प्रथमाध्यायः ॥

प्रथमसूक्तं

ऋक्

१ १ १ अग्निमीले पुरोहितं यज्ञस्य देवमृत्विजं १
होतारं रत्नधातमं ॥

तत्र प्रथमे मण्डले प्रथमेऽनुवाके चीणि सूक्तानि, तत्राद्यं नवर्चं सूक्तं। अस्मिन् सूक्ते स्तूयमानत्वादग्निर्देवः। तथा चानुक्रमणिकायामुक्तं मण्डलादिष्वाग्नेयमैन्द्रमिति (अनुं पं। १२) तस्य सूक्तस्य प्रथमामृचं भगवान् वेदपुरुष आह अग्निमिति, अग्निनामकदेवमीले स्तौमि, ईडस्तुताविति-धातुः डकारस्य लकारो बह्वृचाध्येटसम्प्रदायप्राप्तः। मन्त्रस्य होत्रा प्रयोज्यत्वादहं होता स्तौमीतिलभ्यते। कीदृशमग्निं यज्ञस्य पुरोहितं, यथा राज्ञः पुरोहितस्तदभीष्टं सम्पादयति, तथाग्निरपि यज्ञस्यापेक्षितं होमं सम्पादयति, यदा यज्ञस्य सम्बन्धिनि पूर्वभागे आहवनीयरूपेणावस्थितं। पुनः कीदृशं, देवं, दानादिगुणयुक्तं, पुनरपि कीदृशं, होतारमृत्विजं, देवानां यज्ञेषु होटनामकऋत्विगग्निरेव, तथाच श्रुतिः अग्निर्देवानां होतेति। पुनरपि कीदृशं रत्नधातमं, यागफलरूपाणां रत्नानामतिशयेन धारयितारं, पोषयितारं वा। अत्राग्निशब्दस्य यास्को बहुधा निर्वचनं दर्शयति, अथातोऽनुक्रमिष्यामोऽग्निः पृथिवीस्थानस्तं प्रथमं व्याख्यास्यामोऽग्निः कस्मादग्रणीर्भवत्यग्रं यज्ञेषु प्रणीयतेऽङ्गं नयति,

संनममानोऽक्रोपनो भवतीति (नि ७।३ । १)॥ *स्थौलाष्ठीविर्न क्रोपयति, न खेहयति त्रिभ्य आख्यातेभ्यो जायत इति । *शाकपूणिः, इता दक्षाद्दग्धाद्वानीतात्, स खल्वेतेरकारमादत्ते गकारमनक्तेर्वा दहतेर्वा नीः परस्तस्यैषा भवतीति। अग्निमीळ इत्यस्यायमर्थः, सामान्येन सर्वदेवतानां लक्षणस्याभिहितत्वात्, अनन्तरं यतः प्रतिपदं विशेषेण वक्तव्यत्वमाकाङ्क्षितमतोऽनुक्रमेण वक्ष्यामः । तत्र पृथिवीलोके स्थितोऽग्निः प्रथमं व्याख्यास्यते, कस्मात् प्रवृत्तिनिमित्तादग्निशब्देन देवताभिधीयत इति प्रश्नस्याग्रणीरित्यादिकमुत्तरं, देवसेनामग्रे स्वयं नयतीति अग्रणीः, एतदेकमग्निशब्दस्य प्रवृत्तिनिमित्तं, तथाच ब्राह्मणान्तरं अग्निर्वै देवानां सेनानीरिति, एतदेवाभिप्रेत्य बह्वृचो मन्त्रब्राह्मणे आमनन्ति, अग्निर्मुखं प्रथमो देवतानामिति मन्त्रः । अग्निर्वै देवानामवम इति ब्राह्मणं । तथा तैत्तिरीयास्त्वामनन्ति, अग्निरग्रे प्रथमो देवतानामिति मन्त्रः । अग्निरवमो देवतानामिति ब्राह्मणं । वाजसनेयिनस्त्वेवमामनन्ति, स एव वा एषोऽग्रे देवतानामजायत, तस्मादग्निर्नामेति । यज्ञेष्वग्निहोत्रेष्टिपशुसोमसूत्रेष्वग्रस्थपूर्वदिग्वर्त्याहवनीयदेशं प्रति गार्हपत्यात् प्रणीयत इति द्वितीयं प्रवृत्तिनिमित्तं । सन्नममानः सम्यक्खयमक्तीभवन् स्वं स्वकीयशरीरं नयति,काष्ठदाहे हविः पाकेच प्रेरयतीति तृतीयमवृत्तिनिमित्तम् । स्थूलाष्ठीविनामकस्य महर्षेः पुत्रो निरुक्तकारः कश्चिदकोपन इत्यग्निशब्दं निर्वक्ति, तत्र न कोपयतीत्युक्तो न खेहयति, किन्तु काष्ठादिकं रूक्षयतीत्युक्तं भवति । शाकपूणिनामको निरुक्तकारो धातुत्रयादग्निशब्दनिष्पत्तिं मन्यते। इत इण्गतावितिधातुः। अक्तः, अञ्चुयक्तिम्रक्षणकान्तिगतिष्विति धातुः । दग्धः दहभस्मीकरण इति धातुः। नीतः नीञ्प्रापण इति धातुः। अग्निशब्दोऽयकारगकारनिशब्दानपेक्ष्यमाण इति धातोरुत्पन्नादयनशब्दादकारमादत्ते, अनक्तिधातुगतस्य ककारस्य गकारादेशं कृत्वा तमादत्ते, यद्वा दहतिधातुजन्याद्दग्धशब्दाद् गकारमादत्ते। नीरिति नयति धातुः, सच रूक्षो भूत्वा परो भवति, ततो धातुत्रयं मिलित्वाग्निशब्दो भवति, यज्ञभूमिं गत्वा स्वकीयमङ्गं नयति, काष्ठदाहे हविः पाकेच प्रेरयतीतिसमुदायार्थः । तस्याग्निशब्दार्थस्य देवताविशेषस्य प्राधान्येन स्तुतिप्रदर्शनायैषाग्निमीळ इति ऋग्भवतीति, तामेतामृचं यास्क एवं व्याख्यातवान्, यद्यग्नि-

---

* स्थौलाष्ठीविः कश्चिन्निरुक्तकारः * शाकपूणिः कश्चिन्निरुक्तकारः

मीळेऽग्निं याचामीति। अग्निरध्येषणाकर्म्मा पूजाकर्म्मा वा पुरोहितो व्याख्यातो, यज्ञस्य देवो दानाद्वा दीपनाद्वा द्योतनाद्वा द्युस्थानो भवतीति वा यो देवः, सा देवता। होतारं देवानामाक्रातारं जुहोतेर्ह्वयतौत्यौर्णनाभः। रत्नधातमं, रमणीयानां धनानां दाढतममिति। अस्यायमर्थः ईडतिधातोः स्तुत्यर्थत्वं प्रसिद्धं, धातूनामनेकार्थत्वमिति न्यायमाश्रित्य याच्ञा ध्येषणा पूजाह्वाप्यत्रोचितत्वात्तदर्थतया व्याख्याताः। पुरोहितशब्दो द्वितीयेऽध्याये यद्देवापिः शन्तनये पुरोहित इत्येतामृचमुदाहृत्य पुर एनन्दधातीति व्याख्यातः। तैत्तिरीयाश्च पौरोहित्ये स्पर्द्धमानस्य पश्वनुष्ठानं विधाय तत्फलत्वेन पुर एनन्दधत इत्यामनन्ति। देवशब्देन दानदीपनद्योतनानामन्यतममर्थमाचष्टे। यज्ञस्य दाता, दीपयिता, द्योतयिता, अयमग्निरित्युक्तम्भवति, दीपनद्योतनयोरेकार्थत्वेऽप्यस्ति धातुभेदः। यद्यप्यग्निः पृथिवीस्थानस्तथापि देवान् प्रति हविर्वहनाद् द्युस्थानो देवदेवताशब्दयोरेकपर्य्यायत्वान्मन्त्रप्रतिपाद्या काचिदग्नेव्यतिरिक्ता देवता नान्वेषणीया। होटशब्दस्य ह्वयतिधातोरुत्पन्नत्वेन देवतानामाक्रातारमित्यौर्णनाभनामकस्तुमुनिर्जुहोतिधातोरुत्पन्नो होटशब्द इति मन्यते। अग्नेर्होटत्वं होमाधिकरणत्वेन द्रष्टव्यं। रत्नशब्दो द्वितीयाध्याये मघमित्यादिष्वष्टाविंशतौ धननामसु पठितः, रमणीयत्वाद्रत्नत्वं, दधातिधातुरत्र दानार्थवाचीति, तदिदं निरुक्तकारस्य यास्कस्य मन्त्रव्याख्यानं। अथव्याकरणप्रक्रियोच्यते, अग्निधातोर्गत्यर्थात् वीज्याज्वरिभ्योनिरित्यनुवृत्तत्वात्, अङ्गेर्नलोपश्चेत्यौणादिकसूत्रेण नि प्रत्ययः, इदित्वानुमागमेन प्राप्तस्य नकारस्य लोपश्च भवति, अङ्गति स्वर्गं गच्छति हविर्नेतुमित्यग्निः, तत्र धातोः (पां ६। १। १६२) इत्यकार उदात्तः, आद्युदात्तश्च (पां ३। १। ३) इति प्रत्ययगत इकारोऽप्युदात्तः। अनुदात्तं पदमेकवर्जं (पां ६। १। १६८) इति द्वयोरन्यतरमुदात्तमवग्रिष्येतरस्यानुदात्तत्वं प्राप्तं; तत्र धातुस्वरे प्रथमतोऽवस्थिते सति पश्चादुपदिश्यमानः प्रत्ययस्वरोऽवग्रिष्यते सतिग्रिष्टस्वरो बलीयानिति हि न्यायः, ततोनुदात्तमग्निप्रातिपदिकं, अनुदात्तौसुप्पितौ (पां ३। १। ४) इत्यमित्येतद्द्वितीयैकवचनमनुदात्तं, तस्यामिपूर्वः (पां ६। १। १०७) इतियत् पूर्वरूपं तदुदात्तं, एकादेश उदात्तेनोदात्तः (पां ८। २। ५) इति सूत्रितत्वादग्निशब्दो धातुजन्मा इति मते सेयं प्रक्रिया सर्वापि द्रष्टव्या। मतद्वयं यास्केन प्रदर्शितं। नामान्याख्यातजानीति शाकटायनः, नैरुक्तसमयश्च न सर्वा-

णोति, गार्ग्यो वयाकरणानाञ्चैक इति गार्ग्यस्य मते अग्निशब्दस्याखण्ड-प्रातिपादकत्वात्, फिषोऽन्तोदात्त इति फिट्सूत्रेणान्तोदात्तत्वं। पूर्वोक्तेष्वग्रणीरित्यादिनिर्वचनेषु प्रकृतिप्रत्ययाद्यशेषप्रक्रिया यथोचितं कल्पनीया। एतदेवाभिप्रेत्य यास्क आह, अथ निर्वचनं, तद्येषु पदेषु स्वरसंस्कारौ समर्थौ प्रादेशिकेन गुणेनान्वितौ स्यातां, तथा तानि निर्ब्रूयाद्यथानन्वितेऽर्थे प्रादेशिके विकारेऽर्थनित्यः परीक्षेत, केनचिद्वृत्तिसामान्येनाविद्यमाने सामान्येऽप्यक्षरवर्णसामान्यान्निर्ब्रूयान्नत्वेव न निर्ब्रूयादिति। अस्यायमर्थः तत्र निर्वचनीयपदसमूहमध्ये येष्वग्न्यादिपदेषु पूर्वोक्तरीत्या स्वरसंस्कारौ समर्थौ व्याकरणसिद्धौ स्यातां, स्वरउदात्तादिः, संस्कारो निप्रत्ययादिः, किञ्च तौ स्वरसंस्कारौ प्रादेशिकेन गुणेनान्वितौ स्यातां, शब्दस्यैकदेशः पूर्वोक्तोऽगिधातुः प्रदेशः; तत्र भवो गुणो गतिरूपोऽर्थस्तेनान्वितौ, तान्यग्न्यादिपदानि तथा व्याकरणानुसारेण निर्ब्रूयात्, तत्र निर्वचनमस्माभिः प्रदर्शितं। अथ पूर्वोक्तवैलक्षण्येन कश्चित् स्वेन विवक्षितोऽर्थोऽनन्वितस्तस्मिन्शब्देऽनुगतो न भवेत् तस्यैव व्याख्यानमप्रादेशिके विकार इति। अग्रनयनादिरूपः क्रियाविशेषो विकारः, स च प्रदेशेनाग्निशब्दैकदेशेनाङ्ग नाभिधीयत इत्यप्रादेशिकः, एवं सति यः पुमानर्थनित्यः स्वविवक्षितेऽर्थे नियतो निर्बन्धवान्, ब्राह्मणानुसारेण वा देवतास्तवविशेषणत्वेन वा योजयितुं वा* स निर्बन्धः। तदानीं स पुमान् केनचिद्वृत्तिसाम्येन स्वविवक्षितमर्थं परीक्षेत, तस्मिन्शब्दं योजयेत्, वृत्तिः क्रिया, तद्रूपेण साम्यं सादृश्यं, अस्माभिरग्रनयनादिरूपं क्रियात्वसाम्यमुपजीव्याग्रणीत्वाद्यर्थो योजितः, तदिदं यास्काभिमतं निर्वचनं। स्रौलाष्ठोविरक्षरसाम्यान्निर्वक्ति, अन्नोपनशब्दस्यादौ निषेधार्थमकाररूपमक्षरं विद्यते, अग्निशब्दस्यादावकारोऽस्ति, तदिदमक्षरसाम्यं। शाकपूणिस्तु वर्णसाम्यान्निर्ब्रूते, तदग्रशब्दाग्निशब्दयोर्गकारेण वर्णेन साम्यं सर्व्वथापि निर्वचनं न त्याज्यमिति।, ईळ इत्येतत्पदं क्षत्खमप्यनुदात्तं, तिङ्ङ तिङः (पां ८। १। २८) इत्यतिङन्तादग्निशब्दात् परस्य ईळ इत्यस्य तिङन्तस्य निघातविधानात् पदद्वयं, संहिताकाले त्वीकारस्य धातुगतस्य, उदात्तादनुदात्तस्य स्वरितः (पां ८। ४। ६६) इति स्वरितत्वं, तस्मादूर्द्धभाविन एकाक्षरस्य तिङ्प्रत्यय-

---

* अथानन्वितौ स्यातां, तथा तानि निर्ब्रूयात् कां, सं अधिकः पाठः।
मूलनिरुक्तेयथोक्तमेव। † निर्वन्ध्यनात् कां।

रूपस्य, स्वरितात् संहितायामनुदात्तानां (पां १ । २ । ३९) इत्येकश्रुतिप्रचयनामकं भवति । पुरःशब्दोऽन्तोदात्तः, अयं पुरोभुव इत्यत्र तथैवाम्नातत्वात्, पूर्वाधरावराणामसि पुरधवश्चैषां (पां ५ । ३ । ३९) इति पूर्वशब्दादसिप्रत्ययः, पुर आदेशश्च, ततोऽत्रप्रत्ययस्वरः, धातोर्निष्ठायां, दधातेर्हिः (पां ७ । ४ । ४२) इति धाधातोर्हि आदेशे सति प्रत्ययस्वरेणान्तोदात्तो हितशब्दः, तत्र समासान्तोदात्तत्वे प्राप्ते, तदपवादत्वेन, तत्पुरुषे तुल्यार्थ ( पां ६ । २ । २ ) इत्यादिनाव्ययपूर्वपदप्रकृतिस्वरत्वं, यद्वा, पुरोऽव्ययं (पां १ । ४ । ६७) इति गतिसंज्ञायां, गतिरनन्तरः (पां ६ । २ । ४९) इति पूर्वपदप्रकृतिस्वरत्वं, तत ओकारः उदात्तः, अवशिष्टानामनुदात्तस्वरितप्रचयाः पूर्ववद्वेदितव्याः । यद्यपि पदकाले हितशब्दान्तर्गतस्येकारस्य स्वरितत्वं दुर्लभं उदात्तपरत्वाभावात्, मात्राक्रमस्तावदवग्रहान्तरमिति प्रातिशाख्येऽवसानविधानात्, अतएव तैत्तिरीया अनुदात्तमेवाभिधीयन्ते, तथापि यथा सन्धीयमानानामनेकीभवतां स्वरोऽवग्रह इति प्रातिशाख्येऽतिदेशादिष्टसिद्धिः । उपदिष्टस्तथा विद्यादक्षराणामवग्रह इत्याद्याक्षरस्य संहितायां प्रचयप्राप्तत्वात्, उदात्तस्वरितपरस्य सन्नतरः (पां १ । २ । ४० ) इत्यतिनीचोऽनुदात्तः । यजयाचयतविच्छ ० (पां ३ । ३ । ९०) इत्यादिना यजतेर्नङ्प्रत्यये सत्यन्तोदात्तो यज्ञशब्दः, विभक्तेः सुप्स्वरेणानुदात्तत्वे सति पश्चात् स्वरितत्वं। देवशब्दः पचाद्यजन्तः, सच फिट्स्वरेण प्रत्ययस्वरेण चित्स्वरेण चान्तोदात्तः । ऋत्विक् शब्द, ऋतौ यजतीति विग्रहे सति, ऋत्विग्दधृक् ० ( पां ३ । २ । ५९) इत्यादिना निपातितः, क्तदुत्तरपदप्रकृतिस्वरेणान्तोदात्तः, विभक्तिस्वरः पूर्ववत्। होढशब्दस्तृन्प्रत्ययान्तो नित्स्वरेणाद्युदात्तः,स्वरितप्रचयौ पूर्ववत्। रत्नशब्दो नञ्विषयस्यानिसन्तस्येति फिट्सूत्रेणाद्युदात्तः। तथाचाम्नायते रत्नंधातेति । रत्नानि दधातीति विग्रहः, समासत्वादन्तोदात्तो रत्नधाशब्दः, यद्वा क्तदुत्तरप्रकृतिस्वरः, तमप्प्रत्ययस्य पित्स्वरेणानुदात्ते सति स्वरितप्रचयौ, संहितायामाद्याक्षरस्य प्रचयः, द्वितीयाक्षरस्य सन्नतरत्वमिति वेदावतार आद्यायाऋचोऽर्थश्च प्रपञ्चितः । विज्ञानं वेदगाम्भीर्यमथ संक्षिप्य वर्ण्यते ॥ १ ॥

---

१ २ १ अग्निः पूर्वेभिर्ऋषिभिरीड्यो नूतनैरुत १
स देवां एह वक्षति ॥

आग्नेयसूक्तस्य द्वितीयामृचमाह, अग्निः पूर्वेभिरिति। अयमग्निः पुरातनैर्भृग्वङ्गिरःप्रभृतिभिर्ऋषिभिरीड्यः स्तुत्यः, इदानीन्तनैरस्माभिरपि स्तुत्यः, सोऽग्निः स्तुतः सन्, इह यज्ञे देवान् हविर्भुजं आवक्षति, वह प्रापण इति धातुः, आवहत्वित्यर्थः। पूर्वेभिरित्यत्र, बहुलं छन्दसि (पां ७। १। १०।) इति भिस ऐसादेशाभावः; बहुवचने झल्येत् (पां ७। ३। १०३। इति आकारस्य एकारः। पूर्वपर्वअर्वपूरण इति धातुः, पूर्वतिधातोरन्प्रत्यय औणादिकः। ऋषिभिः, इन्प्रत्ययान्त ऋषिशब्दः, ऋष्यन्धकवृष्णिकुरुभ्यश्च (पां ४। १। ११४।) इति निपातनाल्लघूपधगुणाभावः, किन्प्रत्ययो वात्र ज्ञेयः; तौ शब्दौ नित्स्वरेणाद्युदात्तौ। ईड्यः, ईड्यशब्दस्य ण्यत्प्रत्ययान्तत्वात्, तित्स्वरितं (पां ६। १। १८५) इति स्वरिते प्रेषानुदात्तत्वे च प्राप्ते तदपवादत्वेन, ईड वन्द वृशंसदुहां ण्यतः (पां ६। १। २१४) इत्याद्युदात्तत्वं। नूतनैः, नवस्य नूतनप्रतननवखाश्चेति सूत्रवार्त्तिकेन नवशब्दस्य नू इत्यादेशस्तन्प्रत्ययश्च महावार्त्तिके विहितः, ततो नित्स्वरेणाद्युदात्तः, अवशिष्टाः स्वरा अग्न्यादिषु नूतनान्तेषु पूर्ववदुन्नेयाः। उतशब्दो यद्यपि विकल्यार्थः प्रसिद्धः, तथापि निपातत्वेनानेकार्थत्वात्, औचित्येनात्र समुच्चयार्थो द्रष्टव्यः। उच्चावचेष्वर्थेषु निपतन्तीति निपातत्वं, तर्हि निपाता आद्युदात्ता इतिफिट्सूत्रेण उकारस्योदात्तः प्राप्त इति चेन्न, प्रातः शब्दवदन्तोदात्तत्वात्, यथा प्रातः शब्दोऽन्तोदात्तत्वेनैव स्वरादिषु पठितः, एवमुतशब्दस्यापि पाठो द्रष्टव्यः, स्वरादेराकृतिगणत्वात्। यद्वा, एवमादीनामन्त इतिफिट्सूत्रेणान्तोदात्तः। स इत्यत्र फिट्स्वरः। देवान्, देवशब्दः पूर्ववत्, देवानित्यस्य नकारस्य संहितायां, दीर्घादटि समानपादे (पां ८। ३। ९) इति रुत्वं, अचानुनासिकः पूर्वस्य तु वा (पां ८। ३। २) इति आकारः सानुनासिकः। भो भगो अघो अपूर्वस्य योऽशि (पां ८। ३। १७) इति रोर्यत्वं, सच, लोपः शाकल्यस्य (पां ८। ३। १९) इति लुप्यते, तदसिद्धत्वान्न पुनः सन्धिकार्यं। आङो नितातत्वादाद्युदात्तत्वं। इदमो हः प्रत्यये सति निष्पन्नत्वात्, इहशब्दे प्रत्ययस्वरः। वक्षति, वहतिधातोर्लाडर्थे छान्दसोलुट्, स्यप्रत्ययगतस्य यकारस्य लोपोऽपिछान्दसः, यद्वा लेटि, सिब्बहुलं लेटि (पां ३। १।

ऋक्

१ ३ १ अग्निना रयिमश्नवत् पोषमेव दिवे दिवे १
यशसं वीरवत्तमं ॥
१ ४ १ अग्ने यं यज्ञमध्वरं विश्वतः परिभूरसि १
स इद्देवेषु गच्छति ॥

३४) इति सिप्, लेटोऽडाटौ (पां ३ । ४ । ९४) इत्यडागमश्च, ततो वक्ष्यतीति सम्पद्यते, तस्य तिङन्तत्वान्निपातः, संहिताखरः ॥ २ ॥

पूर्ववदाधाने तृतीयेऽष्टौ प्रथमाज्यभागस्यानुवाक्या सूक्तगता तृतीया तामेतां तृतीयामृचमाह अग्निनेति । योऽयं होत्रा स्तुत्योऽग्निः, तेनाग्निनामितभूतेन यजमानो रयिं धनं अश्नवदश्नोत् प्राप्नोत् । कीदृशं रयिं, दिवे दिवे पोषमेव, प्रतिदिनं पुष्यमाणतया वर्द्धमानमेव, नतु कदाचिदपि क्षीयमाणं । पुनः कीदृशं, यशसं दानादिना यशोयुक्तं । पुनरपि कीदृशं वीरवत्तमं, अतिशयेन पुत्रभृत्यादिवीरपुरुषोपेतं, सति हि धने पुरुषाः सम्पद्यन्ते । रयिशब्दो मघमित्यादिधननामसु पठितः, अत्र फिट्खरः । अश्नवत्, अश्नोतेर्धातोर्लेटि व्यत्ययेन तिप्, इतश्च लोपः परस्मैपदेषु (पां ३ । ४ । ९७ ।) इतीकारलोपः, लेटोऽडाटौ (पां ३ । ४ । ९४) इत्यडागमः, ततोऽश्नवदिति भवति, तस्य निघातः । घञन्तत्वात् पोषशब्द आद्युदात्तः । एवशब्दस्य निपातत्वेऽपि एवादित्वादन्तोदात्तत्वं । वकारान्तादिवशब्दात् परस्याः सप्तम्याः, सुपांसुलुक् पूर्वसवर्णाच्छेयाडाद्या जालः (पां ७ । १ । ३९ ।) इति शे भावे सति, सावेकाचस्तृतीयादिर् (पां ६ । १ । १६८ ।) इत्यादिना, ऊडिदंपदाद्यप्पुम्रैद्युभ्यः (पां ६ । १ । १७१ ।) इति सूचेण वा तस्योदात्तत्वं, नित्यवीप्सयोः (पां ८ । १ । ४ ।) इति द्विर्भावे सति उत्तरभागस्य, अनुदात्तञ्च (पां ८ । १ । ३ ।) इत्यनुदात्तत्वं । यशसं, यशोऽस्यास्तीति विग्रहे सति, अर्श आदिभ्योऽच् (पां ५ । २ । १२७ ।) इत्यच्प्रत्ययः, चित्खरेणान्तोदात्तत्वं व्यत्ययेन बाधित्वा मध्योदात्तं । फिट्खरेणान्तोदात्तादीरशब्दान्मतुप्तमपोः पित्त्वादनुदात्तत्वं, झरनुड्भ्यां मतुप् (पां ६ । १ । १७६ ।) इत्युदात्तत्वं न भवति, सौ अवर्णान्तत्वात्, नगोश्वन् सावर्वराडङ्क्रुङ्कृद्भ्यः (पां ६ । १ । १८२ ।) इति निषेधात् ॥ ३ ॥

अभिश्नवषडहस्य मध्यवर्त्तिषूक्थेषु तृतीयसवने मैत्रावरुणस्य अग्नेयं

ऋक्

१ ५ १ अग्निर्होता कविक्रतुः सत्यश्चित्रश्रवस्तमः १
देवो देवेभिरागमत् ॥ १ ॥ वर्गः ॥

यज्ञमित्यादिको वैकल्पिकोऽनुरूपस्तृचः, एतच्च सप्तमाध्याये एह्यष्वित्यादिखण्डे सूत्रितं, अग्निं वोवृधन्तमग्नेयं यज्ञमध्वरमिति। तस्मिंस्तृचे या प्रथमा सा सूक्ते, तामेतां चतुर्थीमृचमाह अग्नेयमिति। हे अग्ने, त्वं, यं यज्ञं विश्वतः सर्वासु दिक्षु परिभूः, परितः प्राप्तवानसि, स इत् स एव यज्ञो देवेषु तृप्तिं प्रणयितुं स्वर्गे गच्छति, प्राच्यादिचतुर्द्दिग्गतेषु आहवनीयमार्ज्जालीयगार्हपत्याग्नीध्रीयस्थानेष्वग्निरस्ति, परिशब्देन होत्रीयादिधिष्ण्यव्याप्तिर्विवक्षिता। कीदृशं यज्ञं, अध्वरं हिंसारहितं, नहि अग्निना सर्वतः पालितं यज्ञं राक्षसादयो हिंसितुं प्रभवन्ति। अग्निशब्दस्य षाष्ठिकमामन्त्रिताद्युदात्तत्वं। न विद्यतेऽध्वरोऽस्येतिबहुव्रीहौ, नञसुभ्यां (पां ६। २। १७२।) इत्यन्तोदात्तत्वं। विश्वत इत्यत्र तसिलः प्रत्ययस्वरं बाधित्वा पूर्ववर्णस्य, लिति (पां ६। १। १९०।) इत्युदात्तत्वं। परिभूरित्यत्राव्ययपूर्वपदप्रकृतिस्वरत्वे प्राप्ते तदपवादत्वेन कृदुत्तरपदप्रकृतिस्वरत्वं। असीत्यत्र निघाताभावो यच्छब्दप्रयोगात्॥ ४॥

पञ्चमीमृचमाह अग्निर्होतेति। अयमग्निर्देवोऽन्यैर्देवैः हविर्भोजिभिः सहागमत्, अस्मिन् यज्ञे समागच्छतु। कीदृशोऽग्निः, होता होमनिष्पादकः। पुनः कीदृशः, कविक्रतुः, कविशब्दोऽत्र कान्तवचनो* नतु मेधावी नाम, क्रतुः प्रज्ञानस्य कर्म्मणो वा नाम, ततः कान्तप्रज्ञः कान्तकर्म्म वा †। पुनः कीदृशः, सत्यः, अनृतरहितः, फलमवश्यं प्रयच्छतीत्यर्थः। पुनरपि कीदृशः चित्रश्रवस्तमः, श्रूयत इति श्रवः कीर्त्तिः, अतिशयेन चित्रकीर्त्तियुक्तः। कविक्रतुश्चित्रश्रवस्तम इत्यत्रोभयत्र बहुव्रीहित्वात् पूर्वपदप्रकृतिस्वरत्वं। सत्सु साधुः सत्यः, सत्यादशपथे (पां ५। ४। ६६।) इत्यत्रान्तोदात्तो हरदत्तेन निपातितः। लोडन्तस्य गच्छत्वितिशब्दस्य छत्वाभाव उकारलोपश्छान्दसः, ततो रूपमागमदिति भवति, स्पष्टमन्यत्॥ ५॥ इत्यृक्संहितायां वेदार्थप्रकाशे प्रथमकाण्डस्य प्रथमाध्याये प्रथमो वर्गः॥ १॥

---

* क्रान्तवचनो कां सं। † क्रान्तप्रज्ञः क्रान्तकर्मावा कां सं।

ऋक्

१ ६ १ यदङ्ग दाशुषे त्वमग्ने भद्रं करिष्यसि १
तवेतत् सत्यमङ्गिरः ॥
१ ७ १ उप त्वाग्ने दिवे दिवे दोषावस्तर्धिया वयं १
नमो भरन्त एमसि ॥

आग्नेयसूक्ते षष्ठीमृचमाह, यदङ्गदाशुष इति। अङ्गेत्यभिमुखीकरणार्था निपातः, अङ्गाग्ने हे अग्ने त्वं, दाशुषे हविर्दत्तवते यजमानाय, तत्प्रीत्यर्थं यद्भद्रं, वित्तगृहप्रजापशुरूपं कल्याणं करिष्यसि, तद्भद्रं तवेत्, तवैव सुखहेतुरिति शेषः। हे अङ्गिरोऽग्ने तच्च सत्यं, न त्वत्र विसम्वादोऽस्ति, यजमानस्य वित्तादिसम्पत्तौ सत्यामुत्तरकालवनुष्ठानेनाग्नेरेव सुखं भवति। भद्रशब्दार्थं ग्राह्यायनिनः समामनन्ति, यद्वै पुरुषस्य वित्तं, तद्भद्रं, गृहा भद्रं, प्रजा भद्रं, पशवो भद्रमिति। अङ्गशब्दस्य निपातत्वेऽपि अर्शआदित्वादन्तोदात्तत्वं, दाश्वान् साह्वान् मीढ्वांश्च (पां ६। १। १२। इति सूत्रेण दाशृदान इति धातोः क्वसुप्रत्ययो निपातितः, तत्र प्रत्ययस्वरः। आमन्त्रितस्याग्निशब्दस्य पदपरत्वेनाद्युदात्तत्वं न शङ्कनीयं, अनुदात्तं सर्वमपादादौ (पां ८। १। १८।) इत्यपादादाविति पर्य्युदस्तत्वात् षाष्ठिकमाद्युदात्तत्वमेव, भद्रशब्दस्य नञ्विषयत्वेनानुदात्तत्वप्रसक्तावपि, भदिकल्याण इतिधातोरुपरि रक्प्रत्ययेन निपातनादन्तोदात्तत्वं, अस्मिन् वाक्ये यच्छब्दप्रयोगात्, निपातैर्यद्यदिहन्त (पां ८। १। ३०।) इत्यादिना निघाते प्रतिषिद्धेऽस्य प्रत्ययस्वरेण सतिशिष्टेन करिष्यसीतिशब्द उपान्तोदात्तः। तव इत्यत्र, यष्मदस्मदोर्ङसि (पां ६। १। २११।) इत्याद्युदात्तत्वं। अङ्गिरः, अङ्गारा इति यास्कः। ऐतरेयिणोऽपि प्रजापतिदुहितृध्यानोपाख्याने समामनन्ति, येऽङ्गारा आसंस्तेऽङ्गिरसोऽभवन्निति, तस्मादङ्गिरोनामकमुनिकारणत्वादङ्गाररूपस्याग्नेरङ्गिरस्त्वं, अत्र पदात्यपरत्वेनाद्युदात्तत्वं ॥ ६ ॥

अग्नीषोमप्रणयने उपत्वाग्नइत्याद्यनुवचनीयस्तृचः, एतच्च ब्राह्मणे समाम्नातं। उप त्वाग्ने दिवे दिव उपप्रयं पतिप्रतमिति*तिस्रश्चैकां वान्का-

* पनिप्रतमिति कां

ऋक्

१ ८ १ राजन्तमध्वराणां गोपामृतस्य दीदिविं १
वर्धमानं स्वे दमे ॥
१ ९ १ स नः पितेव सूनवेऽग्ने सूपायनो भव १
सचस्वा नः स्वस्तये ॥ २ ॥

हेति, तस्मिंस्तृचे या प्रथमा सा सूक्ते सप्तमी, तामेतां सप्तमीमृचमाह, उपत्वाग्न इति। हे अग्ने, वयमनुष्ठातारो दिवे दिवे प्रतिदिवं दोषावस्तोरात्रावहनि च धिया बुद्ध्या नमोभरन्तो नमस्कारं सम्पादयन्तः, उप समीपे, त्वा एमसि त्वामागच्छामः। उपशब्दस्य निपातस्वरः। त्वा, त्वौ द्वितीयायाः (पां १। ८। २३।) इति युष्मच्छब्दस्यानुदात्तस्त्वादेशः। दोषाशब्दो रात्रिवाची, वस्त इत्यहर्वाची, द्वन्द्वसमासे, कार्त्तकौ जपादयश्च (पां ६। २। ३७) इति कार्त्तकौजपादित्वादाद्युदात्तः। सावेकाचस्तृतीयादिर्विभक्तिः (पां ६। १। १६८।) इति धियो विभक्तिरुदात्ता। नम इति निपातः, भरन्त, इत्यत्र शपः पित्त्वाच्छतुर्लसार्वधातुकत्वाच्चानुदात्तत्वे सति धातुस्वरः शिष्यते। इमसि इत्यत्र, इदन्तो मसिः (पां ७। १। ४६।) इति इदन्तावयवको मसादेशो निघातश्च ॥ ७ ॥

अष्टमीमृचमाह राजन्तमध्वराणामिति। पूर्वमन्त्रे त्वामुपैम इत्यभिमुद्दिश्योक्तं। कीदृशं त्वां, राजन्तं दीप्यमानं। अध्वराणां राक्षसकृतहिंसारहितानां यज्ञानां गोपां रक्षकं। ऋतस्य सत्यस्यावश्यम्भाविनः कर्म्मफलस्य दीदिविं, पौनःपुन्येन भृशं वा द्योतकं, आङ्त्याधारमग्निं दृष्ट्वा शास्त्रप्रसिद्धं कर्म्मफलं स्मर्य्यते। स्वे दमे स्वकीयगृहे यज्ञशालायां हविर्भिर्वर्द्धमानं। राजन्तं वर्द्धमानमित्यत्रोभयत्र पूर्ववद्धातुस्वरः शिष्यते। दीदिविं, दीदिविशब्दस्य, अभ्यस्तानामादिः (पां ६। १। १८९।) इत्याद्युदात्तत्वं। दमे, दमशब्दो, वृषादीनाञ्च (पां ६। १। २०३।) इति वृषादित्वादाद्युदात्तः ॥ ८ ॥

नवमीमृचमाह स नः पितेवेति। हे अग्ने, स त्वं नोऽस्मदर्थं सूपायनः शोभनप्राप्तियुक्तो भव, तथा नोऽस्माकं स्वस्तये, विनाशराहित्यार्थं सचस्व समवेतो भव, तत्रोभयत्र दृष्टान्तः, पितेव सूनवे, यथा सूनवे पुत्रार्थं पिता सूपायनः प्रायेण समवेतो भवति तद्वत्। अस्मच्छब्दादेशस्य

## द्वितीयसूक्तं।

ऋचः १।

१ १ १ वायवायाहि दर्शतेमे सोमा अरंकृताः १
तेषां पाहि श्रुधी हवं ॥

न इत्येतस्य, अनुदात्तं सर्वमपादादौ (पां ८।१।१८।) इत्यनुदात्तत्वं। चादयोऽसत्त्वे (पां १।४।५७।) इति चादीनामनुदात्तत्वादिवशब्दोऽनुदात्तः। इवेन नित्यसमासः, पूर्वपदप्रकृतिस्वरत्वञ्च वक्तव्यमिति वार्त्तिकेन समस्तः पितेवेतिशब्दो मध्योदात्तः। शोभनमुपायनं यस्येति बहुव्रीहौ, नञ् सुभ्यां (पां ६।२।१७२।) इत्यन्तोदात्तत्वं। सचस्वेत्यत्र पदात् परत्वं नास्तीति न निघातः, ङसार्वधातुकानुदात्तत्वे सति धातुस्वरावशेषः। इतिप्रथमस्य प्रथमे द्वितीयो वर्गः॥ २॥ इत्यग्निसूक्तं॥

---

अग्निमील इत्यादिसूक्तमग्निष्टोमस्य प्रातरनुवाके यथा विनियुक्तं, तथा वायवायाहीत्यादयस्तृचाः प्रउगे विनियुक्ताः, तत्रेदच्चिन्त्यन्ते। शस्त्रं किं देवतास्मरणरूपं संस्कारकर्म्म, किं वा प्रधानकर्म्मेति, अत्र पूर्वपक्षं जैमिनिः सूचयामास, स्तुतशस्त्रयोस्तु संस्कारो याज्यावद्देवताभिधानत्वादिति। आज्यैः स्तुवते, पृष्ठैः स्तुवते, प्रउगं शंसति, निष्केवल्यं शंसतीति श्रूयते, अत्र स्तुतिः शंसनञ्च गुणिनिष्ठगुणाभिधानं, इन्द्रस्य नु वीर्य्याणि प्रवोचमित्यत्र दृष्टत्वात्, एवं सति याज्यान्यायेन गुणिन्या देवताया अभिधायकत्वेन स्तुतशस्त्रयोः संस्काररूपत्वमभ्युपेयं, याज्यायास्तद्रूपत्वं दशमाध्यायस्य चतुर्थपादे दृष्टार्थत्वलाभेन निर्णीतं, तद्वदत्रापि तुशब्दः प्रधानकर्म्मत्वं व्यावर्त्तयति। सिद्धान्ती तं पक्षं दूषयति, अर्थैनत्वपक्षश्येत देवतानामश्चोदनार्थस्य गुणभूतत्वादिति। तुशब्देन संस्काररूपत्वं वारयति, संस्कारपक्षे प्रयोजनवशेन मन्त्रः, स्वस्थानादपक्षीयेत, कुतः, मन्त्रगतं देवतावाचकं यदिन्द्रादिनामास्ति तच्चोदनया मन्त्ररूपया प्रतिपाद्यस्य देवतारूपस्यार्थस्य गुणभूतं, तस्माद्यत्र प्रधानभूतदेवतास्ति त्र गुणभूतमन्त्रो नेतव्यः, तद्यथा, माहेन्द्रग्रहसन्निधौ

अभित्वाशूरेत्ययं प्रगाथ आम्नातः, स चेन्द्रं प्रकाशयति, नतु महेन्द्रं, ततो यच्चैन्द्रं कर्म्म तत्रायं प्रगाथोऽपकर्षणीयः, तथा सति क्रमसन्निधी बाध्येयातां। तदेतत् सिद्धान्तिनाभिहितं दूषणं पूर्वपक्षी समाधत्ते, वशावद्वागुणार्थं स्यादिति। वाशब्दः प्रगाथस्यान्यत्र नयनं वारयति, यदेतदिन्द्रशब्दाभिधानं तदेतन्महत्त्वगुणोपलक्षणार्थं, यथा सा वा एषा सर्वदेवत्यायदजा वशावायव्यामालभेतेत्यत्राजावशाशब्देन चोदिते कर्म्मणि क्वागशब्देन केवलेन युक्ता निगमा वशात्वगुणमप्युपलक्षयन्ति तद्वत्। तस्मान्महत्त्वगुणयुक्ते चोदिते कर्म्मणि निर्गुणेन्द्रशब्देनाभिधानमविरुद्धं, लोकेऽपि महाराजे केवलराजशब्दप्रयोगमपि पश्यामः। तदेतत् समाधानं सिद्धान्ती दूषयति, न श्रुतिसमवायित्वादिति। यदुक्तं वशान्यायेन राजन्यायेन वास्यग्रहस्येन्द्रो देवता युज्यत इति तन्न, देवतात्वस्य तद्धितश्रुतिसमवायित्वात्, माहेन्द्रयग्रह इत्यत्र, सास्यदेवतेत्यस्मिन्नर्थे महेन्द्राद्वाणौचेति महेन्द्रशब्दादणप्रत्ययो विहितः, तस्मान्महेन्द्र एव देवता नत्विन्द्रः। विपक्षे बाधमाह गुणश्चानर्थक इति। यदीन्द्रो देवता स्यात्तदानीमैन्द्रयग्रह इत्येतावतैवार्थावगतौ महेन्द्र इति महत्त्वगुणोऽनर्थकः स्यात्, चकारः पूर्वहेतुना समुच्चयार्थः। हेत्वन्तरमाह तथा याज्यापुरोरुचोरिति। इन्द्रमहेन्द्रयोर्भेदे यथा महेन्द्रगुणः सार्थकस्तथा याज्यापुरोऽनुवाक्ययोर्भेदोऽप्यस्मिन्नेव पक्ष उपपद्यते। ऐन्द्रसानसिमित्यादिके इन्द्रस्य याज्यापुरोऽनुवाक्ये, महां इन्द्रो य ओजसेत्यादिके महेन्द्रस्य पूर्वपक्षिणोक्ते वशादृष्टान्ते वैषम्यमाह वशायामर्थसमवायादिति। या वशा विधिवाक्ये श्रुता, तस्या एव निगमेषु क्वागशब्देन व्यवहारो न विरुद्धः, क्वागत्वलक्षणस्यार्थस्य वशायां समवेतत्वात्, तच्च प्रत्यक्षेणोपलभ्यते, इन्द्रमहेन्द्रयोस्तु भेद उपपादितः, तस्माद्विषमो दृष्टान्तः। एवं संस्कारपक्षे प्रगाथस्यैन्द्रकर्म्मण्यपकर्षप्रसङ्गात्, तद्वारयितुं स्तोत्रशस्त्रयोः प्रधानकर्म्मत्वमिति सिद्धान्तिनो मतं। पुनरपि पूर्वपक्षी तदेतन्मतं निराचष्टे, यत्रेतिवार्थवत्स्यादिति। वाशब्दः सिद्धान्तिमतव्यावृत्त्यर्थः, यच्चैन्द्रं कर्म्म तत्र प्रगाथो नेतव्य इत्ययमेव पक्षः स्यात्, कुतः, सार्थवत्त्वात्, ऐन्द्रो मन्त्र इन्द्रमेव प्रकाशयितुं समर्थ इत्यर्थवान् स्यादिति, महेन्द्रन्तु प्रकाशयितुमसमर्थत्वादानर्थक्यं प्रगाथस्य प्रसज्येत, तस्माद्देवताप्रकाशनरूपसंस्कारकर्म्मत्वमेव स्तोत्रशस्त्रयोर्युक्तमिति स्थितः पूर्वपक्षः। अथ सिद्धान्तमाह, अपि वा श्रुतिसंयोगात् प्रकरणे स्तौति शंसति क्रियेत्यस्मिं विदध्यातामिति। अपि वेत्यनेन संस्कार-

कर्म्मत्वं व्यावर्त्तते, स्तौतिधातुः शंसतिधातुश्चेत्येतावुभावपि स्वप्रकरण एव कस्याश्चित्प्रधानक्रियाया उत्पत्तिं विदधातां, कुतः, श्रुतिसंयोगात्, तयोर्धात्वोर्वाच्योऽर्थः श्रुतिरित्युच्यते। तत्संयोगः प्रधानकर्म्मत्वे सिद्धति। तथाहि गुणिनमुपसर्ज्जनीकृत्य तन्निष्ठानां गुणानां प्राधान्येन कथनं स्तुतिः, यो देवदत्तश्चतुर्वेदाभिज्ञ इत्युक्ते सर्वे जनाः स्तुतिमवगच्छन्ति, गुणस्योपसर्जनत्वे तु स्तुतिर्न प्रतीयन्ते, यश्चतुर्वेदाभिज्ञस्तमाकारयेत्युक्ते स्तुतिं न मन्यन्ते, किन्त्वाङ्गानप्राधान्यमेव बुद्ध्यन्ते। एवं मन्त्रेष्वपि या देवता सेयमीदृग्गुणैरुपेतेति गुणप्राधान्यं विधीयते, तत्पक्षेतु येयमीदृग्गुणयुक्ता, सेयं देवतेति देवतास्मरणस्य प्राधान्यादियं स्तुतिर्न स्यात्, ततः श्रुतिलक्षणादेते प्रधानकर्म्मणी। तथा सति देवताप्रकाशने तात्पर्य्याभावादैन्द्रोऽपि प्रगाथः स्वप्रकरणगते माहेन्द्रकर्म्मण्येवावतिष्ठते। यदि देवतानुस्मरणरूपं दृष्टं प्रयोजनं न लभ्येत तर्ह्यदृष्टमस्तु, प्रधानकर्म्मत्वे हेत्वन्तरमाह, शब्दपृथक्त्वाच्चेति। द्वादशाभिष्टोमस्य स्तोत्राणि द्वादशशस्त्राणीत्यत्र द्वादशशब्देन स्तोत्राणां पृथक्त्वमवगम्यते, देवताप्रकाशनपक्षे सर्वैरपि मन्त्रसंघैः कृतस्य प्रकाशनस्यैकत्वेन द्वादशसङ्ख्या न स्यात्, प्रधानकर्म्मणान्वाख्यस्तोत्रपृष्ठस्तोत्रादिनामकानां भिन्नत्वात् द्वादशत्वसङ्ख्योपपद्यते, एवं शस्त्रवाक्येऽपि योज्यं। विपक्षे बाधमाह अनर्थकञ्च तद्वचनमिति। अग्निस्तुतिः श्रूयते, आग्नेया ग्रहा भवन्तीति। तत्रैव पुनरप्यन्यदुच्यते, आग्नेयीषु स्तुवन्ते आग्नेयीः शंसन्तीति. त्वत्पक्षे तद्वचनमनर्थकं स्यात्, चोदकप्राप्तेषु स्तोत्रशस्त्रमन्त्रेषु आग्नेयग्रहानुसारेण देवतापदस्योहे सत्याग्नेयत्वसिद्धिः, प्रधानकर्म्मपक्षेतु देवताप्रकाशनरूपत्वाभावेनोहाभावादाग्नेयमन्त्रान्तरविधिवचनमर्थवद्भवति। पुनरपि हेत्वन्तरमाह, अन्यश्चार्थः प्रतीयत इति। सम्बद्धे वै स्तोत्रशस्त्रे इति ह्यामनन्ति, सम्बन्धश्च द्वयोर्भवति नैकस्य, तस्मात् स्तोत्रशस्त्रयोरर्थभेदः प्रतीयते, स च संस्कारपक्षे न सम्भवति, देवताप्रकाशनरूपस्यार्थस्यैकत्वात्, प्रधानकर्म्मपक्षेतु स्तोत्रकर्म्म शस्त्रकर्म्मचेत्यर्थभेद उपपद्यते। यद्यपि स्तुतौ शंसुस्तुतावित्येकार्थौ, तथापि प्रगीतमन्त्रसाध्यं स्तोत्रं, अप्रगीतमन्त्रसाध्यं शस्त्रमिति तयोर्विवेकः। हेत्वन्तरमाह अभिधानञ्च कर्म्मवदिति। यथा प्रधानकर्म्मणि अग्निहोत्रं जुहोतीति द्वितीयासंयोगेनाभिहितं, तथा प्रउगं शंसतीत्यभिधीयते, अतस्तत्साहश्यात् प्रधानकर्म्मत्वं। हेत्वन्तरमाह यावन्निवृत्तेश्चेति। स्तुतस्य स्तुतमसीति स्तोत्रानुमन्त्रणमाम्नाय वाक्य-

शंसे स्तोत्रफलमेवाम्नातं, इन्द्रियावन्तो वनामहे धुक्षीमहि प्रजामिष-मिति, ननु देवताप्रयुक्तं फलमाम्नातं, अतो न देवता संस्कारः, किन्तु प्रधानकर्म्मेति स्थितं। अनेन तु निर्णयेन प्रयोजनविकृतिषूहाभावः, संस्कारपक्षेतु यस्यां विकृतौ देवतान्तरं, तत्र तद्वाचकं पदमूहनीयं स्यात्, तन्माभूदिति प्रधानकर्म्मत्वमुक्तं। एतच्च दर्शमाध्याये सूचितं, ग्रहाणां देवतान्यत्वे स्तुतशस्त्रयोः कर्म्मत्वादविकारः स्यादिति। अत्र संग्रहश्लोकौ। प्रउगं शंसतीत्यादौ गुणतो न प्रधानता। दृष्टादेव स्मृति-स्तेन गुणता स्तोत्रशस्त्रयोः॥ स्मृत्यर्थत्वे स्तौतिशंसत्योर्धात्वोः श्रुतार्थवादनं। तेनादृष्टमुपेत्यापि प्राधान्यं श्रुतये मतमिति। अग्निष्टोम-सत्यादिने सूर्य्योदयात् पूर्वं प्रेषितो होता प्रातरनुवाकमनुब्रूयात्, एतचैतरेयब्राह्मणे प्रपञ्चितं, देवेभ्यः प्रातर्यावभ्यो होतरनुब्रूहीत्या-ह्वाध्वर्युरित्यादिब्राह्मणं, तस्मिंश्च प्रातरनुवाकेऽग्निमीलइत्यादिसूक्त-मन्तर्भूतं, तच्च व्याख्यातं, प्रातःसवने वैश्वदेवग्रहादूर्द्धं प्रउगशस्त्रं होत्रा शंसनीयं, तच्च शस्त्रं वायवायाहीत्यादि सप्तर्चात्मकं, एतच्च ब्राह्मणे ग्रहोक्थमित्यादिखण्डे प्रपञ्चितं, तथा पञ्चमाध्याये स्तोत्रमग्ने शस्त्रादित्यादिखण्डे सूचितञ्च। अथेयमनुक्रमणिका, वायो वायवैन्द्र-वायवमैन्द्रावरुणास्तृचाः, अश्विनाद्वादशाश्विनैन्द्रावैश्वदेवसारस्व-तास्तृचाः, सप्तैताः प्रउगदेवता इति, अस्यायमर्थः, वायवायाहीत्या-दिकं नवर्चं सूक्तं, अग्निं नवेत्यतो नवशब्दस्यानुवृत्तेः, तत्राद्यस्तृचो वायुदेवताकः, द्वितीय इन्द्रवायुदेवताकः, तृतीयो मित्रावरुणदेव-ताकः, अश्विनेत्यादिकं द्वादशर्चं सूक्तं, तत्राद्यस्तृच आश्विनः, द्वितीय ऐन्द्रः, तृतीयो वैश्वदेवः, चतुर्थः सारस्वतः, तेषु तृचेषु प्रतिपाद्यदेवा-द्यादयः सारस्वतान्ताः सप्तसङ्ख्काः प्रउगशस्त्रस्य देवता इति, मधुच्छ-न्दसोऽनुवर्त्तनात् स एव ऋषिस्तथैवानुवृत्त्या गायत्रं छन्दः, वायव्ये तृचे प्रथमा, ग्रहस्यैन्द्रवायवस्यैकापुरोऽनुवाक्या, एतच्च ब्राह्मणे समाम्नातं, वायव्या पूर्वापुरोऽनुवाक्यैन्द्रवायव्युत्तरेति, तथा सूचितञ्च वायवायाहि दर्शतेन्द्रवायू इमे सुता इत्यनुवाक्ये इति, वायव्यतृचे प्रथमामृचमाह वायवायाहीति। दर्शत हे दर्शनीय वायो कर्म्मण्येतस्मिन् आयाहि आगच्छ, त्वदर्थमिमे सोमा अरंकृताः, अभिषवादिसंस्कारोऽलङ्कार-स्तेषां तान् सोमान् पाहि पिव, यद्वा तेषामेकदेशं इत्यध्याहारः, तत् प्रानार्थं हवमस्मदीयमाह्वानं शृणु शृणु। अत्र यास्कः, वायवायाहि दर्शनीयेमे सोमा अरङ्कृता अलङ्कृतास्तेषां पिव शृणु नोह्वानमिति।

१२१ वाय उक्थेभिर्जरन्ते त्वामच्छा जरितारः।
सुतसोमा अहर्विदः॥

दर्शत, भृमृदृशीत्यादिसूत्रेणातच्प्रत्यय औणादिकः। चित्त्वादन्तोदात्तस्यामन्त्रितानुदात्तत्वं। अर्त्तिस्तुसुहीत्यादिना मन्प्रत्ययान्तस्य सोमशब्दस्य नित्स्वरः। अलमित्यत्र छान्दसोरेफादेशः। अरङ्कृतशब्दे समासान्तोदात्तं बाधित्वा व्ययेन पूर्वपदप्रकृतिस्वरत्वप्राप्तौ; भूषणेऽलं (पां १। ४। ६४।) इत्यलंशब्दस्य गतिसंज्ञायां, गतिकारक (पां ६। २। १३९।) इत्यादिना ह्रदुत्तरपदप्रकृतिस्वरत्वे प्राप्ते तदपवादत्वेन, गतिरनन्तरः (पां ६। २। ४९।) इति पूर्वपदप्रकृतिस्वरत्वं, निपातत्वादलंशब्द आद्युदात्तः। पाह्योत्यत्र पिबादेशाभावश्छान्दसः। शुधीत्यत्र, शृणेः (पां ६। ४। १०२।) इत्यादिना हेर्धिभावः, तिङन्तादुत्तरस्य निघातो नास्ति, सेर्ह्यपिच (पां ३। ४। ८७।) इति पित्त्वनिषेधादनुदात्ते निवारिते प्रत्ययस्वरः। ह्वमित्यत्र ह्वयतिधातोर्बहुलं छन्दसि (पां ६। १। ३४।) इति सम्प्रसारणे सत्युकारान्तत्वात्, ऋदोरप् (पां ३। ३। ५७।) इत्यप्प्रत्ययः, तस्य पित्त्वादनुदात्तत्वे सति धातुस्वरः शिष्यते। संहितायां शुधीत्यस्य, अन्येषामपि दृश्यते (पां ६। ३। १३७।) इति दीर्घत्वं॥ १॥

द्वितीयामृचमाह वाय उक्थेभिरिति। हे वायो जरितारः स्तोतार ऋत्विग्यजमानास्त्वामच्छा त्वामभिलक्ष्य उक्थेभिरुक्थ्यप्रउगादिशस्त्रैर्जरन्ते स्तुवन्ति। कीदृशास्ते सुतसोमा अभिषुतेन सोमेनोपेताः। अहर्विदः, अहःशब्द एकेनाङ्गा निष्पाद्येऽग्निष्टोमादिक्रतौ वैदिकव्यवहारेण प्रसिद्धः, क्रतमिज्ञ इत्यर्थः। अर्चति गायतीत्यादिषु चतुष्वत्रिंशत्स्वर्चतिकर्म्मसु जरते ह्वयतीति पठितं। स्तुतेरप्यर्चनविशेषत्वात् औचित्येनात्र स्तुत्यर्थो जरतिधातुः। अच्छशब्दस्य संहितायां, निपातस्य च (पां ६। ३। १३६।) इति दीर्घः। सुतसोमाइत्यत्र बहुव्रीहित्वात् पूर्वपदप्रकृतिस्वरः। अहर्विदइत्यत्र समासस्वरं बाधित्वा, तत्पुरुषे तुल्यार्थतृतीया (पां ६। २। २।) इति द्वितीयापूर्वपदप्रकृतिस्वरत्वे प्राप्ते तदपवादत्वेन, गतिकारक (पां ६। २। १३९।) इत्यादिना ह्रदुत्तरपदप्रकृतिस्वरः॥ २॥

१ ३ १ वायो तव प्रपृञ्चती धेना जिगाति दाशुषे १
उरूची सोमपीतये ॥

(तृचः २)

१ १ १ इन्द्रवायू इमे सुता उप प्रयोभिरागतं १
इन्दवो वामुशन्ति हि ॥

तृतीयामृचमाह वायो तवेति। हे वायो, तव धेना वाक् सोमपीतये सोमपानार्थं दाशुषे दाश्वांसं दत्तवन्तं यजमानं जिगाति गच्छति, हे यजमान, त्वया दत्तं सोमं पास्यामीत्येवं वायुर्ब्रूतइत्यर्थः। कीदृशी धेना प्रपृञ्चती प्रकर्षेण सोमसम्पर्कं कुर्वती, सोमगुणं वर्णयन्तीत्यर्थः। उरूची, उरून् बहून् यजमानान् गच्छन्ती, ये ये सोमयाजिनस्तान् सर्वान् वर्णयन्तीत्यर्थः। प्रपृञ्चतीत्यत्र, शतुरनुमो न द्यजादी (पां ६। १। १७३।) इति ङीबुदात्तः। श्लोकाधारेत्यादिषु सप्तपञ्चाशत्सु वाङ्नामसु गणो धेना ग्ना इति पठितं वर्त्तते। अयतइत्यादिषु द्वाविंशाधिकशतसङ्ख्यकेषु गतिकर्म्मसु गाति जिगातीति पठितं। दाशुषइत्यत्र, गत्यर्थकर्म्मणि (पां २। ३। १२।) इति चतुर्थी। उरूचीत्यत्र गौरादित्वेन ङीषि कृते प्रत्ययस्वरः। सोमपीतयइत्यत्र बहुव्रीहित्वाभावेऽपि व्यत्ययेन पूर्वपदप्रकृतिस्वरः॥ ३ ॥

ऐन्द्रवायवे तृचे प्रथमामृचमाह, इन्द्रवायू इमे सुता इति। एतस्या ऋच ऐन्द्रवायवग्रहे द्वितीयपुरोनुवाक्यारूपेण विशेषविनियोगः पूर्वमेवोक्तः, हे इन्द्रवायू भवदर्थमिमे सोमाः सुता अभिषुतास्तस्माद्युवां प्रयोभिरन्नैरस्मभ्यं दातव्यैः सहोपागतं अस्मत्समीपं प्रत्यागच्छतं, हि यस्मादिन्दवः सोमा वां युवामुशन्ति कामयन्ते, तस्मादागमनमुचितं। इन्द्रवायूशब्दस्यामन्त्रिताद्युदात्तत्वं। प्रीणयन्ति भोक्तॄनिति प्रयांस्यन्नानि, प्रीधातोरन्तभावितण्यर्थादसुन्प्रत्यये सति नित्स्वरः। गमिधातोर्लोण्मध्यमपुरुषद्विवचने, बहुलं छन्दसि (पां २। ४। ७३।) इति शपो लुकि सति, अनुदात्तोपदेश (पां ६। ४। ३७।) इत्यादिना मकारलोपस्ततो गतमिति भवति। इन्दवः, उन्दीक्लेदन इति धातोः, उन्देरिच्चादेरित्युण्प्रत्यय आद्यक्षरस्येकारादेशश्चौणादिकस्तत इन्दुशब्दस्य नित्स्वरः, तिलवृत्तेः सोमरसस्य द्रवत्वात् क्लेदनं सम्भवति। युष्मच्छब्दा-

१ २ १ वायविन्द्रश्च चेतथः सुतानां वाजिनीवसू।
तावायातमुपद्रवत् ॥ ३ ॥
१ ३ १ वायविन्द्रश्च सुन्वत आयातमुप निष्कृतं।
मक्षित्था धिया नरा ॥

देशस्य वामित्येतस्य, अनुदात्तं सर्वमपादादौ ( पां ८ । १ । १८ । )इत्यनुदात्तः । उशन्तोत्यस्य निघाते, हिच ( पां ८ । १ । ३४ । ) इति सूत्रेण निघाते प्रतिषिद्धे सति प्रत्ययस्वरः । हिशब्दस्य निपातस्वरः ॥ १ ।

द्वितीयामृचमाह वायविन्द्रश्चेति । अत्र चकारेण नान्यः समुच्चीयते सन्निहितत्वाद्वायुरेव, हे वायो, त्वमिन्द्रश्च युवामुभौ सुतानामभिषुतान् सोमान् चेतथो जानीथः, यद्वाभिषुतानां सोमानां विशेषमित्यध्याहारः । कीदृशौ युवां, वाजिनीवसू, वाजिनीशब्दो यद्यप्युषोनामसु पठितस्तथाप्यन्नसम्भवादन्नं गृह्यते, वाजोऽन्नं तद्यस्यां हविःसन्ततावस्ति सा वाजिनी, तस्यां वसतइति तौ वाजिनीवसू, आमन्त्रितत्वादनुदात्तः, तौ तथाविधौ युवां द्रवत् क्षिप्रमुप समीपे आयातं आगच्छतं । षड्विंशतिसङ्ख्यकेषु क्षिप्रनामसु क्षिप्रं मक्षु द्रवदिति पठितं, तत्र फिटस्वरः ॥ २ ॥ इति प्रथमस्य प्रथमे दृतीयो वर्गः ॥

ऐन्द्रवायवे दृचे दृतीयामृचमाह वायविन्द्रश्च सुन्वतइति । हे वायो, त्वमिन्द्रश्च सुन्वतः, सोमाभिषवं कुर्वतो, यजमानस्य निष्कृतं संस्कृतं सोममुपायातं आगच्छतं । नरा, हे नरौ पुरुषौ पौरुषेण सामर्थ्येनोपेतौ, युवयोरागतयोश्च सतोर्धियामुना कर्म्मणा मक्षु त्वरया संस्कारः सम्पत्स्यते इत्था सत्यं । वायो इत्यस्य, आमन्त्रितस्य च ( पां ६ । १ । १५८ । ) इति षाष्ठिकमाद्युदात्तत्वं । इन्द्रः, इदिपरमैश्वर्य्य इति धातुः, इदितो नुम्धातोः ( पां ७ । १ । ५८ । ) रिति नुमागमः, ऋच्चेन्द्राग्नवच्चविप्रकुत्रचुत्रच्चुरभेत्यादिना औणादिक रन्प्रत्ययान्तो निपातितः, ज्नित्यादिर्नित्यं ( पां ६ । १ । १९७ । ) इत्याद्युदात्तः । चशब्दस्वादयोऽनुदात्ता इतिफिट्सूत्रेणानुदात्तः । सुन्वत इत्यत्र, शतुरनुमो नद्यजादी ( पां ६ । १ । १७३ । ) इति विभक्तेरुदात्तत्वं । निष्कृतं, निरित्यस्य समित्येतस्य स्थान इति यास्कः । कृतशब्दः, आदिकर्म्मणि क्तः कर्त्तरिच ( पां ३ । ४ । ७१ । ) इति कर्त्तरि क्तः, संस्कर्त्तुं प्रवृत्त

(तृचः ३)

१ १ १ मित्रं हुवे पूतदक्षं वरुणं च रिशादसं ।
धियं घृताचीं साधन्ता ॥

इत्यर्थः, कुगतिप्रादयः (पां १ । २ । २८ ।) इति समासेऽव्ययपूर्वपद-प्रकृतिस्वरत्वे प्राप्ते, थाथघञ्क्ताज्वित्रकाणां (पां ६ । २ । १४४ ।) इत्यन्तोदात्तः, गतिरनन्तरः (पां ६ । २ । ४९ ।) इति निस उदात्तत्वं न भवति, तद्धि कर्म्मणि क्ते विहितं, निष्करोतीति निष्कृदिति क्विबन्तव्याख्यानेतु, गतिकारकोपपदात् कृत् (पां ६ । २ । १३९ ।) इत्यृकार उदात्तः स्यात्। धिया, सावेकाचस्तृतीयादि (पां ६ । १ । १६८ ।) इत्यादिना विभक्तिरुदात्ता। नरा, सुपांसुलुक् (पां ७ । १ । ३९ ।) इत्यादिना सम्बोधनद्विवचनस्य डादेशः, पदात्परत्वात्, आमन्त्रितस्य च (पां ८ । १ । १९ ।) इत्याष्टमिको निघातः ॥ ३ ॥

मित्रं हुव इति मैत्रावरुणस्तृचो गवामयने आरम्भणीये चतुर्विंशेऽहनि प्रातःसवने मैत्रावरुणस्य स्तोत्रियः, तत्रैवाभिप्लवषडहेऽपि विनियुक्तः, तथाचाश्वलायनेन चतुर्विंशे होताजनिष्टेत्यादिखण्डे मित्रं वयं हवामहे, मित्रं हुवे पूतदक्षमित्यादिसूत्रितं, तथैवाभिप्लवपृष्ठ्याहानीतिखण्डे परिशिष्टानावापानुद्धृत्य मित्रं वयं हवामहे मित्रं हुवे पूतदक्षमिति च, तस्य मैत्रावरुणतृचस्य प्रथमामृचं मित्रं हुव इति। अहमस्मिन् कर्म्मणि हविःप्रदानाय पूतदक्षं पवित्रबलं मित्रं हुवे, तथा रिशादसं, रिशानां हिंसकानामदसं सम्भोक्तारं वरुणं हुवे आह्वयामि। कीदृशौ मित्रावरुणौ, घृतमुदकमञ्चति भूमिं प्रापयति या धीर्वर्षणकर्म्म तां घृताचीं धियं साधन्ता साधयन्तौ कुर्वन्तौ। मित्रशब्दः पुंलिङ्गः, प्रातिपदिकस्वरेणान्तोदात्तः। हुवे, हूयतेर्बहुलं छन्दसीति शपोलुकि सति, ह्वः सम्प्रसारणं (पां ६ । १ । ३२ ।) इत्यनुवृत्तौ, बहुलं छन्दसि (पां ६ । १ । ३४ ।) इति सम्प्रसारणे उवादेशः, तिङ्ङतिङः (पां ८ । १ । २८ ।) इति निघातः। पूतदक्षं, पूतशब्दः प्रत्ययस्वरेणान्तोदात्तः, बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वं। वरुणशब्दः ऋदुदादिभ्य उनन्नित्युनन्प्रत्ययान्तो नित्त्वादाद्युदात्तः। रिशन्ति हिंसन्तीति रिशाः शत्रवः, इगुपधज्ञाप्रीकिरः कः (पां ३ । १ । १३५ ।) इति कः प्रत्ययः, प्रत्ययस्वरेणोदात्तस्तानत्तीति

१ २ १ ऋतेन मित्रावरुणावृतावृधावृतस्पृशा १
क्रतुं बृहन्तमाशाथे ॥

रिष्टादात्तं सर्वधातुभ्योऽसुन्नित्यसुन्प्रत्यय औणादिकः, नित्स्वरेणोत्तरपदमाद्युदात्तं, क्षदुत्तरपदप्रकृतिस्वरेण स एव शिष्यते, शेषनिघाते सति, एकादेश उदात्तेनोदात्तः ( पां ८ । २ । ५ । ) इति सवर्णदीर्घेणाप्युदात्त एव । धीरिति, अप इत्यादिषु षड्विंशतिसङ्ख्यकेषु कर्म्मनामसु पठितः प्रातिपदिकस्वरेणान्तोदात्तः । घृतमञ्चतीति घृताची, ऋत्विग्दधृक् ( पां ३ । २ । ५९ । ) इत्यादिना क्विनि, अनिदितां ( पां ६ । ४ । २४ । ) इत्यादिना न लोपः, अञ्चतेश्चोपसङ्ख्यानमितिवार्त्तिकेन ङीप्, अचः ( पां ६ । ४ । १३८ । ) इत्याकारलोपे, चौ ( पां ६ । ३ । १३८ । ) इति दीर्घत्वं, घृतशब्दो, नञ्विषयस्यानिसन्तस्येत्याद्युदात्तं बाधित्वा घृतादीनाञ्चेत्यन्तोदात्तः, समासस्य ( पां ६ । १ । २२३ । ) इत्यन्तोदात्तस्यापवादकं, तत्पुरुषे तुल्यार्थैतृतीया ( पां ६ । २ । २ । ) इति पूर्वपदप्रकृतिस्वरं बाधित्वा, गतिकारकोपपदात् कृत् ( पां ६ । २ । २३९ । ) इत्युत्तरपदप्रकृतिस्वरेणान्तोदात्तस्य धात्वकारस्य लोपे सति, अनुदात्तस्य च यत्रोदात्तलोपः ( पां ६ । १ । १६१ । इति ङीप उदात्तत्वे प्राप्ते, चौ ( पां ६ । १ । २२२ । ) इति पूर्वपदान्तोदात्तत्वं । साधन्ता, राध् साध् संसिद्धावित्यस्मादन्तर्भावितण्यर्थाल्लटः शतृादेशे श्नमं बाधित्वा व्यत्ययेन शप्, अदुपदेशादुपरि शतृप्रत्ययस्य लसार्वधातुकानुदात्तत्वं, द्वितीयाद्विवचनस्य, शपश्च, अनुदात्तौ सुप्पितौ ( पां ६ । १ । ४ । ) इत्यनुदात्तत्वं, धातोः ( पां ६ । २ । १६२ । ) इति धातुस्वर एव शिष्यते । सुपां सुलुक् ( पां ७ । १ । ३९ । ) इति विभक्तेराकारादेशः ॥ १ ॥

द्वितीयाम्रचमाह ऋतेन मित्रावरुणाविति । हे मित्रावरुणौ, युवां क्रतुं प्रवर्त्तमानमिमं सोमयागं आशाथे आनशाथे व्याप्तवन्तौ, केन निमित्तेन, ऋतेन अवश्यम्भावितया सत्येन फलेनास्मभ्यं फलं दातुमित्यर्थः । कीदृशौ युवां ऋतावृधौ, ऋतमित्युदकनाम, सत्यं वा यज्ञं वेति यास्कः, उदकादीनामन्यतमस्य वर्द्धयितारौ, अतएव ऋतस्पृशा, उदकादीन् स्पृशन्तौ । कीदृशं क्रतुं बृहन्तं, अङ्गैरुपाङ्गैश्चातिप्रौढं । ऋतशब्दो घृतादित्वादन्तोदात्तः । मित्रावरुणावित्यत्र मित्रश्च वरुणश्चेति मित्रावरुणौ, देवताद्वन्द्वे च ( पां ६ । ३ । २६ । ) इतिपूर्वपदस्या

नडादेशः । ऋतस्य वर्द्धयितारावित्यर्थेऽन्तर्भावितण्यर्थाद्दृधेः क्विप्, ऋन्नेधामपि दृश्यते (पां ६।३।११७।) इति पूर्वपदस्य दीर्घः, ऋतस्पृशा, सुपांसुलुक् (पां ७।१।३९।) इति डादेशः। मित्रावरुणावित्याद्यामन्त्रितत्रयस्य खखपूर्वपदात् परत्वात्, आमन्त्रितस्य च (पां ८।१।१९।) इत्याद्यमिको निघातः। ननु ऋतेनेत्येतस्य, सुबामन्त्रिते पराङ्गवत्सरे (पां २।१।२।) इति पराङ्गवद्भावेनामन्त्रितानुप्रवेशात्, पादादित्वेन पदादपरत्वेन चाद्यमिकनिघाताभावात्, आमन्त्रितस्य च (पां ६।१।१९८।) इत्याद्युदात्तेन भवितव्यमिति चेन्न, पराङ्गवद्भावस्य सुबामन्त्रिताश्रयत्वेन पदविधित्वात्, समर्थः पदविधिः (पां २।१।१।) इति नियमात्, इह च ऋतेन मित्रावरुणाविति योराप्त इत्याख्यातेनैवान्वयेन परस्परमसामर्थ्यात्, यत्र पुनः परस्परान्वयेन सामर्थ्यन्तत्र पराङ्गवद्भवात् पादादेराद्युदात्तत्वं भवत्येव, यथा मरुतां पितस्तदहं गृणामीति, मृग्रोरुतिरितूतिप्रत्ययान्तत्वेन, एष्ट्रियो वै पयसो मरुतो जाता इत्यादावन्तोदात्तोऽपि हि मरुच्छब्दो मरुतां पितरित्यत्र सामर्थ्यात् पराङ्गवद्भावादेवाद्युदात्तो जातः, प्रकृते तु ऋतेनेत्यस्यासामर्थ्यादेव न पराङ्गवद्भाव इति, ऋताद्यधावित्यत्र द्वितीयामन्त्रितस्य निघाते कर्त्तव्ये, आमन्त्रितं पूर्वमविद्यमानवत् (पां ८।१।७२।) इति प्रथमामन्त्रितेनाविद्यमानवद्भावेन भवितव्यमिति चेत्, भवतु, अतएव तस्याव्यवधायकत्वात्, ऋतेनेति प्रथमपदात् परत्वेनैव द्वितीयामन्त्रितं निहनिष्यते। यथा इमं मे गङ्गे यमुने सरस्वतीत्यादौ, गङ्गेशब्दस्याविद्यमानवद्भावेऽपि तस्याव्यवधायकत्वादेव मे इत्येव पदमुपजीव्य यमुनेशब्दस्य निघातः, किञ्च प्रकृतेन च मित्रावरुणावित्यामन्त्रितं सामान्यवचनं, तस्य विशेषणतया विशेषवचनमृताद्यधावितीति, अतो नामन्त्रिते समानाधिकरणे सामान्यवचनं (पां ८।१।७३) इति पूर्वस्याविद्यमानवद्भावप्रतिषेधादपि निरन्तरायो द्वितीयनिघातः। नन्वेवमप्यादादावित्यनुवृत्तेः ऋताद्यधेत्यस्य द्वितीयपादादित्वान्न भवितव्यनिघातेन, अतएव हि इमं मे गङ्गे यमुने सरस्वति शुतुद्रिस्तोमं सचता इत्यत्र शुतुद्रिपदस्य पदात् परस्यापि पादादित्वादेव निघाताभावादाद्युदात्तं जातं, तद्वदत्रापि भवितव्यं, वक्तव्यो विशेष इति चेत्, उच्यते, मित्रावरुणास्य, सुबामन्त्रित इति पराङ्गवद्भावेन परानुप्रवेशादेव ऋताद्यधेत्यस्य न पादादित्वं, शुतुद्रिपदमपि तर्ह्येवमेव पूर्वस्य सरस्वतीपदस्य पराङ्गवद्भावेन न पादादिरिति निहन्येतेति चेत्, न,

१३१ कवी नो मित्रावरुणा तुविजाता उरुक्षया दक्षं दधाते अपसं ॥ ४ ॥

पराङ्गवद्भावस्तावत्सुबन्तमामन्त्रितं वाश्रित्य प्रवृत्तः पदविधिः, यत्र स्तयोः सत्येव परस्परान्वये पराङ्गवद्भावेन भवितव्यं, समर्थः पदविधिरिति नियमात्, श्रुतद्रिसरस्वतिपदयोश्च न परस्परेणान्वयः। किन्तु सचतेत्यनेनासामर्थ्यान्न पराङ्गवद्भावः, प्रकृते तु मित्रावरुणावृताव्धा इति द्वयोरपि सामानाधिकरण्येन परस्परान्वयादस्ति सामर्थ्यमिति भवितव्यं पराङ्गवद्भावेन, यथा मरुतां पितरित्यत्र विशेषः। नन्वतएव तर्हि मित्रावरुणपदस्य पराङ्गवद्भावेन पादादित्वादपादादाविति पर्युदासादामन्त्रितनिघातो न स्यादिति चेन्न, पूर्वं सुबन्तं परञ्चामन्त्रितमाश्रित्य यः स्वरः प्रवर्त्तते, तत्र सुबामन्त्रित इति पराङ्गवद्भावः, भवति चैवंविधे ऋतावृधपदनिघात इति। तत्र पूर्वस्य पराङ्गवद्भावेन पदादित्वात् संप्रवर्त्तते, मित्रावरुणपदनिघातस्तु पूर्वमेव पदमुपजीवति न परमामन्त्रितमिति न पराङ्गवद्भाववन्निघातोऽपि पदविधिरिति, ऋतेनेत्यनेनासामर्थ्यात्, ततः पदात्परस्य मित्रावरुणपदस्य न स्यादिति चेन्न, समानवाक्ये निघातयुष्मदस्मदादेशा वक्तव्या इति निघाते पदविधावपि समानवाक्यत्वमेव पर्य्याप्तं न पराङ्गवद्भाववत् परस्परान्वयोऽपीत्यलं। क्रतुं. छन्दःक्रतुरित्यौणादिकक्रञ्प्रत्ययः क्रतुरादेशः। प्रत्ययस्वरेणादिरुदात्तः। आघ्राये, आनघ्राये, छन्दसि लुङ् लङ् लिटः (पां ३। ४। ६।) इति वर्त्तमाने लिट्, नुडभावश्छान्दसः ॥ २ ॥

तृतीयामृचमाह कवी न इति। मित्रावरुणावेतौ देवौ नोऽस्माकं दक्षं बलं, अपसं कर्म्म च दधाते पोषयतः। कीदृशावेतौ कवी मेधाविनौ, तुविजातौ बहूनामुपकारकतया समुत्पन्नौ, उरुक्षया बहुनिवासौ। विप्रो धीरइत्यादिषु चतुर्विंशतिसङ्ख्यकेषु मेधाविनामसु कविर्मनीषीति पठितं। उरुतृवीत्येतौ द्वादशसु बहुनामसु पठितौ। रुजः पाज इत्यादिष्वष्टाविंशतिसङ्ख्यकेषु बलनामसु दक्षो विदिति पठितं। अपस्शब्दः षड्विंशतिसङ्ख्यकेषु कर्म्मनामसु पठितः। मित्रावरुणा, मित्रशब्दः प्रातिपदिकस्वरेणान्तोदात्तः, वरुणशब्दो नित्स्वरेणाद्युदात्तः, द्वन्द्वे देवताद्वन्द्वेचेत्युभावेव शिष्येते। तुविजातौ, बहूनामुपकारकतया तत्सम्बन्धित्वेन जाताविति षष्ठीसमासे समासान्तो-

## तृतीयसूक्तं।

ऋचः ॥ १ ॥

१११ अश्विना यज्वरीरिषो द्रवत्पाणी शुभस्पती।
पुरुभुजा चनस्यतं ॥

दात्तत्वं, चतुर्थीसमासे, हि (पां ८ । १ । ३४) चेति पूर्वपदप्रकृतिस्वरः स्यात्। उरुक्षया, उरूणां बहूनां क्षयावुरुक्षयौ, क्षिनिवासगत्योरिति धातोः क्षयत्यस्मिन्निति क्षय इत्यधिकरणे, एरच् (पां ३ । ३ । ५६।) इत्यच् प्रत्ययान्तस्य, चितः (पां ६ । १ । १६३।) इत्यन्तोदात्तत्वे प्राप्ते, क्षयो निवासे (पां ६ । १ । २०१।) इत्याद्युदात्तत्वं विहितं, समासे तु समासस्येत्यन्तोदात्तत्वं बाधित्वा क्षदुत्तरप्रकृतिस्वरेण प्राप्तमुत्तरपदाद्युदात्तत्वं, यद्यपि, घाघञ (पां ६ । २ । १४४।) इति घाघादिस्वरेणान्तोदात्तेन बाध्यते, तथापि, परादिश्छन्दसि बहुलं (पां ६ । २ । १६९।) इत्युत्तरपदाद्युदात्तत्वं द्रष्टव्यं। दक्षं, दक्षतेरुत्साहकर्म्मणो घञ्, जित्त्वादाद्युदात्तः। अपसं, अप्यते फलमनेनेत्यपः कर्म्म, आपः-कर्म्माख्यायां ऋहो नुट् चेत्यसुन्नन्तस्य, अपसस्पारइत्यादौ नित्त्वादाद्युदात्तस्याप्यपस्शब्दस्यात्र व्यत्ययेन प्रत्ययाद्युदात्तत्वं ॥ ३ ॥ इति प्रथमस्य प्रथमे चतुर्थो वर्गः ॥ ४ ॥

---

आश्विनस्तृचः प्रातरनुवाकस्य आश्विने क्रतौ विनियुक्तः, तथाच सूचितं, अथाश्विन एषो उषाः प्रातर्युजेति चतसोऽश्विना यज्वरीरिष इति, तत्र प्रथमामृचमाह अश्विना यज्वरीरिष इति। हे अश्विनौ युवामिषोहविर्लक्षणानि अन्नानि चनस्यतं इच्छतं भुञ्जाथामित्यर्थः, यद्यपि चनःशब्दोऽन्नवाची, तथापीषइत्यनेन सह नास्ति पुनरुक्तिदोषः, इच्छामुपलक्षयितुं प्रयुक्तत्वादुक्तार्थमुवाच, समूलकाषं कषतीत्यादौ यथा पुनरुक्त्यभावस्तद्वत्। कीदृशीरिषः, यज्वरीः यागनिष्पादिकाः। कीदृशावश्विनौ द्रवत्पाणी, हविर्ग्रहणाय द्रवद्भ्यां धावद्भ्यां पाणिभ्यामुपेतौ। शुभस्पती, शोभनस्य कर्म्मणः पालकौ। पुरुभुजा, पुरुभुजौ विस्तीर्ण-

भुजौ बङ्भोजिनौ वा। अश्विना, आमन्त्रितस्य च (पां ६।१।१९८।) इति षाष्ठिकमाद्युदात्तत्वं। यज्वरीः, यागकरणानामप्यन्नानामस्निग्धनक्तीतिवत् स्वव्यापारे कर्तृत्वविवक्षया, सुयजोर्ङ्वनिप् (पां ३।२।१०३।) इति ङ्वनिप् प्रत्ययः, वनोरच (पां ४।१।७।) इति ङीप्, वत्संनियोगेन रेफादेशः, प्रत्ययचयस्य, अनुदात्तौ सुप्पितौ (पां ३।१।४।) इत्यनुदात्तत्वाद्धातुस्वर एवावशिष्यते। इषःशब्दे शसोऽनुदात्तत्वात् प्रातिपदिकस्वर एव शिष्यते। द्रवत्पाणी, द्रवन्तौ धावन्तौ पाणी ययोस्तयोः सम्बोधनं द्रवत्पाणी, तस्यामन्त्रिताद्युदात्तत्वं, न पुनराद्यन्तिको निघातः, अपादादाविति प्रतिषेधात्। इषइति पूर्वपदस्य, सुबामन्त्रिते पराङ्गवत्स्वरे (पां २।१।२।) इति पराङ्गवद्भावेन मित्रावरुणावृतावृधाविवदपादादित्वमिति चेन्न, तत्र सामानाधिकरण्येन परस्परान्वयात्, इहत्विषो द्रवत्पाणीइत्यनयोः सरस्वतिस्तुतिपदसामर्थ्येन प्रयुक्तत्वात्, शुभइति, शुभशुम्भदीप्तावित्यस्य सम्पदादित्वात् भावे क्विबन्तस्य षष्ठ्येकवचनं, षष्ठ्याः पतिपुत्र (पां ८।३।५३।) इति विसर्जनीयस्य षत्वं, तस्य पतौ इत्यामन्त्रिते परतः पराङ्गवद्भावात् आमन्त्रिताद्युदात्तत्वं, न पुनराद्यन्तिको निघातः, तस्मिन् कर्त्तव्ये द्रवत्पाणीतिपूर्वस्यामन्त्रितस्य, आमन्त्रितं पूर्वमविद्यमानवदित्यविद्यमानवद्भावेन पादादित्वादपादादाविति प्रतिषेधात्। ननु मित्रावरुणावृतावृधाविवत्, नामन्त्रिते समानाधिकरणे (पां ८।१।७३।) इत्यविद्यमानवद्भावप्रतिषेधेन भवितव्यमिति चेन्न, मित्रावरुणपदं हि सामान्यवचनमिति युक्त्याविद्यमानवत्त्वप्रतिषेधः, द्रवत्पाणीपदन्तु न तथेति वैषम्यात्। पुरू विस्तीर्णौ भुजौ ययोस्तौ आमन्त्रिताद्युदात्तत्वं, सुपांसुलुगिति डादेशः, पुरु बञ् भुञ्जातइति वा। चनस्यतमित्यत्र, चायोरन्ने क्रत्वश्चेति चायृपूजानिशामनयोरित्यस्यासुन्प्रत्यये, आकारस्य क्रत्वे चानुक्तक्रनुडागमेच, लोपो व्योर्वलि (पां ६।१।६६।) इति यकारलोपे चनस्शब्दोऽन्ननामसुपठितस्तदात्मन इच्छतीति, सुप आत्मनः क्यच् (पां ३॥१।८।) इतिक्यच्, सनाद्यन्तेन धातुत्वात्तिङोमध्यमपुरुषद्विवचनं, क्यचः प्रत्ययस्वरेणोदात्तत्वं, शप, एकादेशउदात्तेनोदात्तः (पां ८।२।५।) इत्युदात्तः, उपर्य्याख्यातस्य तसार्वधातुकानुदात्तत्वे खरितत्वं, नच, तिङ्ङतिङः (पां ८।१।२८।) इति निघातः, पूर्वस्यामन्त्रितस्याविद्यमानवद्भावेन पदात् परत्वात् पादादित्वाद्वा तदप्राप्तेः॥१॥

१ २ १ अश्विना पुरुदंससा नरा शवीरया धिया १
धिष्ण्या वनतं गिरः ॥

द्वितीयामृचमाह अश्विनापुरुदंससेति । अश्विना हे अश्विनौ, युवां गिरोऽस्मदीयाः स्तुतीर्धिया आदरयुक्तया बुद्ध्या वनतं सम्भजतं स्वीकुरुतं । कीदृशावश्विनौ पुरुदंससा बञ्कर्म्माणौ, षड्विंशतिसङ्ख्यकेषु कर्म्मनामसु दंस इति पठितं । नरा नेतारौ, धिष्ण्या धाष्ण्ययुक्तौ बुद्धिमन्तौ वा । कीदृश्या धिया शवीरया गतियुक्तया अप्रतिहतप्रसरयेत्यर्थः । अश्विनेत्याद्यामन्त्रितचतुष्टयस्य वाष्ठिकमामन्त्रितादुदात्तत्वं, पादादित्वान्नाष्टमिको निघातः, पुरुदंससेत्यपि हि पादादिरेव, आमन्त्रितं पूर्वमविद्यमानवदिति पूर्वस्याविद्यमानवत्त्वान्नामन्त्रिते समानाधिकरण इति पूर्वस्य सामान्यवचनत्वेनास्य विशेषवचनत्वेन नाविद्यमानवत्त्वमिति चेन्न, अश्विशब्दवत् पुरुदंससशब्दस्यापि अश्विनाविव रूढ्या प्रयुज्यमानतया सामान्यशब्दत्वात् सामान्यवचनं, नाविद्यमानवदित्युक्तेऽर्थात् परस्य विशेषवचनत्वावगमादुभयोः सामान्यवचनत्वे पर्य्यायत्वेन पौनरुक्त्यात् सहाप्रयोग इति चेन्न, गुणविशेषसङ्कीर्त्तनवत् प्रसिद्धानेकनामविशेषसम्बन्धसङ्कीर्त्तनस्यापि स्तुत्युपयोगेन सप्रयोजनत्वान्निष्प्रयोजनपुनर्वचनस्यैव पुनरुक्तत्वात्, अश्विपुरुदंससशब्दयोरेकार्थत्ववृत्तित्वेऽपि पर्य्यायत्वादेव प्रवृत्तिनिमित्तभेदाभावेनासामानाधिकरण्यादपि नाविद्यमानवत्त्वप्रतिषेधः, भिन्नप्रवृत्तिनिमित्तानामेव हि एकस्मिन्नर्थे वृत्तिसामानाधिकरण्यं, अश्विशब्दस्याश्विसम्बन्धो निमित्तं, पुरुदंसस् शब्दस्य तु बञ्कर्म्मसम्बन्ध इति प्रवृत्तिनिमित्तभेद इति चेन्न, तद्धि द्वयं व्युत्पत्तिमात्रनिमित्तं न प्रवृत्तिनिमित्तं व्युत्पत्तिनिमित्तभेदमात्रेणापि सामानाधिकरण्याभिधाने वृत्तमहीरुहशब्दयोरपि तथात्वप्रसङ्गः, अतएव हीडेरन्तेदिते सरंसतिप्रिये प्रेयसि मद्दिविश्रुते इत्येतानि ते अध्रिये नामानीत्यत्र सहस्रतमीप्रभृतीनामुपयोगित्वेनेडादिशब्दानामेतानि अध्रिये नामानि इति वचनेन पर्य्यायाणामप्यनेकविशिष्टानामसम्बन्धनिबन्धस्तुत्यर्थत्वेनैव सहप्रयोगः, स्तुत्युपयोगेनैव व्युत्पत्तिनिमित्तभेदविवक्षायामपि पर्य्यायत्वेनासामानाधिकरण्यादेव, नामन्त्रिते (पां ८ । १ । ७३) इति निषेधाभावादामन्त्रितं पूर्वमविद्यमानवदिति पूर्वपूर्वस्याविद्यमानवत्त्वात् सर्वेषां वाष्ठि-

## १३१ दस्रा युवाकवः सुता नासत्या वृक्तबर्हिषः १ आयातं रुद्रवर्तनी ॥

कमादुदात्तत्वं, तद्वत् प्रकृतेऽपि, कॄ गॄ पॄ कटि पटि प्रोटिभ्य ईरन्नित्यनुवृत्तौ, बहुलवचनादन्यत्रापीत्यनेन शुभ्रुगताविति धातोरीरन्प्रत्यये कृते सति नित्त्वाच्छवीरया शब्द आद्युदात्तः। धिषेत्यत्र, सावेकाच (पां ६। १। १६८) इति विभक्तिरुदात्ता। वनतमित्यत्र शप्रः पित्त्वाल्लोपमध्यमद्विवचनस्य लसार्वधातुकाच्च, वन षन संभक्ताविति धातूदात्तत्वमेवावशिष्यते, नच, तिङ्ङ तिङः (पां ८। १। २८) इति निघातः, पूर्वामन्त्रितस्याविद्यमानत्वेन पदादित्वात्। गिरः, सुपोऽनुदात्तत्वे प्रातिपदिकस्वरः शिष्यते ॥ २ ॥

तृतीयामृचमाह दस्रा युवाकव इति। अत्राश्विनेत्यनुवर्त्तते, हे अश्विनौ, आयातं अस्मिन् कर्म्मण्यागच्छतं, किमर्थमिति तदुच्यते, सुता युष्मदर्थं सोमा अभिषुतास्तान् स्वीकर्त्तुमिति शेषः। कीदृशावश्विनौ दस्रा शत्रूणामुपक्षयितारौ, यद्वा देववैद्यत्वेन देवानामुपक्षयितारौ, अश्विनौ वै देवानां भिषजाविति श्रुतेः। पुनः कीदृशौ, नासत्या असत्यमनृतभाषणं तद्रहितौ। अत्र यास्कः सत्यावेव नासत्याविति उर्णनाभः। सत्यस्य प्रणेतारावित्याग्ग्रायण इति। रुद्रवर्त्तनी, रुद्रशब्दस्य रोदनं प्रवृत्तिनिमित्तं, यद्रोदीत्तद्रुद्रस्य रुद्रत्वमिति तैत्तिरीयाः। तद्यद्रोदयन्ति तस्माद्रुद्रा इति वाजसनेयिनः। रुद्राणां शत्रुरोदनकारिणां शूरभटानां वर्त्तनिर्मार्गो धाटीरूपो ययोस्तौ रुद्रवर्त्तनी, यथा धाटीमुखेन शत्रून् रोदयन्ति तद्वदेतावित्यर्थः। युवाकव इति अभिषुतसोमानां विशेषणं, वसतीवरीभिरेकधनाभिरद्भिर्मिश्रिता इत्यर्थः। वृक्तानि मूलैर्वर्जितानि बर्हींषि आस्तरणरूपाणि येषां सोमानां ते वृक्तबर्हिषः। यद्वा भरता इत्यादिष्वृक्षु ऋत्विङ्नामसु वृक्तबर्हिष इति पठितं, तदानीं तृतीयार्थे प्रथमा, ऋत्विग्भिरभिषुता इत्यन्वयः। दस्रा, आमन्त्रितस्य च (पां ६। १। १५८) इत्याद्युदात्तः, युवाकवः, युमिश्रणे, युवन्ति मिश्रीभवन्ति वसतीवरीप्रभृतिभिः अयणाद्यैरिति युवाकवः, कटिकुषादिष्वगणितस्यापि यौतेर्बहुलग्रहणात् काकुप्रत्ययः, तस्य कित्त्वेन गुणाभावादुवङादेशः, प्रत्ययस्वरेणाकार उदात्तः। न विद्यते असत्यमनयोरिति नासत्यौ, नञ्जा-

॥ तृचः २ ॥

१ १-१ इन्द्रायाहि चित्रभानो सुता इमे त्वायवः १
अण्वीभिस्तना पूतासः ॥

ण्नपान्नवेदानासत्या ( पां ६ । ३ । ७५ । ) इत्यादिना प्रकृतिवद्भावान्न लोपाभावः, पादादित्वेनानिघातादामन्त्रिताद्युदात्तत्वं । वृक्तवर्हिषः, वृक्तं मुलैर्वर्जितं वर्हिरास्तीर्णं येषां सोमानां ते वृक्तवर्हिषः पूर्वपद-प्रकृतिस्वरेण क्तप्रत्ययस्वरएव शिष्यते । आ इत्यत्र उपसर्गाश्चाभिवर्ज-मित्युदात्तः । रुद्रवर्त्तनी, आमन्त्रितस्य च ( पां ८ । १ । १९ । ) इत्याम-न्त्रितनिघातः ॥ ३ ॥

ऐन्द्रेतृचे प्रथमामृचमाह इन्द्रायाहीति । चित्रभानो विचित्रदीप्त इन्द्र अस्मिन् कर्म्मणि आयाहि आगच्छ, सुता अभिषुता इमे सोमाः त्वायवस्त्वां कामयमाना वर्त्तन्ते, अण्वीभिः, अण्व्यग्रुवइत्यादिषु द्वाविंशतिसङ्ख्यकेषु अङ्गुलिनामसु अण्वीति पठितं, ऋत्विजामङ्गुलीभिः सुता इत्यन्वयः, किञ्च एते सोमास्तना नित्यं पूतासः शुद्धाः,दशापवित्रेण शोधितत्वात् । इन्द्रशब्दं यास्को बहुधा निर्वक्ति, इन्द्रइरान्दृणातीति वा इरान्ददातीति वा इरान्दधातीति वा इरान्दारयतीति वा इरान्धारय-तीति वा इन्दवे द्रवत इति वा इन्दौ रमत इति वा इन्धे भूतानीति वा, तद्यदेनं प्राणैः समैन्धत्तदिन्द्रस्येन्द्रत्वमिति विज्ञायते । इदं करणादि-त्याग्रायणः । इदन्दर्शनादित्यौपमन्यवः । इदन्ते वैश्वर्य्यकर्म्मणः इच्छत्रूणां दारयिता वा इद्रावयिता दरयिता वा यज्वनामिति । अस्यायमर्थः । दृ विदारण इति धातुः, इरामन्नमुद्दिश्य तन्निष्पादकजलसिद्ध्यर्थं दृणाति मेघं विदारयतीति इन्द्रः । डुदाञ्दानइति धातुः इरामन्नं वृष्टिनिष्पादनेन ददातीति इन्द्रः । घञ् पोषणार्थः इरामन्नं तृप्तिकारणं सस्यं दधाति जलप्रदानेन पुष्णातीति इन्द्रः । इरामुत्पादयितुः कर्ष-कमुखेन भूमिञ्चदारयतीति इन्द्रः । पूर्वोक्तपोषणमुखेन इरां धारयतीति विनाशराहित्येन स्थापयतीति इन्द्रः । इन्दुः सोमवल्लीरसस्तदर्थं याग-भूमौ द्रवति धावतीति इन्द्रः । इन्दौ यथोक्ते सोमे रमते क्रीडतीति इन्द्रः । ञिइन्धीदीप्ताविति धातुः, भूतानि प्राणिदेहानिन्धे जीवचै-तन्यरूपेणान्तः प्रविश्य दीपयतीति इन्द्रः । एतदेवाभिप्रेत्य वाज-सनेयिनआमनन्ति, इन्धो ह वै नामैषः, योऽयं दक्षिणेक्षणः पुरुष

स्तं वा एतमिन्द्रं सन्तं तमिन्द्रमित्याचक्षते परोक्षेण परोक्षप्रिया इव हि देवाः प्रत्यक्षद्विष इति। तद्यदित्यादिकं ब्राह्मणान्तरवाक्यं, तच्चेन्द्र-विषये निर्वचनमुच्यतइति शेषः। यद्यस्मात् कारणादेनं परमात्मरूप-मिन्द्रदेवं प्राणैर्वाक्चक्षुरादीन्द्रियैः प्राणापानादिवायुभिश्च सहितं समैन्धत, उपासका ध्यानेन सम्यक्प्रकाशितवन्तस्तत्तस्मात् कारणात् इन्द्रनाम सम्पन्नं, अस्मिन् पक्षे इन्ध्यते दीप्यतइति कर्मणि व्युत्पत्तिः। आग्रायणनामको मुनिरिदंकरणादिन्द्रइति निर्वचनं मन्यते। इन्दो हि परमात्मरूपेणेदं जगत् करोतीति, औपमन्यवनामको मुनिरिदन्दर्शना-दिन्द्र इतिनिर्वचनमाह। इदमितीदमित्यपरोक्षमुच्यते, विवेकेन हि परमात्मानमपरोक्षेण पश्यति। एतदेवाभिप्रेत्यारण्यकाण्डे समाम्नायते, स एतमेव पुरुषं ब्रह्म ततमपश्यदिदमदर्शमिति, तस्मादिदंद्रो नामेदं द्रोह वै नाम तमिदं द्रं सन्तमिन्द्र इत्याचक्षते परोक्षेण परोक्षप्रिया इवहि देवा इति। इदि परमैश्वर्य इति धातुः, स्वमायया जगदुत्पत्वं परमैश्वर्यं तद्योगादिन्द्रः, अनेनाभिप्रायेण श्रूयते इन्द्रो मायाभिः पुरुरूप ईयतइति। इनशब्दस्येश्वरवाचकस्याकारलोपे रुति नकारान्तं इन्पदं भवति। दृभयइतिधातुः, सच परमेश्वरः, भूचूणां दारयिता भीषयि-तेति इन्द्रः। दृगताविति धातुः, भूचूणां द्रावयिता पलायनं प्रापयिता इतीन्द्रः। यज्वनां यागानुष्ठायिनामादरयिता भयस्य परिहर्त्ता, एवमे-तानि निर्वचनानि द्रष्टव्यानि। इन्द्र इत्यत्र आमन्त्रिताद्युदात्तत्वं। आ इत्यत्र निपातत्वेनाद्युदात्तः। चित्रभानो, पदात्परत्वादामन्त्रित निघा-तः। त्वामिच्छन्तीत्यर्थे युष्मच्छब्दात्, सुप आत्मनः क्यच् (पां ३। १। ८) इति क्यच्। प्रत्ययोत्तरपदयोश्च (पां ७। २। ९८।) इति मपर्यन्तस्य त्वा-देशः, क्याच्छन्दसि (पां ३। २। १७०।) इति क्यजन्तादुप्रत्ययः। त्वयव इति प्राप्ते, युष्मदस्मदोरनादेशे (पां ७। २। ९६।) इति अविभक्तावपि छलादौ व्यत्ययेनात्वं, उकारः प्रत्ययस्वरेणाद्युदात्तः। अणुशब्दः सौक्ष्मवा-चकस्तद्योगात्प्रकृते अङ्गुलीषु वर्त्तते, वोतो गुणवचनात् (पां ४। १। ४४।) इति ङीषि प्राप्ते व्यत्ययेन ङीन्, नित्त्वादाद्युदात्तः। तना इत्ययं निपातो नित्यमित्यर्थः, निपातत्वादाद्युदात्तः। पूतासः, आज्जसेरसुक् (पां ७। १। ५०।) इत्यसुक् प्रत्ययः॥ १॥

१ २ १ इन्द्रायाहि धियेषितो विप्रजूतः सुतावतः १
उप ब्रह्माणि वाघतः ॥
१ ३ १ इन्द्रायाहि तूतुजान उप ब्रह्माणि हरिवः १
सुते दधिष्व नश्चनः ॥ ५ ॥

द्वितीयामृचमाह इन्द्रायाहि धियेति। हे इन्द्र, त्वमायाहि अस्मिन् कर्म्मण्यागच्छ, किमर्थं वाघतऋत्विजो ब्रह्माणि वेदरूपाणि स्तोत्राणि उपैतुं। कीदृशस्त्वं धियास्मदीययेष्टया प्रज्ञया इषितः प्राप्तः, अस्मद्भक्त्या प्रेरित इत्यर्थः। विप्रजूतः, यथा यजमानभक्त्या प्रेरितस्तथान्यैरपि विप्रैर्मेधाविभिर्ऋत्विग्भिः प्रेरितः। कीदृशस्य वाघतः, सुतावतः अभिषुतसोमयुक्तस्य। केतइत्यादिषु एकादशसु प्रज्ञानामसु धीरिति पठितं। चतुर्विंशतिसङ्ख्यकेषु मेधाविनामसु विप्रोधीरइति पठितं। भरताइत्यष्टसु ऋत्विङ्नामसु वाघत इति पठितं। इषित इत्यत्र इषगतावित्यस्मान्निष्ठायामिडागमः, आगमा अनुदात्ता इति इटोऽनुदात्तत्वात् क्तस्वरः शिष्यते। टुवप्बीजतन्तुसन्तान इति धातोः, ऋचेन्द्राग्रवच्चविप्रेत्यादिना रन् प्रत्ययान्तो विप्रशब्दो निपातितः। निपातनादुपधाया इकारो लघूपधगुणाभावश्च, नित्त्वादाद्युदात्तः, तैर्जूतः प्राप्तः। ज्वर इति सैत्रोधातुर्गत्यर्थः, ग्रुकः किति (पां ७। २। ११।) इति इट्प्रतिषेधः, क्तीया कर्म्मणि (पां ६। २। ४८।) इति पूर्वपदप्रकृतिस्वरत्वं। सुतावतइत्यत्र छान्दसं दीर्घत्वं, मतुपउदात्तत्वात् क्तप्रत्ययस्वरएव शिष्यते। ब्रह्माणि, नब्विषयानिसन्तस्येत्याद्युदात्तः। वाघच्छब्द ऋत्विङ्नामसु पठितः प्रातिपदिकस्वरः॥ २॥

तृतीयामृचमाह इन्द्रायाहीति। हरिशब्द इन्द्रसम्बन्धिनोरश्वयोर्नामधेयं, हरी इन्द्रस्य लोहितेऽग्नेरिति तदीयाश्वनामत्वेन पठितत्वात्। हे हरिवः, अश्वयुक्तेन्द्र, त्वं ब्रह्माण्युपैतुमायाहि। कीदृशस्त्वं तूतुजानस्त्वरमाणः, आगत्य चास्मिन् सुते सोमाभिषवयुक्ते कर्म्मणि नोऽस्मदीयं चनोऽन्नं हविर्लक्षणं दधिष्व धारय स्वीकुर्व्वित्यर्थः। तूतुजानस्तुजेर्लिटि, लिटः कानज्वा (पां ३। २। १०६।) इति कानजादेशः, तुजादीनां दीर्घोऽभ्यासस्य (पां ६। १। ७।) इत्यभ्यासस्य दीर्घत्वं, अभ्यस्तानामादिः (पां ६। १। १८९।) इत्याद्युदात्तत्वं।

( ३ )

१ १ १ ओमासश्चर्षणीधृतो विश्वे देवास आगत १
दाश्वांसो दाशुषः सुतं ॥

हरिवइत्यत्र हरयोऽस्य सन्तीत्यस्मिन्नर्थे, तदस्यास्त्यस्मिन्निति मतुप् (पां ५ । २ । ९४ ।) इति मतुप्, छन्दसीरः (पां ८ । २ । १५ ।) इति मकारस्य वत्वं, सम्बुद्धौ, उगिदचां (पां ७ । १ । ७० ।) इति नुम्, संयोगान्तलोपो, नकारस्य, मतुवसोरुसम्बुधौ छन्दसि (पां ८ । ३ । १ ।) इति नकारस्य रुत्वं, आद्यूदात्तो निघातः । ब्रह्माणीत्यस्य हरिवइत्यनेनासामर्थ्यात्, समर्थः पदविधिः (पां २ । १ । १ ।) इति नियमात्, सुबामन्त्रिते पराङ्गवत्स्वरे (पां २ । १ । २ ।) इति पराङ्गवद्भावेनामन्त्रितनिघाताभावादाद्युदात्तत्वे सति, उपेत्यकारस्य, नोदात्तः स्वरितोदय (पां ८ । ४ । ६७ ॥) इति स्वरितो न सन्नतरः । दधिध्वेत्यत्र दधातेर्लोटि थास्, थासः से (पां ३ । ४ । ८० ।) इति सेआदेशः, सवाभ्यां वामौ (पां ३ । ४ । ९१ ।) इति एकारस्य वादेशः, छन्दस्युभयथा (पां ३ । ४ । ११७ ।) इति सार्वधातुकार्द्धधातुकसंज्ञयोः सत्योः सार्वधातुकत्वेन शपि, तस्य, श्लौ (पां ६ । १ । १० ।) इति द्विर्भावः, आर्द्धधातुकत्वेनेडागमस्य, आतो लोप इटि च (पां ६ । ४ । ६४ ।) इत्याकारलोपः । चनः, चायेरन्ने क्रुखच्चेत्यसुन्नन्तश्चकारान्नुडागमे यलोपः ॥ ३ ॥ इति प्रथमस्य प्रथमे पञ्चमो वर्गः ॥ ५ ॥

वैश्वदेवर्चे प्रथमामृचमाह ओमासइति । हे विश्वेदेवास, एतन्नामका देवविशेषाः दाशुषो हविर्दत्तवतो यजमानस्य सुतं अभिषुतं सोमं प्रति आगत आगच्छत, ते च देवा ओमासो रक्षकाः । चर्षणीधृतो मनुष्याणां धारकाः । दाश्वांसः फलस्य दातारः । मनुष्या इत्यादिषु पञ्चविंशतिसङ्ख्यकेषु मनुष्यनामसु चर्षणीशब्दः पठितः । अश्विनावित्यादिष्वेकत्रिंशत्सङ्ख्यकेषु देवविशेषनामसु विश्वेदेवाः साध्या इति पठितं । एतामृचं यास्क एवं व्याख्यातवान्, अवितारो वावनीया वा मनुष्याभृतः सर्वे च देवा इहागच्छत, दत्तवन्तो दत्तवतः सुतमिति । तदेतदेकमेव वैश्वदेवं गायत्रं ऋचं दशतयीषु विद्यते, यत्तु किञ्चिद्बृहद्दैवतं तद्वैश्वदेवानां स्थाने युज्यते यदेव विश्वलिङ्गमिति शाकपूणिरिति । अत्र विश्वशब्दः सर्वशब्दपर्य्यायइति यास्कस्य मतं, तदेव

विशेषस्यैवासाधारणं लिङ्गमिति शाकपूणेर्मतं । अवन्तीत्योमासो देवाः, मन्नित्यनुवृत्तौ, अवि सिवि सि षु शुभ्यः किदिति मन्प्रत्ययः, ज्वरत्वरस्रिव्यविमवामुपधायाश्च (पां ६ । ४ । २० ।) इत्यूठ्, मनः कित्त्वेऽपि बाहुलकादुणः, आज्जसेरसुक् (पां ७ । १ । ५० ।) इति जसेरसुगागमः, आमन्त्रितादुदात्तत्वं । चर्षणयो मनुष्यास्तान् दृष्टिदानादिना धारयन्तीति चर्षणीधृतो देवाः, पूर्वस्यामन्त्रितस्य सामान्यवचनस्य, विभाषितं विशेषवचने बहुवचनं (पां ८ । १ । ७४ ।) इत्यविद्यमानवत्त्वप्रतिषेधादपादादित्वेन निघातः । नन्वतएव विद्यमानत्वात्, सुबामन्त्रित इति पराङ्गवत्त्वेनैकपदीभावात् पादपरत्वेन कथं निघात इति चेन्न, तत्कारणं स्वाश्रयमपि यद्यास्यादिति वचनात्, पदभेदप्रयुक्तस्य निघातस्याऽप्युपपत्तेः, एकपदेऽप्यादुदात्तत्वे, अनुदात्तं पदमेकवर्जमिति सुतरामेव निघातो भविष्यति, इत्यमेव तर्हि द्रवत्पाणी शुभस्पती इत्यत्रापि पराङ्गवत्त्वेनैकपदादुत्तरस्य विशेषनिघातप्रसङ्ग इति चेन्न, तत्र पराङ्गवद्भावस्य परेणामन्त्रितं पूर्वमविद्यमानवदित्यविद्यमानवद्भावेन बाधितत्वात्, इह पुनर्विभाषितं विशेषवचने बहुवचनमित्यविद्यमानवत्त्वनिषेधात् पूर्वस्याप्यामन्त्रितस्य विद्यमानवत्त्वात् पराङ्गवत्त्वं स्वीकृतमिति वैषम्यं । विश्वे, पादादित्वादाद्युदात्तः, गणदेवतावचनत्वाच्च विश्वशब्दो न सर्वशब्दपर्यायः इति विशेष्यपरतया सामान्यवचनत्वादोमासइत्यनेन न सामानाधिकरण्यं, सामानाधिकरण्ये हि पूर्वस्य पादस्य पराङ्गवद्भावे सति मित्रावरुणावृताद्येत्यादाविवाचाप्यामन्त्रितादुदात्तता न स्यात्, विश्व इत्यस्य विशेषणं देवास इति, दीव्यन्तीति देवाः प्रकाशवन्तः, नन्ववयवप्रसिद्धेः समुदायस्य प्रसिद्धिर्बलीयसीति रूढएवार्थो देवशब्दस्य ग्राह्यो न यौगिकः, यौगिकत्वे हि अवयवार्थानुसन्धानव्यवधानेन प्रतिपत्तिर्विच्छिन्ना स्यात्, समुदायप्रसिद्धौ तु न विच्छेद इति चेन्न, समुदायप्रसिद्धौ हि देवशब्दस्य सामान्यपरतया विशेषवचनत्वाभावात्, विभाषितं विशेषवचने बहुवचनमित्यनेनासिद्धत्वादिश्व इत्यस्याविद्यमानवत्त्वेन शुभस्पतीतिपदवद्देवाइत्यस्याप्याद्युदात्तत्वं स्यात्, स्वरानुसारेणाच रूढियोगेनापि देवशब्दस्य योगस्वीकारो युक्त एव । आगत आगच्छत, बहुलं छन्दसीति शपो लुकि सति, अनुदात्तोपदेश (पां ६ । ४ । ३७ ।) इत्यादिना मकारलोपः । आङः यदात् परत्वेन निघातः । दाश्वांसः, दाशृदानइत्यस्य क्वसौ, दाश्वान्

१ २ १ विश्वे देवासो अप्तुरः सुतमागन्तु तूर्णयः १
उस्रा इव स्वसराणि ॥

साह्वान् मीढांश्च ( पां ६ । १ । १२ । ) इति निपातनात् क्रादिनियमप्राप्त इडागमो द्विर्वचनञ्च न भवति, प्रत्ययस्वरेण क्वसोरुदात्तत्वं, दाशुषइत्यत्र, वसोः सम्प्रसारणं ( पां ६ । ४ । १३१ । इति सम्प्रसारणं, सम्प्रसारणाच्च ( पां ६ । १ । १०८ । ) इति पूर्वरूपत्वं, शासिवसिघसीनाञ्च ( पां ८ । ३ । ६० । ) इति षत्वं ॥ १ ॥

द्वितीयामृचमाह विश्वेदेवासइति। विश्वेदेवास एतन्नामका गणरूपा देवविशेषाः सुतं सोममागन्तु आगच्छन्तु । कीदृशाः अप्तुरः तत्तत्काले वृष्टिप्रदा इत्यर्थः। तूर्णयस्त्वरायुक्ता यजमानमनुग्रहीतुमालस्यरहिता इत्यर्थः। विश्वेषां देवानां सोमं प्रत्यागमने उस्रा इत्यादिषु दृष्टान्तः, उस्राः सूर्य्यरश्मयः स्वसराण्यहानि प्रत्यालस्यरहिता यथा गच्छन्ति तद्वत् । स्वेदयइत्यादिषु पञ्चदशसु रश्मिनामसु उस्रावसव इति पठितं । वस्तरित्यादिषु द्वादशष्वहर्नामसु स्वसराणि ध्रंस घर्म्म इति पठितं । तच्च पदं यास्केन व्याख्यातं, स्वसराण्यहानि भवन्ति स्वयं सारीण्यपि वा स्वरादित्यो भवति स एतानि सारयति उस्रा इव स्वसराणीत्यपि निगमो भवतीति । देवासः, पचाद्यजन्तश्चित्त्वादन्तोदात्तः । अप्तुरः, तुरत्वरणे श्नुविकरणी, तुरति त्वरयतीत्यर्थे, क्विप्च ( पां ३ । २ । ७६ । ) इति क्विप्, गतिकारकोपपदात् कृत् ( पां ६ । २ । १३९ ) इति उत्तरपदप्रकृतिस्वरत्वं । आगन्तु, आगच्छन्त्वित्यर्थे व्यत्ययेन मध्यमपुरुषबहुवचनं, बहुलं छन्दसीति शपो लुक् तस्य, तप्तनप्तनथनाश्च ( पां ७ । १ । ४५ । ) इत्यवादेशेऽपिदिति निषेधादङित्वादनुनासिकलोपाभावः, तिङ्ङतिङ इति निघातः। तूर्णयः, ञित्वरासम्भ्रमइति धातोस्त्वरन्तइति तूर्णयः, निरित्यनुवृत्तौ, वहि श्रिश्रूयुग्लाहात्वरिभ्यो निदिति नित्प्रत्ययः, नित्त्वादाद्युदात्तः। उस्राइवेत्यत्र इवेन विभक्त्यलोपः, पूर्वपदप्रकृतिस्वरत्वञ्चेति समासे पूर्वपदप्रकृतिस्वरत्वं नित्यं। सरतीति सरः सूर्य्यः, पचा द्यच्, स्वः सरो येषान्तानि स्वसराणि, बहुव्रीहौ प्रकृत्या पूर्वपदं ( पां ६ । २ १ । ) इति स्वर्शब्द आद्युदात्तः ॥ २ ॥

१३१ विश्वे देवासो अस्रिध एहिमायासो अद्रुहः १
मेधं जुषन्त वह्नयः ॥

( ४ )

१११ पावका नः सरस्वती वाजेभिर्वाजिनीवती १
यज्ञं वष्टु धियावसुः ॥

तृतीयामृचमाह विश्वेदेवासइति। विश्वे देवास एतन्नामका देवविशेषा मेधं हविर्यज्ञसम्बन्धं जुषन्तसेवन्तां। क्रोष्टृशास्ते अस्रिधः क्षयरहिताः क्षीणरहिता वा। एहिमायासः सर्वतोव्याप्तप्रज्ञाः, यद्वा सौचीकमग्निमभ्यु प्रविष्टमेहि मायासीतिरिति यदवोचत् तदनुकारणहेतुकोऽयं विश्वेषां देवानां व्यपदेश एहिमायास इति। अद्रुहो द्रोहरहिताः। वह्नयो वोढारः, धनानां प्रापयितारः। स्रिधः क्षयार्थस्य क्षीणार्थस्य वा सम्पदादिभ्यो भावे क्विपि नञा बहुव्रीहिः, पूर्वपदप्रकृतिस्वरं बाधित्वा, नञ्सुभ्यामित्युत्तरपदान्तोदात्तत्वं। एहिमायासः, ईहचेष्टायां, आसमन्तादीहतइत्येहि, इन्निति सर्वधातुसाधारण इन्प्रत्ययो नित्त्वादाद्युदात्तः, एहिर्माया प्राज्ञा येषामिति बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वं, अथवा आङ उदात्तादुत्तरस्य एहीतिलोण्मध्यमैकवचनस्य, तिङ्ङतिङ इति निघाते, एकादेश उदात्तेनोदात्तः (पां ८।२।५) इत्येकार उदात्तः, एहीत्येतत् पदयुक्तं मायासीत्यच मायेत्यक्षरद्वयं येषां ते एहिमायासः, पूर्वपदप्रकृतिस्वरः। अद्रुहः, द्रुहजिघांसायां, सम्पदादित्वाद्भावे क्विपि बहुव्रीहौ, नञ्सुभ्यां (पां ६।२।१७२) इत्युत्तरपदान्तोदात्तत्वं। मेधं, मेधृसङ्गमेच, मेध्यते देवैः संगम्यत इति मेधं हविः, कर्म्मणि घञ्, जित्त्वादाद्युदात्तः। जुषन्त, सेवन्ताभित्यर्थे, छन्दसि लुङ्लङ्लिटः (पां ३।४।६।) इति धातुसम्बन्धे लङ्। एत उक्तरूपा विश्वेदेवा अतो जुषन्तेति दुहादिधात्वर्थसम्बन्धात्, बहुलं छन्दस्यमाङ्योगेऽपि (पां ६।४।७५।) इत्यडागमाभावः। वह्नयः, निरित्यनुवृत्तौ, वहिश्रीत्यादिना विहितस्य नित्प्रत्ययस्य नित्त्वादाद्युदात्तत्वं ॥ ३ ॥

सारस्वते तृचे या प्रथमा सान्वारम्भणीयेष्टौ सरस्वत्याः पुरोनुवाक्या, तथा दर्शपूर्णमासावारभ्यमाण इत्यस्मिन् खण्डे पावकानः सरस्वती पावी-

१२१ चोदयित्री सूनृतानां चेतन्ती सुमतीनां १
यज्ञं दधे सरस्वती ॥

रवीकन्या चित्रायूरिति सूचितं, तामेतामृचमाह पावका न इति। सरस्वती देवी वाजेभिर्हविर्लक्षणैरन्नैर्निमित्तभूतैः, यद्वा यजमानेभ्यो दातव्यैरन्नैर्निमित्तभूतैर्नोऽस्मदीयं यज्ञं वस्तु कामयतां, कामयित्वा च निर्वहत्वित्यर्थः। तथाचारण्यकाण्डे श्रुत्यैवं व्याख्यातं यज्ञं वष्टिति यदाह यज्ञं वहत्वित्येव तदाहेति। कीदृशी सरस्वती पावका शोधयित्री। वाजिनीवती अन्नवत्क्रियावती। धियावसुः कर्म्मप्राप्यधननिमित्तभूता। वाग्देवतायास्तथाविधधननिमित्तत्वमारण्यकाण्डे श्रुत्या व्याख्यातं, यज्ञं वष्टु धियावसुरिति वाग्वै धियावसुरिति। श्येनः सोम इत्यादिषु षट्त्रिंशत्सङ्ख्यकेषु देवताविशेषवाचिषु पदेषु सरमा सरस्वतीति पठितं। एतामृचं यास्क एवं व्याचष्टे, पावका नः सरस्वत्यन्नैरन्नवती यज्ञं वष्टु धियावसुः कर्म्मवसुरिति। पवनं पावः शुद्धिस्तां कायतीति पावका, कै गै रै शब्दइति धातोः, आतोऽनुपसर्गे कः ( पां ३। २। ३। ) इति क प्रत्ययः, कृदुत्तरपदप्रकृतिस्वरत्वेनोदात्तत्वं, यद्वा पुनातीत्यर्थे ण्वुलि कृते, प्रत्ययस्यात्कात्पूर्वस्यातइदाप्यसुपः ( पां ७। ३। ४४। ) इतीत्वस्याभावोऽन्तोदात्तश्च छान्दसं द्रष्टव्यं। सरःशब्दः सर्त्तेरसुन्नन्तत्वादाद्युदात्तः, मतुप्ङीषोः पित्त्वादनुदात्तत्वं। वाजेभिः, वाजशब्दो वृषादित्वादाद्युदात्तः, सह्यवत्कृत्वादाकृतिगणः, वाजोऽन्नमाख्यिति वाजिन्यः क्रियाः, अतइनिठनौ ( ५। २। ११५। ) इति इनिप्रत्ययः, ताः क्रिया यस्याः सन्ति सा वाजिनीवती, छन्दसीरः ( पां ८। २। १५। ) इति मतुपो वत्वं, मतुप्ङीषोः पित्त्वेनानुदात्तत्वमेव शिष्यते। यज्ञं, यज याच यत विच्छ प्रच्छ ( पां ३। ३। ९०। ) इत्यादिना नङ् प्रत्ययस्वरेणान्तोदात्तः। वष्टु, वशकान्तौ, कान्तिरभिलाषः, अदिप्रभृतिभ्यः शपः ( पां २। ४। ७२। ) इति शपो लुक्, निघातः। धिया कर्म्मणा वसु यस्याः सकाशाद्भवति सा धियावसुः, सावेकाचः ( पां ६। १। १६८। ) इति विभक्तिरुदात्ता, बहुव्रीहौ, प्रकृत्या पूर्वपदं ( पां ६। २। १। ) इति विभक्तिस्वर एव शिष्यते, छान्दसस्तृतीयाया अलुक् ॥ १ ॥

द्वितीयामृचमाह चोदयित्रीति। या सरस्वती, सेयमिमं यज्ञं

१३१ महो अर्णः सरस्वती प्रचेतयति केतुना १
धियो विश्वा विराजति ॥ ६ ॥

दधे धारितवती। कीदृशी, स्तूयतानां प्रियाणां सत्यवाक्यानां चोदयित्री प्रेरयित्री। सुमतीनां शोभनबुद्धियुक्तानामनुष्ठातॄणां चेतन्ती तदीयमनुष्ठेयं ज्ञापयन्ती। चोदयित्री, चुद्प्रेरणे ण्यन्तात्तृच्, चित्त्वादन्तोदात्तः, ऋन्नेभ्योऽङीप् (पां ४।१।५।) इति ङीप्, तस्य, उदात्तयणोहल्पूर्वात् (पां ६।१।१७४।) इत्युदात्तत्वं। स्तूयतानां, ऊन् परिहाणइत्यतः, क्विप्च (पां ३।२।७५) इति क्विपि, सु सुतरामूनयत्यप्रियमिति स्तून् इति प्रियमुच्यते। तच्च तदृतं सत्यञ्चेति स्तूयतं, परादिश्छन्दसि बहुलं (पां ६।२।१९९।) इत्युत्तरपदाद्युदात्तत्वं। चेतन्ती, चितीसंज्ञाने अत्रश्नेोऽङीपश्च चित्त्वादनुदात्तत्वं, श्नुस्त्वादुपदेशाल्लसार्वधातुकस्वरेणानुदात्तत्वं धात्वन्तस्वर एव शिष्यते। सुमतिशब्दस्य मतुपि क्रस्वत्वात्, नामन्यतरस्यां (पां ६।१।१७७।) इति विभक्तेरुदात्तत्वं ॥ २ ॥

तृतीयामृचमाह महो अर्ण इति। द्विविधा हि सरस्वती विग्रहवद्देवता, नदीरूपा च, तत्र पूर्वाभ्यामृग्भ्यां विग्रहवती प्रतिपादिता, अनया तु नदीरूपा प्रतिपाद्यते, तादृशी सरस्वती केतुना कर्म्मणा प्रवाहरूपेण महो अर्णः प्रभूतमुदकं प्रचेतयति प्रकर्षेण ज्ञापयति। किञ्च स्वकीयेन देवतारूपेण विश्वा धियः सर्वाण्यनुष्ठाप्रज्ञानानि विराजति विशेषेण दीपयति, अनुष्ठानविषया बुद्धीः सर्वदोत्पादयतीत्यर्थः। सरस्वत्या द्विरूपत्वं यास्को दर्शयति, तत्र सरस्वतीत्येतस्य नदीवद्देवतावच्च निगमा भवन्तीति। एकशतसङ्ख्यकेषूदकनामस्वर्णः चोद इति पठितं। एतामृचं यास्को व्याचष्टे, महदर्णः सरस्वती प्रचेतयति प्रज्ञापयति केतुना कर्म्मणा प्रज्ञया वेमानि च सर्वाणि प्रज्ञानान्यभिविराजतीति। महो अर्णः, महदिति तकारस्य व्यत्ययेन सकारस्य रुत्वोत्वगुणाः, प्रातिपदिकस्वरेणान्तोदात्तः, एङः पदान्तादति (पां ६।१।१०९।) इति पूर्वरूपे प्राप्ते, प्रकृत्यान्तः पादमव्यपरे (पां ६।१।११५।) इति प्रकृतिभावः, उदकेनुट्चेत्यसुनप्रत्ययो नुडागमश्च। केतुना प्रातिपदिकस्वरेणान्तोदात्तः। विश्वाः, विश्वशब्दः क्वन्प्रत्ययान्त आद्युदात्तः। इति प्रथमस्य प्रथमे षष्ठो वर्गः ॥ प्रथमोऽनुवाकः समाप्तः ॥

## द्वितीयानुवाकः ।

### चतुर्थसूक्तं ।

१ १ १ सुरूपकृत्नुमूतये सुदुघामिव गोदुहे ।
जुहूमसि द्यवि द्यवि ॥

प्रथमे मण्डले द्वितीयानुवाके चत्वारि सूक्तानि, तेषु सुरूपेत्यादिकं दशर्चं सूक्तं, सुरूपकृत्नुं दशेत्यनुक्रान्तत्वात्, पूर्ववन्मधुच्छन्दसो गायत्रस्य चानुवृत्तेस्तएव ऋषिच्छन्दसी, इन्द्रं पृच्छेतिचतुर्थ्यामृचि लिङ्गदर्शनादिन्द्रो देवता । अभिप्लवषडहे ब्राह्मणाच्छंसिनः प्रातःसवने स्तोमवृद्धावावापार्थानि सुरूपकृत्नुमूतयइत्यादीनि षट् सूक्तानि । सूत्रितञ्च अभिप्लवपृष्ठ्याहानीतिखण्डे ब्राह्मणाच्छंसिनः सुरूपकृत्नुमूतय इति षट् सूक्तानीति । आद्यानि त्रीणि सूक्तानि महाव्रते निष्केवल्ये औष्णिहतृचाशीतौ शस्तव्यानि । उक्तञ्च शौनकेन सुरूपकृत्नुमूतय इति त्रीण्येन्द्रसानसिं रयिमिति सूक्ते इति, चतुर्विंशेऽहनि माध्यन्दिने सवने ब्राह्मणाच्छंसिनः सुरूपकृत्नुमूतय इति वैकल्पिकस्तोत्रियस्तृचः । होत्रकाणामितिखण्डे मदे मदे हिनोददिः सुरूपकृत्नुमूतय इति सूत्रितत्वात् । अग्निष्टोमे वैश्वदेवशस्त्रे सुरूपकृत्नुमूतय इति धाय्या, सुरूपकृत्नुमूतये तक्षन्नृथमिति सूत्रितत्वात्, तामेतां सूक्तगतां प्रथमामृचमाह सुरूपकृत्नुमिति । सुरूपकृत्नुं शोभनरूपोपेतस्य कर्म्मणः कर्त्तारमिन्द्रमूतयेऽस्मद्रक्षार्थं द्यवि द्यवि प्रतिदिनं जुहूमसि आह्वयामः । आह्वाने दृष्टान्तः, गोदुहे गोधुगर्थं सुदुघामिव सुष्ठु दोग्ध्रीं गामिव, यथा लोके गोर्यो दोग्धा तदर्थं तस्याभिमुख्येन दोहनीयां गामाह्वयति तद्वत् । वस्तरित्यादिषु द्वादशस्वहर्नामसु द्यवि द्यवीति पठितं । सुरूपकृत्नुं, करोतीति कृत्नुः, कृहनिभ्यां क्त्नुः, कित्त्वाद्गुणाभावः, तकारोपजनश्छान्दसः, समासान्तोदात्त । ऊतये, अवतेर्धातोरुदात्त इत्यनुवृत्तौ, ऊति यूति जूति साति हेति कीर्त्तयश्च (पां ३ । ३ । ३७ ।) इति क्तिन्नुदात्तो निपातितः । सुष्ठुदुग्ध इति सुदुघा, दुहः कप् घश्च (पां ३ । २ । ७० ।) इति कप्प्रत्ययो हकारस्य च घकारः, कित्त्वाद्गुणाभावः, कपः पित्त्वादनुदात्तत्वे धातु-

१ २ १ उप नः सवनागहि सोमस्य सोमपाः पिब १
गोदा इद्रेवतो मदः ॥

स्वरेणोकारः उदात्तः। सुशब्देन गतिसमासे कृदुत्तरपदप्रकृतिस्वरत्वेन स एव स्वरः, इवेन विभक्त्यलोपः, पूर्वपदप्रकृतिस्वरत्वञ्चेति, इवसमासे स एव। गां दोग्धीति गोधुक्, सत्सूद्विष दृह दुह युज (पां ३। २। ६१।) इत्यादिना क्विप्, कृदुत्तरपदप्रकृतिस्वरत्वं। जुह्वमसि, क्रयतेर्लङ्डुत्तमपुरुषबहुवचनेन, बहुलं छन्दसि (पां २। ४। ७६।) इति शपः लुः, अभ्यस्तस्यच (पां ६। १। ३३।) इत्यभ्यस्तकारणस्य क्रयतेः प्रागेव द्विर्वचनात् सम्प्रसारणं, सम्प्रसारणाच्च (पां ६। १। १०८।) इति पररूपत्वं, हलः (पां ६। ४। २।) इति दीर्घः, ततः, स्यौ (पां ६। १। १०।) इति द्विर्वचनं, अभ्यासस्य क्रस्वश्च, सुत्वजश्त्वे, इदन्तोमसि (पां ७। १। ४६।) इतीकारागमः, प्रत्ययस्वरेण मकारस्योदात्तत्वं। द्यवि द्यवि, द्योशब्दः प्रातिपदिकस्वरेणान्तोदात्तः, नित्यवीप्सयोः (पां ८। १। ४।) इति द्विर्भावः, तस्य परमाम्रेडितं (पां ८। १। २।) इत्याम्रेडितं, अनुदात्तञ्च (पां ८। १। २।) इति द्वितीयस्यानुदात्तत्वं ॥ १ ॥

द्वितीयाम्रचमाह उप न इति। हे सोमपा इन्द्र, सोमं पातुं नोऽस्मदीयानि सवनानि त्रीणि सवनानि प्रत्युप समीपे आगहि आगच्छ, आगत्य च सोमस्य सोमं पिब, रेवतो धनवतस्तव मदो हर्षो गोदा। इत् गोप्रद एव, त्वयि हृष्टे सत्यस्माभिर्गावो लभ्यन्त इत्यर्थः। उप, निपातत्वादाद्युदात्तः। सवना, सूयते सोम एष्विति सवनानि, अधिकरणे लुट्, सुपो डादेशस्थिलोपश्च, लिति (पां ६। ४। १९३।) इति प्रत्ययात् पूर्वस्याकारस्योदात्तत्वं, गहि, बहुलं छन्दसि (पां २। ४। ७३।) इति शपोलुक्, हेर्डित्त्वात्, अनुदात्तोपदेश (पां ६। ४। ३७।) इत्यादिना मकारलोपः, अतोहेः (पां ६। ४। १०५।) इत्याभाच्छास्त्रीये लुकि कर्त्तव्ये, असिद्धवदत्राभात् (पां ६। ४। २२।) इत्याभाच्छास्त्रीयो मकारलोपोऽसिद्धवद्भवति। सोमपाः, आमन्त्रितस्य च (पां ८। १। १९।) इति निघातः, तस्याविद्यमानवत्त्वेऽपि पूर्वापेक्षया, तिङ्ङतिङः (पां ८। १। २८।) इति पिबेत्यस्य निघातः। नच पूर्वस्यापि पराङ्गवद्भावेन विद्यमानवत्त्वं, असाम-

१३१ अथा ते अन्तमानां विद्याम सुमतीनां १
मा नो अति ख्य आगहि ॥

र्थेन तदभावात्। गान्दातीति गोदाः, क्विप् च (पां ८।२।७६।) इति क्विपं परमप्यसरूपं बाधित्वा प्रतिपदविधेयत्वात्, आतो मनिन् क्वनिप् वनिपश्च (पां ३।२।७४।) इति विच्, क्विपिच्हि, घुमास्थागापा (पां ६।४।६६।) इत्यादिना धातोरकारस्य ईत्वं स्यात्। रेवान्, रयिर्धनमस्यास्तीति मतुप्, झयनुड्भ्यां मतुप् (पां ६।१।१७६।) इति मतुबुदात्तः, छन्दसीरः (पां ८।२।१५।) इति मस्य वत्वं, रयेर्मतौ, बहुलं छन्दसीति सम्प्रसारणपरपूर्वत्वे, गुणश्च। मदः, मदोऽनुपसर्गे (पां ३।३।६७।) इत्यप्, पित्त्वादनुदात्तः ॥ २ ॥

तृतीयाम्बचमाह अथा त इति। अथ सोमपानानन्तरं, हे इन्द्र, ते तवान्तमानां अतिशयेन समीपवर्त्तिनां सुमतीनां शोभनमतियुक्तानां पुरुषाणां मध्ये स्थित्वा विद्याम वयं त्वां जानीमः, यद्वा सुमतीनां शोभनबुद्धीनां कर्म्मानुष्ठानविषयाणां लाभार्थमित्यध्याहारः, बुद्धिलाभाय त्वां स्मराम इत्यर्थः। त्वमपि नोऽति माख्यः अस्मानतिक्रम्यान्येषां त्वत्स्वरूपं मा प्रकथय, किन्त्वागहि अस्मानेवागच्छ। अथ, निपात आद्युदात्तः, निपातस्य च (पां ६।३।१३६।) इति दीर्घत्वं। अन्तमानां, अतिशयेनान्तिका इत्यस्मिन्नर्थे, अतिशायने तमबिष्ठनौ (पां ५।३।५५।) इति तमप्, तमेताश्चेति तादिलोपः। अन्तोऽस्यास्तीत्यन्तिकः समीपः, अत इनिठनौ (पां ५।२।११५।) इति इनिः प्रत्ययः, नित्त्वादाद्युदात्तः, दूरोत्कर्षस्य ह्यवसानं नास्ति, सामीप्योत्कर्षस्य पुनर्यो यस्य समीपः सएव तस्यान्त इत्यन्तरत्वात् समीपमन्तिकमुच्यते। विद्याम, वेत्तेर्लिङि, यासुट् परस्मैपदेषूदात्तो ङिच्च (पां ३।४।१०३।) इति यासुडुदात्तः, पादादित्वात्तिङुतिङ इति निघातः। सुमतीनां, मतिशब्देक्तिन्नन्तेऽपि, मन्त्रे वृषेषपचमनविदभूवीरा उदात्तः (पां ३।३।९६।) इतीकार उदात्तः, शोभना मतिर्येषान्ते सुमतयः, बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वापवादो, नञ्सुभ्यां (पां ६।२।१७२।) इत्युत्तरपदान्तोदात्तः। शोभना मतयः सुमतय इति कर्म्मधारयेऽपि अव्ययपूर्वपदप्रकृतिस्वरत्वापवादः क्षदुत्तरपदप्रकृतिस्वरेणा-

१४१ परेहि विग्रमस्तृतमिन्द्रं पृच्छा विपश्चितं १
यस्ते सखिभ्य आ वरं ॥
१५१ उत ब्रुवन्तु नो निदो निरन्यतश्चिदारत १
दधाना इन्द्र इद्दुवः ॥ ७ ॥

न्तोदात्ततैव मतौ, मतुपि ऋखादन्तोदात्तत्वाच्च सुमतिशब्दात् परस्य नामो, नामन्यतरस्यां ( पां ६ । १ । १७१ ) इत्युदात्तत्वं । ख्यः, ख्या प्रकथन इत्यस्य लुङि सिपि, अस्यति वक्ति ख्यातिभ्योऽङ् ( पां ३ । १ । ५२ । ) इति च्लेरङादेशः, आतो लोप इटि च ( पां ६ । ४ । ६४ । ) इत्याकारलोपः, इतश्च ( पां ३ । ४ । १०० । ) इतीकारलोपोरुत्वविसर्गौ, नमाङ्योगे ( पां ६ । ४ । ७४ । ) इत्यडभावः । गहि, गमेर्बहुलं छन्दसीति शपोलुकि, हेर्डित्त्वात्, अनुदात्तोपदेश ( पां ६ । ४ । ३७ । ) इति मकारलोपस्य, असिद्धवदत्राभात् ( पां ६ । ४ । २२ । ) इत्यसिद्धत्वात्, अतोहेः ( पां ६ । ४ । १०५ । ) इति हेर्लुङ्न भवति ॥ ३ ॥

चतुर्थीमृचमाह परेहीति । अत्र यजमानं प्रति होता ब्रूते, हे यजमान, त्वमिन्द्रं परेहि इन्द्रस्य समीपं गच्छ, गत्वा च विपश्चितं मेधाविनं होतारमाप्टच्छ, असौ होता सम्यक् स्तुतवान् नवेत्येवं प्रश्नं कुरु । य इन्द्रस्ते तव यजमानस्य सखिभ्य ऋत्विग्भ्यो वरं श्रेष्ठं धनपुत्रादिकमासमन्तात् प्रयच्छतीति शेषः, तादृशमिति पूर्वत्रान्वयः । पुनरपि कीदृशं, विग्रं मेधाविनं । अस्तृतमहिंसितं । विप्रइत्यादिषु चतुर्विंशतिसङ्ख्यकेषु मेधाविनामसु विग्रविपश्चिच्छब्दौ पठितौ । विग्रं, वृषादित्वादाद्युदात्तः, अव्ययपूर्वपदप्रकृतिस्वरत्वं । इन्द्रशब्दः, ऋचन्द्राग्र इत्यादिना रन् प्रत्ययान्तो नित्त्वादाद्युदात्तः । सखिभ्यः, समानेख्यश्चोदात्त इति समाने उपपदे ख्यातेरिण्, डिदित्यनुवृत्तेस्तस्य डित्त्वाट्टिलोपश्च, तत्सन्नियोगेन यलोपः, उपपदस्योदात्तत्वं, समानस्य, छन्दस्यमूर्धप्रभृत्युदर्केषु ( पां ६ । ३ । ४८ । ) इति सभावः, अतः सखिशब्द आद्युदात्तः । व्रियत इति वरः, ग्रहवृदृनिश्चिगमश्च ( पां ३ । ३ । ५८ । ) इत्यप्, पित्त्वाद्धातुस्वरएव ॥ ४ ॥

पञ्चमीमृचमाह उतब्रुवन्त्विति । नोऽस्माकं सम्बन्धिन ऋत्विज इति शेषः, ते ब्रुवन्तु इन्द्रं स्तुवन्तु, उत अपि च, हे निदः, निन्दि-

१ ६ १ उत नः सुभगां अरिर्वोचेयुर्दस्म कृष्टयः १
स्यामेदिन्द्रस्य शर्म्मणि ॥

तारः पुरुषा निरारत इतो देशान्निर्गच्छत, अन्यतश्चिदन्यस्मादपि देशान्निर्गच्छत। कीटशा ऋत्विज इड्वः परिचर्य्यान्दधानाः कुर्वाणाः। इच्छब्दोऽवधारणे सर्वदा परिचर्य्यां कुर्वन्त एव तिष्ठन्त्वित्यर्थः। निन्दन्तीति निदः, निदिकुत्सायां क्विप्, नुमभावश्छान्दसः, सुपोऽनुदात्तत्वाद्धातुस्वरः, आमन्त्रितत्वेऽपि वाक्यान्तरत्वेन स्ववाक्यगतपदादपरत्वान्निघात इत्याद्युदात्तत्वमेव। अन्यतः, तिति (पां ६। १। १९३।) इति प्रत्ययात् पूर्वस्योदात्तत्वं। चिदित्यपि शब्दार्थे, तेन न केवलमितः, इतो निर्गत्यान्यतोऽपि तिर्गच्छतेति गम्यते, स एष धात्वर्थयोः सम्बन्धो लुङा द्योत्यते, सच्हि धातुसम्बन्धाधिकारे विधीयते। आरत, अर्त्तेः, छन्दसि लुङ् लङ् लिटः (पां ३। ४। ६) इति लोडर्थे लुङ्, मध्यमपुरुषबहुवचनस्य तादेशः, सर्त्तिशास्त्यर्त्तिभ्यश्च (पां ३। १। ५६।) इति च्लेरङादेशः, ऋटशोऽङि गुणः (पां ७। ४। १६।) इति गुणः, आडागमः। दधानाः, शानच च्वित्वात् प्राप्तमन्तोदात्तत्वं बाधित्वा परत्वात्, अभ्यस्तानामादिः (पां ६। ४। १८६।) इत्याद्युदात्तत्वं। इड्वः, नब्विषयस्यानिसन्तस्येत्याद्युदात्तः ॥ ५ ॥ इति प्रथमस्य प्रथमे सप्तमो वर्गः ॥ ७ ॥

सुरूपेति सूक्ते षष्ठीमृचमाह उत न इति। हे दस्म शत्रूणामुपक्षयितरिन्द्र त्वदनुग्रहात् अरिरुत शत्रवोऽपि नोऽस्मान् सुभगान् शोभनधनोपेतान् वोचेयुरूचुयुः, कृष्टयो मनुष्या अस्मिन्नमिचभूता वदन्तीति किमुक्तव्यमितिशेषः। ततः सम्पन्ना वयमिन्द्रस्य शर्म्मणि इन्द्रप्रसादलब्धे सुखे स्यामेत् भवेमेव। मघमित्यादिष्वष्टाविंशतिसङ्ख्यकेषु धननामसु कृष्टय इति पठितं। उत, एवमादीनामन्त इत्यन्तोदात्तः। सुभगान्, भगशब्दस्य क्त्वादिषु पाठात्, नञ्सुभ्यां (पां ६। २। १७२।) इत्युत्तरपदान्तोदात्तत्वं बाधित्वा, क्त्वादयश्च (पां ६। २। ११८।) इति उत्तरपदाद्युदात्तत्वं, संहितायां, दीर्घादटिसमानपादे (पां ८। ३। ९।) इति नकारस्य रुत्वं, भो भगो अघो अपूर्वस्य योऽशि (पां ८। ३। १७।) इति यत्वं, तस्य, लोपः, शाकल्यस्य (पां ८। ३। १९।) इति लोपः, तस्यासिद्धत्वान्न पुनः सन्धिकार्य्यं, आतोऽटिनित्यं (पां ८। ३। ३।) इत्याकारस्य सानुनासिकता। अरिः,

१७१ एमाशुमाशवे भर यज्ञश्रियं नृमादनं १
पतयन्मन्दयत्सखं ॥

वचनव्यत्ययः । वोचेयुः उच्चायुः, वच् परिभाषणइत्यस्मादाशीर्लिङि, झेर्जुसादेशः, लिङ्याशिष्यङ् ( पां ३ । १ । ८६ । ) इत्यङ्प्रत्यये, वचउम् ( पां ७ । ४ । २० । ) इत्युमागमः गुणः, किदाशिषि ( पां ३ । १ । १०४ । ) इति यासुट्, छन्दस्युभयथा ( पां ३ । ४ । ११७ । ) इति लिङादेशस्य सार्वधातुकत्वात्, लिङः सलोपोऽनन्त्यस्य ( पां ७ । २ । ७९ । ) इति सकारलोपः, अतोयेयः ( पां ७ । २ । ८० । ) इतीयादेशः, आदृणः ( पां ६ । १ । ८७ । ) इति गुणः, अडो ऽदुपदेशाल्लसार्वधातुकस्वरेण लिङोऽनुदात्तत्वं, अङ्प्रत्ययस्वर एवशिष्यते, तेन सह इकारस्य गुणः, एकादेशउदात्तेनोदात्तः ( पां ८ । २ । ५ । ) इत्युदात्तः । दस्म, दसु उपक्षयइत्यस्मादन्तर्भावितण्यर्थात्, इषि युधीन्धिदसिस्याधूभ्यो मगिति मक्प्रत्यय औणादिकः, पदात् परत्वादामन्त्रितनिघातः । क्षयः, क्षिच् क्षौच संज्ञायां ( पां ३ । ३ । १७४ । ) इति क्षिचि, मनुष्यनामत्वात्, चितः ( पां ६ । १ । १६३ । ) इत्यन्तोदात्तः । स्याम, अस भुवि, अस्तेरलोपः ( पां ६ । ४ । १११ । ) इत्यकारलोपः, यासुट उदात्तत्वं, पादादित्वादनिघातः । शूर्ममणि, शूर्म हिंसायां, हिनस्ति दुःखमिति शूर्म्म, अन्येभ्योऽपि दृश्यन्ते ( पां ३ । २ । ७५ । ) इति मनिन्, नेड्वशिकृति ( पां ७ । २ । ८ । ) इतीट्प्रतिषेधः, नित्त्वादाद्युदात्तत्वं ॥ ६ ॥

सप्तमीमृचमाह एमाशुमाशव इति । ईमिति निपातइदमर्थे वर्त्तते, हे यजमान, आशवे क्षत्सोमयागव्याप्तायेन्द्राय ईमाभर इमं सोममाहर । कीदृशं सोमं, आशुं सवनव्यव्याप्तं । यज्ञश्रियं यज्ञस्य सम्पद्रूपं । नृमादनं, नृणामत्विग्यजमानानां हर्षहेतुं । पतयत् पतयन्तं कर्म्मणि प्राप्नुवन्तं । मन्दयत्सखं य इन्द्रो मन्द्रयति यजमानान् हर्षयति तस्मिन्निन्द्रे सखिभूतोऽयं सोमस्तत्प्राप्तिहेतुत्वात् । आशुं, क्षवापाजिमिस्वदिसाध्यशूभ्य उणिति उण्, प्रत्ययस्वरः । आशवे, पूर्ववत् । यज्ञश्रियं, समासस्य ( पां ६ । १ । २२३ । ) इत्यन्तोदात्तः । माद्यन्तेऽनेनेति मादनः, करणाधिकरणयोश्च ( पां ३ । ३ । ११७ । ) इति ल्युट्, तस्य ञित्त्वात् पूर्व आकार उदात्तः

१८१ अस्य पीत्वा शतक्रतो घनो वृत्राणामभवः १
प्रावो वाजेषु वाजिनं ॥
१९१ तं त्वा वाजेषु वाजिनं वाजयामः शतक्रतो १
धनानामिन्द्र सातये ॥

गतिकारकोपपदात् कृत् ( पां ६ । २ । १३९ । ) इति स एव शिष्यते । पतयत्, पतेरदन्तस्य चौरादिको णिच्, अतोलोपः, तस्य स्थानिवत्त्वादुपधाया वृद्ध्यभावः, लटः शचादेशः, तस्य, छन्दस्युभयथेत्यार्द्धधातुकत्वेन शबभावात्, अददुपदेशादिति निघाताभावेन प्रत्ययाद्युदात्तत्वमेव भवति, आर्द्धधातुकत्वेऽपि, सर्वे विधयश्छन्दसि विकल्प्यन्त इति परिभाषया, णेरनिटि ( पां ७ । १ । ५१ । ) इति णिलोपाभावः । मन्दयच्छब्दोऽन्तोदात्तः, मन्दयति इन्द्रे सखा, सप्तमी ( पां २ । १ । ४० । ) इति योगविभागात् समासः, तत्पुरुषे तुल्यार्थे ( पां ६ । २ । २ । ) इति सप्तमी, पूर्वपदप्रकृतिस्वरत्वं ॥ ७ ॥

अष्टमीमृचमाह अस्य पीत्वेति । हे शतक्रतो बज्रकर्म्मयुक्तेन्द्र, त्वमस्य सोमस्य सम्बन्धिनमंशं पीत्वा वृत्राणां शत्रूणां वृत्रनामकासुरप्रमुखानां शत्रूणां घनोऽभवो हन्ताभूः, ततो वाजेषु संग्रामेषु वाजिनं संग्रामवन्तं स्वभक्तं प्रावः प्रकर्षेण रक्षितवानसि । अस्येतीदम्शब्देन प्रयोगसमये पुरोदेशस्थः सोमो निर्दिश्यते, नतु पूर्वप्रकृतः सोमः परामृश्यते, अतो अनन्वादेशत्वान्नात्र, इदमोऽन्वादेशेऽशनुदात्तस्तृतीयादौ ( पां २ । ४ । ३२ । ) इत्यशादेशः, अतो न सर्वानुदात्तत्वं, किन्तु त्यदाद्यत्वे हलिलोपे अकारः प्रातिपदिकस्वरेणोदात्त इति । अन्तोदात्त इत्यन्तोदात्तादित्यनुवृत्तौ, ऊडिदम्पदाद्यप्पुभ्यैद्युभ्यः ( पां ६ । १ । १७१ । ) इति विभक्तिरुदात्ता । पीत्वा, पिवतेः क्त्वाप्रत्यये, घुमास्थागापा ( पां ६ । ४ । ६६ । ) इत्यादिना ईत्वं, प्रत्ययस्वरेणोदात्तः असामर्थ्यान्न परामन्त्रिताङ्गवद्भावः । घनः, मूर्त्तौ घनः ( पां ३ । ३ । ७७ । ) इति हन्तेर्धातोः काठिन्येऽप्प्रत्ययः, तदस्यास्तीत्यर्शआदित्वादजन्तः, चित्त्वादन्तोदात्तः । वाजेषु, वृद्यादित्वादाद्युदात्तः । वाजिनमिति प्रत्ययस्वरः ॥ ८ ॥

नवमीमृचमाह तंत्वेति । हे शतक्रतो बज्रकर्म्मयुक्त, यद्वा बज्र-

१।०१ यो रायोऽवनिर्महान्त्सुपारः सुन्वतः सखा १
तस्मा इन्द्राय गायत ॥ ८ ॥

प्रज्ञानयुक्तेन्द्र, धनानां सातये सम्भजनार्थं, वाजेषु युद्धेषु वाजिनं बलवन्तं तं त्वा पूर्वमन्त्रोक्तगुणयुक्तं त्वां वाजयामः अन्नवन्तं कुर्म्मः। रण इत्यादिषु षट्चत्वारिंशत्सु संग्रामनामसु पोस्ये वाजे अग्रन्निति पठितं। अष्टाविंशतिसङ्ख्यकेषु अन्ननामसु अन्धः वाजः पाज इति पठितं। उरु तुवीत्यादिषु द्वादशसु बऊनामसु शतं सहस्रमिति पठितं। अपः, अप्रइत्यादिषु षड्विंशति सङ्ख्यकेषु कर्म्मनामसु* शम क्रतुरिति पठितं। केतः केतुरित्यादिष्वेकादशसु प्रज्ञानामसु क्रतुरसुरिति पठितं। त्वा, अनुदात्तं सर्वं (पां ८।१।१८।) इत्यनुवृत्तौ, त्वामौ द्वितीयायाः (पां ८।१।२३।) इति त्वादेशः। वाजेषु, वज गतौ, वाजयति गमयति शरीरनिर्वाहमनेनेति वाजो बलमन्नं वा, ण्यन्तात् करणे घञ्, तच्च ञ्णित्स्वरितस्यापवादे, कर्षात्वतो घञोऽन्त उदात्तः (पां ६।१।१५८।) इत्यन्तोदात्तत्वे प्राप्ते तस्याप्यपवादत्वेन, वृषादीनाञ्च (पां ६।१।२०३।) इत्याद्युदात्तः। वाजयामः, वाजोऽस्यास्तीति वाजवान्, तं कुर्म्मइत्यर्थे, तत् करोति तदाचष्ट इति वार्त्तिकेन णिच्, इष्टवत्सौ प्रातिपदिकस्येति वार्त्तिकेन तस्मिन् परत इष्टवद्भावाद्विन्मतुपोर्लुगिति वार्त्तिकेन मतुपो लुक्, टेः (पां ६।४।१४३।) इत्यकारलोपः, णिचश्चित्त्वादन्तोदात्तत्वं, शपः पित्त्वेनानुदात्तत्वं, लसार्वधातुकस्वरेणाख्यातस्याप्यनुदात्तत्वं, पादादित्वान्निङ्ङ तिङ इति न निघातः। शतक्रतो, आमन्त्रितनिघातः, धनानां, नब्विषयस्यानिसन्तस्येत्याद्युदात्तः। सातये, उदात्त इत्यनुवृत्तौ, ऊतियूतिजूतिसातिहेतिकीर्त्तयश्च (पां ३।३।९७।) इति क्तिन्नुदात्तः ॥ ९ ॥

दशमीमृचमाह यो रायइति। यइन्द्रो रायो धनस्यावनीरक्षकः स्वामी वा, तस्मा इन्द्राय गायत, हे ऋत्विजस्तत्प्रीत्यर्थं स्तुतिं कुरुत। कीदृश इन्द्रः, महान् गुणैरधिकः,। सुपारः, सुष्ठुकर्म्मणां पूरयिता। सुन्वतो यजमानस्य सखा, सखिवत् प्रियः। रायः, ऊडिदम्पदाद्यप्पुम्रैद्युभ्यः (पां ६।१।१७१।) इति विभक्तेरुदात्तत्वं।

---

* शम इति कां।

## पञ्चमसूक्तं ।

१ १ १ आ त्वेता निषीदतेन्द्रमभिप्रगायत १
सखायः स्तोमवाहसः ॥

अवनिः, अव रक्षणगतिप्रीतितृप्त्यवगमप्रवेशश्रवणस्वाम्यर्थयाचनक्रियेच्छा दीप्त्यवाप्त्यालिङ्गनहिंसादानभाववृद्धिषु च इत्यस्मात्, अर्त्ति सृ धृ धम्यम्यश्यवितृभ्योऽनिरित्यनिः प्रत्यय औणादिकः, प्रत्ययाद्युदात्तत्वं । सुपारः, पॄ पालनपूरणयोरित्यस्मात्सृजन्तात्, कर्त्तरि अनुवृत्तौ पचाद्यच्, चितः ( पां ६ । १ । १६३ । ) इत्यन्तोदात्तः । सुन्वतः, शृतुरनुमोनद्यजादी ( पां ६ । १ । १७३ । ) इति भक्तिरुदात्ता । सखा, समाने ख्यश्चोदात्त इति इगन्तप्रत्ययान्तस्तत्सन्नियोगेन यलोपः, सशब्दश्चोदात्तः, डित्त्वाट्टिलोपः । तस्मै, अदिरित्यनुवृत्तौ, त्यजियजितनिभ्यो डिदिति तनोतेरदिःप्रत्ययः, डित्त्वाट्टिलोपे प्रत्ययस्वरेण तशब्दउदात्तः, त्यदाद्यत्वं, एकादेश उदात्तेनोदात्तः ( पां ८ । २ । ५ । ) इत्युदात्तः, सर्वैकाचस्तृतीयादिर्विभक्तिः ( पां ६ । १ । ६८ । ) इतिविभक्तेरुदात्तत्वे प्राप्ते प्रथमैकवचने अवर्णान्तत्वात्, नगोश्वन् सावनर्वा ( पां ६ । १ । १८२ । इति निषेधः । इन्द्राय, इन्द्रशब्दो रगप्रत्ययान्तो निपातितः, नित्त्वादाद्युदात्तः, कर्म्मणायमभिप्रैतिससम्प्रदानं ( पां ६ । ४ । ३२ । ) इत्यत्र क्रियाग्रहणं कर्त्तव्यमिति वचनात्, गानक्रियया प्राप्तत्वात् सम्प्रदानत्वेन चतुर्थी ॥ १० ॥ इति प्रथमस्य प्रथमेऽष्टमो वर्गः ॥ ८ ॥

---

आत्वेतिसूक्तं दशर्चं, सरूपसूक्तं दशेत्यनुवृत्तौ, आतु युञ्जन्तीत्येव मनुक्रान्तत्वात्, ऋषिच्छन्दोदेवताविनियोगः पूर्ववत्, विशेषविनियोगस्तु अतिरात्रे तृतीयपर्य्याये मैत्रावरुणशस्त्रे स्तोत्रियोऽयं तृचः। अतिरात्रे पर्य्यायाणामिति खण्डे आत्वेता निषीदतेत्युक्तत्वात्, तच्च प्रथमाम्त्वमाह आत्वेति। तु शब्दः क्षिप्रार्थो निपातः, ह्वाभ्यामाङ्भ्यामन्वेतुमितशब्दोऽभ्यसनीयः, हे सखायः ऋत्विजः क्षिप्रमस्मिन् कर्म्मण्यागच्छत, आदरार्थोऽभ्यासः, आगत्य च निषीदत उपविशत, उप-

१ २ ॥ पुरूतमं पुरूणामीशानं वार्य्याणां १
इन्द्रं सोमे सचा सुते ॥

विश्व चेन्द्रमभिप्रगायत सर्वतः प्रकर्षेण स्तुत। कीदृशः, स्तोमवाहसः, त्रिवृत् पञ्चदशादिस्तोमानस्मिन् कर्म्मणि वहन्ति प्रापयन्ति। आतु, आ, निपातत्वादाद्युदात्तः। इत, इणगतौ, ह्यचोऽतस्तिङः (पां ६। ३। १३५।) इति संहितायां दीर्घत्वं। नि, निपातत्वादाद्युदात्तः। सीदत, पाघ्राध्मास्थाम्नादाण् (पां ७। ३। ७८।) इत्यादिना सदेः सीदादेशः, सदिरप्रतेः (पां ८। ३। ६६।) इति संहितायां षत्वं। अभि, उपसर्गाश्चाभिवर्जमितिवचनात् प्रातिपदिकान्तोदात्तत्वं। स्तोमवाहसः, अर्त्तिषुस्तुसुञ्जुधुक्षिक्षुभायावापदियक्षिनीभ्यो मन्निति स्तौतिरौणादिकोमन्प्रत्ययान्तः स्तोमशब्दः, नित्त्वादाद्युदात्तः। स्तोमं वहन्तीति स्तोमवाहसः, वहिहाधाञ्भ्यक्छन्दसीत्यौणादिकोऽसुन्प्रत्ययः, तत्र णिदित्यनुवृत्तेः, अत उपधायाः (पां ७। २। ११६।) इत्युपधाया वृद्धिः, ह्रादुत्तरपदप्रकृतिस्वरत्वे प्राप्ते, गतिकारकोपपदयोः पूर्वपदप्रकृतिस्वरत्वस्येत्यौणादिकसूत्रात् समास आद्युदात्तः॥ १॥

द्वितीयामृचमाह पुरूतनमिति। सखायोऽभिप्रगायतेति पदद्वयमत्रानुवर्त्तते, हे सखाय ऋत्विजः, सचा यूयं सर्वैःसह, यद्वा सचा परस्परसमवायेन सुते अभिषुते सोमे प्रवृत्ते सतीन्द्रमभिप्रगायत। कीदृशमिन्द्रं, पुरूतमं पुरून् बहून् शत्रून् तमयति ग्लापयतीति पुरूतमः, पुरूणां बहूनां वार्याणां वरणीयानां धनानां ईशानं स्वामिनं। पुरूतमं, तमुग्लानइति धातोर्ण्यन्तात् पचाद्यचि चित्त्वादन्तोदात्तत्वेऽपि ह्रादुत्तरपदप्रकृतिस्वरं बाधित्वा, परादिश्छन्दसि बहुलं (पां ६। २। १९९।) इत्युत्तरपदाद्युदात्तत्वं। पुरूणां, पॄपालनपूरणयोरित्यस्मात् कुरित्यनुवृत्तौ, पॄभिदिव्यधिगृधिधृषिट्टपिभ्यइत्यौणादिकः कुः प्रत्ययः, कित्त्वादुगुणनिषेधे, उदोष्ठ्यपूर्वस्य (पां ७। १। १०२।) इत्युकारः, उरण् रपरः (पां १। १ ५२) इति ऋस्थानजोऽण् रपरः, प्रत्ययस्वरेणान्तोदात्तः पुरुशब्दः, अतो मतुपि, ऋक्षादन्तोदात्तात् पुरुशब्दात् परस्य नामो, नामन्यतरस्यां (पां ६। १। १७७।) इत्यन्तोदात्तत्वं। ईशानं, ईशॄऐश्वर्य्य इति धातोरनुदात्तत्वात् परस्य शानचो लसार्वधातुकानुदात्तत्वं। वार्य्याणां, वृङ् सम्भक्तावित्यस्मात्, ऋहलोर्ण्यत्

१३१ स घा नो योग आभुवत् स राये स पुरन्ध्यां १
गमद्वाजेभिरा स नः ॥

(पां ३।१।१२४।) इति ण्यत्, क्यब्विधौ हि वृजएव ग्रहणं न वृङः, तित्स्वरितं (पां ६।१।१८५।) इति प्रत्ययस्वरितं बाधित्वा, ईडवन्दवृशंसदुहां ण्यतः (पां ६।१।२१४।) इति ण्यदन्तस्याद्युदात्तत्वं यतोऽनावः (पां ६।१।२१३।) इत्यत्र तु ण्यतो ग्रहणं न भवति, तस्य ह्यनुबन्धकत्वात्, एकानुबन्धग्रहणे न ह्यनुबन्धकस्येति नियमात्। सचा, षचसमवाये, धात्वादेः षः सः (पां ६।१।६४।) इति षस्य सत्वं, सम्पदादित्वाद्भावे क्विप्, टतीयैकवचनं, धातुस्वरेणाद्युदात्तः, सर्वे विधयश्छन्दसि विकल्पन्त इति न्यायेन, सावेकाच इति सूत्रं न प्रवर्त्तते, सचेत्यस्य निपातत्वपक्षे स्पष्टमाद्युदात्तत्वं ॥ २ ॥

टतीयामृचमाह स घा न इति। घ शब्दोऽवधारणार्थो निपातः, सर्वैस्तच्छब्दः सम्बध्यते, स घ, स एवेन्द्रः पूर्वमन्त्रोक्तगुणविशिष्टो नोऽस्माकं योगे पूर्वमप्राप्तस्य पुरुषार्थस्य सम्बन्धे आभुवत् आभवतु, पुरुषार्थं साधयत्वित्यर्थः। स एव राये धनार्थं आभुवत् आभवतु,। स एव पुरन्ध्यां योषित्यामुवत् आभवतु। यद्वा बहुविधायां बुद्धावाभुवत् आभवतु, पुरन्धिर्बहुधीरिति यास्कः। स एव वाजेभिर्देयैरन्नैः सह नोऽस्मानागमदागच्छतु। घ, चादयोऽनुदात्ताः, संहितायां, ऋचि। तु नु घ मच्चु तङ्चोरुष्याणां (प्रा ६।३।१३३।) इति दीर्घः। योगे, घञो जित्त्वादाद्युदात्तत्वं। भुवत्, भूयात्, भवतेराशीर्लिङि परतो, लिङ्याशिष्यङ् (पां ३।१।८६।) इत्यङ्प्रत्ययः, तस्य ङित्त्वेन गुणाभावादुवङादेशः, किदाशिषि (पां ३।४।१०४।) इति यासुट् न भवति, अनित्यमागमशासनमिति वचनात्, तिङ्ङ तिङः (पां ८।१।२८।) इति निघातः। ऊडिदम्पदाद्यप्पुम्रैद्युभ्यः (पां ६।१।१७१।) इत्येतस्य विभक्तेरुदात्तत्वं। पुरन्ध्यां, पुरन्धिः पुरुधीः, पृषोदरादित्वादुकारस्यामादेशः, ईकारस्य ह्रस्वश्च, आद्युदात्तप्रकरणे दिवोदासादीनां छन्दस्युपसङ्ख्यानमिति वार्तिकेनाद्युदात्तत्वं, अथवा पुरं शरीरं धीयतेऽस्यामिति, कर्म्मण्यधिकरणे च (पां ३।३।९३।) इति किः प्रत्ययः, ञ्नुक्छान्दसः, नञ्विषयस्यानिसन्तस्येति पुरः शब्द आद्युदात्तः, दासीभारादित्वात् पूर्वपदप्रकृतिस्वरत्वं। गमत्, गमे-

१४१ यस्य संस्थे न वृण्वते हरी समत्सु शत्रवः १
तस्मा इन्द्राय गायत ॥
१५१ सुतपावन्ने सुता इमे शुचयो यन्ति वीतये १
सोमासो दध्याशिरः ॥ ९ ॥

लेंटस्त्रिप्, इतश्च लोपः परस्मैपदेषु (पां ३ । ४ । ९७ ।) इतीकारलोपः, बहुलं छन्दसीति श्नुप्रोलुक्, लेटोऽडाटौ (पां ३ । ४ । ९४ ।) इत्यडागमः, आगमा अनुदात्ता इति फिट्सूत्रेण तस्यानुदात्तत्वे धातुस्वर एव शिष्यते । वाजेभिः, दृषादित्वादाद्युदात्तः ॥ २ ॥

चतुर्थीमृचमाह यस्य संस्थ इति । समत्सु युद्धेषु यस्येन्द्रस्य संस्थे रथे युक्तौ हरी द्वावश्वौ शत्रवो न वृण्वते न सम्भजन्ते, रथमश्वौ च दृष्ट्वा पलायन्त इत्यर्थः, तस्मा इन्द्राय तत्सन्तोषार्थं हे ऋत्विजो गायत स्तुतिं कुरुत । रणशब्दादिषु षट्चत्वारिंशत्सङ्ख्यकेषु सङ्ग्रामनामसु समत् समो रण इति पठितं । संस्थे, सम्यक् तिष्ठतीति संस्थो रथः, आतश्चोपसर्गे (पां ३ । १ । १३६ ।) इति क प्रत्ययः, क्रादुत्तरपदप्रकृतिस्वरत्वं । वृण्वते, प्रत्ययस्वरेणाकार उदात्तः, सति शिष्टस्वरबलीयस्त्वमन्यत्र विकरणेभ्य इति परिभाषया, तिङ्ङतिङ इति निघातो न भवति, यदृत्तान्नित्यं (पां ८ । १ । ६६ ।) इति प्रतिषेधात्, पञ्चमीनिर्देशेऽप्यन्तव्यवहितेऽपि कार्यमिष्यते । हरतो रथमिति हरी अश्वौ, इन् इत्यनुवृत्तौ, हृषिषिरुहिदृतिविदिछिदिकीर्त्तिभ्यश्चेत्यौणादिक इन् प्रत्ययः, नित्त्वादाद्युदात्तत्वं । समत्सु, सम्पूर्वादतेः क्विप् । शुचवः, शुतिः सौचो धातुर्हिंसार्थः, रु शुतिभ्यां क्रुन् इत्यौणादिकः क्रुन्प्रत्ययः, नित्त्वादाद्युदात्तत्वं । तस्मै, सावेकाचः (पां ६ । १ । २६८ ।) इति विभक्त्युदात्तस्य, न गोश्वन् सावर्वृ (पां ६ । १ । १८२ ।) इति प्रतिषेधात्, प्रातिपदिकस्वरः ॥ ४ ॥

पञ्चमीमृचमाह सुतपावन्निति । इमे सोमासः, अस्मिन् कर्म्मणि सम्पादिताः सोमाः सुतपावन्ने अभिषुतस्य सोमस्य पानकर्त्रे, वषट्यर्थे चतुर्थी, तस्य पातुर्वीतये भक्षणार्थं यन्ति तमेव प्राप्नुवन्ति । कीदृशाः सोमाः, सुताः अभिषुताः । शुचयः दशापवित्रेण शोधितत्वाच्छुद्धाः । दध्याशिरः, अवनीयमानं दधि आशीर्दोषघातकं येषां सोमानां ते दध्याशिरः ।

१ ६ १ त्वं सुतस्य पीतये सद्यो वृद्धो अजायथाः
इन्द्र ज्यैष्ठ्याय सुक्रतो ॥

सुतपाव्ने, सुतं पिबतीति सुतपावा, वनिपः पित्त्वाद्धातुस्वर एव शिष्यते, समासे द्वितीया पूर्वपदप्रकृतिस्वरं बाधित्वा कृदुत्तरपदप्रकृतिस्वरत्वं। शुचयः, शुचदीप्तौ, इन्नित्यनुवृत्तौ, इगुपधात् किदित्यौणादिक इन्, कित्त्वाल्लघूपधगुणाभावो नित्त्वादाद्युदात्तत्वं। वीतये, वी गतिप्रजनकान्त्यशनखादनेष्वित्यस्मात्, मन्त्रे वृषेषपचमनविदभूवीरा उदात्ताः, (पां ३।३।९६।) इति क्तिन्नुदात्तः। सोमासः, षुञ् अभिषवे, अर्त्तिषुस्तुसुहुसृधुक्षीत्यादिना मन्, नित्त्वादाद्युदात्तः, आज्जसेरसुक् (पां ७।१।५०) इत्यसुगागमः। दध्याशिरः, दधाति पुष्णातीति दधि, डुधाञ् धारणपोषणयोः, आदृगमहनजनः किकिनौ लिट् च (पां ३।२।१७१।) इति किन्, लिड्वद्भावाद्द्विर्भावः, कित्त्वादाकारलोपः, नित्त्वादाद्युदात्तत्वं। शृ हिंसायां, शृणाति हिनस्ति सोमेऽवनीयमानं, स तु सोमस्य स्वाभाविकं रसं, ऋजीषत्वप्रयुक्तं नीरसं दोषं वेत्याशीः, क्विपि, ऋत इद्धातोः (पां ७।१।१००।) इतीत्वं, रपरत्वञ्च, दध्येव आशीर्येषां सोमानां ते दध्याशिरः, बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वं ॥ ५ ॥ इतिप्रथमस्य प्रथमे नवमो वर्गः ॥ ९ ॥

आत्वेति सूक्ते षष्ठीमृचमाह त्वं सुतस्य पीतय इति। सुक्रतो शोभनकर्म्मन् शोभनप्रज्ञ वा, हे इन्द्र, त्वं सुतस्याभिषुतस्य सोमस्य पीतये पानार्थं, ज्यैष्ठ्याय देवेषु ज्येष्ठत्वार्थं च, सद्यस्तस्मिन्नेव क्षणे वृद्धोऽजायथाः अभिवृद्ध्योत्साहेन युक्तोऽभूः। पीतये, पा पान इत्यस्मात्, स्थागापापचोभावे (पां ३।३।९५।) इति क्तिन्, घुमास्थागापा (पां ६।४।६६।) इत्यादिना ईत्वं, तस्य नित्त्वेऽपि व्यत्ययेन प्रत्ययोदात्तत्वं, उत्तरसूत्रगतमुदात्तपदमत्रापि वा योजनीयं। सद्यः, सद्यः परुत्परार्यैषमः (पां ५।३।२२।) इति समानेऽहनीत्यर्थे समानस्य सभावो, द्यश्च प्रत्ययो निपात्यते, प्रत्ययस्वरेणोदात्तः। वृद्धः, वृधु वृद्धौ, उदितो वा (पां ७।२।५६) इति क्त्वा प्रत्ययेन इटो विकल्पितत्वात्, यस्य विभाषा (पां ७।२।१५।) इति निष्ठायामिट्प्रतिषेधः, प्रत्ययस्वरेणोदात्तः। ज्यैष्ठ्याय, ज्येष्ठस्य भावो ज्यैष्ठ्यं, गुणवचनब्राह्मणादिभ्यः कर्म्मणि च (पां ५।१।१२४। इतिष्यञ्, ञित्त्वादाद्युदात्तः ॥ ६ ॥

१ ७·१ आ त्वा विशन्त्वाशवः सोमास इन्द्र गिर्वणः
शं ते सन्तु प्रचेतसे १
१ ८ १ त्वां स्तोमा अवीवृधन्त्वामुक्था शतक्रतो १
त्वां वर्धन्तु नो गिरः १

सप्तमीमृचमाह आत्वा विशन्त्विति। हे इन्द्र, त्वां सोमासः सोमा आविशन्तु आभिमुख्येन प्रविशन्तु। कीदृशाः सोमाः, आशवः सवनत्रये प्रकृतिविकृत्योर्वा व्याप्तिमन्तः। कीदृशेन्द्र, गिर्वणः, गीर्भिःस्तुतिभिः सम्भजनीयदेवविशेष, गिर्वणो देवो भवति गीर्भिरेनं वनयन्तीति यास्कः, तथाविध हे इन्द्र, ते * तव प्रचेतसे प्रकृष्टज्ञानाय शं सुखरूपाः सोमाः सन्तु। गिर्वणः, गृणन्तीति गिरः स्तुतयः, गॄ शब्दे क्विपि, ऋत इद्धातोः (पा७।१।१००।) इतीत्वं, रपरत्वं च, गीर्भिर्वण्यते सेव्यत इति गिर्वणः, वनषण संभक्तौ, सम्भक्तिः सेवा, सर्वधातुभ्योऽसुन्नित्यौणादिकऽसुन् प्रत्ययः। प्रचेतसे, बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वं। ७।

अष्टमीमृचमाह त्वां स्तोमा इति। हे शतक्रतो बहुकर्म्मन् बहुप्रज्ञ वेन्द्र, त्वां स्तोमाः सामगानां स्तोत्राणि अवीवृधन् वर्द्धितवन्तः, तथा बह्वृचानामुक्थाः शस्त्राणि त्वामवीवृधन्, यस्मात् पूर्वमेवमासीत् तस्मादिदानीमपि नाऽस्माकं गिरः स्तुतयस्त्वां वर्द्धयन्तु अतिवृद्धं कुर्वन्तु। स्तोमाः, अर्त्तिषुस्तुस्वित्यादिना मन्, मनो नित्त्वादाद्युदात्तः। अवीवृधन्, वृधु वृद्धौ, इत्यस्माण्ण्यन्ताल्लुङिचङि, उरत् (पां ७। ४। ६६।) इति वृधेरुपधाया ऋकारस्याकारविधानादन्तरङ्गोऽपि गुणो बाध्यते, द्विर्भावहलादिशेषसन्वद्भावेत्वदीर्घत्वाडागमाः। उक्थाः उक्थानि, पा तृ तुदि विचि वचि सिचिभ्यस्थगिति वचेस्थक्प्रत्यय औणादिकः, तस्य कित्त्वात् सम्प्रसारणं, शेश्छन्दसि बहुलं (पां ६। १। ७०।) इति शिलोपो न लोपश्च, प्रत्ययस्वरेणोदात्तः, असामर्थ्यात् आमन्त्रितस्यापि न पराङ्गवद्भाव इति नाद्युदात्तत्वं। वर्द्धन्तु, अन्तर्भावितण्यर्थाद्वृधेर्व्यत्ययेन परस्मैपदं ॥ ८॥

---

* तुभ्यं कां. सं,।

१९१ अक्षितोतिः सनेदिमं वाजमिन्द्रः सहस्रिणं १
यस्मिन् विश्वानि पौंस्या १

नवमीमृचमाह अक्षितोतिरिति । इन्द्र,इमं वाजं सोमरूपमन्नं सनेत् सम्भजेत्। कीदृश इन्द्रः, अक्षितोतिः, अहिंसितरक्षणः, कदाचिदपि रक्षां न विमुञ्चतीत्यर्थः । कीदृशं वाजं सहस्रिणं, प्रकृतौ विकृतौ च प्रवर्त्तमानत्वेन सहस्रसङ्ख्यायुक्तं । यस्मिन्वाजे विश्वानि सर्वाणि पौंस्या पुंस्त्वानि बलानि वर्त्तन्ते, तादृशं वाजमिति पूर्वत्रान्वयः । अक्षितोतिः, ननु क्षि क्षयइत्ययं धातुरकर्म्मकः, तस्य च कर्म्माभावादधिकरणे भावे कर्त्तरि वा क्तप्रत्ययेन भवितव्यं, तदिह यदि कर्त्तर्य्यधिकरणे वा स्यात्, तदा तयोरर्थयोर्ण्यत्प्रत्ययस्याविधानात् क्षियइत्यनुवृत्तौ, निष्ठायामण्यदर्थे (पां ६।४।६०।) इति दीर्घेन भवितव्यं, तथाच, क्षियोदीर्घात् (पां ८।२।४६।) इति निष्ठानत्वे अक्षीणेति स्यान्नचाक्षितेति अथ नपुंसके, भावे क्तः (पां ३।३।११४।) इति भावपरः क्षितशब्दो गृह्यते, तदा तस्य ण्यदर्थत्वेनाण्यदर्थइतिनिषेधात् दीर्घनत्वयोरभावात् क्षितमिति सिद्ध्यति, तदा तु नञ्तत्पुरुषः प्रकृतेन नान्वेतीति, न विद्यते क्षितमत्रेति बहुव्रीहिणैव भवितव्यं, तथाच, नञ्सुभ्यां (पां ६।२।१७२।) इत्युत्तरपदान्तोदात्तत्वं स्यात्, पुनरूतिशब्देन बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वेन स एव स्वरस्तिष्ठेदित्यभिमतमाद्युदात्तत्वं न सिद्ध्येदिति, सत्यं, अतएवात्र क्षिधातुरन्तर्भावितण्यर्थो गृह्यते, तेन सकर्म्मकत्वात् कर्म्मण्येषा निष्ठा, ततश्चाण्यदर्थ इति निषेधात्, दीर्घो निष्ठानत्वञ्च न भविष्यति, तथा च नञ्तत्पुरुषे नक्षिता अक्षिता अक्षयितेत्यर्थः, तत्र चाव्ययपूर्वपदप्रकृतिस्वरत्वेन नञ उदात्तत्वं, पुनरूतिपदेन बहुव्रीहौ स एव स्वरः स्थास्यतीति न कोऽपि दोषः । रि क्षि चिरि गिरि दा शृ दृ हिंसा दान निकेतनेषु, द्रुहञिघांसायामिति, क्षिणोतेर्हिंसार्थस्य वा कर्म्मणि निष्ठा, तथा चाहिंसितोतिरित्यर्थे नकोऽपि दोषः, उक्तक्रमेण स्वरः सिद्ध्यतीति। सनेत्, वन षण सम्भक्तौ, भौवादिकः वाजं, वृषादित्वादाद्युदात्तः। इन्द्रं, आद्युदात्तः। सहस्रिणं, सहस्रमस्यास्तीति, अत इनि ठनौ (पां ५।२।११५।) इति इनिः प्रत्ययः, प्रत्ययस्वरः।

१ १० १ मानोमर्त्ता अभिद्रुहन्तनूनामिन्द्र गिर्वणः १
ईशानो यवया वधं १

विश्वानि, विशेः क्वनिति क्वन्प्रत्ययः, नित्त्वादाद्युदात्तः। पुंसः कर्म्माणि पौंस्यानि, ब्राह्मणादेराकृतिगणत्वात्, गुणवचनब्राह्मणादिभ्यः कर्म्मणि च (पां ५। १। १२४।) इति ष्यञ्, जित्त्वादाद्युदात्तः, प्रथमा बहुवचनस्य, सुपांसुलुगिति डादेशः। ननु स्त्रीपुंसाभ्यां नञ् स्नञौ भवनात् (पां ४। १। ८७।) इत्यनेन धान्यानां भवने क्षेत्रे खञ् (पां ५। २। १। इत्येतत्पर्य्यन्तेषु अपत्याद्यर्थेषु नञस्नञोर्विधानात्, यथा पुंसोऽपत्यं पौंस्नइत्यादिवत्, पुंसो भावः कर्म्म वेत्यस्मिन्नर्थे ष्यञं बाधित्वा पौंस्नानीत्येव भवितव्यं कथमुच्यते पौंस्यानीति। उच्यते, आचत्वात् (पां ५। १। १२०।) इति सूत्रे त्वादित्यवधिनिर्द्देशात्, ब्राह्मणस्त्वः (पां ५। १। १३६।) इत्येतत्पर्य्यन्तेरिमनिजादिभिः प्रत्ययैः स्नञ् त्वतलोः समावेशः, एवं तत्रैव चशब्दात्, नञस्नञोरपि ष्यञादिभिः समावेशादेव नं बाध्यबाधकभावः॥ ९॥

दशमीमृचमाह मानइति। हे गिर्वण इन्द्र, मर्त्ता विरोधिनो मनुष्या नोऽस्मदीयानां तनूनां शरीराणां माभिद्रुहन् अभितो द्रोहं मा कुर्य्युः, ईशानः समर्थस्त्वं वधं वैरिभिः सम्माद्यमानं यवयास्मत्तः पृथक्कुरु। मनुष्याइत्यादिषु पञ्चविंशतिसङ्ख्यकेषु मनुष्यनामसु मर्त्ता व्रात इति पठितं। मर्त्ताः, असिहसिमृगृखमिदमिलूपूधूविभ्यस्तन्निति तन्प्रत्ययश्चाणादिकः नित्त्वादाद्युदात्तः। अभि, एवमादीनामन्त इत्यन्तोदात्तः। द्रुहन्, द्रुह जिघांसायां, लिङर्थे लेट् (पां ३। ४। ७।) इति प्रार्थनायां लेट्, तस्य झि आदेशः, झोऽन्तः (पां ७। १। ३।) इति झस्यान्तादेशः, इतश्चलोपः परस्मैपदेषु (पां ३। ४। ९७।) इतीकारलोपः, श्नसोरल्लोपः, सार्वधातुकमपित् (पां १। २। ४।) इति तिङो ङित्त्वाल्लघूपधगुणाभावः। तनूनां, असामर्थ्यान्न षष्ठ्यर्थवद्भावः। इन्द्र गिर्वणः, गतपूर्वं। ईशानः, धातोरनुदात्तेत्वाच्छ्नोलुकि लसार्वधातुकानुदात्तत्वे धातुस्वर एव शिष्यते। यवय, यौतेर्णिचि संज्ञापूर्वको विधिरनित्यइति वृद्धिर्न क्रियते, अथवा यौतीति यवः, पचाद्यच्, यवं करोतीत्यर्थे, तत् करोति तदाचष्ट इति सूत्र वार्त्तिकेनणिच्, इष्टव-

द्भावाट्टिलोपः, तस्य स्थानिवद्भावाद्धृद्भावः। वधं, हनश्च वधः (यां ३। ३। ७१) इति भावेऽप्प्रत्ययस्तत्सन्नियोगशिष्टः स्थानिवद्भावेनान्तोदात्तो वधादेशः, उदात्तनिवृत्तिस्वरेणापउदात्तत्वं ॥ १० ॥ इति प्रथमस्य प्रथमे दशमो वर्गः। १०।

# शुद्धिपत्रम्।

| पृष्ठं | पंक्तिः | अशुद्धं | शुद्धं |
|---|---|---|---|
| १९ | ७। ८ | यथानितये | यथानिथये |
| १४ | १ | तवैव | नव न |
| १६ | १ | स्तुत्ययन | स्तुत्यर्थेन |
| २४ | २२ | उक्तेन | उक्थेन |
| २५ | २८ | कर्टकात् | कर्टकां |
| ६२ | १८ | संस्कृतं | संस्कर्तारं |
| ६२ | २४ | चुरभ | चुभ्र |
| ६५ | २ | दीर्घः | दीर्घत्वं |
| ८० | २२ | तः | क्तुः |

## षष्ठसूक्तं।

१११ युञ्जन्ति ब्रध्नमरुषं चरन्तं परितस्थुषः १
रोचन्ते रोचना दिवि १

सुरूपेत्यादिषु षट्सूक्तेषु तृतीयस्य युञ्जन्तीति सूक्तस्य मन्त्रसङ्ख्या-ऋषिच्छन्दो, देवतानि, विनियोगश्च, पूर्ववदवगन्तव्यः। दर्शे तस्मिन् सूक्ते आद्यास्तिस्रोऽन्तिमाचेत्येतासु तस्र ऐन्द्र्यः। आदहेत्येतासुतुर्यी-मारभ्य षड्चो मारुत्यः, तासु मध्ये वीलुचिदिन्द्रेणेत्येते द्वे ऋचौ मारुत्यौ सत्यावैन्द्र्यावपि भवतः, तदेतत् सर्वमनुक्रमणिकायामुक्तं, सुरूपकृत्नुं दर्शैन्द्रं, आतु युञ्जन्त्यादहेत्येताः षण्मारुत्यः, वीलुचित् इन्द्रेणेत्यैन्द्र्यौ-चेति। एतस्मिन् सूक्ते युञ्जन्तीत्यसौ तृचस्तृतीये राज्ञिपर्य्याये ब्राह्मणा-च्छंसिन उक्तिरूपः, * तथाचातिरात्रे पर्य्यायाणामिति खण्डे योगे योगे तवस्तरं युञ्जन्ति ब्रध्नमरुषमिति सूचितं, तच्च प्रथमामृचमाह युञ्जन्ती-ति। इन्द्रो हि परमैश्वर्ययुक्तः, परमैश्वर्यञ्चाग्निवाय्वादित्यनक्षत्ररूपे-णावस्थानादुपपद्यते। ब्रध्नमादित्यरूपेणावस्थितं। अरुषं हिंसकरहि-ताग्निरूपेणावस्थितं। चरन्तं वायुरूपेण सर्वतः प्रसरन्तमिन्द्रं परि-तस्थुषः परितोऽवस्थिता लोकत्रयवर्त्तिनः प्राणिनो युञ्जन्ति, स्वकीय-कर्म्माणि देवतात्वेन सम्बद्धं कुर्व्वन्ति, तस्यैवेन्द्रस्य मूर्त्तिविशेषभूता रोचना नक्षत्राणि दिवि द्युलोके रोचन्ते प्रकाशन्ते। अस्य मन्त्रस्योक्तार्थपरत्वं ब्राह्मणान्तरे व्याख्यातं, युञ्जन्ति ब्रध्नमित्याह, असौ वा आदित्यो ब्रध्नः, आदित्यमेवास्मै युनक्ति, अरुषमित्याह, अग्निर्वा अरुषः, अग्निमेवास्मै युनक्ति, चरन्तमित्याह, वायुर्वै चरन्, वायुमेवास्मै युनक्ति, परित-स्थुष इत्याह, इमे वै लोकाः परितस्थुषः इमानेवास्मै लोकान् युनक्ति, रोचन्ते रोचना दिवीत्याह, नक्षत्राणि वै रोचना दिवि, नक्षत्राण्येवास्मै रोचयन्तीति। पञ्चविंशतिसङ्ख्यकेषु महन्नामसु महः, ब्रध्न इति पठितं, आदित्यस्यापि महत्त्वादेव ब्रध्नत्वं। युञ्जन्ति, अन्तेः प्रत्ययस्वरेणादुदात्तत्वं। ब्रध्नमिति शब्दः प्रातिपदिकान्तोदात्तः। न सन्ति रुषा यस्यासावरुषः,

* अनुरूपः, कां, सं।

१२१ युञ्जन्त्यस्य काम्या हरी विपक्षसा रथे १
शोणा धृष्णू नृवाहसा ॥

नञ्सुभ्यां (पां ६।२।१७२।) इत्युत्तरपदान्तोदात्तत्वं, अभिपूर्वः (पां ६।१।१०७।) इतिपूर्वरूपे, एकादेशउदात्तेनोदात्तः (पां ८।२।५।) इत्युदात्तत्वं। चरन्ति, शपः पित्त्वादनुदात्तत्वं, श्नुश्च लसार्वधातुकस्वरेण धातुस्वर एव शिष्यते। तस्थुषः, तिष्ठतेर्लिटः क्वसुरादेशः, वस्वेकाजाद्घसां (पां ७।२।६७।) इतीटमन्तरङ्गमपि बाधित्वा, सम्प्रसारणं सम्प्रसारणाश्रयञ्च बलीयइति शसिपरतो भवात्, वसोः सम्प्रसारणं परपूर्वत्वं, शासिवसिघसीनाञ्च (पां ८।३।६०।) इति षत्वं, वसोः प्रत्ययस्वरेणोदात्तत्वं। रोचन्ते, लिङो लसार्वधातुकानुदात्तत्वं, धातुस्वरएव। रोचना, अनुदात्तेतश्च हलादेः (पां ३।२।१४९) इति युच्, युवोरनाकौ (पां ७।१।१।) इत्यनादेशः, चितः (पां ६।१।१६३।) इत्यन्तोदात्तत्वं। दिवि, ऊडिदम्पदादित्यादिना विभक्तेरुदात्तत्वं। १।

द्वितीयामृचमाह युञ्जन्त्यस्येति। अस्य ब्रह्मादिशब्दप्रतिपाद्यस्यादित्यादिमूर्त्तिभिस्तत्रावस्थितस्येन्द्रस्य रथे, हरी एतन्नामानौ द्वावश्वौ सारथयो युञ्जन्ति, इन्द्रसम्बन्धिनोरश्वयोर्हरिनामत्वं, हरीन्द्रस्य, खोदितोऽमेरिति पठितत्वात्। कीदृशौ हरी, काम्या कामयितव्यौ। पुनः कीदृशौ विपक्षसा, विविधे पक्षसी रथस्य पार्श्वौ ययोरश्वयोस्तौ विपक्षसौ, रथस्य द्वयोः पार्श्वयोर्योजितावित्यर्थः। पुनरपि कीदृशौ, शोणा रक्तवर्णौ। पुनः किम्भूतौ धृष्णू, प्रगल्भौ। पुनः किम्भूतौ, नृवाहसा, नॄणां पुरुषाणामिन्द्रतत्सारथिप्रमुखानां वाहकौ वोढारौ। अस्य ब्रह्मेत्युक्तस्य परामर्शात्, इदमोऽन्वादेशेऽशनुदात्तस्तृतीयादौ (पां २।४।३२।) इत्यशू, अशूः शित्त्वात् सर्वादेशेऽनुदात्तः, विभक्तेरनुदात्तत्वमेवेति सर्वानुदात्तत्वं। काम्या, कमुकान्तौ, कमेर्णिङ्, कामयतेः, अचीकमत् (पां ३।१।६७।) इति यत्प्रत्ययः, तित्स्वरितापवादत्वेन, यतोनावः, (पां ६।१।२१३) इत्याद्युदात्तत्वं, सुपां सुलुक् (पां ७।१।३९।) इति द्विवचनस्य डादेशः। हरतो रथमिति हरी, हृषिषीत्यादिना इन्, नित्त्वादाद्युदात्तः। विपक्षसा, पचिवचिभ्यां सुट्चेति पचेः सुडागमः। विभिन्ने पक्षसी पार्श्वौ ययोस्तौ, विशब्दो निपातत्वादुदात्तः, पूर्वपद-

१ ३ १ केतुं कृण्वन्नकेतवे पेशो मर्या अपेशसे १
समुषद्भिरजायथाः १

प्रकृतिस्वरेण स एव शिष्यते, द्विवचनस्य डादेशः । रथे, रमन्तेऽस्मिन्निति तथः, रमुक्रीडायां, हनि कुषिनीरमिकाशिभ्यः क्थन्निति क्थन्, कित्त्वात्, अनुदात्तोपदेशे ( पां ६ । ४ । ३७ । ) इत्यादिना मकारलोपः, नित्स्वरेणाद्युदात्तः । शोणा, * शोणृ रक्तीकरणे, शोणतेरच्, चित्त्वादन्तोदात्तः, सुपांसुलुगिति द्विवचनस्य डादेशः । धृष्णू, ञिधृषाप्रागल्भ्ये, त्रसि गृधि धृषि क्षिपेः क्नुः ( पां ३ । २ । १४० । ) इति क्नुप्रत्ययः, कित्त्वाद्गुणाभावः, प्रत्ययस्वरः । नृवाहसा, नॄन् वहत इति वहेः, वहि हा धाञ्भ्यश्छन्दसीत्यसुन्, निदित्यनुवृत्तेर्वृद्धिः, नित्त्वादाद्युदात्तः, कृदुत्तरपदप्रकृतिस्वरत्वेन स एव शिष्यते ॥ २ ॥

तृतीयामृचमाह केतुं कृण्वन्निति । हे मर्या मनुष्या, इदमाश्चर्य्यं पश्यतेत्यध्याहारः । किमाश्चर्य्यमिति तदुच्यते, आदित्यरूपोऽयमिन्द्र उषद्भिर्दाहकैरंशुभिः प्रतिदिनमुषःकाल एव समजायथाः, उदपद्यत, अथवा सूर्य्यस्यैवास्तसमये मरणमुपचर्य्य व्यत्ययेन बहुवचनं कृत्वा सम्बोधनं क्रियते, हे मर्य प्रतिदिनं त्वमजायथा इति * यावत्, किं कुर्वन् अकेतवे रात्रौ निद्राभिभूतत्वेन प्रज्ञानरहिताय प्राणिने केतुं कृण्वन् प्रातः प्रज्ञानं कुर्वन् । पुनः किं कुर्वन्, अपेशसे रात्रावन्धकारावृतत्वेनानभिव्यक्तत्वाद्रूपरहिताय पदार्थाय प्रातरन्धकारनिवारणेन पेशो रूपमभिव्यज्यमानं कुर्वन् । पेश इति रूपनाम, पिंशतेरिति यास्कः । अकेतवे, अपेशस इति चतुर्थ्यर्थौ षष्ठ्यर्थे द्रष्टव्यौ । केतुं, प्रातिपदिकस्वरः । कृण्वन्, कृवि हिंसाकरणयोश्च, लटः शत्रादेशः, इदितो नुम् धातोरिति नुमागमः, कर्त्तरिशपि प्राप्ते, धिन्विकृण्वोरच ( पां ३ । १ । ८० । ) इत्युप्रत्ययः, तत्सन्नियोगेन वकारस्य चाकारः, अतोलोपः ( पां ६ । ४ । ४८ । ) इत्यकारलोपः, तस्य स्थानिवद्भावात् पूर्वस्य लघूपधगुणो न भवति । अकारस्य प्रत्ययस्वरेणोदात्तत्वं । अकेतवे, बहुव्रीहौ, नञ्सुभ्यां ( पां ६ । २ । १४२ । ) इत्युत्तरपदान्तो-

---

* शोणवर्णगत्योः गमनकरणत्वात् करणे घञ्, ञित्त्वादाद्युदात्तः, कां ।
* योज्यं कां ।

१४१ आदह स्वधामनु पुनर्गर्भत्वमेरिरे १
दधाना नाम यज्ञियं १

दात्तत्वं। पेशः, नब्विषयस्यानिसन्तस्येत्याद्युदात्तः। मर्या, छन्दसि निष्टर्क्य देव हूय (पां ३।१।१२३) इत्यादौ म्रियतेर्निपातितः, आमन्त्रितनिघातः, असामर्थ्यात् पूर्वस्य न पराङ्गवद्भावः। अपेशसे, नञ्सुभ्यां (पां ६।२।१४२।) इत्युत्तरपदान्तोदात्तत्वं। सं, निपात आद्युदात्तः। उषद्भिः, उषप्लुषदाहे, ज्वलद्भीरश्मिभिः, लटः शत्रादेशे शपि प्राप्ते व्यत्ययेन शः, सार्वधातुकमपिदिति तस्य ङित्त्वाल्लघूपधगुणो न भवति, शस्य प्रत्ययस्वरेणोदात्तत्वं, उपरि शतुरदुपदेशाल्लसार्वधातुकानुदात्तत्वं, एकादेश उदात्तेनोदात्तः (पां ८।२।५) इत्युदात्तत्वं। अजायथाः, अजायतेत्यर्थे पुरुषव्यत्ययो निघातस्वरः॥ ३॥

चतुर्थीमृचमाह, आदहेति। अत्रास्ति विशेषविनियोगः, चतुर्विंशेऽहनि प्रातःसवने ब्राह्मणाच्छंसिशस्त्रे आदह स्वधामन्विति द्वे ऋचौ, इन्द्रेण सं हि दृक्षस इत्येका, अयन्तृचः षलहस्तोत्रियसञ्ज्ञकः, तथाच सूत्रितं, चतुर्विंशे होताजनिष्टेतिखण्डे, इन्द्रेण सं हि दृक्षसे, आदहस्वधामन्वित्येका द्वेचेति। यद्यप्येतदैन्द्र्यं सूक्तं, तथाप्यादहेत्यादिषु षट्सु मरुतो वर्ण्यन्ते, प्रायेणेन्द्रमरुत इत्यनुक्रमणिकायामुक्तत्वात्। आदित्ययमानन्तर्य्यार्थो निपातः। अहेत्यवधारणार्थः। आदह वृष्टेरनन्तरमेव, स्वधामनु इतः परं जनिष्यमाणमन्नमुदकम्वानुलक्ष्य मरुतो देवा गर्भत्वमेरिरे, मेघमध्ये जलस्य कर्त्तारं प्रेरितवन्तः, प्रतिसंवत्सरमेवं कुर्वन्त्विति दर्शयितुं पुनः शब्दः प्रयुक्तः। कीदृशा मरुतः, यज्ञियं यज्ञार्हं नाम दधाना धारयन्तः। सप्तसु गणेषु मरुतामीदृङ्चान्यादृङ्चेत्यादीनि यज्ञयोग्यानि नामान्यत्राम्नातानि। अन्ध इत्यादिष्वष्टाविंशतिसङ्ख्यकेष्वन्ननामसु कर्क चरसः स्वधेति पठितं। अर्ण इत्यादिष्वेकशतसङ्ख्यकेषूदकनामसु तेजः स्वधा अक्षरमिति पठितं। आत्, अह, निपातावाद्युदात्तौ। स्वं लोकं दधाति पुष्णातीति स्वधा, आतोऽनुपसर्गे कः (पां ३।२।३।) इति कः, कृदुत्तरपदप्रकृतिस्वरत्वं। अनु, पुनः शब्दौ निपातावाद्युदात्तौ। गर्भस्य भावो गर्भत्वं, प्रत्ययस्वरः। एरिरे, अन्तर्भावितण्यर्थादीरगतावित्यस्मादनुदात्तेतः परस्य लिटस्तस्येरेच्, चित्त्वादन्तोदात्तः, सहसुपेत्यत्र सुपेति योगविभागार्थं

१५१ वीलु चिदारुजन्तुभिर्गुहा चिदिन्द्र वह्निभिः १
अविन्द उस्रिया अनु १

आडा सह तिङ्समासेऽपि समासस्य (पां ६ । १ । २२३) इत्यन्तोदात्तत्वं, इजादेश्च गुरुमतोऽनृच्छः (पां ३ । १ । ३६) इति आम् न भवति, मन्त्रत्वात् । अहशब्दयोगान्निधातोऽभावः, तुपश्यपश्यताहैः पूजायां (पां ८ । १ । ३९) इति निषेधात् । दधानाः, ज्ञानचश्चित्त्वादन्तोदात्तत्वे प्राप्ते, अभ्यस्तानामादिः (पां ६ । १ । १८९) इत्याद्युदात्तत्वं । यज्ञमर्हतीति यज्ञियं, यज्ञर्त्विग्भ्यां घखञौ (पां ५ । १ । ७ ।) इति घप्रत्ययः, आयनेयीनीयियः फढखछघां प्रत्ययादीनां (पां ७ । १ । २ ।) इतीयादेशः, प्रत्ययस्वरेणोकार उदात्तः ॥ ४ ॥

पञ्चमीमृचमाह, वीलु चिदिति । अस्ति किञ्चिदुपाख्यानं, पणिभिर्देवलोकाद् गावोऽपहृता अन्धकारे प्रक्षिप्ताः, ताश्चेन्द्रो मरुद्भिः सहाजयदिति । एतच्चानुक्रमणिकायां सूचितं, पणिभिरसुरैर्निगूढा गा अन्वेष्टु सरमा देवशुनीन्द्रेण प्रहिता; तामयुग्मिः पणयो मिथीयन्तः प्रोचुरिति । मन्त्रान्तरे च दृष्टान्ततया सूचितं, निरुद्धा आपः पणिनेव गाव इति । तदेतदुपाख्यानमभिप्रेत्योच्यते, हे इन्द्र, वीलु चित् दृढमपि दुर्गमस्थानमारुजन्तुभिर्भञ्जद्भिः वक्रिभिर्वाहृभिरन्यच्च नेतुं समर्थैर्मरुद्भिः सहितस्त्वं, गुहाचित् गुहायामपि स्थापिता उस्रिया गा अन्वविन्दः, अन्विष्य लब्धवानसि । ओजः पाजइत्यादिष्वष्टाविंशतिसङ्ख्यकेषु बलनामसु दत्तः वीलु सन्नमिति पठितं । नवसङ्ख्यकेषु गोनामसु अघ्रिया उक्षा उस्रिया इति पठितं । वीलु, प्रातिपदिकस्वरः । चित्, चादिरनुदात्तः । आरुजन्तुभिः, रुजो भङ्ग इत्यौणादिकः कन्नुच्प्रत्ययः, कित्त्वाद्गुणाभावः, चित्त्वादन्तोदात्तत्वं, समासे ऋदुत्तरपदप्रकृतिस्वरत्वं । गुहा, सप्तम्या डादेशः, ग्रामादीनाञ्चेत्याद्युदात्तः । वक्रिभिः, वहि श्रिरुहात्वरिभ्यो निदिति वहेर्नित्प्रत्ययः, नित्त्वादाद्युदात्तः । अविन्दः, शेर्मुचादीनां ( पां ७ । १ । ५९ । ) इति नुमागमः, लुङ् सङ् लङ्क्ष्वडुदात्तः ( पां ६ । ४ । ७१ । ) इत्यडागमः, उदात्तश्च । वसन्तीत्युस्रियाः, वसेः कर्त्तरि यक् प्रत्ययः, घत्वाभावश्च बाहुलकादूहनीयः । उक्षाश्च, पदार्थविशेषसमुत्थं प्रत्ययतः प्रकृतेश्च

3 | 36

47294

१६१ देवयन्तो यथा मतिमच्छा विदद्वसुं गिरः १
महामनूषत श्रुतं १

तदूह्यमिति, इकारः प्रत्ययस्वरेणोदात्तः ॥ ५ ॥ इति प्रथमस्य प्रथमे एकादशो वर्गः ॥

युञ्जन्तीति सूक्ते षष्ठीमृचमाह, देवयन्त इति। देवयन्तो मरुत् सञ्ज्ञकान् देवानिच्छन्तो गिरः स्तोतार ऋत्विजः महां प्रौढं मरुद्गणमच्छा प्रामनूषत स्तुतवन्तः। कीदृशं मरुद्गणं, विदद्वसुं, वेदयद्भिः स्वमहिमप्रख्यापकैर्वसुभिर्धनैर्युक्तं। पुनः कीदृशं, श्रुतं विख्यातं। मरुद्गणस्य दृष्टान्तः, यथा मतिं मन्तारमिन्द्रं यथा स्तुवन्ति तथेत्यर्थः। देवयन्तः, देवानात्मन इच्छन्तः, सुप आत्मनः क्यच् (पां ३। १। ८।) इति क्यच्प्रत्ययः, क्यचि च (पां ७। ४। ३३।) इतीत्वं, अतृत् सार्वधातुकयोर्दीर्घः (पा ७। ४। २५।) इति दीर्घत्वञ्च न भवति, न छन्दस्यपुत्रस्य (पां ७। ४। ३५।) इत्यनेन क्यचि यत् प्राप्तमीत्वं दीर्घत्वं वा तस्य सर्व्वस्य प्रतिषेधात्, यद्यपीत्वमेव प्रकृतं, तथापि व्यवहितस्यापि दीर्घत्वस्य प्रतिषेध इति विज्ञायते, अश्वायन्त इत्यादौ, अश्वाद्यस्यात् (पां ७। ४। ३७) इत्यात्वविधानादिति ह्युक्तं, क्यजन्ताच्छतृप्रत्ययः, क्यचश्चित्त्वादन्तोदात्तत्वं, शपः पित्त्वेन, शतुश्च लसार्वधातुकस्वरेणाद्युदात्तत्वे, एकादेश उदात्तेनोदात्तः (पां ८। २। ५) इत्युदात्तत्वं। यथा, प्रकारवचने थाल्, (पां ५। ३। २३) इति थालप्रत्ययः, ञितीति प्रत्ययात् पूर्वमुदात्तत्वं। मतिं, मन्ते वृषेषपचमनविदभूवीरा उदात्तः (पां ३। १। ९९।) इति क्तिन् प्रत्यय उदात्तश्च। मतिशब्दो ज्ञानपरोऽप्युपचाराज्ज्ञातरीन्द्रे वर्त्तते, अथवा पदान्तरे विशेष्यानुपादानादिन्द्रस्यैषा सञ्ज्ञा, ततश्च, क्तिच् क्तौच् सञ्ज्ञायां (पां ३। ३। १७४।) इति मन्यतेः कर्त्तरि क्तिच्, तस्योपदेशेऽनुदात्तत्वादिट्प्रतिषेधः, चित्त्वादन्तोदात्तत्वं। अच्छा, अध्याहृतगच्छत्यर्थयोगात्, अच्छगत्यर्थवदेषु (पां १। ४। ६९।) इति गतिसञ्ज्ञया सह निपातसञ्ज्ञाया अपि समावेशान्निपाता आद्युदात्ता इत्याद्युदात्तत्वं। विदद्वसुं, विदज्ञानइत्यस्मादन्तर्भावितण्यर्थाच्छतृप्रत्यये विदन्त्यादार्य्यातिशयवत्तया ज्ञापयन्ति वसूनि धनानि यं स विदद्वसुः, विदेः शतृप्रत्यये, अदिप्रभृतिभ्यः शपः (पां २। ४। ७२) इति शपोलुकि, प्रत्ययस्वरेण शतुरुदा-

१७१ इन्द्रेण सं हि दृक्षसे सञ्जग्मानो अबिभ्युषा १
मन्दू समानवर्चसा ॥

त्तवं, बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वेन तदेव शिष्यते । गृणन्ति स्तुवन्तीति गिरः, गृणातेः क्विपि, ऋत इद्धातोः (पां ७।१।१००।) इतीत्वं, रपरत्वं, धातुस्वरेणोदात्तत्वं । मह्यां, मह्यान्तं, नकारतकारयोर्लोपश्छान्दसः, प्रातिपदिकस्वरेणोदात्तत्वं । अनूषत, ष्णु स्तुतौ, व्यत्ययेनात्मनेपदं, लुङि झस्य अदादेशः, सिचि कुटादित्वेन ङित्त्वाद्गुणाभावः, इडभाव उकारदीर्घत्वञ्च छान्दसं, निघातः । श्रुतं, प्रत्ययस्वरः ॥ ६ ॥

सप्तमीमृचमाह इन्द्रेण सं हीति । हे मरुद्गण, त्वं इन्द्रेण सञ्जग्मानः सङ्गच्छमानः सन्दृक्षसे हि, सम्यक् दृश्येथाः खलु, अवश्यमस्माभिर्दृश्य इत्यर्थः । कीदृशेनेन्द्रेण, अबिभ्युषा, भीतिरहितेन । कीदृशाविन्द्रमरुद्गणौ, मन्दू, नित्यं प्रमुदितौ । पुनः कीदृशौ तौ, समानवर्चसा तुल्यदीप्ती । पुरा कदाचिद्वृत्रवधदशायां इन्द्रस्य सखायः सर्वे देवा वृत्रसेनापसारिताः, तदानीमिन्द्रस्य वृत्रसम्बन्धिसकलसेनाजयार्थं मरुद्भिः सङ्गमोऽभूत्, सोऽयमर्थो वृत्रस्य त्वास्य सयादितिमन्त्रे सङ्गृहीतः, इन्द्रो वृत्रं हनिष्यन्निति ब्राह्मणे प्रपञ्चितश्च । इन्द्रशब्दः परमैश्वर्यवन्तं मरुद्गणं वाभिधत्ते, तदानीमिन्द्रस्य सम्बोधनं । बहिरेवाध्याहर्त्तव्यं । तथाचेयमृग्व्याख्येन व्याख्याता, इन्द्रेण सं हि दृक्षसे सञ्जग्मानोऽबिभ्युषा गणेन मन्दूमदिष्णू युवां स्थोऽपि वा मन्दूना तेनेति स्यात् समानवर्चसेत्येतेन व्याख्यातमिति । सन्दृक्षसे सम्पश्येथाः, दृश्येस्वेति वक्तव्यमित्यात्मनेपदं, दृशेर्लिङर्थे लेडिति प्रार्थनायां लेट्, थासःसे (पां ३।४।८०।) इति से, लेटोऽडाटौ (पां ३।४।९४।) इत्यडागमः । सिब्बहुलं लेटि (पां ३।१।३४।) इति सिप्, सञ्ज्ञापूर्वको विधिरनित्यइति गुणाभावः । व्रश्चादिना षत्वं, षढोः कःसि, (पां ८।२।४१।) इति कत्वं, आदेशप्रत्यययोः (पां ८।३।५९।) इति सिपः सस्य षत्वं, बहुलग्रहणात् सिपः परस्ताच्चापि भवति, सिपा व्यवधानात् पश्यादेशो न भवति । थासः पित्त्वादनुदात्तत्वं, उत्तरस्य सस्यार्धधातुकानुदात्तत्वं, धातुस्वर एव शिष्यते, शिश्शब्दयोगात्, तिङ्ङतिङ इति निघातो न भवति, शिच, (पां ८।१।२४) इति प्रतिषे-

१८१ अनवद्यैरभिद्युभिर्मखः सहस्वदर्चति ।
गणैरिन्द्रस्य काम्यैः ॥

धात्। सञ्जग्मानः, गमेः सम्पूर्वात्, छन्दसि, लुङ् लङ् लिटः, (पां ३। ४। ६) इति वर्त्तमाने लिट्, समो गम्यृच्छीत्यादिनात्मनेपदविधाना-ल्लिटः कानज्वेति लिटः कानजादेशः, द्विर्भावो, हलादिशेषोऽभ्यासस्य श्चुत्वं, गमहनेत्युपधालोपः, कानचश्चित्त्वादन्तोदात्तत्वं, गतिसमासे कृदुत्तरपदप्रकृतिस्वरत्वं। अबिभ्युषा, ञिभीभये, पूर्ववल्लिट्, शेषात् कर्त्तरि परस्मैपदं, क्वसुश्च (पां ३। २। १०७।) इति लिटः क्वसुरा-देशः, तस्य कित्त्वाद्गुणाभावः, अभ्यासस्याचोह्रस्वश्च, क्रादिनियमात् प्राप्तइट्, वस्वेकाजाद्घसां (पां ७। २। ६७।) इति नियमान्निवर्त्तते, नञ्समासे तृतीयैकवचने सति भत्वात्, वसोः संप्रसारणं (पां ६। ४। १३१।) इति वकारस्य उकारः, सम्प्रसारणाच्च (पां ६। १। १०८।) इति पूर्वरूपत्वं, शासि वसि घसीनाञ्च (पां ८। ३। ६०।) इति षत्वं, इयङादेशं बाधित्वा, एरनेकाचोऽसंयोगपूर्वस्य (पां ६। ४। ८२।) इति यणादेशः, अव्ययपूर्वपदप्रकृतिस्वरत्वं। पूर्वेण पदेन सह संहितायामेकारस्य, एङः पदान्तादति (पां ६। १। १०९।) इति परपूर्वत्वे प्राप्ते, प्रकृत्यान्तः पादमव्ययपरे (पां ६। १। ११५।) इति प्रकृतिभावः। मन्दू, मति स्तुतिमोद मद स्वप्नकान्ति गतिषु, इदि-तोनुमधातोः (पां ७। १। ५८।) इति नुमागमः, कुरित्यनुवृत्तौ कुः, शङ्कु पीयु नीलङ्गु लिग्वित्यत्राविभक्तिकनिर्देशात् हन्तेर्हिंगुरितिवत् धात्वन्तरादपि कुरित्युक्तं, प्रत्ययस्वरेणोदात्तः, द्विवचनमौ, प्रथमयोः पूर्वसवर्णः (पां ६। १। १०२।) इति पूर्वसवर्णदीर्घः, तृतीयैकवचने चेत्, सुपांसुलुगित्यादिना पूर्वसवर्णदीर्घत्वं। समानवर्चसा, समानं वर्चो ययोरिति यस्येति वा बहुव्रीहिः, द्विवचने सुपांसुलुगित्यादिना द्विवचनस्थाने आकारादेशः, समानपदस्य प्रातिपदिकान्तोदात्तत्वं, बहुव्रीहौ पूर्वपदप्रकृतिस्वरेण तदेवावशिष्यते ॥ ७ ॥

अष्टमीमृचमाह, अनवद्यैरिति। मखः प्रवर्त्तमानोऽयं यज्ञः, अन-वद्यैर्दोषरहितैरभिद्युभिर्द्युलोकमभिगतैः, काम्यैः फलप्रदत्वेन काम-यितव्यैर्गणैर्मरुत्समूहैः सहितस्येन्द्रस्य सहस्वद्बलोपेतं यथा भवति तथार्चति पजयति, अयं यज्ञो मरुत इन्द्रञ्चातिशयेन प्रीणयतीत्यर्थः।

१६१ अतः परिज्मन्नागहि दिवो वा रोचनादधि १
समस्मिन्नृञ्जते गिरः ॥

यज्ञ इत्यादिषु पञ्चदशसु यज्ञनामसु मखः विष्णुरिति पठितं। चतुश्चत्वारिंशत्सु * पूजानामस्वर्चति गायतीति पठितं। अनवद्यैः, न विद्यतेऽवद्यं पापं येषां तेऽनवद्याः, तैः, नञ्सुभ्यामित्युत्तरपदान्तोदात्तत्वं। अभियुभिः, अभिगतो द्यौर्यैस्तेऽभिद्यवस्तैः, अभिशब्दः प्रातिपदिकस्वरेणान्तोदात्तः, बहुव्रीहौ पूर्वपदप्रकृतिस्वरेण स एव शिष्यते। मखः प्रातिपदिकस्वरः। सहो बलमस्मिन्नर्चने कर्म्मण्यस्तीति सहस्वत्, तस्मै मत्वर्थे (पां १। ४। १९।) इति भसञ्ज्ञया-पदसञ्ज्ञाया बाधितत्वात् सकारस्य रुत्वाभावः, मादुपधायाश्च मतोर्वो यवादिभ्यः (पां ८। २। ९।) इति मतुपो मस्य वत्वं, सहस्शब्दो नञ्विषयानिसन्तस्येत्याद्युदात्तः, मतुपः पित्त्वात् स एव शिष्यते। काम्यैः, कमेर्णिङ्, अत उपधायाः (पां ७। २। ११६।) इति वृद्धिः, जनि जृष् क्नसुरञ्जो मन्ताश्चेत्यमन्तत्वेन प्राप्तस्य मित्त्वस्य, न कम्यमिचमामिति प्रतिषेधान्मितां ह्रस्व इत्युपधाह्रस्वत्वं न भवति, ण्यन्तादचोयत्, णिलोपः, निखरितमिति प्राप्ते, यतो नावः (पां ६। १। २१३) इत्याद्युदात्तत्वं ॥ ८ ॥

नवमीमृचमाह अतः परिज्मन्निति। हे परिज्मन् परितो व्यापिन् मरुद्गण, अत एतस्मान्मरुद्गणस्थानादन्तरिक्षादागहि, अस्मिन् कर्म्मण्यागच्छ, दिवो वा द्युलोकाद्वा समागच्छ, रोचनादधि दीप्यमानादादित्यमण्डलाद्वा समागच्छ, अस्मदीये कर्म्मकाले यत्र यत्र तिष्ठसि, ततः सर्वस्मादागच्छेत्यर्थः। किमर्थमागमनमिति तदुच्यते, अस्मिन् कर्म्मणि वर्त्तमाना ऋत्विजो गिरः स्तुतीः समञ्जते सम्यक् प्रसाधयन्ति। ऋञ्जतिः प्रसाधनकर्म्मेति यास्कः। एतत्स्तुतीः श्रोतुमागच्छेत्यर्थः। यद्यपि ऋत्विजा मन्त्रस्य प्रयुज्यमानत्वात्, ऋञ्जतिधातोरुत्तमपुरुषेण भवितव्यं, तथापि परोक्षकृतत्वेन निर्देशात् प्रथमपुरुषप्रयोगः। परोक्षकृतलक्षणञ्च यास्क आह, तास्त्रिविधा ऋचः, परोक्षकृताः, प्रत्यक्षकृता आध्यात्मिकाश्च। तत्र परोक्षकृताः सर्व्वाभिर्नामविभक्तिभिर्युज्यन्ते प्रथमपुरुषैश्चाख्यातस्येति। अतः, पञ्चम्यास्तसिल्, एतदस्ततसोस्ततसौचा-

* अर्चतिकर्म्मसु, कां, खं।

१।१०।१ इतो वा सातिमीमहे दिवो वा पार्थिवादधि१
इन्द्रं महो वा रजसः ॥ १२ ॥

नुदात्तौ (पां २।४।३६।) इत्यनुदात्तोऽण्, च्वेः, णित्वात् सर्वादेशः, लिति (पां ६।१।१९३।) इति प्रत्ययात् पूर्वस्योदात्तत्वं। परिज्मन्, अज गतिक्षेपणयोः, अन्येभ्योऽपि दृश्यन्ते (पां ३।२।७५।) इति मनिन्, चकारलोपश्छान्दसः, आमन्त्रितनिघातः। गहि, गमेर्बहुलं छन्दसीति श्लुप्लोलुक्, हेर्डित्वादनुदात्तोपदेश इत्यादिना मलोपः, अतोहेरिति हिलोपो न भवति, तस्मिन् कर्त्तव्ये असिद्धवदत्राभादिति मलोपस्यासिद्धत्वेनानकारान्तत्वात्। दिवः, ऊडिदमित्यादिना विभक्तेरुदात्तत्वं। वा, चादयोऽनुदात्ता इत्यनुदात्तः। रोचनात्, रुच दीप्तौ, अनुदात्तेतश्च हलादेः (पां ३।२।१४९।) इति युच्, युवोरनाकौ (पां ७।१।१।) इत्यनादेशः, चितइत्यन्तोदात्तः, अधि, अधि परौ अनर्थकौ (पां १।४।९३।) इति कर्म्मप्रवचनीयत्वेन सह निपातसञ्ज्ञायाः समावेशान्निपाता आद्युदात्ता इत्याद्युदात्तत्वं। अस्मिन्, अतः परिज्ञानित्यादिष्टसैवान्वादेशात्, इदमोऽन्वादेशेऽनुदात्तस्तृतीयादावित्यण् अनुदात्तः, णित्वात् सर्वादेशः, विभक्तेरनुदात्तौ सुप्तितावित्यनुदात्तेतेति सर्वानुदात्तत्वं। ऋञ्जते, ऋजि भृजि वृजि वर्जने, समित्युपसर्गयोगात् प्रसाधने वर्त्तते, निघातः। गिरः प्रातिपदिकस्वरः ॥ ९ ॥

दशमीमृचमाह इतो वेति। इन्द्रं देवं प्रति सातिं धनदानं अधीमहे आधिक्येन याचामहे, कस्माल्लोकादिति तदुच्यते, इतोऽस्मादभिदृश्यमानात् पार्थिवात् पृथिवीलोकाद्वा, दिवो वा द्युलोकाद्वा, महो महतः प्रौढाद्रजसो वा पृथ्व्यादीनां रञ्जकादन्तरिक्षलोकाद्वायमिन्द्रो यतः कुतश्चिदानीयास्मभ्यं धनं प्रयच्छत्वित्यर्थः। सप्तदशसु याज्ञाकर्म्मसु ईमहे याचामीति पठितं। इतः, इदमश्शब्दात् पञ्चम्यास्तसिल्, इदम इश् (पां ५।३।३।) इतीश्, णित्वात् सर्वादेशः, च्च ऊडिदमित्यस्यावकाशः, आभ्यामेभिः, लितीत्यस्यावकाशः, पचनं पाचकः उभावपि नित्यौ, तत्र परत्वाद्विप्रतिषेधे परं कार्य्यं, (पां १।४।२) इतिसमबलविरोधे परस्य कार्य्यत्वविधानादिति लिती तीकारस्योदात्तत्वं, पञ्चात् तसेः, प्राक् दिशो विभक्तिरिति विभक्ति-

सञ्ज्ञकत्वात्, ऊडिदमित्यादिना असर्वनामस्थानविभक्तेरुच्यमानमुदात्तत्वं भवति, सकृद्गतौ विप्रतिषेधे यद्बाधितं तद्बाधितमेवेति, परिभाषया ऊडिदमित्यस्य पुनरप्रवृत्तिरेवेति चेन्न, लक्ष्यानुरोधेन पुनःप्रसङ्गविज्ञानञ्चेति स्वीकारात् । नन्वेवं यतस्ततइत्यादावपि परेण लित्स्वरेण बाधितमपि, सावेकाच इति तस्मिन उदात्तत्वं स्यादिति चेन्न, यत्तच्छब्दयोर्नं गोश्वन् सावर्वर्णेति निषेधात्, न च पुनः प्रसङ्गविज्ञानं च इत्येतत् सार्व्वत्रिकं, लक्ष्यानुरोधेन क्वचिदेव तदाश्रयणादिति । सातिं षणुदाने, धात्वादेः षः सः (पां ६ । १ । ६४ । ) इति षस्य सः, भावे क्तिन्, जनसनखनां सञ्झलोः ( पां ६ । ४ । ४२ । ) इति नकार स्यात्वं । तितुत्रतथसिसुसरकसेषुचेति निषेधादिट्न भवति, नित्स्वरे प्राप्ते उदात्त इत्यनुवृत्तौ, ऊति यूति जूति साति हेति कीर्त्तयश्च (पां ३ । ३ । ९७) इति निपातनादन्तोदात्तत्वं । ईमहे, ईड्गतौ, श्यनोऽपि, बहुलं छन्दसीति लुक्, अस्य धातोर्ङित्त्वात्, तास्यनुदात्तेन्ङिददुपदेशाल्लसार्व्वधातुकस्यानुदात्तत्वे धातुस्वर एव शिष्यते। नच तिङ्ङतिङ इति निघातः, च वा योगेप्रथमेति निषेधात्, उत्तरवाक्ययोरपि हि वा शब्दयोगात्, अन्यथा वाक्यपरिपूर्त्तेस्तिङ्विभक्तेरवश्यमध्याहारात्तदपेक्षयैषा प्रथमा तिङ्विभक्तिरिति । दिवः, ऊडिदमित्यादिना विभक्तेरुदात्तत्वं । पार्थिवात्, प्रथ ख्यापने, प्रथत इति पृथिवी, प्रथेः षिवन् सम्प्रसारणञ्चेति षिवन् प्रत्ययः, सम्प्रसारणञ्चेत्यादिसिद्धं, षिद्गौरादिभ्यश्च (पां ४ । १ । ४१ । ) इति ङीष्, प्रत्ययस्वरेणोदात्तः, । प्रथेषनिघातेनानुदात्तादिः, पार्थिवशब्दस्य पृथिवीविकार इत्यर्थे, ओरञ् (पां ४ । ३ । १३९ ।) इत्यनुवृत्तेः, अनुदात्तादेश्च (पां ४ । ३ । १४० ।) इत्यञ्, यस्येति च ( पां ६ । ४ । १४८ । ) इति इकारलोपः, तद्धितेष्वचामादेः (पां ७ । २ । ११७ ।) इति वृद्धीरपरत्वं, ञ्नित्यादिर्नित्यं (पां ६ । १ । १९७) इत्याद्युदात्तः । अधि, निपातत्वादाद्युदात्तः । इन्द्रं, रन्प्रत्ययान्त आद्युदात्तः। महः, महत इत्यस्याकारतकारयोर्लोपश्चान्दसः, सावेकाचः (पां ६ । १ । १६८) इति विभक्तेरुदात्तत्वं । रजसः, नब्विषयस्यानिषन्तस्येत्याद्युदात्तत्वं ॥ १० ॥ इति प्रथमस्य प्रथमे द्वादशो वर्गः ॥

## सप्तमसूक्तं।

१११ इन्द्रमिद्गाथिनो बृहदिन्द्रमर्केभिरर्किणः १
इन्द्रं वाणीरनूषत ॥ *

इन्द्रमित्यादिकं दशर्चं सूक्तं, तत् सुरूपकृत्नुमित्यादिषु चतुर्थं, ऋषिच्छन्दो देवता विनियोगश्च पूर्ववत्, विशेषस्तूच्यते, महाव्रते निष्केवल्यशस्त्रमिन्द्रमिद्गाथिन इति सूक्तं, तथा पञ्चमारण्यके सूचितं, शिरो गायत्रमिन्द्रमिद्गाथिन इति, तथा चतुर्विंशेऽहनि ब्राह्मणाच्छंसिनः शस्त्रे इन्द्रमिद्गाथिन् इतिषडहस्तोचीयस्तृचः, चतुर्विंशे होताजनिष्टेत्युपक्रम्यायाहि सुषुमाहित इन्द्रमिद्गाथिनो बृहदिति सूचितत्वात्, अतिरात्रे प्रथमे पर्य्याये अच्छावाकशस्त्रेऽयमेव तृचोऽनुरूपः, सूचितश्च, इन्द्रायमद्वने सुतमिन्द्रमिद्गाथिनो बृहदिति, तत्र प्रथममृचमाह इन्द्रमिदिति। गाथिनो गीयमानसामयुक्ता उद्गातार इन्द्रमिदिन्द्रमेव, बृहत् त्वामिद्धि हवामह इत्यस्यामृचि उत्पन्नेन बृहन्नामकेन साम्ना, अनूषत स्तुतवन्तः। अर्किणः, अर्चनहेतुमन्त्रोपेता होतारः, अर्केभिर्ऋग्यूपैर्मन्त्रैरिन्द्रमानूषत। येत्वर्वाग्विष्टा अध्वर्यवस्ते वाणीर्वाग्भिर्यजूरूपाभिरिन्द्रमेवानूषत। अर्कशब्दस्य मन्त्रपरत्वं यास्केनोक्तं, अर्को मन्त्रो भवति यदेनेनार्चन्तीति। श्लोकइत्यादिषु सप्तपञ्चाशत्सु वाङ्नामसु वाणी वाणीति पठितं। गाथिनः, उषि कुषि गर्त्तिभ्यस्थन्निति गायते स्थन्प्रत्ययः, नित्त्वादाद्युदात्तः, गाथा एषां सन्तीति गाथिनः, व्रीह्यादिभ्यश्च (पां ५। २। ११६) इतीन् प्रत्ययः, प्रत्ययस्वरेणोकारउदात्तः, स च सति शिष्टः। बृहत्, बृहता, तृतीयैकवचनस्य, सुपांसुलुगिति लुक्, वर्त्तमाने एषन्मन्त्रहृबृहज्जगच्छृतवचेतिसूचवार्त्तिके नान्तोदात्तोनिपातितः। अर्केभिः, अर्क पूजायां, अर्चन्ति एभिरर्का मन्त्रास्ते, पुंसि संज्ञायां घः प्रायेण (पां ३। ३। ११८।) इति घः, चजोः कुघिण्यतोः (पां ७। ३। ५२।) इति कुत्वं, प्रत्ययस्वरेणान्तोदात्तः बज्रलं छन्दसीति भिस ऐसादेशो न भवति। अर्काः स्तुतिसाधनभूता मन्त्रा एषां सन्तीत्यर्किणः। वाणीः, बृषादीनाञ्च (पां ६। १। २०३) इत्याद्युदात्तः, दीर्घाञ्छसि च (पां ६। १। १०५) इति पूर्वसवर्णदीर्घनिषेधस्य, वा छन्दसि (६। १। ६) इति विकल्पितत्वाद्दीर्घत्वं, तृतीयार्थे प्रथमा। अनूषत,

* बृहदितिवर्गीयबकारो लिखितादर्शपुस्तकेदृष्टः। वि, सं, का।

१२१ इन्द्र इद्धर्य्योः सचा संमिश्ल आ वचोयुजा १
इन्द्रो वज्री हिरण्ययः ॥
१३१ इन्द्रो दीर्घाय चक्षस आ सूर्यं रोहयद्दिवि १
वि गोभिरद्रिमैरयत् ॥

गु स्तुतौ, गोनः (पां ६ । १६५ ।) इति नत्वं, लुङि व्यत्ययेनात्मनेपदं, झस्यादादेशः, सिचइडभावः, उकारस्य दीर्घत्वञ्च छान्दसं, गुधातोः कुटादित्वात् सिचो ङित्त्वेन गुणाभावः ॥ १ ॥

द्वितीयामृचमाह, इन्द्रइद्धर्य्योरिति । इन्द्र इत् इन्द्र एव हि हर्य्यो-र्हरिनामकयोरश्वयोः सचा सह युगपत् आसंमिश्रः सर्वतः सम्य-ङ्मिश्रयिता । कीदृशयोर्हर्य्योः, वचोयुजा इन्द्रस्य वचनमात्रेण रथे युज्यमानयोः, सुशिक्षितयोरित्यर्थः, अयमिन्द्रो वज्री वज्रयुक्तः। हिरण्ययः सर्वाभरणभूषित इत्यर्थः । हर्य्योः, हरत इति हरी इन्, नित्त्वादाद्युदात्तः। सचा सहेत्युक्तं। मिश्रणं मिश्रः, मिश्रयतेर्घञ्, सम्यक् मिश्रो यस्यासौ संमिश्रः, सत्वं छान्दसं, सम्यङ्मिश्रयितेत्यर्थः, वज्रीहौ पूर्वपदप्रकृतिस्वरत्वं । वचसा युज्येते इति वचोयुजौ तयोः, षष्ठीद्विवचनस्य, सुपां सुलुगित्याकारादेशः। युजाशब्दो धातु-स्वरेणान्तोदात्तः, कृदुत्तरपदप्रकृतिस्वरेण स एव शिष्यते। वज्री, वज्र-मस्यास्तीति, अत इनिठनौ (पां ५ । २ । ११५ ।) इति इनि प्रत्ययः, प्रत्ययस्वरः । हिरण्ययः, ऋत्यवास्त्यवा स्वमाध्वी हिरण्ययानि छन्द-सि, (पां ६ । ४ । १७५) इति हिरण्यमयशब्दस्य मकारलोपो निपा-त्यते, प्रत्ययस्वरेणोदात्तः, पूर्वेणानुदात्तेन सह, एकादेशउदात्तेनोदात्तः (पां ८ । २ । ५) इत्युदात्तः ॥ २ ॥

तृतीयामृचमाह, इन्द्रो दीर्घायेति । अयमिन्द्रो दीर्घाय प्रौढाय निरन्तराय चक्षसे दर्शनाय दिवि द्युलोके सूर्यमारोहयत्, पुरा वृत्रासुरेण जगति यदापादितं तमः तन्निवारणेन प्राणिनां दृष्टि-सिद्ध्यर्थं आदित्यं द्युलोके स्थापितवानित्यर्थः। स च सूर्यो गोभिः स्वकी-यरश्मिभिरद्रिं पर्वतमुखं सर्वं जगत् व्यैरयत् विशेषेण दर्शनार्थं प्रेरितवान् प्रकाशितवानित्यर्थः। अथवा इन्द्र एव गोभिर्जलैर्निमित्त-भूतैरद्रिं मेघं व्यैरयत् विशेषेण प्रेरितवान्। पञ्चदशसङ्ख्केषु रश्मिना-मसु खेदयः किरणा गाव इति पठितं। त्रिंशत्सङ्ख्केषु मेघनामसु

१४१ इन्द्र वाजेषु नोऽव सहस्रप्रधनेषु च १
उग्र उग्राभिरूतिभिः ॥
१५१ इन्द्रं वयं महाधन इन्द्रमर्भे हवामहे १
युजं वृत्रेषु वज्रिणं ॥ १३ ॥

अद्रिः ग्रावेति पठितं। दीर्घाय, प्रातिपदिकस्वरेणान्तोदात्तः। चक्षसे, चक्षतेः सर्वधातुभ्योऽसुन्नित्यसुन्, बहुलग्रहणात् ख्याजादेशाभावः, नित्त्वादाद्युदात्तः। सूर्य्यं, सुवति प्रेरयतीति सूर्य्यः, षू प्रेरणे, धात्वादेः षः सः, राजसूयसूर्य्य (पां ३। १। ११४।) इत्यादिना क्यप्प्रत्ययः, तस्य रुड़ागमश्च निपात्यते, क्यपः कित्त्वादुणाभावः, यित्त्वादनुदात्तत्वं, धातुस्वर एव शिष्यते। रोहयत्, रुहेर्ण्यन्ताल्लङि, बहुलं छन्दस्यमाङ्योगेऽपि (पां ६। ४। ७५) इत्यड़भावो निघातश्च। दिवि, ऊडिदमित्यादिना विभक्तेरुदात्तत्वं। अद्रिं, अदिशदिभूशुभिभ्यः क्रिन्निति क्रिन्प्रत्ययः, अदन्ति पशवस्तृणान्यत्रेत्यद्रिः, नित्त्वादाद्युदात्तत्वं। ईरयत्, ईरगतौ, ण्यन्ताल्लङ्, निघातः ॥ ३ ॥

चतुर्थीमृचमाह इन्द्र वाजेष्विति। हे इन्द्र उग्रः शत्रुभिरप्रधृष्यस्त्वं, उग्राभिरप्रधृष्याभिरूतिभिरस्मद्विषयरक्षाभिर्वाजेषु युद्धेषु नोऽस्मान् अव रक्ष, तथा सहस्रप्रधनेषु च सहस्रसङ्ख्यकेषु गजाश्वादिलाभयुक्तेषु महायुद्धेष्वपि रक्ष। वाजेषु, वृषादीनां चेत्याद्युदात्तत्वं। नः, नसः सकारस्य रुत्वोत्वगुणेषु, प्रकृत्यान्तः पादमव्यपरे (पां ६। १। ११५) इति प्रकृतिभावो न भवति, अव्यपरइति निषेधात्। अव, अव रक्षणे, तिङुतिङः (पां ८। १। २८) इति निघातः। यद्यपि सहस्रप्रधनेषु चावेत्यध्याहृतां क्रियामपेक्ष्य प्रथमायाः श्रूयमाणायाः अवेतिक्रियायाः, च वायोगे प्रथमेति निघातनिषेधः प्राप्तस्तथापि वाजेष्वित्यत्र चकारस्य लुप्तत्वाच्चादिलोपे विभाषेति निषेधस्य विकल्पितत्वादत्र निघातः प्रवर्त्तते। सहस्रशब्दः कर्दमादीनाञ्चेति मध्योदात्तः, सहस्रप्रधनेषु वाजेषु बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वं। ऊतिभिः, ऊति युतीत्यादिना क्तिन्नुदात्तः ॥ ४ ॥

पञ्चमीमृचमाह, इन्द्रं वयमिति। वयमनुष्ठातारः महाधने प्रभूतधननिमित्तमिन्द्रं हवामहे आह्वयामः, अर्भे अर्भके स्वल्पेऽपि धने निमित्तभूते

१ ६ १ स नो वृषन्नमुं चरुं सत्रादावन्नपावृधि १
अस्मभ्यमप्रतिष्कुतः ॥

सति इन्द्रं हवामहे । कीदृशमिन्द्रं, युजं सहकारिणं समाहितं वा । पुनः कीदृशं, वृत्रेषु शत्रुषु धनलाभविरोधिषु प्राप्तेषु तन्निवारणाय वज्रिणं वज्रोपेतं । महाधनशब्दो यद्यपि सङ्ग्रामनामसु पठितस्तथापि महत्त्ववचनमत्र सङ्ग्राम इति बहुव्रीहित्वेत्वन्तोदात्तत्वासिद्धेर्नात्र तद्गृहीतं । महाधने, महच्च तद्धनञ्चेति, समासस्येत्यन्तोदात्तः । अर्भे, अर्त्तिदृभ्यां भन्, नित्त्वादाद्युदात्तः । हवामहे, ह्वेञ् स्पर्द्धायां शब्दे च, ञित्त्वात् कर्त्रभिप्राये आत्मनेपदं, लटः स्थाने महि, टित आत्मनेपदानां टेरे (पां ३ । ४ । ७९ । ) इति टेरेत्वं, कर्त्तरि शप्, ह्वः सम्प्रसारणमित्यनुवृत्तौ, बहुलं छन्दसीति सम्प्रसारणं, वकारस्य उकारः, परपूर्वत्वं, गुणावादेशौ, अतो दीर्घो यञि (पां ७ । ३ । १९ । ) इति दीर्घत्वं, तिङ्ङ् तिङ इति निघातः । युजं, युज समाधावित्यस्य क्विप्, युजेरसमासे (पां ७ । १ । ७१ । ) इति नुम् न भवति, सहि युजेरिति निर्द्देशादिकाररहितस्य न भवति, अनित्यमागमशासनमिति वा युजिर्योग इत्यस्यापि नुम् न भवति । वृत्रेषु, वृतुवर्त्तने, प्रतिकूलतया वर्त्तन्त इति वृत्राणि शत्रुकुलानि, स्फायि तञ्चि वञ्चीत्यादिना रक्प्रत्ययः, कित्त्वाद्गुणाभावः, प्रत्ययस्वरः । वज्रिणं, अत इनि ठनौ (पां ५ । २ । ११५ । इति इनिः, प्रत्ययस्वरः ॥ ५ ॥ इति प्रथमस्य प्रथमे त्रयोदशवर्गः ॥

इन्द्रमिद्गाथिन इति सूक्ते षष्ठीमृचमाह, स नो वृषन्नमुमिति । हे सत्रादावन् अस्मदभीष्टानां सर्वेषां फलानां सहप्रदातः, अतो व्रीह्यादिनिष्पत्त्यर्थं हे वृषन् वृष्टिप्रदेन्द्र, नोऽस्मदर्थममुं दृश्यमानं चरुं मेघमपावृधि उद्घाटय, तथैवास्मभ्यमस्मदर्थं अप्रतिष्कुतः, प्रतिशब्दरहितो यद्यदस्माभिर्याच्यते तत्र सर्वत्र नेति प्रतिशब्दं नोच्चारयति, अतोऽस्मद्विषये कदाचिदप्यस्खलितः । एतदेवाभिप्रेत्य यास्क आह, अप्रतिष्कुतोऽप्रतिकृतोऽप्रतिस्खलितो वेति । वृषन्, आमन्त्रितनिघातः । अमुं, प्रातिपदिकस्वरेणान्तोदात्तः । चरुं, चरतीति चरुः, भृ मृ शी तृ दृ चरित्सरि तनि धनि मि मस्जिभ्य उरित्युप्रत्ययः, प्रत्ययस्वरेणान्तोदात्तः । सत्रादावन्, सत्राशब्दः सहार्थे, अभितः फलजातं सकलं

१७१ तुञ्जे तुञ्जे य उत्तरे स्तोमा इन्द्रस्य वज्रिणः ।
न विन्धे अस्य सुष्टुतिं ॥

सच्च ददातीति सत्रादावा, आतो मनिन् क्वनिब्वनिपश्च ( पां ३ । २ । ७४ । ) इति वनिप्, आमन्त्रितस्य च ( पां ६ । १ । १५८ । ) इत्याद्युदात्तत्वं, पादादित्वान्न निघातः । अप, निपातस्य च ( पां ६ । ३ । २३६ । ) इति दीर्घः, निपात आद्युदात्तः । दधि, दृज्वरणे, लोटः सिप्, तस्य, सेर्ह्यपिच ( पां ३ । ४ । ८७ । ) इति हिः, स्वादिभ्यः श्नुः, तस्य, बहुलं छन्दसीति लुक्, श्नुश्नसु पृ क्ष दृभ्यश्छन्दसि ( पां ६ । ४ । १०२ । ) इति हेर्धिरादेशः, तस्य ङित्त्वात् पूर्वस्य गुणाभावः, निघातः । अस्मभ्यं, अस्मच्छब्दाङ्ग्सोभ्यमिति भ्यमादेशः, शेषे लोपः ( पां ७ । ३ । ९० । ) इति दकारलोपः, बहुवचने झल्येदित्येत्वं न भवति, अङ्गवृत्तौ * पुनर्वृत्तिरविधिरित्युक्तत्वात्, प्रातिपदिकस्वरेण स्नेत्यकारउदात्तः, भ्यसोऽभ्यमित्यभ्यमादेशपक्षे, शेषे लोप इति मयर्य्यन्तशेषस्यादः शब्दस्य लोपः, तदा उदात्तनिवृत्तिस्वरेण अभ्यमादेरकारस्योदात्तत्वं । अप्रतिष्कुतः, केनचिदप्रतिशब्दितः, कुङ्शब्दे, निष्ठा ( पां ३ । २ । १०२ । ) इति कर्म्मणि क्त प्रत्ययः, प्रतेः प्राक्प्रयोगः, पारस्करादेराकृतिगणत्वात् सुडागमः, सुषामादेराकृतिगणत्वात् षत्वं, नञ्समासेऽयथपूर्वपदप्रकृतिस्वरत्वं ॥ ६ ॥

सप्तमीमृचमाह तुञ्जे तुञ्जे य इति । तुञ्जे तुञ्जे तस्मिन् फलदातरि देवान्तरे ये स्तोमाः स्तोत्रविशेषाः उत्तरे उत्कृष्टाः सन्ति तैस्तोमैः सर्वैरपि, अस्य वज्रिणो वज्रयुक्तस्येन्द्रस्य सुष्टुतिं शोभनस्तुतिं न विन्धे न विन्दामि, इन्द्रस्यात्यन्तगुणबाहुल्येन देवान्तरेषूत्तमत्वेन प्रसिद्धान्यपि स्तोत्राणि न पर्य्याप्तानीत्यर्थः । एतामृचं यास्क एवं व्याचष्टे, तुञ्जे तुञ्जे, तुञ्जतेर्दानकर्म्मणः दाने दाने तुञ्जे तुञ्जे य उत्तरे स्तोमा इन्द्रस्य वज्रिणो नास्य तैर्विन्दामि समाप्तिस्तुतेरिति । तुञ्जे तुञ्जे तुञ्जतिर्दानकर्म्मेत्युक्तं, ततः कर्त्तरि यचाद्यच्, चित इत्यन्तोदात्तत्वं, नित्यवीप्सयोरिति द्विर्भावः, तस्य परमाम्रेडितमिति द्वितीयस्याम्रेडितसञ्ज्ञा, अनुदात्तङेत्यनुदात्तत्वं । दातरि दातरीत्यर्थः, निरुक्तेतु दाने दानेऽर्थतो व्याख्यानं । उत्तरे, तुज्बवनतरणयोः भावे,

* अङ्गवृत्तौपुनर्वृत्तावविधिनिष्ठितस्येत्युक्तं, कां, सं, ।

ऋदोरप् ( पां ३ । ३ । ५७ । ) इत्यप्, उच्छब्द उत्कृष्टवचनः, उत्कृष्टः स्तरो यस्येति बहुव्रीहिः, उच्छब्दो निपाता आद्युदात्ता इत्याद्युदात्तः, बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वं । स्तोमाः, स्तौतेः, अर्त्तिषु स्तु सु हु सृ धु क्षि क्ष्वित्यादिना स्तोमशब्दो मन्नन्तो, नित्त्वादाद्युदात्तः । विन्दे, विद्लृ-लाभे, लट् स्वरितेत्त्वादात्मनेपदं, उत्तमैकवचनं, तुदादिभ्यः शः ( पां ३ । १ । ७७ । ) इति शः, शेमुचादीनां ( पां ७ । १ । ५९ । ) इति नुम्, दकारस्य व्यत्ययेन धकारः, अस्य प्रकृतस्येन्द्रस्य परामर्शादन्वादेशे, इदमोऽश्, शित्त्वात् सर्व्वादेशोऽनुदात्तः । सुष्टुतिं, ष्टुञ् स्तुतौ, धात्वादेः षः सः ( पां ६ । १ । ६४ । ) इति सत्वं, स्त्रियां क्तिन् ( पां ३ । ३ । ९४ । ) इति भावे क्तिन्, सु इत्युदात्तेनोपसर्गेण प्रादिसमासः, उपसर्गात् सुनोति ( पां ८ । ३ । ६५ । ) इत्यादिना षत्वं, अत्राव्ययपूर्वपद-प्रकृतिस्वरत्वेन सोः प्राप्तमुदात्तत्वं बाधित्वा, गतिकारकोपपदात् कृत् इत्युत्तरपदप्रकृतिस्वरेण धातोरुदात्तत्वे प्राप्ते, तदपवादेन, तादौ चनि-तिकृत्यता वित्यनन्तरस्य गतिसञ्ज्ञकस्य सोरेवोदात्तत्वेन भवितव्यं, तत्तु मनक्तिन्व्याख्यानशयनासनस्थानयाजकादिक्रीता इत्युत्तरपदान्तो-दात्तत्वेन बाध्यते, तथाच सुहवां सुष्टुतीं हुवे * वृष्णेचोदस्व सुष्टुतिं यास्तेराके सुमतय इत्यादावन्तोदात्तत्वमित्याहुः, यथा तु मनक्ति-न्नित्यादौ वृत्तावुक्तं, तथैव तन्न घटत इति लक्ष्यते, तत्र हि, कार-काद्दत्तश्रुतयोरेवाशिषीत्यतः कारकादित्यनुवृत्तेः पाणिनिकृतिरित्यादा-वेव मनक्तिन्नित्यादिसूत्रमित्युक्तं, कारकादित्येव प्रकृतिः प्रहृति-रिति प्रत्युदाहृते, स्यादेतत्, स्तूयते अनयेति स्तुतिरिति क्तिना कर-णभूता ऋगभिधीयते, सुशब्देन च करणमेव विशेष्यते न धात्वर्थः, सुष्टुतिरित्यत्र सुशब्दः कारकपर एव भविष्यति, प्रकृतिः प्रहृतिरि-त्यादौ तु प्रशब्दो धात्वर्थे विशेषणमेवेति तत् प्रत्युदाहरणोपपत्तिरिति, न, एवं सति सुशब्दस्य क्रियायोगाभावादुपसर्गाः क्रियायोग इत्युक्ता उपसर्गसञ्ज्ञा न स्यात्, तथाच उपसर्गात् सुनोति सुवतीत्यादिना षत्वं न स्यात् । ननु क्तिना करणमभिधीयते, क्रियासाधनञ्च करणं, तथाच करणविशेषणस्यापि सुशब्दस्य करणान्तर्गतक्रियायोगादुपसर्गता भवि-ष्यतीति, न, तथा सति यत् क्रियायुक्ताः प्रादयस्तं प्रत्येवगत्युपसर्ग-

---

* दृष्टे इति कां सं ।

सञ्ज्ञकाः स्तुरिति करोत्यर्थमेव प्रति सोरुपसर्गता । ननु स्तुधात्वर्थं प्रतीत्यास्य षत्वं न स्यादेव । ननु स्तुधात्वर्थद्वारैव तत्करणस्य सुशब्दो विशेषणं भविष्यति, याहि शोभना स्तुतिस्तत्करणमपि शोभनमेवेति, एवञ्च स्तुधात्वर्थसम्बन्धात्तं प्रत्युपसर्गत्वेन षत्वमपि भविष्यति, तद्द्वारा करणविशेषणत्वात् कारकवचनोऽपि सुशब्दो भविष्यतीति, कृत्यविरोधेनैव मनक्तिनादिसूत्रस्य सुष्टुतिशब्दो विषयो भविष्यति, प्रकृतिः प्रहृतिरित्यत्र भावे क्तिन् प्रत्युदाहृतेति न तत्र प्रशब्दस्य करणपरत्वं करणे क्तिनुदाहरणेऽपि धात्वर्थमात्रविशेषणतैव विवक्षिता, न तद्द्वारा प्रत्ययार्थविशेषणतापीति, तत् प्रत्युदाहरणतोपपत्तिरिति । सुष्टुतिरित्यत्र पुनः क्तिन्नभिधेयकरणपर्य्यन्तं सुशब्दस्य व्यापार इत्युदाहरणतैव न प्रत्युदाहरणतेति, न, किमत्र सुशब्दः श्रुत्यैव प्रकृतिप्रत्ययार्थोभयविशेषणपरः, उत श्रुत्यैकं विशिनष्टि, अर्थादितरदिति, यदाप्युभयपरत्वं तदापि किं यौगपद्येन उतक्रमेणेति, आद्ये सति विशेष्यविशेषणपदाहृत्तिरिति प्रसङ्गः, द्वितीये विरम्य व्यापारपातः। न च शब्दबुद्धिकर्म्मणां विरम्य व्यापारपातः * कथञ्चिदृष्टः, इष्टो वा, अतो न श्रुत्योभयपरत्वं । अथैकत्र श्रुत्या तात्पर्य्यार्थं, अपरत्रत्वर्थादिति, अत्र धात्वर्थसम्बन्धस्यार्थिकत्वे षत्वासिद्धिः, प्रत्ययार्थसम्बन्धस्यार्थिकत्वे मनक्तिन्नित्यादिस्वरासिद्धिः, आर्थिकेनापि कारकसम्बन्धेनोदाहरणत्वाभिधाने प्रकृतिः प्रहृतिरित्यादिप्रत्युदाहरणं न स्यात्, श्रुत्या धात्वर्थमात्रसम्बन्धस्यापि प्रशब्दस्यार्थात् तत् करणसम्बन्धः केन वारयितुं शक्यत इत्येषा दिक्, अतएव * प्रत्ययार्थमात्रसम्बन्धपरत्वाङ्गीकारेण स्वरः सिद्ध्यतु, षत्वन्तु छान्दसमस्तु, शोभना स्तुतिर्यस्यामिति बहुव्रीहिर्वा भवतु, एवञ्च नञ्सुभ्यां ( पां ६ । २ । १७२ । ) इत्यन्तोदात्तं भविष्यति, अथवा सुष्ठु स्तुवन्तीति सुष्टुतय इतिकरणभूता ऋचः स्तुतिशब्देनोच्यन्ते, क्तिच्क्तौच सञ्ज्ञायां ( पां ३ । ३ । १७४ । ) इति क्तिच्प्रत्यये सति चित्त्वादन्तोदात्तता भविष्यति, न च करणीभूतानामृचां कर्तृप्रत्ययेन क्तिचा कथमभिधानमिति वाच्यं, काष्ठानि पचन्तीतिवत् तासामपि स्वव्यापाराप्राधान्यविवक्षया करणत्वोपपत्तिरिति ॥ ७ ॥

---

* कथञ्चिदिति कां, सं। * इष्ट कां सं।

१ ८ १ वृषा यूथेव वंसगः कृष्टीरियर्त्योजसा १
ईशानो अप्रतिष्कुतः ॥
१ ९ १ य एकश्चर्षणीनां वसूनामिरज्यति १
इन्द्रः पञ्च क्षितीनां ॥

अष्टमीमृचमाह वृषा यूथेवेति । वृषा कामानां वर्षिता इन्द्रः ओजसा स्वकीयबलेनानुग्रहीतुं कृष्टीर्मनुष्यान् इयर्त्ति प्राप्नोति । कीदृश इन्द्रः, ईशानः समर्थः । पुनः कीदृशः, अप्रतिष्कुतः, प्रतिशब्दरहितः, याच्यमानं न परिहरतीत्यर्थः । इन्द्रस्य दृष्टान्तः, वंसगो वननीयगतिर्वृषभो यूथेव, गावो यूथानि यथा प्राप्नोति तद्वत् । वृषा, कनिन् युवृषि तक्षि वि राजि धन्वि द्यु प्रतिदिव इति वर्षतेः कनिन्प्रत्यय औणादिकः, कित्त्वादुणाभावः, नित्त्वादाद्युदात्तः । यूथा इव, युवन्ति मिश्रीभवन्तीति यूथानि, युमिश्रणामिश्रणयोः, तिथ पृष्ठ गूथ यूथ प्रोथा इत्यौणादिक थ प्रत्ययान्तो निपातितः, निपातनाद्दीर्घत्वं, प्रत्ययस्वरेणाकार उदात्तः, शेश्छन्दसि बहुलं ( पां ६ । १ । ७० । ) इति शेर्लुक्, स्वेन विभक्त्यलोपः, पूर्वपदप्रकृतिस्वरत्वञ्च वक्तव्यमिति वार्तिकेन समासेऽपि स एव स्वरः । वंसगः, एषोदरादित्वादभिमतरूपस्वरसिद्धिः । कर्षन्तीति कृष्टयः, क्तिच् क्तौ च सञ्ज्ञायां (पां ३ । ३ । १७४ ।) इति क्तिच्, चित्त्वादन्तोदात्तः । इयर्त्ति, ऋच्छतौ, तिप्, शपः श्लुः, श्लौ ( पां ६ । १ । १० । ) इति द्विर्भावः, अभ्यासस्य उरदत्वहलादिशेषौ, अर्त्तिपिपर्त्त्योश्च (पां ७ । ४ । ७७ ।) इत्यकारस्य इकारः, अभ्यासस्यासवर्णे ( पां ६ । ४ । ७८ ।) इतीयङादेशः, ऋकारस्य गुणोरपरत्वं । ओजसा, उर्ज्जेर्बलेर्बलोपश्च इत्यौणादिकअसुन्, तत्सन्नियोगेन बकारलोपः, लघूपधगुणः, नित्त्वादाद्युदात्तः । ईशानः, ईशऐश्वर्ये, लटः शानच्, अदिप्रभृतिभ्यः शपः (पां २ । ४ । ७२ । ) इति शपोलुक् । चितः ( पां ६ । १ । १६३ । ) इत्यन्तोदात्तं बाधित्वा, अनुदात्तत्वाल्लसार्वधातुकानुदात्तत्वेन धातुस्वर एव शिष्यते । अप्रतिष्कुतः, अप्रतिशब्दितः, कु शब्दे, कर्म्मणि क्तः, पारस्करादित्वात् सुडागमः, सुषामादित्वात् षत्वं, नञ्समासः, अव्ययपूर्वपदप्रकृतिस्वरत्वं ॥ ८ ॥

नवमीमृचमाह, य एक इति । य इन्द्रः स्वयमेक एव चर्षणीनां

१ १० १ इन्द्रं वो विश्वतस्परि हवामहे जनेभ्यः १
अस्माकमस्तु केवलः १ १४ १

मनुष्याणामिरज्यति ईष्टे, तथा वसूनां धनानामिरज्यति, स इन्द्रः पञ्च निषादपञ्चमानां क्षितीनां निवासार्हाणां वर्णानामनुग्रहीतेति शेषः। एकः, इण्गतौ, इण् भी का पा शल्यति मर्च्चिभ्यः कन्नित्यौणादिकः कन्-प्रत्ययः, बाहुलकात् कलोपाभावः, नित्त्वादाद्युदात्तत्वं। चर्षणीनां, प्रातिपदिकस्वरेणान्तोदात्तः। अन्तोदात्तावित्यनुवृत्तौ, नामन्यतरस्यां (पां ६। १।१७७।) इति विभक्तेरुदात्तत्वं। वसूनां, वस निवासे, निदित्यनुवृत्तौ, शृ स्वृ स्निहि त्रप्यसिवसिहनि क्लिदिबन्धिमनिभ्यश्चेत्युप्रत्ययऔणादिकः, नित्त्वादाद्युदात्तः। इरज्यति, कण्ड्वादिषु इरज् इर्षायां अत्रैश्वर्य्यार्थः, कण्ड्वादिभ्योयक् (पां ३।१।२७।) इति यक्, प्रत्ययस्वरेणोदात्तः। पञ्च, पचि व्यक्तीकरणे, पञ्चेश्चेत्यौणादिकः कनिन्, नित्त्वादाद्युदात्तः। क्षितीनां, प्रातिपदिकस्वरेणान्तोदात्तः, नामन्यतरस्यां (पां ६।१।१७७।) इति विभक्तेरुदात्तत्वं ॥ ९॥

आश्विनं शंसिष्यन्निन्द्रं वो विश्वतस्परीति जुहुयात् * संस्थितेष्वश्विनायस्तुवत इति खण्डे वण्महां असि सूर्य्येति द्वाभ्यामिन्द्रं वो विश्वतस्परीति सूत्रितं। चतुर्विंशेऽहनि प्रातः सवने ब्राह्मणाच्छंसिन इन्द्रं वो विश्वतस्परीत्यारम्भणीया, चतुर्विंश इत्युपक्रम्य ऋजुनीतिनो वरुण इन्द्रं वो विश्वतस्परीति सूत्रितं, तामेतां दशमीमृचमाह, इन्द्रं व इति। हे ऋत्विग्यजमानाः, विश्वतः सर्वेभ्यो जनेभ्यः परि उपरि अवस्थितमिन्द्रं वो युष्मदर्थं हवामहे आह्वयामः, अतः स इन्द्रोऽस्माकं केवलोऽसाधारणोऽस्तु, इतरेभ्योऽप्यधिकमनुग्रहमस्मासु करोत्वित्यर्थः। इन्द्रं, इदि परमैश्वर्य्य इति धातुः, रन्प्रत्ययः, नुमागमः, नित्त्वादाद्युदात्तः। वः, अनुदात्तं सर्वमित्यनुवृत्तौ, बहुवचनस्य वस्नसौ (पां ८।१।२१।) इति वस्। विश्वतः, पञ्चम्यास्तसिल् (पां ५।३।७।) इति तसिल्, लिति (पां ६।१।१६३।) इति प्रत्ययात् पूर्वमुदात्तत्वं। परि, निपातत्वादाद्युदात्तः संहितायां, पञ्चम्याः परावध्यर्थे (पां ८।३।५१।) इति विसर्ज्जनीयस्य सत्वं। हवामहे,

---

* संस्तुते इति कां, सं।

ह्वेञः शपि, बहुलं छन्दसि ( पां ६ । १ । ३४ । ) इति सम्प्रसारण परपूर्वत्वे, गुणावादेशौ । जनेभ्यः, जन्यन्त इति जनाः, जनयतेः कर्म्मणि घञ्, जनिवध्योश्च ( पां ७ । ३ । ३५ । ) इत्युपधाया वृद्ध्यभावः, ञित्त्वादाद्युदात्तत्वं । अस्माकं, अस्मच्छब्दोऽन्तोदात्तः, शेषे लोपः ( पां ७ । २ । ९० । ) इत्यलोपपक्षे, सामआकं ( पां ७ । १ । ३३ । इत्याकमाकारेण एकादेश उदात्तः, टिलोपपक्षे उदात्तनिवृत्तिस्वरेणाकार उदात्तः । केवलः, वृषादेराकृतिगणत्वादाद्युदात्तः ॥ १० ॥ इति प्रथमस्य प्रथमे चतुर्द्दशो वर्गः ॥ १४ ॥ इति द्वितीयोऽनुवाकः ॥

---

## ॥ अथ तृतीयोऽनुवाकः ॥

### ॥ अष्टमसूक्तं ॥

१११ एन्द्र सानसिं रयिं सजित्वानं सदासहं ।
वर्षिष्ठमूतये भर ॥

तृतीयेऽनुवाके चत्वारि सूक्तानि, तत्र एन्द्र सानसिं रयिमित्यादिकं प्रथमं दशर्च्चं सूक्तं, तत्सुरूपकृत्नुमित्यादिषु षट्सु पञ्चमं, ऋष्यादयस्तु पूर्व्ववत्, विशेषविनियोगस्तु महाव्रते निष्केवल्ये औङ्ख्यतृचाशीतौ च एन्द्र सानसिं रयिमित्यादिके द्वे सूक्ते, पञ्चमारण्यके औङ्ख्यतृचाशीतिरिति खण्डे शौनकेन सूत्रितं, सुरूपकृत्नुमूतय इति त्रीणि, एन्द्र सानसिं रयिमिति द्वे इति, अतिरात्रे प्रथमपर्य्याये अच्छावाकशस्त्रे एन्द्र सानसिं रयिमिति सूक्तं सूत्रितञ्च, इन्द्रमिद्गाथिनो बृहदेन्द्र सानसिमिति, दर्शयागे इन्द्रयाजिनः सान्नायस्यानुवाक्या एन्द्र सानसिमिति, उक्तादेवता इत्यस्मिन् खण्डे एन्द्र सानसिं रयिं प्रससाहिषेपुरुहूतशक्रमिति सूत्रितं, तस्मिन् सूक्ते तामेतां प्रथमामृचमाह एन्द्र सानसिं रयिमिति। हे इन्द्र, ऊतयेऽस्मद्रक्षार्थं रयिं धनं आभर, आहर। कीदृशं रयिं, सानसिं सम्भजनीयं। पुनः कीदृशं सजित्वानं, समानशत्रुजयशीलं, धनेन शूरान् भृत्यान् सम्पाद्य शत्रवो जीयन्ते। पुनः कीदृशं सदासहं, सर्वदा शत्रूणामभिभवहेतुं। पुनरपि कीदृशं वर्षिष्ठं, अतिशयेन वृद्धं प्रभूतमित्यर्थः। सानसिं, वन षण सम्भक्ताइत्यस्मादसिप्रत्ययो वृद्धिरन्तोदात्तत्वञ्च सानसि धर्णसीत्यादिना निपात्यते। रयिं, प्रातिपदिकस्वरेणान्तोदात्तत्वं। सजित्वानं, समानानरीन् जेतुं शीलमस्य, अन्येभ्योऽपि दृश्यन्ते (पां ३। २। ७५।) इति क्वनिप्, उपपदसमासः, समानस्य छन्दस्यमूर्द्धप्रभृत्युदर्केषु (पां ६। ३। ८४।) इति समानस्य सभावः, कृदुत्तरपदप्रकृतिस्वरेण धातुस्वर एव शिष्यते। वर्षिष्ठं, वृद्धशब्दात्, अतिशायनेतमबिष्ठनौ (पां ५। ३। ५५।) इतीष्ठन् प्रत्ययः, प्रियस्थिर

१२१ नि येन मुष्टिहत्यया नि वृत्रा रणधामहै।
त्वोतासो न्यर्वता ॥

(पां ६।४।१५७।) इत्यादिना वृद्भशब्दस्य वर्षादेशः, इष्ठनोनित्त्वादायुदात्तत्वं। ऊतये, उदात्त इत्यनुवृत्तौ ऊतियूति जूति साति (पां ३।३।९७।) इत्यादिना क्तिन्नुदात्तोनिपातितः। भर, हृग्रहोर्भश्छन्दसीति सूत्रवार्तिकेन हकारस्य भकारः, ते प्राग्धातोः (पां १।४।८०।) इति धातोः प्राक् प्रयोक्तव्यस्याङो, व्यवहिताश्च (पां १।४।८२।) इति छन्दसि व्यवहितप्रयोगः ॥ १ ॥

द्वितीयामृचमाह, नि येनेति। येन धनेन सम्यादितानां भटानां निमुष्टिहत्यया नितरां मुष्टिप्रहारेण वृत्रा शत्रून् निरणधामहै निरुद्धान् करवाम, तादृशं धनमाहरेत्यर्थः। त्वोतासः त्वया रक्षिता वयं अर्वता, अस्मदीयेनाश्वेन निरणधामहा इत्यनुषङ्गः, पदातियुद्धेनाश्वयुद्धेन च शत्रून् विनाशयामेत्यर्थः। मुष्टिहत्यया, हनस्त च (पां ३।१।१०८।) इति सुबन्तोपपदे क्यप्, तत्सन्नियोगेन नकारस्य तकारः, कृदुत्तरपदप्रकृतिस्वरे प्राप्ते, परादिश्छन्दसिबहुलं (पां ६।२।१९९।) इति बहुलग्रहणेन, त्रिचक्रेणाप्यन्तोदात्तत्वाभिधानादन्तोदात्तत्वं। नि, आख्यातसम्बन्धस्यापि नेरुपसर्गस्य, व्यवहिताश्चेति व्यवहितप्रयोगः। वृत्रा, शेश्छन्दसि बहुलं (पां ६।१।७०।) इति शेर्लोपः, नलोपः। रणधामहै, आटसंयोगेन पित्त्वात्, असोरल्लोपः (पां ६।४।१११।) इत्यकारलोपो न भवति, पित्त्वादेव चाख्यातस्यानुदात्तदात्तत्वेन विकरणस्य अस एवोदात्तत्वमिष्यते। ननु तिङ्स्तिङ इति निघातेन भवितव्यं, न ह्यत्र तिङ्विभक्ती, निबिडयामुषा निरणधामहा इत्यत्र श्रुत्यैक्यात्। अर्वता, निरणधामहा इत्यत्रानुषक्ता द्वितीया, तयोः समुच्चयार्थयोश्चकारो लुप्यते, तेन चादिलोपे विभाषा (पां ८।१।६३) इति प्रथमेयं तिङ्विभक्तिर्न निहन्यते, यथा नात्मना लप्यति नान्यस्मै ददातीत्यत्र हि समुच्चयार्थस्य च शब्दस्य लोपात् लप्यतीति प्रथमा तिङ्विभक्तिर्न निहन्यते, ददातीति द्वितीया तु निहन्यत एव। ननु तत्र द्वे तिङ्विभक्ती श्रूयेते। किन्तु पुनरेकैव श्रुता, सैवोत्तरत्रानुषज्यते नान्या श्रूयत इति द्वितीयायाश्रवणात् कथमियं प्रथमा न, अनुषङ्गलब्धद्वितीयापेक्षमपि प्राधान्यमुपजीव्य निघा

१३१ इन्द्र त्वोतास आ वयं वज्रं घना ददीमहि १
जयेम सं युधि स्पृधः ॥

तनिषेधदर्शनात्, पुरोडाशश्चाधिश्रयत्याज्यं च, प्रोक्षणीश्चासादयत्याज्यं चेत्यत्र ह्यधिश्रयत्यासादयतीत्याख्यातयोः प्रथमवाक्यद्वययोः श्रुतयोरुत्तरवाक्यद्वयेऽनुषङ्गमपेक्ष्यैव प्राधान्यस्वीकारेण, चवायोगे प्रथमा (पां ८।१।५९।) इति निघातनिषेधो दृष्ट इति। त्वोतासः, त्वया ऊता रक्षितास्त्वोतासः, प्रत्ययोत्तरपदयोश्च (पां ७।२।९८) इति मपर्य्यन्तस्य त्वादेशे दकारलोपश्छान्दसः, ष्वतेर्निष्ठायामिडभावश्च, ज्वरत्वरस्रिव्यवि मूवामुपधायाश्च (पां ६।४।२०।) इत्यूठ्, ऊठ्यधत्यूठ्सु (पां ६।१।५९।) इति वृद्ध्यभावश्छान्दसः, टतीया कर्म्मणि (पां ६।२।४८।) इति पूर्वपदप्रकृतिस्वरेणाकार उदात्तः, एकादेश उदात्तेनोदात्त इत्युदात्तः। अर्वता, अर्वति गच्छतीत्यर्व्वा, अर्व्वगताविति धातुः, अन्येभ्योऽपि दृश्यन्ते (पां ३।२।७५।) इति वनिप्प्रत्ययः, नेड्वशिकृति (पां ७।२।८।) इतीट्प्रतिषेधः, लोपो व्योर्वलि (पां ६।१।६६।) इति वकारलोपः, अर्वणस्त्रसावनञः (पां ६।४।१२७।) इति तकारः, वनिपः पित्त्वाद्धातुस्वर एव ॥ २ ॥

टतीयामृचमाह इन्द्र त्वोतास इति। हे इन्द्र, त्वोतास्त्वया पालिता वयं घना घनं शत्रुप्रहरणात्मकं दृढं वज्रमायुधमाददीमहि स्वीकुर्म्मः, तेन च वज्रेण युधि युद्धे स्पृधः स्पर्द्धमानांश्छत्रून् सञ्जयेम सम्यक् जयेम। त्वोतास इत्युक्तं। वज्रं, वज व्रज व्रजि गताविति धातुः, ऋज्वेन्द्राग्रवज्रेत्यादिना रन्प्रत्ययान्तो निपातः। घना, घनः काठिन्यं, तदस्यास्तीति अर्शआदित्वादच्, चित्वादन्तोदात्तः, सुपां सुलुगिति डादेशः। ददीमहि, डुदाञ्दाने, प्रार्थनायां लिङ्, क्रियाफलस्य कर्त्रगामित्वात्, स्वरित ञितः कर्त्राभिप्राये क्रियाफले (पां १।३।७२।) इत्यात्मनेपदोत्तमपुरुषबहुवचनं। ईमहि, जुहोत्यादिभ्यश्छपः श्लुः, श्लौ (पां ६।१।१०।) इति द्विर्भावः, पूर्वोऽभ्यासः (पां ६।१।४।) इत्यभ्यासस्य ह्रस्वः (पां ७।४।५९।) इति ह्रस्वे, लिङः सलोपोऽनन्त्यस्य (पां ७।२।७९) इति सलोपः, उभे अभ्यस्तं (पां ६।१।५।) इत्यभ्यस्तत्वे, आभ्यस्तयोरातः (पां ६।४।११२।) इत्याकारलोपे प्राप्ते, ईहल्यघोः (पां ६।४।११३।) इतीत्वं। जयेम, शपः पित्त्वादनुदात्तत्वं,

१४१ वयं शूरेभिरस्तृभिरिन्द्र त्वया युजा वयं १
सासह्याम पृतन्यतः ॥

तिङश्च लसार्वधातुकस्वराद्धातुस्वर एव शिष्यते, छन्दसि परेऽपि (पां १। ४। ८१) इति समः परप्रयोगः। युधि, युध सम्प्रहार इति धातोः सम्पदादित्वाद्भावे क्विप्, सावेकाचः (पां ६। २। २६८) इतिविभक्तेरुदात्तत्वं। स्पृधः, स्पर्द्धन्तीति स्पृधः, स्पर्द्धसङ्घर्ष इति धातोः, क्विप्च (पां ३। २। ७६) इति क्विप्, बऋलं छन्दसीति रेफस्य सम्प्रसारणम्-कारः, अकारलोपश्च ॥ ३ ॥

चतुर्थीमृचमाह, वयं शूरेभिरिति। वयं कर्मानुष्ठातारः शूरेभि-र्शौर्ययुक्तैः, अस्तृभिरायुधानां प्रक्षेप्तृभिर्भटैः संयुज्येमहीति शेषः। हे इन्द्र, तादृशा भटसहिता वयं युजा सहायभूतेन त्वया पृतन्यतः सेनाभिच्छतः शत्रून् सासह्याम अतिशयेनाभिभवेम। शूरेभिः, शुश्रुग-ताविति धातोः, क्रन्नित्यनुवृत्तौ शुसिचिमीनां दीर्घश्चेत्यौणादिकः क्रन्, कित्त्वादगुणाभावः, नित्त्वादाद्युदात्तत्वं, बऋलं छन्दसीत्यसौ निषिद्धत्वात्, बऋवचने झल्येत् (पां ७। ३। १०३।) इत्येत्वं, सहयोगे टतीयाबला-दयमित्यस्मत्पदसमभिव्याहाराच्च वयं संयुज्येमहीति गम्यं, विनापि सहशब्देन वृद्धोयूनेति निपातनादिति ह्युक्तं। अस्तृभिः, शस्त्रास्त्रप्र-क्षेपणशीलैस्तद्धर्मभिस्तत्साधुकारिभिर्वा, असुक्षेपणे, टन् (पां ३। २। १३५।) इति तान्छिल्यादिषु टन्, नित्त्वादाद्युदात्तः, रुधा-धिभ्यश्च (पां ७। २। ४५।) इति विकल्पविधानादयं पक्षे इडभावः। त्वया, युष्यसिभ्यां मदिक् इत्यौणादिको मदिक्, कित्त्वादगुणाभवः, युष्मदः प्रत्ययस्वरेणाकार उदात्तः, टतीयैकवचनं टा, त्वमावेकवचने (पां ७। २। ९७।) इति मपर्य्यन्तस्य त्वादेशः, अतोगुणे (पां ६। १। ९७।) इति परूपत्वं, एकादेशउदात्तेनोदात्तः। युजा, ऋत्विग्दधृक्स्रग्दिगुष्णिगञ्चु-युजि क्रुञ्चाञ्च (पां ३। २। ५९।) इति क्विन्प्रत्ययः, सावेकाचः (पां ६। १। १६८।) इत्यादिना विभक्तेरुदात्तत्वं। सासह्याम, भृशं पुनः पुनः सहेमहि, षहमर्षण इति धातुः, धात्वादेः षः सः (पां ६। १। ६४) इति षस्य सः। धातोरेकाचोहलादेः क्रियासमभिहारे यङ्, (पां ३। १। २२।) इति यङ्, यङोऽचि च (पां २। ४। ७४।) इति लुक्, सन्यङोः (पां ६। १। ९।) इति द्विर्भावः, हलादिःशेषः, दीर्घोऽकितः (पां ७। ४। ८०।) इति दीर्घः, प्रार्थनायां लिङ्, चर्करीतं परस्मैपद-

१ ५ १ महाँ इन्द्रः परश्च नु महित्वमस्तु वज्रिणे १
द्यौर्न प्रथिना शवः ॥ १५ ॥

मदादिवच्च द्रष्टव्यमिति सूत्रवार्त्तिकेन परस्मैपदोत्तमपुरुषबवचनं मस्, कर्त्तरि शपोऽदादिवद्भावाल्लुङो, नित्यंङितः, (पां ३ । ४ । ९९ ।) इत्यन्तसकारलोपः, यासुट्परस्मैपदेषूदात्तोङिच्च (पां ३ । ४ । १०३ ।) इति यासुट्, लिङः सलोपोऽनन्तस्य (पां ७ । २ । ७९ ।) इति सकारलोपः, सति शिष्टत्वाद्यासुट एवोदात्तत्वं शिष्यते, पादादित्वान्न निघातः । पृतन्यतः, योद्धुं पृतनामात्मन इच्छतीत्यर्थे सुपआत्मनः क्यच् (पां ३ । १ । ८) इतिक्यच्, सनाद्यन्ताधातवः (पां ३ । १ । ३२) इति धातुसञ्ज्ञायां, सुपो धातुप्रातिपदिकयोः (पां २ । ४ । ७१ ।) इति सुपोलुक्, क्यचिच (पां ७ । ४ । ३३ ।) इत्यनुवृत्तौ, कव्यध्वरपृतनस्यर्च्चिलोपः (पां ७ । ४ । ३९ ।) इत्याकारलोपः, पृतन्यधातुश्चित्त्वादन्तोदात्तः, उपरि लटः शत्रादेशः, कर्त्तरि शप्, पित्त्वादनुदात्तत्वं, शतुश्चलसार्व्वधातुकस्वरेणोदात्तेन सहैकादेशउदात्तेनोदात्तः (पां ८ । २ । ५) इति पृतन्यच्छब्दोऽन्तोदात्तः, शसः सुप्स्वरेणानुदात्तस्यान्तोदात्तादित्यनुवृत्तौ, शतुरनुमो नद्यजादी (पां ६ । १ । १७३) इत्यनुदात्तत्वं ॥४॥

पञ्चमीमृचमाह, महाँ इन्द्र इति । अयमिन्द्रो महान् शरीरेण प्रौढः, परश्च गुणैरुत्कृष्टोऽपि, नु किञ्च वज्रिणे वज्रयुक्तायेन्द्राय, महित्वमुक्तं द्विविधमाधिक्यं सर्वदास्तु, स्वभावसिद्धस्यापि भक्त्या प्रार्थनमेतत्, किञ्च द्यौर्न द्युलोक इव शवो बलमिन्द्रस्य सेनारूपं प्रथिना प्रथिम्ना पृथुत्वेन युज्यतामिति शेषः, यथा द्युलोकः प्रभूतः, एवमस्य सेना प्रभूता । नु शब्दो यद्यपि क्षिप्रनामसु नु मक्ष्विति पठितं, तथाप्यत्र * तस्यार्थाभावान्निपातत्वेनानेकार्थत्वसम्भावाच्च समुच्चयार्थोऽत्र गृहीतः । नेति शब्दो लोके प्रतिषेधार्थ एव, स्वाध्याये तु प्रतिषेधार्थ उपमानार्थश्चेति द्विविधो येन पदेनान्वीयते, तस्मात् पूर्व्वं प्रयुज्यमानः प्रतिषेधार्थः, उपरिष्टात् प्रयुज्यमान उपमानार्थः । तथात्र यास्क उदाहरति, उभयमन्वध्यायं नेन्द्रं देवममंसतेति प्रतिषेधार्थीयः, पुरस्तादुपचारस्तस्य यत्प्रतिषेधति, दुर्म्मदासोनसुरायामित्युपमार्थीयः, उपरिष्टादुपचारस्तस्य येनोपमिमीत इति । अत्रोपमावाचिनो द्युशब्दस्यापि

---

* तस्यान्वयाभावादिति कां, सं ।

१ ६ १ समोहे वा य आशत नरस्तोकस्य सनितौ ।
विप्रासो वा धियायवः ॥

प्रयुक्तत्वादुपमानार्थः स्वीकृतः । अष्टाविंशतिसङ्ख्यकेषु बलनामसु ओजः पाजः शव इति पठितं । महानिति नकारस्य संहितायां, दीर्घादटिसमानपादे ( पां ८ । ३ । ९ । ) इति रुत्वं, आतेऽटि नित्यं ( पां ८ । ३ । ३ । ) इति पूर्व्वस्याकारस्यानुनासिकः, भो भगो अघोअपूर्वस्य योऽशि ( पां ८ । ३ । १७ । ) इति रोर्यकारः तस्य लोपस्तस्यासिद्धत्वात् स्वरसन्धिर्न भवति । महेरित्यौणादिक इन्, महेर्भावो महित्वं, त्वइति प्रत्ययस्वरेणोदात्तः, स एव शिष्यते । वज्रिणे, इकारः प्रत्ययस्वरेणोदात्तः । द्योशब्दः प्रातिपदिकस्वरेणान्तोदात्तः, गोतोणित् ( पां ७ । १ । ९० । ) इति विभक्तेर्णित्त्वात्, अचोञ्णिति ( पां ७ । २ । ११५ । ) इति वृद्धिः आन्तरतम्यादुवङ्नैव भवति । प्रथिना प्रथिम्ना, पृथोर्भाव इत्यर्थे, पृथ्वादिभ्य इमनिज्वा ( पां ५ । १ । १२२ । ) इति इमनिच्, रऋतोहलादेर्लघोः ( पां ६ । ४ । १६१ । ) इति ऋकारस्य रभावः, तुरिष्ठेमेयः सु ( पां ६ । ४ । १५४ । ) इत्यनुवृत्तौ, टेः ( पां ६ । ४ । १५५ । ) इति टिलोपः, प्रथिमन्शब्दश्चित्त्वादन्तोदात्तस्तृतीयैकवचने भत्वात्, अल्लोपोऽनः ( पां ६ । ४ । १३४ । ) इत्यकारलोपश्छान्दसो मकारलोपः, अनुदात्तस्य च यत्रोदात्तलोपः ( पां ६ । १ । १६१ । ) इति विभक्तेरुदात्तत्वं । शवः, नब्विषयस्यानिसन्तस्येत्याद्युदात्तत्वं ॥ ५ ॥ इति प्रथमस्य प्रथमे पञ्चदशो वर्गः ॥

एन्द्रसानसिमिति सूक्ते षष्ठीमृचमाह समोहे वा य इति । ये नरः पुरुषाः समोहे सङ्ग्रामे तोकस्य अपत्यस्य सनितौ लाभे आशत व्याप्तवन्तः, इन्द्रस्तुत्येति शेषः । वा अथवा, विप्रासो मेधाविनो धियायवः प्रज्ञाकामाः सन्त आशत, ते सर्वे लभन्त इत्यध्याहारः । रण इत्यादिषु षट्चत्वारिंशत्सङ्ग्रामनामसु समोहे समिथ इति पठितं । पञ्चदशपस्वत्यनामसु तुक तोक इति पठितं । समोहे, प्रातिपदिकान्तोदात्तत्वं । वा, चादयोऽनुदात्ताः । आशत, अशू व्याप्तौ, छान्दसः सेर्लोपः, अडागम उदात्तः, सति शिष्टत्वेन स एव शिष्यते । नरः, प्रातिपदिकस्वरः । सनितौ, स्त्रियां क्तिन् ( पां ३ । ३ । ९४ ) इतिक्तिन्, तितुत्रेष्वग्रहादीनामिति वचनान्निगृहीतिर्निपचितिरितिवदिडागमः । विप्रासः, ऋज्रेन्द्रेत्यादिना

१७१ यः कुक्षिः सोमपातमः समुद्र इव पिन्वते ।
उर्वीरापो न काकुदः ॥
१८१ एवा ह्यस्य सूनृता विरप्शी गोमती मही ।
पक्वा शाखा न दाशुषे ॥

विप्रशब्दो रन्प्रत्ययान्तो निपातितः । धियायवः, धिधारणे, धीयते धार्य्यते अवबुध्यते श्रुत*मर्थजातमनयेति धिया प्रज्ञा, तामात्मन इच्छन्तीत्यर्थे क्यच्, क्याच्छन्दसि (पां ३ । २ । १७० ।) इत्युप्रत्ययः, क्यतोलोपः, प्रत्ययस्वरेणान्तोदात्तः ॥ ६ ॥

सप्तमीमृचमाह, यः कुक्षिरिति । यः कुक्षिरस्येन्द्रस्योदरप्रदेशः सोमपातमः अतिशयेन सोमस्य पाता, स कुक्षिः समुद्र इव पिन्वते वर्द्धते, सेचनार्थो धातुरौचित्येन वृद्धिं लक्षयति, काकुदो मुखसम्बन्धिन्यउर्वीर्बहूव आपो न जलानीव, जिह्वासम्बन्धमास्योदकं यथा कदाचिदपि न शुष्यति, तथेन्द्रस्य कुक्षिः सोमपूरितो न शुष्यतीत्यर्थः। यद्यपि श्लोकश्लत्यादिषु सप्तपञ्चाशत्सु वाङ्नामसु काकुर्जिह्वेति पठितं, तथाप्युदकसम्बन्धसिद्ध्यर्थमत्र काकुशब्देन मुखमुपलक्ष्यते, सम्बन्धवाचिनस्तद्धितस्याच्छान्दसो लोपो द्रष्टव्यः । सोमपातमः, सोमं पिबतीति सोमपाः, आकारो धातुस्वरेणोदात्तः, कृदुत्तरपदप्रकृतिस्वरेण स एव शिष्यते, तमपः पित्त्वादनुदात्तत्वं । समुद्रः, प्रातिपदिकत्वादन्तोदात्तः, इवेन विभक्त्यलोपः, पूर्वपदप्रकृतिस्वरत्वं चेति प्रकृतिस्वरः। पिन्वते, पिविसेचने, इदितो नुम्धातोः (पां ७ । १ । ५८ ।) इति नुमागमः, शपः पित्त्वान्नानुदात्तत्वं, तिङश्च लसार्वधातुकस्वरेण धातुस्वर एव शिष्यते । उर्व्वीः, उरुशब्दोऽन्तोदात्तः, वोतोगुणवचनात् (पां ४ । १ । ४४ ।) इति ङीष्, यणादेशः, उदात्तयणोहल्पूर्वादितीकार उदात्तः, जसासह, एकादेश उदात्तेनोदात्त इत्येकादेश उदात्तः। आपः, प्रातिपदिकस्वरः । काकुदः, प्रातिपदिकस्वरेणान्तोदात्तः ॥ ७ ॥

अभिप्लवषडहगतेषूक्थेषु तृतीयसवने ब्राह्मणाच्छंसिन एवाह्यस्यसूनृतेत्यनुरूपस्तृचः, एतेषु ब्रवाणितइतिखण्डे अथ ब्राह्मणाच्छंसिन

---

* अज्ञातमिति कां, सं ।

इत्युपक्रम्य एवाह्यसि वीरयुरेवा ह्यस्य सूनृतेति सूचितं. तस्मिंस्तृचे प्रथमां सूक्तेऽष्टमीमृचमाह एवाह्यस्य सूनृतेति। अस्येन्द्रस्य सूनृता प्रियसत्यरूपा वाक्, दाशुषे हविर्दत्तवते यजमानाय तदर्थं एवा हि, एवं खलु, अनन्तरूपा वक्ष्यमाणगुणोपेता भवतीत्यर्थः। कीदृशी वाक्विरप्शी विविधारूपगोपेता वाक्ययुक्ता बहुविधोपचारवादिनीत्यर्थः। पुनः कीदृशी गोमती, बह्वीभिर्गोभिरुपेता गोप्रदेत्यर्थः, अतएव मही महती पूज्या। यथोक्तवाचो दृष्टान्तः, पक्वाशाखा न, यथा बहुभिः पक्वैः फलैरुपेता घनसत्त्वादिशाखा प्रीतिहेतुस्तद्वत्। यद्यपि महन्नामसु ब्रध्नं विरप्शीति पठितं, तथाप्यत्र महीत्यनेन पुनरुक्तिप्रसङ्गादवयवार्थो गृहीतः। एव, एवमादीनामन्त इत्युक्तोदात्तः, संहितायां, निपातस्य च (पां ६। ३। १३६) इति दीर्घः। हि, निपाता आद्युदात्ताः। अस्य, प्रकृतस्येन्द्रस्य परामर्शात्, इदमोऽन्वादेशेऽशित्यादिना अशादेशोऽनुदात्त इति सर्वानुदात्तः। सूनृता, ऊणपरिहाने, सुतरामूणयत्यप्रियमिति सून्, साचासौ ऋता सत्याचेति सूनृता प्रियसत्या वाक्, परादिश्छन्दसि बहुलमिति उकार उदात्तः। विरप्शी, विचित्रं रूपणं विरूपं, रूप लप व्यक्तायां वाचि, सम्पदादित्वाद्भावे क्विप्, तदेषामस्तीति विरप्शीनि वाक्यानि, तानि यस्यां वाचि सन्ति सा वाक् विरप्शी विरप्शिनी, अतइनिठनौ (पां ५। २। ११५) इति इनिः प्रत्ययः, यस्येतिचेतीकारलोपः, ऋन्नेभ्योङीबिति ङीप्, इकारः प्रत्ययस्वरेणोदात्तः, नकारलोपश्छान्दसः, सवर्णदीर्घः, एकादेश उदात्तेनोदात्तः। गावोऽस्यां सन्तीति गोमती, मतुप्ङीषौ पित्त्वादनुदात्तौ, प्रातिपदिकस्वर एव शिष्यते। मही महती, उगितश्च (पां ४। १। ६।) इति ङीप्, तस्य पित्त्वादनुदात्तत्वे प्राप्ते, शतुरनुमो नद्यजादीत्यत्र, बृहन्महतो रूपसङ्ख्यानमित्युदात्तत्वं, अच्छव्दलोपश्छान्दसः। पक्वा, डुपचष् पाके, निष्ठा (पां ३। २। १०२।) इति क्त प्रत्ययः, पचोवः (पां ८। ७। ५२।) इति वत्वं, चोः कुः (पां ८। २। ३०।) इति कुत्वं, प्रत्ययस्वरेणान्तोदात्तः, टापा सवर्णदीर्घे, एकादेशउदात्तेनोदात्त इत्युदात्तः। शाखा, शाङ् शाघृ व्याप्तौ, पचाद्यच्, चित्त्वादन्तोदात्ते प्राप्ते दृषादेराकृतिगणत्वाद्दृषादित्वादाद्युदात्तत्वं। दाशुषे, दाशृङ् दाने, दाश्वान् साह्वान् मीढ्वांश्चेति निपातनात् क्वसाविडभावो, द्विर्वचनाभावश्च। चतुर्थ्येकवचने, यचिभं (पां १। ४। १८।) इति भसञ्ज्ञायां, वसोः सम्प्रसारणं (पां ६। ४। १३१।) इति सम्प्रसारणं वकारस्योकारः,

१९। एवा हि ते विभूतय ऊतय इन्द्र मावते।
सद्यश्चित्सन्ति दाशुषे॥
११०। एवा ह्यस्य काम्या स्तोम उक्थं च शंस्या।
इन्द्राय सोमपीतये॥ १६॥

परपूर्व्वत्वं, शासि वसि घसीनाञ्च (८।३।६०।) इति षत्वं, प्रत्ययस्वरेणोकार-उदात्तः॥ ८॥

नवमीमृचमाह, एवा हि तइति। हे इन्द्र, ते तव विभूतय ऐश्वर्य्यविशेषाः एवा हि एवंविधाः खलु, किंविधा इति तदुच्यते, मावते मत्सदृशाय दाशुषे हविर्दत्तवते यजमानाय ऊतय स्त्वदीयरक्षारूपाः सद्यश्चित् सन्ति, विना कर्म्मानुष्ठानं तदैव भवन्ति। मावते, मत्सदृशाय, वतुप्प्रकरणे, युष्मदस्मद्भ्यां छन्दसि सादृश्य उपसङ्ख्यानमिति वार्त्तिकेनास्मच्छब्दाद्वतुप्, मपर्य्यन्तस्य, प्रत्ययोत्तरपदयोश्चेति मादेशः, अदस्शब्देन सह, अतो गुण इति पररूपत्वं, दृग्दृशवतुष्वित्यनुवृत्तौ, आसर्वनाम्नः (पां ६।३।९१।) इति दकारस्याकारः, सवर्णदीर्घत्वं, वतुपः पित्त्वात् प्रातिपदिकस्वरएव शिष्यते। सद्यः, समाने द्यवीत्यर्थे, सद्यः परुत् परायैशमइत्यादिना निपातितः, प्रत्ययस्वरेणान्तोदात्तत्वं। चित्, चादयोऽनुदात्ता इत्यनुदात्तः। सन्ति, अस भुवि, लटः स्थाने झि, झोऽन्तः (पां ७।१।३।) इत्यन्तादेशः, अदिप्रभृतिभ्यः शपइति शपोलुक्, तिङःप्रत्ययाद्युदात्तत्वं, प्रत्ययलोपे प्रत्ययलक्षणमिति शबकारमाश्रित्य लसार्वधातुकानुदात्तत्वं न भवति, वर्णाश्रयविधौ प्रत्ययलक्षणं नास्तीति निषेधात्। दाशुषे, गतमन्त्रे गतं॥ ९॥

दशमीमृचमाह, एवा ह्यस्य काम्या इति। अस्येन्द्रस्य स्तोमः सामसाध्यं स्तोत्रं, उक्थञ्च ऋक्साध्यं शस्त्रमपि एवा हि तेउभेऽत्रैवंविधे खलु, किं विध इति तदुच्यते, काम्या कामयितव्ये, शंस्या ऋत्विग्भिः शंसनीये, किमर्थं शंसनमिति तदुच्यते, इन्द्राय सोमपीतये, इन्द्रस्य सोमपानार्थं। एवा ह्यस्येति व्यवहितमन्त्रे गतं। काम्या, कमेर्णिङ्, तस्मादचोयत्, णेरनिटि (पां ६।४।५१।) इति णिलोपः, णित्स्वरितमिति स्वरिते प्राप्ते, यतोऽनाव इत्याद्युदात्तत्वं, सुपो डादेशः। स्तोमः, अर्त्तिस्तुसुहुसृधृक्ष्वीत्यादिना मन् प्रत्ययः। उक्थं, वच परि-

## नवमसूक्तं।

१११ इन्द्रेहि मत्स्यन्धसो विश्वेभिः सोमपर्वभिः।
महाँ अभिष्टिरोजसा॥

भाषणे, पातृतुदिवचिरिचिसिचिभ्य स्थगिति थक् प्रत्यय औणादिकः, कित्त्वात् सम्प्रसारणपरपूर्वत्वगुणाभावः। ष्टंस्या, ष्टंसु स्तुतौ, ण्यन्तादचोयत्, यतो ऽनाव इत्याद्युदात्तत्वं, सुपोडाशेशः। सोमपीतये, सोमस्य पीतिस्तदर्थं, क्रदुत्तरपदप्रकृतिस्वरे प्राप्ते व्यत्ययेनाद्युदात्तत्वं, अथवा सोमस्य पीतिर्यस्येन्द्रस्येति सोमपीतिरिन्द्रः, बहुव्रीहौ प्रकृत्या पूर्वपदमिति पूर्वपदप्रकृतिस्वरत्वं॥ १०॥ इति प्रथमस्य प्रथमे खोडशोवर्गः॥

इन्द्रेहीत्यादिकं दशर्चं, सुरूपकृत्नुमित्यादिषु षष्ठं, ऋष्यादयस्त्वस्य पूर्ववत्, विशेषस्तु अतिरात्रे द्वितीयपर्य्याये अच्छावाकशस्त्रे इन्द्रेहीत्यनुरूपस्तृचः, अतिरात्रे पर्य्यायाणामितिखण्डे इदं वसो सुतमन्धः इन्द्रेहि मत्स्यन्धस इति सूचितं, तस्मिन् सूक्ते प्रथमामृचमाह इन्द्रेहीति। हे इन्द्र, एहि अस्मिन्कर्म्मण्यागच्छ, आगत्य च विश्वेभिः सर्वैः सोमपर्वभिः सोमरसरूपैः, अन्धसः अन्धोभिरन्नैर्मत्सि माद्यसि हृष्टो भव, तथाभूतस्त्वमोजसा बलेन महान् भूत्वा अभिष्टिः, शत्रूणामभिभविता भवेतिशेषः। अष्टाविंशतिसङ्ख्यकेषु बलनामसु ओजपाज इति पठितं। आ इहि, आदृणः, इन्द्र एहि, योह्युभयोः स्थाने लभते असावन्यतरव्यपदेशमिति आङ्माङोरेकादेशस्याङ्व्यपदेशादेमाङश्चेति परूपं। मत्सि, मदी हर्षग्लेपनयोः, लोटः सिप्, सर्वे विधयश्छन्दसि विकल्प्यन्त इति परिभाषया सेर्हिरादेशो न भवति, दिवादिभ्यः श्यन्निति श्यन्, बहुलं छन्दसीति श्यनो लुक्, नलुमताङ्गस्य (पां १।१।६३।) इति प्रत्ययलक्षणप्रतिषेधात्, समानस्यानां दीर्घः श्यनि इतिसूत्रवार्त्तिकेनोपधादीर्घो न भवति, सिपः पित्त्वाद्धातुस्वर एव। अन्धसः, अदेर्नुमधस्येत्यसुन्, व्यत्ययेन तृतीयाबहुवचनं कर्त्तव्यं, नित्त्वादाद्युदात्तः। विश्वेभिः, अशिश्रुषीत्यादिना औणादिकः क्वन्, नित्त्वादाद्युदात्तत्वं, बहुलं छन्दसीति ऐसादेशो न भवति। सोमपर्वभिः, लतारूपं सोमं पृणन्ति पूरयन्तीति सोमपर्वाणः सोमरसाः, पॄ पालनपूरणयोः, अन्येभ्योऽपि दृश्यन्ते (पां ३।२।७५।) इति वनिप्, गुणोरपरत्वं, वनिपः पित्त्वाद्धातुस्वरएव, उपपदसमासे क्रदुत्तरपदप्रकृति-

१२१ एमेनं सृजता सुते मन्दिमिन्द्राय मन्दिने १
चक्रिं विश्वानि चक्रये ॥

स्वरेण पुनः स एव भवति। अभिष्टिरभिगन्ता, इषगतौ, मन्त्रेष्टषेत्यादिना क्तिन्नुदात्तः, स हि भावपरोऽपि भवितारं लक्षयति, क्तिच्क्तौ-घूपधगुणाभावः, तितुत्र त थ सि सुसरकसेषु च (पां ७। २। ९।) इतीडागमो न भवति, अभिशब्दस्येकारे, एमन्नादिषु छन्दसि पररूपं वक्तव्यमिति पररूपं, प्रादिसमासे छदुत्तरपदप्रकृतिस्वरत्वं। ओजसा, उर्ज्जेर्बलेर्बलोपश्चेत्यसुन्, नित्त्वादाद्युदात्तः ॥ १ ॥

द्वितीयामृचमाह एमेनमिति। ईम् इत्यनर्थकः पादपूरणाय प्रयुक्तः, हे अध्वर्यवः सुते अभिषुते चमसस्थे सोमे एनं सोममिन्द्राय इन्द्रार्थं आहृजत पुनरभ्युन्नयत। शुक्रामन्थिचमसगणेषु पुनरभ्युन्नयनमापस्तम्बेनोक्तं, होचकाणां चमसाध्वर्यवः सङ्कृत् सङ्कृत्वा शुक्रस्याभ्युन्नीयेत्यावर्त्तध्वमितीति। कीदृशमेनं मन्दिं हर्षहेतुं, चक्रिं साधुकरणशीलं। कीदृशायेन्द्राय मन्दिने हर्षयुक्ताय, पुनः कीदृशाय विश्वानि सर्वाणि कर्म्माणि चक्रये कृतवते सर्वकर्म्मनिष्पादनशीलायेत्यर्थः। ईमित्यस्य पादपूरणार्थत्वं यास्क आह, अथ ये प्रकृतेऽर्थेऽमिताक्षरेषु ग्रन्थेषु वाक्यपूरणा आगच्छन्ति पदपूरणास्ते मिताक्षरेष्वनर्थकाः कमीमिति। अस्यायमर्थः अन्यैरेव पदैर्विवक्षितेऽर्थे समाप्तेसति ये शब्दाः कमीमित्यादयः प्रयुक्तास्ते शब्दा अमिताक्षरेषु छन्दोराहित्येन परिमिताक्षररहितेषु ब्राह्मणादिवाक्येषु वाक्यपूरणार्था द्रष्टव्याः, मिताक्षरेषु तु छन्दोयुक्तेषु ग्रन्थेषु पादपूरणार्थास्ते च कमीमित्यादय इति। ईमित्यस्य शब्दस्यानर्थक्यायैतामृचमुदाजहार, एमेनं सृजता सुते आहृजतैनं सुत इति। एनं, इदमो द्वितीयायां, द्वितीयाटौस्वेनः (पां २। ४। ३४।) इति एनादेशोऽनुदात्त इत्यनुवृत्तेः सर्वानुदात्तः। सृजत, संहितायां, अन्येषामपि दृश्यते (पां ६। ३। १३७।) इति दीर्घः। मन्दिं, प्रमोदहेतुं, मदिस्तुतिमोदमदस्वप्नकान्तिगतिषु, इदितोनुम्धातोः (पां ७। १। ५८।) इति नुम्, मन्दमानं प्रयुक्तइत्यर्थे, हेतुमतिच (पां ३। १। २६।) इति णिच्, ण्यन्तस्याजन्तत्वात्, अचइतिण्वुलादिकइकारप्रत्ययः, णेरनिटि (पां ६। ४। ५१।) इति णिलोपः, प्रत्ययस्वरेणान्तोदात्तत्वं। मन्दिने, मदेः पूर्व-

१३१ मत्स्वा सुशिप्र मन्दिभिः स्तोमेभिर्विश्वचर्षणे १
सचैषु सवनेष्वा ॥
१४१ असृग्रमिन्द्र ते गिरः प्रति त्वामुदहासत १
अजोषा वृषभं पतिं ॥

वत् चतुर्थैकवचने अनपुंसकस्यापि व्यत्ययेन नुमागमः । चक्रिं, डुकृञ्करणे, आदृगमहनजनः किकिनौ लिट् च (पां ३ । २ । १७१ ।) इति तच्छील तद्धर्म तत्साधुकारिषु कर्तृषु किन्प्रत्ययः कित्त्वाद्गुणाभावः, यणादेशः, लिङ्वत्, द्विर्वचनं, द्विर्वचनेऽचि (पां १ । १ । ५९ ।) इति यणादेशस्य स्थानिवद्भावात् क्रञ्शब्दो द्विरुच्यते, अभ्यासस्य उरदत्वरपरत्वहलादिशेषाः, किनो नित्त्वादाद्युदात्तः । विश्वानि, विशेः क्वन्, नित्त्वादाद्युदात्तः । चक्रये, इत्यस्य क्रदन्ते प्रयोगेपि, कर्तृकर्मणोः कृति (पां २ । ३ । ६५ ।) इति षष्ठी न भवति, किं किनौ लिट्चेति किनो लिङ्वद्भावेन, न लोकाव्ययनिष्ठा खलर्थतृणां (पां २ । ३ । ६८ ।) इति निषेधात् ॥ २ ॥

तृतीयामृचमाह मत्स्वा सुशिप्रेति । हे सुशिप्र हे शोभनहनो, शोभननासिक वा, शिप्रे हनूनासिके चेति यास्केनोक्तत्वात्, तादृश हे इन्द्र, मन्दिभिर्हर्षहेतुभिः स्तोमेभिः स्तोमैः स्तोत्रैः, आ सर्वतोभावेन मत्स्व हृष्टो भव, हे विश्वचर्षणे सर्वमनुष्ययुक्त, सर्वैर्यजमानैः पूज्येत्यर्थः, तादृशेन्द्र त्वं एषु यागगतेषु त्रिषु सवनेषु सत्त्वात्, देवैरन्यैः सहागच्छेतिशेषः । मत्स्व, मदिस्तुतीत्यस्य लोटि, अनित्यमागमशासनमित्युक्तत्वात्, इदितो नुमधातोरिति नुम् न भवति, अनुदात्तेत्त्वात्, तास्यनुदात्तेन्ङिददुपदेशात् (पां ६ । १ । १८९ ।) इति लसार्वधातुकाद्युदात्तत्वं, धातुस्वर एव, संहितायां, ह्यचोऽतस्तिङः (पां ६ । ३ । १३५ ।) इति दीर्घत्वं । सुशिप्र, इत्यामन्त्रितनिघातः । मन्दिभिः, गतमन्त्रे व्याख्यातं । स्तोमेभिः, मन् प्रत्ययस्य नित्त्वादाद्युदात्तत्वं, बहुलं छन्दसीति भिसऐसादेशो न भवति । विश्वचर्षणे, निघातः स च उक्तः । एषु, ऊडिदमित्यादिना विभक्तेरुदात्तत्वं ॥ ३ ॥

चतुर्थीमृचमाह असृग्रमिन्द्रेति । हे इन्द्र, ते गिरस्त्वदीयाः स्तुतीरहयं सृष्टवानस्मि, ताश्च गिरः स्वर्गेऽवस्थितं त्वां प्रति उदहासत

१५१ सञ्चोदय चित्रमर्वाग्राध इन्द्र वरेण्यं १
असदित्ते विभु प्रभु ॥ १७ ॥

उदूत्य प्राप्नुवन्, तादृशीर्गिरस्त्वं अजोषा सेवितवानसि । कीदृशं त्वां वृषभं, कामानां वर्षितारं । पुनः कीदृशं पतिं सोमस्य पातारं, यजमानानां पालयितारं वा, पाता वा पालयिता वेति यास्केनोक्तत्वात् । अस्रग्रं, अस्रजं, सृज विसर्गे, लङो मिप्, तुदादिभ्यः शः, बहुलं छन्दसीति, अच विकरणस्य सडागमः, जकारस्य गकारः, लुङ् लङ् लृङ्क्ष्वडुदात्तः ( पां ६ । ४ । ७१ ।) इत्यडागम उदात्तः, सतिशिष्टत्वात् स एव शिष्यते । गिरः, प्रातिपदिकस्वरः । अद्दासत, ओहाङ्गतौ, लुङ्, झस्य अदादेशः, च्लेः, सिच्, अडागमो, निघातश्च । अजोषाः, जुषी प्रीतिसेवनयोः, लङस्यास्, तुदादिभ्यः शः, तस्य छन्दस्युभयथेति आर्द्धधातुकत्वेन ङित्वाभावाल्लघूपधगुणः, यासस्थकारलोपश्छान्दसः, सवर्णदीर्घः, अडागमः, सतिशिष्टत्वादुदात्तः शिष्यते । वृषभं, एषु वृषु सेचने, अभजित्यनुवृत्तौ, कृषि वृषिभ्यां किदित्यभच्प्रत्ययः, कित्त्वादगुणाभावः, चित्त्वादन्तोदात्तः । पतिं, पारक्षणे, पातेर्डतिः, ङित्वाट्टिलोपः, प्रत्ययाद्युदात्तत्वं ॥ ४ ॥

पञ्चमीमृचमाह सञ्चोदयेति । हे इन्द्र, वरेण्यं श्रेष्ठं राधो धनं चित्रं मणिमुक्तादिरूपेण बहुविधं अर्वागस्मदभिमुखं यथा भवति तथा सञ्चोदय सम्यक् प्रेरय, भोगाय यावत् पर्याप्तं तावद्विभुशब्देन चोच्यते, ततोऽभ्यधिकं प्रभुशब्देन, तादृशं धनं ते तवैव असदित् अस्त्येव, तस्मादस्मभ्यं प्रयच्छेत्यर्थः । मघमित्यादिषु अष्टाविंशतिसङ्ख्यकेषु धननामसु रायेराध इति पठितं । चोदय, चुदप्रेरणे, ण्यन्ताल्लोट्, तिङुतिङ इति निघातः । राधः, राध्नुवन्त्यनेनेति राधो धनं, सर्वधातुभ्योऽसुन्, इत्यादिकोऽसुन्प्रत्ययः नित्वादाद्युदात्तः । वरेण्यं, वृञ एण्य इत्यौणादिकएण्यप्रत्ययः, वृषादित्वादाद्युदात्तः । असत्, अस भुवि, लेट्, तिप्, इतश्च लोपः परस्मैपदेषु ( पां ३ । ४ । ९७ । ) इतीकारलोपः, लेटोऽडाटावित्यडागमः, अदिप्रभृतिभ्यः शपः ( पां २ । ४ । ७२ । ) इति शपोलुक्, आगमा अनुदात्ता इति, अटोऽनुदात्तत्वाद्धातुस्वर एव । विभु, विभवतीति विभु, भुव इत्यनुवृत्तौ, विप्रसंभ्योर्डसञ्ज्ञायां ( पां ३ । २ । १८० । ) इति डुप्रत्ययः, ङित्वाट्टिलोपः, प्रत्ययस्वरेणोकार उदात्तः । एवं प्रभु, ॥ ५ ॥

इति प्रथमस्य प्रथमे सप्तदशो वर्गः ॥

१ ६ १ अस्मान्त्सु तत्र चोदयेन्द्र राये रभस्वतः १
तुविद्युम्न यशस्वतः ॥
१ ७ १ सं गोमदिन्द्र वाजवदस्मे पृथु श्रवो बृहत् १
विश्वायुर्धेह्यक्षितं ॥

इन्द्रेहीति सूक्ते षष्ठीमृचमाह अस्मान्त्सुेति। हे तुविद्युम्न प्रभूतधनेन्द्र, राये धनसिद्ध्यर्थं अस्माननुष्ठातॄन् तत्र कर्म्मणि सुचोदय सुष्ठु प्रेरय। कीदृशानस्मान् रभस्वतः, उद्योगवतः। पुनः कीदृशान्, यशस्वतः, कीर्त्तिमतः। तत्र, तच्छब्दात् सप्तम्यास्वल्, लिति (पां ६।१।१९३।) इतिप्रत्ययात् पूर्वस्योदात्तत्वं। इन्द्र, आमन्त्रिताद्युदात्तत्वं, पादादित्वान्न निघातः। राये, ऊडिदमित्यादिना विभक्तेरुदात्तत्वं। रभस्वतः, रभ राभस्ये कार्य्योपक्रमे च, सर्वधातुभ्योऽसुन्, नित्त्वादाद्युदात्तः, मतुपः पित्त्वादनुदात्तत्वं, स्वादिष्वसर्वनामस्थाने (पां १।४।१७।) इति न पदत्वं, तसौ मत्वर्थे (पां १।४।१९।) इति भसञ्ज्ञया बाधितत्वात्, ञ्नित्यादिर्नित्यं (पां १।४।१।) इति नियमात्। तुविद्युम्न, तुवि बञ्ज द्युम्नं धनं यस्य, षाष्ठिक मामन्त्रिताद्युदात्तत्वं। यशस्वतः, यशोऽस्यास्तीति मतुप्, अस्मायामेधास्रजो विनिः (पां ५।२।१२१।) इति विनिना न बाध्यते, मतुपः सर्वत्र समुच्चयात् यशस्शब्दो नविषयस्यानिसन्तस्येत्याद्युदात्तः, मतुपः पित्त्वात् स एव शिष्यते। अचोक्तास्मान्त्सु इति पाठविशेषः, केवलं नश्च (पां ८।३।३०।) इति वैकल्पिको धुडागमः, तेनास्मान्सु अस्मान्त्सुइत्युभयमपि भवितुमर्हति ॥ ६ ॥

सप्तमीमृचमाह सं गोमदिन्द्रेति। हे इन्द्र, श्रवो धनं अस्मे सन्धेहि अस्मभ्यं सम्यक् प्रयच्छ। कीदृशं श्रवः, गोमत्, बञ्जीभिर्गोभिरुपेतं। पुनः कीदृशं वाजवत्, प्रभूतेनान्नेनोपेतं। पुनः कीदृशं पृथु, परिमाणेनाधिकं। पुनरपि कीदृशं बृहत्, गुणैरुपेतं। पुनश्च कीदृशं विश्वायुः, छत्स्वायुष्यकारणं। पुनरपि कीदृशं अक्षितं, विनाशरहितं। गोमत्, वाजवदित्युभयत्र मतुपोऽनुदात्तत्वात् प्रातिपदिकस्वर एव, वाजशब्दो हलादिराद्युदात्तः। अस्मे, अस्मच्छब्दाच्चतुर्थीबञ्जवचनस्य, सुपांसुलुगित्यादिना ङे आदेशः, ङित्त्वात् सर्वादेशः प्रातिपदि

१ ८ १ अस्मे धेहि श्रवो बृहद्द्युम्नं सहस्रसातमं १
इन्द्र ता रथिनीरिषः ॥

कस्वरेणान्तोदात्तत्वं, शेषे लोपः (पां ७।२।९०) इतिटिलोपपक्षे उदात्तत्वनिवृत्तिस्वरेण विभक्तेरुदात्तत्वं, अन्त्यलोपपक्षे अतोगुण इति पररूपे, एकादेश उदात्तेनोदात्तः (पां ८।२।५) इत्युदात्तत्वं। पृथु, प्रथख्यापने, प्रथि म्रदि भ्रस्जां सम्प्रसारणं सलोपश्चेत्यौणादिकः कुप्रत्ययः, रेफस्य सम्प्रसारणमृकारः, परपूर्वत्वं, न लघूपधगुणः। श्रूयत इति श्रवो धनं, असुन्प्रत्ययः, नित्त्वादाद्युदात्तः। बृहत्, प्रातिपदिकस्वरः। विश्वायुः, विश्वमायुर्यस्मिन् धने, विश्वशब्दः क्वन् प्रत्ययान्तः, तस्य बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वे प्राप्ते, परादिश्छन्दसि बहुलं (पां ६।२।१९९) इति पूर्वपदान्तोदात्तत्वं, एकादेश उदात्तेनोदात्त इत्युदात्तः। अक्षितं, क्षिक्षयइत्यस्मात्, अन्तर्भवितण्यर्थात् कर्म्मणि निष्ठा, तेन ण्यदर्थत्वात्, निष्ठायामण्यदर्थे (पां ६।४।६०।) इति न दीर्घत्वं, अतएव, क्षियो दीर्घात् (पां ८।२।४६।) इति न निष्ठानत्वं, नञ्समासे पूर्वदपदप्रकृतिस्वरत्वं ॥ ७ ॥

अष्टमीमृचमाह, अस्मे धेहीति। हे इन्द्र, बृहच्छ्रवः महतीं कीर्त्तिं अस्मे धेहि अस्मभ्यं प्रयच्छ, तथा सहस्रसातमं अतिशयेन सहस्रसङ्ख्यावद्गुणोपेतं द्युम्नं धनमस्मे धेहि, तथा ताः, व्रीहियवादिरूपेण प्रसिद्धा रथिनीर्वरूथोपेता इषोऽन्नान्यस्मे धेहि। अस्मे, सुपांसुलुगित्यादिना शे आदेशः। धेहि, घ्वसोरेद्धावभ्यासलोपश्च (पां ६।४।११९।) इति एत्वाभ्यासलोपौ। श्रूयत इति श्रवः, असुनो नित्त्वादाद्युदात्तत्वं। सहस्रसातमं, सहस्रं षनुते ददातीति सहस्रसाः, षणुदाने, जन सन खन क्रम गमोविट् (पां ३।२।६७।) इति विट्, विड्वनोरनुनासिकस्यात् (पां ६।४।४१।) इत्याकारादेशः, धातुस्वरेणान्तोदात्तः, पुनः कृदुत्तरपदप्रकृतिस्वरेण स एव शिष्यते। रथा आसां सन्तीति रथिन्य इति, प्रत्ययस्याद्युदात्तत्वं, ऋन्नेभ्योङीप् (पां ४।१।५।) इति ङीप्, तस्य पित्त्वादनुदात्तत्वं। इषो यौगिकत्वे, धातुस्वररूढत्वे प्रातिपदिकस्वरः ॥ ८ ॥

१ ६ १ वसोरिन्द्रं वसुपतिं गीर्भिर्गृणन्त ऋग्मियं १
होम गन्तारमूतये ॥
१ १० १ सुते सुते न्योकसे बृहद्बृहत एदरिः १
इन्द्राय शूषमर्चति ॥ १८ ॥

नवमीमृचमाह वसोरिन्द्रमिति । वसोर्वसुनोऽस्मदीयस्य धनस्योतये रक्षार्थं होम वयमाक्रयामः, किं कुर्वन्तः, गीर्भिस्तुतिभिर्गृणन्तः स्तुवन्तः । कीदृशमिन्द्रं वसुपतिं धनपालकं । पुनः कीदृशं ऋग्मियं ऋचां मातारं । पुनश्च कीदृशं गन्तारं यागदेशगमनशीलं । वसोः, वस निवासे, श्वसु स्रंसीत्यादिना औणादिक उप्रत्ययः, निदित्यनुवृत्तेर्नित्त्वादाद्युदात्तः। वसुपतिं, समासान्तोदात्तत्वे प्राप्ते, पत्यावैश्वर्ये (पां ६।२।१८) इति पूर्वपदप्रकृतिस्वरत्वं । गीर्भिः, सावेकाच इति विभक्तेरुदात्तत्वं । गृणन्तः, गृशब्दे, लटः शतृ, क्र्यादिभ्यः श्ना ( पां ३ । १ । ८१ । ) इति श्ना, शतुः, सार्वधातुकमपित् ( पां १ । २ । ४ । ) इति ङित्त्वात्, आभ्यस्तयोरातः ( पां ६ । ४ । ११२ । ) इत्याकारलोपः, शतुरुकारस्य प्रत्ययस्वरेणोदात्तत्वं । ऋग्मियं, ऋचो मिमीत इति ऋग्मी तमृग्मियं, माङ्माने शब्दे च, क्विप् च ( पां । ३ । २ । ७६ । ) इति क्विप्, घुमास्थागापा (पां ६ । ४ । ६६ ।) इत्यादिना ईत्वं, चकारस्य, चोः कुः, (पां ८।२ । ३०) इतिकुत्वं, झलाञ्जशोऽन्ते (पां ८ । २ । ३९ ।) इति ककारस्य गकारः, द्वितीयैकवचने, अचिश्नुधातु ( पां ६ । ४ । ७७ । ) इत्यादिना इयङादेशः, एरनेकाचः ( पां ६ । ४ । ८२ । ) इत्यादिना यणादेशः, सर्वे विधयश्छन्दसि विकल्प्यन्त इति परिभाषया छदुत्तरपदप्रकृतिस्वरेण ईकार उदात्तः । होम, आङ्पूर्वस्य क्रेञस्पर्द्धायां शब्दे च, लट्, तस्यात्मनेपदेऽपि व्यत्ययेन मिप्, इकारस्य व्यत्ययेनाकारः, शपो बहुलं छन्दसीति लुक्, बहुलं छन्दसीति कः सम्प्रसारणं परपूर्वत्वं, गुणः, धातोः ( पां ६ । १ । १६२ । ) इत्योकार उदात्तः, मिपः पित्स्वरेणानुदात्तत्वं । गन्तारं, गस्लृ स्रृगतौ, ताच्छील्येटन्, नित्त्वादाद्युदात्तः । ऊतये, ऊति यूतीत्यादिना क्तिन्नुदात्तो निपातितः ॥ ९ ॥

दशमीमृचमाह सुते सुत इति । आकारश्चशब्दश्च पादपूरणौ, यद्वा व्याप्तिवचने आकारः आ ईषदर्थेऽभिव्याप्तावित्यभिधानात्,

## दशमसूक्तं ।

१ १ १ गायन्ति त्वा गायत्रिणोऽर्चन्त्यर्कमर्किणः १
ब्रह्माणस्त्वा शतक्रत उद्वंशमिव येमिरे ॥

इच्छब्दोऽपि शब्दार्थः, इयर्त्ति गच्छति, अनुष्ठेयं कर्म्म प्राप्नोतीत्यरिर्यजमानः एदरिः, सर्वोऽपि यजमानः इन्द्राय सुते सुते इन्द्रार्थमभिषुते तत्तत्सोमे बृहत इन्द्रस्य शूषं बलं अर्चति स्तौति, इन्द्रस्य पराक्रमं शंसतीत्यर्थः । कीदृशं शूषं बृहत् प्रौढं । कीदृशायेन्द्राय न्योकसे, नियतस्थानाय, बृहते प्रौढाय । सुते सुते, षु ञ् अभिषवे क्तप्रत्ययः प्रत्ययस्वरेणोदात्तः, नित्यवीप्सयोः ( पां ८ । १ । ४ । इति वीप्सायां द्विर्भावः, तस्य परमाम्रेडितं ( पां ८ । १ । २ । ) इति द्वितीयस्याम्रेडितत्वेनानुदात्तत्वं । न्योकसे, नियतमोकोयस्य तस्मै, निशब्दो नियाता आद्युदात्ता इत्याद्युदात्तः, तस्य यणादेशे, उदात्तस्वरितयोर्यणः स्वरितोऽनुदात्तस्य (पां । ८ । १ । ४ । ) इत्योकारः स्वरितः । बृहते, बृहन्महतोरुपसङ्ख्यानमिति वार्तिकेनाजादिविभक्तेरुदात्तत्वं । अर्किः, ऋगतौ, अर्चइरितीकारप्रत्यय वैयादिक, गुणो रपरत्वं, प्रत्ययस्वरेणेकार उदात्तः । इन्द्राय ऋच्चेन्द्रेत्यादिना रन्प्रत्ययः, इकारउदात्तः शूषं । प्रातिपदिकस्वरः, अष्टाविंशतिसङ्ख्यकेषु बलनामसु शूषं सहः यह इति पठितं । अर्चति निघातस्वरः ॥ १० ॥ इति प्रथमस्य प्रथमेऽष्टादशो वर्गः ॥

गायन्तीति सूक्तस्य मन्त्रसङ्ख्याछन्दोविशेषश्चैवमनुक्रम्यते, गायन्ति द्वादशानुष्टुभं त्रिति । तु हि ह वा इत्यादिपरिभाषायां तुशब्दस्य सूक्तद्वये परिभाषितत्वात्, अस्य सूक्तस्य वक्ष्यमाणस्य चानुष्टुभत्वं द्रष्टव्यं ऋषिदेवते पूर्ववत्, अभिप्लवषडहस्योक्थेषु तृतीयसवनेऽच्छावाकस्य गायन्तीति स्तोत्रियस्तृचः । एकुष्विति खण्डे गायन्ति त्वा गायत्रिण आत्वा गिरो रथीरिवेति सूचितं, अस्मिंस्तृचे प्रथमामृचमाह गायन्ति त्वेति । हे शतक्रतो बहुकर्म्मन् बहुप्रज्ञ वेन्द्र, त्वां गायत्रिण उद्गातारो गायन्ति स्तुवन्ति, अर्किणोऽर्चनहेतुमन्त्रयुक्ता होतारोऽर्कमर्चनीयमिन्द्रमर्चन्ति प्रशस्तैर्मन्त्रैः प्रशंसन्ति, ब्रह्माणो ब्रह्मप्रभृतय इतरे ब्राह्मणास्त्वामुद्येमिरे उन्नतिं प्रापयन्ति, तत्र दृष्टान्तः वंशमिव यथा वंशाग्रे नृत्यन्तः शिल्पिनः प्रौढं वंशमुन्नतं कुर्वन्ति, यथा वा

१ २ १ यत्सानोः सानुमारुहद्भूर्यस्पष्ट कर्त्वं १
तदिन्द्रो अर्थं चेतति यूथेन वृष्णिरेजति ॥

सन्मार्गवर्त्तिनः स्वकीयं कुलं उन्नतं कुर्वन्ति तद्वत्, एतामृचं याज्ञ एवं व्याचष्टे, गायन्ति त्वा गायत्रिणः प्रावर्त्तिते* ऽर्कमर्किणो, ब्रह्माणस्त्वा शतक्रत उद्येमिरे वंशमिव वंशोवनशूयो भवति, वननाच्छूयत इति वेति । अर्कशब्दं बहुधा व्याचष्टे, अर्को देवो भवति यदेनमर्चन्ति, अर्को मन्त्रो भवति यदनेनार्चन्ति, अर्कमन्नं भवति यदर्चति भूतानि, अर्को वृक्षो भवति सहतः कटुकिन्नेति । गायन्ति, शृण्वतिङौ, पित्त्वाल्लसार्वधातुकत्वाच्चानुदात्तौ, धातुरुदात्तः । गायत्रिणः, गायत्रं साम येषांस्तोतृणामस्ति ते, अत इनिठनौ ( पां ५ । २ । ११५ । ) इतीनि प्रत्ययः प्रत्ययस्वरेणेकारउदात्तः । अर्चन्ति, अर्चपूजायां भौवादिकः शृण्वतिङावनुदात्तौ धातुस्वर एव पादादित्वान्न निघातः । अर्कं, अर्चत्येभिरित्यर्का मन्त्रास्तैरर्चनीयतया तदात्मक इन्द्रोऽपि लक्षणयार्कः, पुंसि संज्ञायां घः प्रायेण (पां ३ । ३ । ११८ ।) इति करणे घः, चजोः कुघिण्यतोः ( पां ७ । ३ । ५२ ) इति चकारस्य कुत्वं, ककारः प्रत्ययस्वरेणान्तोदात्तः । अर्का मन्त्रा एषां सन्तीत्यर्किणो ह्येतारः । एकाच्चरात् क्षतो जातेः सप्तम्याश्च न तौ स्तृताविति कारिकार्धेन क्षदन्तादिनिठनौ यद्यपि प्रसिद्धौ, तथाप्यत्र व्यत्ययादिनिः, प्रत्ययस्वरेणेकारउदात्तः । ब्रह्माणः, प्रातिपदिकस्वरेणान्तोदात्तः । शतक्रतो, निघातः । संहितायामवादेशे, लोपः शाकल्यस्येति वकारलोपः । वंशशब्दः प्रातिपदिकस्वरेणान्तोदात्तः । इवेन विभक्त्यलोपः पूर्वपदप्रकृतिस्वरत्वं चेति वार्तिकेन स एव शिष्यते । येमिरे, यमुपरमे, तिङ्ङतिङः (पां ८ । १ । २८ ।) इति निघातः ॥ १ ॥

द्वितीयामृचमाह यत्सानोरिति । यदा यदा सानोः सानुमारुहत् यजमानः सोमवल्ली समिदाद्याहरणाय एकस्मात् पर्वतभागादपरपर्वतमारूढवान्, तथा भूरि प्रभूतं कर्त्वं कर्म सोमयागरूपं अस्पष्ट स्पृष्टवान् उपक्रान्तवानित्यर्थः, तत्तदानीमिन्द्रः अर्थं यजमानस्य प्रयोजनं चेतति जानाति, ज्ञात्वा च कामानां वर्षिता सन् यूथेन मरुद्गणेन

* प्रार्चन्ति का., सं ।

१३१ युङ्क्ष्वा हि केशिना हरी वृषणा कक्ष्यप्रा ।
अथा न इन्द्र सोमपा गिरामुपश्रुतिं चर ॥

सह एजति कम्पते, स्वस्थानाद्यच्चभूमिमागन्तुमुद्युङ्क्ते इत्यर्थः। सानोः, षणुदाने, सनोति ददाति निवसतामवकाशमिति सानुः, इ सनि जनि चरि चटि वहिभ्यो जुण्, णित्त्वादुपधायावृद्धिः णित्त्वादाद्युदात्तश्च। आरुहत्, रुहेर्लङि तिपि शपि सञ्ज्ञापूर्वको विधिरनित्य इति परिभाषया लघूपधगुणो न भवति, लुङ् लङ् लङ्क्वडुदात्तः, सति शिष्टत्वात् स एव शिष्यते, निपातैर्यद्यदिहन्त (पां ८।१।३०) इति निपातयुक्तस्य तिङोऽनुदात्तत्वनिषेधात् निघातो न भवति। भूरि, अदिशदिभूभ्यः क्विन्, क्वित्त्वादुणाभावः, नित्त्वादाद्युदात्तः। अस्पृक्, स्पृशस्पर्शनोपक्रमयोः, स्वरितञितः (पां १।३।७२) इत्यात्मनेपदं, लङः प्रथमपुरुषैकवचनं, त, बहुलं छन्दसीति शपोलुक्, व्रश्चादित्वात्सस्यषत्वकुत्वे, लुङ् लङ् लङ्क्वडुदात्तः (पां ६।४।७१) इत्यडागम उदात्तः स एव शिष्यते, अनुषङ्गेण यच्छब्दयोगान्निघाताभावः। कर्त्वं, डुकृञ्करणे, अन्येभ्योऽपि दृश्यते (पां ३।२।१७८) इति क्विप्, गुणोरपरत्वं, क्विपः सर्वापहारी लोपः, करोभावः कर्त्वं व्यत्ययेनाद्युदात्तत्वं * कृत्यार्थेत्वनक्। अर्थं, अर्त्तेः उषिकुषिगर्त्तिभ्यस्थन्, नित्त्वादाद्युदात्तः। यूथेन, तिथपृष्ठगूथयूथप्रोथा इति थक् प्रत्ययान्तो निपातितः। दृष्णिः, निरित्यनुवृत्तौ, स्पृशिदृषिभ्यां किदिति निप्रत्ययान्तः, क्वित्त्वादुणाभावः प्रत्ययस्वरेणान्तोदात्तः। एजति, एजृकम्पने, तिङु तिङ इति निघातः॥ २॥

तृतीयामृचमाह युङ्क्ष्वा हि केशिनेति। हे सोमपा सोमपानयुक्तेन्द्र, हरी, त्वदीयाश्वौ युङ्क्ष्वाहि, सर्वथा संयोजय, अथानन्तरं नोऽस्मदीयानां गिरां स्तुतीनां उपश्रुतिं समीपे श्रवणमुद्दिश्य चर तत्प्रदेशं गच्छ। कीदृशौ हरी, केशिना स्कन्धप्रदेशे लम्बमानकेशयुक्तौ। पुनः कीदृशौ, वृषणा सेचनसमर्थौ युवानौ। पुनरपि कीदृशौ, कक्ष्यप्रा अश्वस्योदरबन्धनरज्जुः कक्षा, तत्रभवः कक्ष्यस्तस्य पूरकौ पुष्टाङ्गाविति यावत्। युङ्क्ष्व, असोलोपश्छान्दसः, सतिशिष्टत्वेन प्रत्ययस्वरः शिष्यते।

---

* कृत्यार्थेत्वनक् इति कां स नास्ति।

१४१ एहि स्तोमाँ अभिस्वराभिगृणीह्यारुव ।
ब्रह्म च नो वसो सचेन्द्र यज्ञं च वर्धय ॥

द्व्यचोऽतस्तिङः ( पां ६ । ३ । १३५ । ) इति संहितायां दीर्घत्वं । केशिना, प्रशस्ताः केशा अनयोः सन्तीति मत्वर्थीय इनि प्रत्ययः, प्रत्ययस्वरः, सुपांसुलुगित्यादिना द्विवचनस्याकारादेशः । वृषणा, एषु वृषु मृषु सेचने, कनिन्यु वृषि तक्षि राजि धन्वि द्यु प्रति दिव इति कनिन्प्रत्ययः, ञ्नित्यादिर्नित्यं ( पां ६ । १ । १९७ ) इति नित्त्वादाद्युदात्तः, वा सपूर्वस्य निगमे ( पां ६ । ४ । ९ । ) इति उपाधायाः पक्षे दीर्घाभावः, पूर्ववदाकारः । कक्ष्यप्रा, कक्षयोर्भवं कक्ष्यं सूत्रं, तत्प्रातः पूरयतः पुष्टत्वादिति कक्ष्यप्रा, प्रापूरणे, आतोऽनुपसर्गे कः (पां ३ । २ । ३) इति कप्रत्ययः कृदुत्तरपदप्रकृतिस्वरेणान्तोदात्तत्वं, आकारः पूर्ववत् । अथ, निपातस्य च ( पां ६ । ३ । १३६ । ) इति संहितायां दीर्घः । नः, अनुदात्तं सर्वमपादादौ ( पां ८ । १ । १८ । ) इत्यनुवृत्तौ, बहुवचनस्य वस् नसौ ( पां ८ । १ । २१ । ) इति नसादेशोऽनुदात्तः । इन्द्र, सोमपा, उभौ आमन्त्रितस्य चेति सर्वानुदात्तौ । गिरां, सावेकाचस्तृतीयादिर्विभक्तिः ( पां ६ । २ । १६८ । ) इति विभक्तिरुदात्ता । उपशब्दो निपातत्वादाद्युदात्तः । श्रुतिशब्देन प्रादिसमासे प्रकृतिस्वरत्वे प्राप्ते, तादौ च निति कृत्यतौ ( पां ६ । १ । ५० । ) इति तुवर्जिततादिपरत्वाद्गतेः प्रकृतिस्वरः । चर, निघातः ॥ ३ ॥

विशेषविनियोगस्तु यत्र श्रौतो न सूत्रितः । स्मार्त्तं तत्र विजानीयादृग्विधानादिसूत्रतः । एहि स्तोमानित्यृगेषा सूत्रे विशेषाकारेण न विनियुक्ता, साधारणविनियोगस्तु ब्रह्मयज्ञादौ सर्वत्रानुसन्धेयस्तामेतां सूक्तगतां चतुर्थीमृचमाह एहि स्तोमानिति । हे वसो निवासकरणभूतेन्द्र, एहि अस्मिन् कर्म्मण्यागच्छ, आगत्य च स्तोमानुद्गातृप्रयुक्तानि स्तोत्राणि अभिस्वर अभिलक्ष्य प्रशंसारूपं शब्दं कुरु । तथाध्वर्य्युमभिलक्ष्य गृणीहि शब्दं कुरु । तथा होतृप्रयुक्तानि शस्त्राणि आ अभिलक्ष्य रुव रुहि शब्दं कुरु । परितोषेण सर्वानृत्विजः प्रशंसेत्यर्थः । तत ऊर्द्धं, नोऽस्माकं ब्रह्म चान्नं च यज्ञञ्चानुष्ठीयमानं कर्म्म च सचा सह वर्द्धय, साङ्गत्वसम्पादनेन यज्ञं वर्द्धयित्वा तत्फलमन्नञ्च प्रवृद्धं कुरु । अन्धइत्यादिष्वष्टाविंशति सङ्ख्यकेष्वन्ननामसु

१ ५ १ उक्थमिन्द्राय शंस्यं वर्धनं पुरुनिःषिधे १
शक्रो यथा सुतेषु णो रारणत्सख्येषु च ॥

ब्रह्म वर्च इति पठितं। इहि, इण् गतौ, सेर्हिः, हेरपित्त्वेन ङित्त्वाद्गुणाभावः, निघातः, आडागमगुणः, एकादेशः उदात्तेनोदात्त इत्युदात्तः। स्तोमान्, अर्त्तिस्तुसुहुसृधृक्षीत्यादिना मन्, नित्त्वादाद्युदात्तः, उत्तरपदेन संहितायां नकारस्य, दीर्घादटिसमानपादे (पां ८।४।९) इति रुत्वं, खरवसानयोर्विसर्जनीयः (पां ८।३।१५) इति विसर्जनीयः, आतोटिनित्यं (पां ८।३।३) इत्याकारस्य सानुनासिकता, भो भगो अघो अपूर्वस्य योऽशि (पां ८।३।१७) इति यत्वं, तस्य, लोपः शाकल्यस्य (पां ८।३।१९) इति लोपः, तस्यासिद्धत्वात् खरसन्धिर्न भवति। अभि, एवमादीनामन्त इत्यन्तोदात्तः। खर, खृ शब्दोपतापयोः निघातः। आभ इतिगतं। गृणीहि, गॄशब्दे, सेर्ह्यपिच्च (पां ३।४।८७।) इति हिः, क्र्यादिभ्यः श्ना, ईहल्यघोः (पां ६।४।११३।) इतीत्वं, घ्वादीनां ह्रस्वः (पां ७।३।८०।) इति ऋकारस्य ऋकारः, ऋवर्णाच्चेति वक्तव्यमितिणत्वं, तिङ्ङतिङ इति निघातः। रुव, रुशब्दे, सेर्ह्यपिच्च (पां ३।४।८७।) इति सेर्हिः, शपि प्राप्ते व्यत्ययेन शपः, तस्य ङित्त्वेन गुणाभावादुवङादेशः, अतो हेः (पां ६।४।१०५।) इति हेर्लुक्, तिङ्ङतिङ इति निघातः। ब्रह्म, वृह वृहि वृद्धौ सर्वधातुभ्यो मनिन्नित्यनुवृत्तौ, वृहेर्नोचेति मनिन्, तत्सन्नियोगेन नलोपः, अमागमश्च, मिदचोऽन्त्यात् परः (पां १।१।४७।) इति ऋकारात् परो यणादेशः, मनिनो नित्त्वादाद्युदात्तत्वं। वसो, आमन्त्रितनिघातः। यज्ञं, यजयाचरुचप्रवचर्चश्च (पां ७।३।६६।) इति नङ्, प्रत्ययस्वरः। वर्द्धय, निघातः, अत्र चकारोदयश्रवणादियमेवतिङ्विभक्तिः पूर्ववाक्येष्वनुषज्यते, अतोऽनुषक्तैव प्रथमा न श्रुतेत्यश्रुतायास्त्वा योगे प्रथमेति निघातनिषेधो न भवति ॥ ४ ॥

अभिप्लवषडहगतोक्थेषु अच्छावाकस्य तृतीयसवने उक्थमिन्द्राय शंस्यमित्यनुरूपस्तृचः एह्यूष्विति खण्डे इन्द्रं विश्वा अवीवृधन् उक्थमिन्द्राय शंस्यमिति सूचितं, तस्मिंस्तृचे प्रथमा सूक्ते पञ्चमीमृचमाह उक्थमिन्द्रायेति। इन्द्रायेन्द्रार्थं वर्द्धनं वृद्धिसाधनं उक्थं शस्त्रं शंस्यं अस्माभिः शंसनीयं। कीदृशायेन्द्राय, पुरु निःषिधे बहूनां शत्रूणां निषेधकारिणे। शक्र इन्द्रो नोऽस्मदीयेषु सुतेषु पुत्रेषु सख्येषु

च सखिवेष्वपि, यथा येन प्रकारेण रारणात् अतिशयेन शब्दं कुर्य्यात्, तथा शंस्यमिति पूर्वेणान्वयः, अस्मदीयेन शस्त्रेण परितुष्ट इन्द्रोऽस्माकं पुत्रान् अस्मत्सख्यानि च बहुधा प्रशंसत्वित्यर्थः। उक्थं, वचेस्थक् प्रत्ययः, प्रत्ययस्वरः। शंस्यं, शंसस्तुतौ, ण्यन्तादचोयदत्, शोरनिटीति णिलोपः, तित्स्वरिते प्राप्ते, यतोनावः (पां ६।१।२१३।) इत्याद्युदात्तत्वं। वर्द्धनं, करणाधिकरणयोश्च (पां ३।३।११७।) इति करणेल्युट्, लितीतिप्रत्ययात् पूर्वस्योदात्तत्वं। पुरुनिष्षिधे, बहूनां शत्रूणां निषेधकाय, षिधुगत्यां, धात्वादेः षः सः (पां ६।१।६४।) इति षस्य सत्वं, अत्र निरित्युपसर्गस्य निशब्दसमानार्थस्य प्राक्प्रयोगः, क्विप्चेति क्विप्, क्विपः सर्वापहारीलोपः, कुरुतिप्रादयः (पां२।२।१८) इति प्रादिसमासः, निसः सकारेण इणो व्यवधानं छान्दसत्वादनादृत्य, उपसर्गात् सुनोति (पां ८।३।६५।) इत्यादिना धातुसकारस्य षत्वं, निसः सकारस्य, ष्टुनाष्टुः (पां ८।४।४१।) इति ष्टुत्वं, पुरुशब्देन कर्म्मणि षष्ठ्यन्तेन समासः, षिधोधातुस्वरेणोदात्तत्वं, निःषिध इति प्रादिसमासे कृते कृदुत्तरपदप्रकृतिस्वरत्वं, कृद्ग्रहणे गतिकारकपूर्वस्यापि ग्रहणात् पुनःकारकसमासेऽपि स एव स्वरः। शक्नोतीति शक्रः, स्फायितञ्चि वञ्चि शक्नोत्यादिना रक्प्रत्यय औणादिकः, प्रत्ययस्वरः। यथा, प्रकारवचने थाल्, लित्स्वरेण प्रत्ययात् पूर्वोऽकार उदात्तः। सुतेषु, क्तः, प्रत्ययस्वरेणोदात्तः। नसो नकारस्य, नश्च धातुस्थोरुषुभ्यः (पां ८।४।२७।) इति संहितायां णत्वं। रारणात्, रणधातुः शब्दार्थकः, धातोरेकाचोहलादेः क्रियासमभिहारे यङ् (पां ३।१।२२।) इति यङ्, यङोऽचि च (पां २।४।७४।) इति तस्य लुक्, प्रत्ययलक्षणेन द्विर्भावो हलादिशेषः, दीर्घोऽकितः (पां ७।४।८३।) इति दीर्घः, प्रत्ययलक्षणेन, सनाद्यन्ता धातवः (पां ३।१।३२।) इति धातुसञ्ज्ञायां, लिङर्थे लेट् (पां ३।४।७।) इति हेतुहेतुमद्भावलक्षणे लिङर्थे लेट्, अत्र हि इन्द्रकर्तृकं रारणनमुक्थशंसनस्य कर्त्तव्यत्वेन हेतुः, लेटस्सिप्, इतश्चलोपः परस्मैपदेषु (पां ३।४।९७।) इति इकारलोपः, लेटोऽडाटौ (पां ३।४।९४।) इत्यडागमः, कर्त्तरिशप् तस्य, चर्करीतं परस्मैपदमदादिवच्च द्रष्टव्यमिति वार्त्तिकेनादादिवद्भावात्, अदिप्रभृतिभ्यः शपः (पां २।४।७२।) इति शपः प्राप्तोलुक्, बहुलं छन्दसीति निषिद्ध्यते, शपोऽनुदात्तत्वाद्धातोरन्तउदात्त एव शिष्यते, शपा सार्वधातुकस्य व्यवधानात् तत्र परतो

१ ६ १ तमित्सखित्व ईमहे तं राये तं सुवीर्य्ये १
स शक्र उत नः शकदिन्द्रो वसु दयमानः ॥ १९ ॥

विधीयमानं, अभ्यस्तानामादिः ( पां ६ । १ । १८९ । ) इत्याद्युदात्तत्वं न भवति, न च तिङ्ङ् तिङ इति निघातः, अत्र यथाशब्दयोगेन, यावद्यथाभ्यां ( पां ८ । १ । ३७ । ) इति निषेधाच्चवायोगे प्रथमेति वा न निघातो न भविष्यति, तत्र ह्युत्तरवाक्ये सख्येषु चेति चानुकृष्टविभक्त्यपेक्षया इयं प्रथमा तिङ्विभक्तिः । सख्येषु, सख्युः कर्म्माणि सख्यानि तेषु, कर्म्मणि चेत्यनुवृत्तौ, सख्युर्यः ( पां ५ । १ । १२९ । ) इति सखिशब्दाद्यः प्रत्ययः, तत्र भसञ्ज्ञायां, यस्येति च ( पां ६ । ४ । १४८ । ) इतीकारलोपः, प्रत्ययस्वरः ॥ ५ ॥

षष्ठीमृचमाह तमित्सखित्व इति । सखित्वे निमित्तभूते सति तमित् तमेवेन्द्रं ईमहे प्राप्नुमः, तथा राये धनार्थं तमीमहे, तथा सुवीर्य्ये शोभनसामर्थ्यनिमित्तं तमीमहे, उत अपि च, शक्रः शक्तिमान् स इन्द्रो नोऽस्मभ्यं वसु धनं दयमानः प्रयच्छन् शकदस्मदीयरक्षणे शक्तोऽभूत् । सप्तदशसु याज्याकर्म्मसु ईमहे याचामीति पठितं, तदनुसारेणेन्द्रं याचामह इति व्याख्येयं । सख्युर्भावः सखित्वं, तस्य भावत्वतलौ ( पां ५ । १ । ११९ । ) इति त्वः, प्रत्ययस्वरेणोदात्तः । ईमहे, ईड् गतौ, डित्त्वादात्मनेपदं, दिवादिभ्यः श्यन् ( पां ३ । १ । ६९ । ) इति श्यन्, बहुलं छन्दसीति श्यनोलुक्, तिङ्ङ् तिङ इति निघातः । राये, ऊडिदं ( पां ६ । १ । १७१ । ) इति विभक्तेरुदात्तत्वं । सुवीर्य्ये, सुष्ठुवीर्य्यं यस्यासौ सुवीर्य्यः, भविष्टवाचिनानेन भावो लक्ष्यते, सुवीर्य्यत्वायेत्यर्थः, बहुव्रीह्वावित्यनुवृत्तौ, वीरवीर्य्यौ च ( पां ६ । २ । १२० । ) इत्युत्तरपदाद्युदात्तत्वं । शक्नोतीति शक्रः, स्फायितञ्चिवञ्चि शकीत्यादिना रक्प्रत्यय औणादिकः, प्रत्ययस्वरः । शकत्, शकृच्छक्तौ, धातुसम्बन्धाधिकारे, छन्दसि लुङ् लङ् लिटः ( पां ३ । ४ । ६ । ) इति लुङ्, यतः शक्नोति अतस्तमीमहे इति धातुसम्बन्धः, लुङ्लिङ्, पुषादिद्युताद्र्दितः परस्मैपदेषु ( पां ३ । १ । ५५ । ) इति च्लेरङादेशः, बहुलं छन्दसीत्यडागमाभावः, तिङ्ङुतिङः ( पां ८ । १ । २८ । ) इति निघातः । वसु, निदित्यनुवृत्तौ वसेरुप्रत्ययः, नित्त्वादाद्युदात्तत्वं । दयमानः, दय दान गति रक्षण हिंसा दानेषु, अनुदात्तेत्त्वादात्मने-

१७१ सुविवृतं सुनिरजमिन्द्र त्वादातमिद्यशः १
गवामपं व्रजं वृधि कृणुष्व राधो अद्रिवः ॥

पदं, लटः शानजादेशः, शपः पित्त्वादनुदात्तत्वं, शानचश्चित इत्यन्तोदात्तत्वं बाधित्वा, तास्यनुदात्तेन्ङिददुपदेशाल्लसार्वधातुकानुदात्तमङ्हन्विलोः ( पां ६ । १ । ११८ । ) इति लसार्वधातुकत्वादनुदात्तत्वं, धातुस्वर एव शिष्यते ॥ ६ ॥ इति प्रथमस्य प्रथमे एकोनविंशो वर्गः ॥

गायन्तीति सूक्तो सप्तमीमृचमाह सुविवृतमिति। हे इन्द्र, यशोऽन्नं कर्मफलभूतं सुविवृतं सुष्ठु सर्वत्र प्रवृतं। सुनिरजं सुखेन निःशेषं प्राप्तुं शक्यं। त्वादातमित्, त्वयैव शोधितञ्च सम्पन्नमिति शेषः। इतः परं क्षीरादिरसलाभार्थं गवां व्रजं निवासस्थानं अपवृधि अपवृतमुखमुद्घाटितद्वारं कुरु। हे अद्रिवः पर्वतोपलक्षितवज्रयुक्तेन्द्र राधो धनं कृणुष्व सम्पादय। सुविवृतं, वृञ् वरणे, कर्मणि क्तः प्रत्ययः, विशब्देन प्रादिसमासः, विवृतमित्यत्र कृदुत्तरपदप्रकृतिस्वरं बाधित्वा कर्मवाचिनि क्तान्ते परतः, गतिरनन्तरः ( पां ६।२। ४९।) इति पूर्वपदप्रकृतिस्वरे प्राप्ते, परादिश्छन्दसि बहुलं ( पां ६। २।१९९।) इति ऋकार उदात्तः, पुनः सुशब्देन समासे कृदुत्तरपदप्रकृतिस्वरेण स एव ऋकार उदात्तः। ननु वृतमित्येव कृदन्तं नतु विवृतमिति, प्रत्ययग्रहणे यस्मात् सविधिस्तदादेस्तदन्तस्य ग्रहणमिति वचनात् सुविवृतमित्यत्र च समासे वृतमित्येतावन्मात्रं नोत्तरपदं किन्तु विवृतमिति, तत् कथं कृदुत्तरपदप्रकृतिस्वरत्वमिति चेत्, तदुच्यते, प्रत्ययग्रहणपरिभाषापवादेन कृद्ग्रहणे गतिकारकपूर्वस्यापि ग्रहणमित्यनेन विवृतमित्यस्यापि कृदन्तव्यपदेशोपपत्तेः। ननु विवृतमित्यस्य यथा कृदन्तव्यपदेशः, एवं क्तान्तव्यपदेशोऽप्यस्ति तयैव परिभाषया, तथाच कर्मणि क्तान्ते उत्तरपदे परतो गतिरनन्तर इति सुशब्दस्य प्रकृतिस्वरः प्राप्नोति, न चात्रापि परादिश्छन्दसि बहुलमित्येवं नास्ति निस्तारः। तथा हि सति सुविवृतमित्यत्र विवृतमित्येवोत्तरपदमिति विवृतमिति समासे यद्यपि ऋकार एवोदात्तः स्यात्, विवृतमिति ऋकारः पदादिर्भवति, तथापि सुविवृतमिति समासस्य सतिशिष्टत्वेन बलीयस्त्वात् तत्रत्य एवोत्तरपदादौ इकार एवोदात्तस्वरेण भवितव्यमिति, उच्यते, गतिरनन्तर इत्यत्र क्तानुवृत्तेः क्तयग्रहणे कृद्ग्रहणपरिभाषा नाश्रीयते, तदाश्रयणे

व्यवहितगतावपि प्रकृतिस्वरे सत्यनन्तरग्रहणमनर्थकं स्यात्, अनेनैव चाभिप्रायेणानन्तरग्रहणस्य प्रयोजनमभ्युद्धृतमित्यत्र व्यवहितस्याभिशब्दस्य माभूदिति प्रत्युदाहृतं, तस्मात् सुविष्टतमिति ऋकार एवोदात्त इति स्थितं । सुनिरजं, अनायासेन निरवशेषं प्राप्यं, अजगतित्वेपशयोः, सुनिसोरुपसर्गयोः प्राक्प्रयोगः, ईषदुसुषु-कृच्छाकृच्छार्थेषु खल्, (पां ३ । ३ । १२६ ।) इनि खल् । न चात्र सुशब्दस्य निसाद्यवधानं शङ्कनीयं, सुशब्दस्य ह्युपपदमात्रं खलोनिमित्तं नानन्तर्यं, अतएव सुपरिहरं दुष्परिहरमित्यादयः प्रयोगा इति, पूर्ववद्गतिसमासे, लिति (पां ६ । १ । १९३ ।) इति प्रत्ययात् पूर्वमुदात्तमिति धात्वकार उदात्तः, निसासमासे कृदुत्तरपदप्रकृतिस्वरेण स एव शिष्यते, पुनः सुशब्देन समासे कृद्ग्रहणे गतिकारकपूर्वस्यापि ग्रहणमिति परिभाषया कृदुत्तरपदप्रकृतिस्वरेण स एव शिष्यते । त्वादातं, त्वया शोधनेन विशोदीक्षतं, दैप् शोधने, आदेच उपदेशेऽशिति (पां ६ । १ । ४५ ।) इत्यात्वं, सत्यपि हि पकारे, नानुबन्धकृतमनेजन्तत्वमित्येजन्त एवायं, निष्ठा (पां । ३ । २ । १०२ ।) इति कर्म्मणि क्तः, दाधाघ्वदाप् (पां १ । १ । २० ।) इत्यत्रादाप् इति निषेधेन घुसञ्ज्ञाया अभावात्, दोदद्घोः (पां ७ । ४ । ४६ ।) इति ददादेशो न भवति । ननु दाप् लवन इति प्रतिपदोक्तस्यैव दापस्तत्रादाबिति निषेधः, न पुनर्लाक्षणिकस्य दैपः, लक्षणप्रतिपदोक्तयोः प्रतिपदोक्तस्यैव ग्रहणं, नतु लाक्षणिकस्येति नियमादिति चेन्न, गापादाग्रहणेष्वविशेष इति वार्त्तिकेन प्रतिप्रसवात्, युष्मच्छब्दात्तृतीयैकवचनस्य, सुपांसुलुगिति डादेशः, त्वमावेकवचने (पां ७ । २ । ९७ ।) इति मपर्य्यन्तस्य त्वादेशः, अतोगुणे (पां ६ । १ । ९७ ।) इति पररूपत्वं, भसञ्ज्ञायां, टेः (पां ६ । ४ । ४३ ।) इत्यदसोऽकारस्य लोपे उदात्तनिवृत्तिस्वरेणाकार उदात्तः, कर्त्तृकरणे कृताबहुलं (पां २ । १ । ३२ ।) इति तृतीयासमासः, तत्पुरुषे कृतिबहुलं (पां ६ । ३ । १४ ।) इति तृतीयाया अलुक्, कृदुत्तरपदप्रकृतिस्वरे प्राप्ते, तृतीया कर्म्मणि (पां ६ । २ । ४८ ।) इति पूर्वपदप्रकृतिस्वरत्वं । यशः, अशूयाशौ, अशेर्देवने युट्चेत्यसुन्, तत्सन्नियोगेन धातोर्युडागमः, नित्त्वादाद्युदात्तत्वं । गवां, प्रातिपदिकस्वरः, सावेकाच इति विभक्तेरुदात्तत्वं प्राप्तं, न गोश्वन्सावर्वर्णेति निषिध्यते । दधि, दृज्त्वरणे, अुभ्रुण पॄ कृ दृभ्यश्छन्दसि (पां ६ । ४ । १०२ ।) इति हेर्धिरादेशः, बहुलञ्छन्दसीति श्नेरपि

१८१ नहि त्वा रोदसी उभे ऋघायमाणमिन्वतः।
जेषः स्वर्वतीरपः सं गा अस्मभ्यं धूनुहि ॥

लुक्, निघातः। कृणुष्व, कृविहिंसाकरणयोश्चेति धातुः, इदितो-नुम्, व्यत्ययेनात्मनेपदं, लोटस्थास्, थासस्से (पां ३।४।८०।) इति थासः से आदेशः, सवाभ्यां वामौ (पां ३।४।९१।) इति व आदेशः, कर्त्तरि शपि प्राप्ते, धिन्विकृण्व्योरच (पां ३।१।८०।) इत्यु प्रत्ययः, तत्सन्नियोगेन वकारस्याकारः, तस्य, अतोलोपः (पां ६।४।४८।) इति लोपः, अचः परस्मिन् पूर्वविधौ (पां १।१।५७।) इत्यकार-लोपस्य स्थानिवद्भावाल्लघूपधगुणो न भवति, अत्र सतिशिष्टस्वर-बलीयस्त्वमन्यत्र विकरणेभ्य इति सति शिष्टमपि विकरणस्वरं बाधित्वा लङ एव प्रत्ययादुदात्तत्वं। राधः, असुन्नन्तो नित्त्वादाद्युदात्तः। अद्रिवः, अद्रिर्वज्रं तदस्यास्तीति मतुप्, छन्दसीरः (पां ८।२।१५।) इति मस्य वत्वं, सम्बुद्धौ, उगिदचां (पां ७।१।७०।) इति नुम्, हल्ङ्यादिसंयोगान्तलोपौ, मतुवसोरसम्बन्धौ छन्दसि (पां ८।३।१।) इति रुत्वं, विसर्जनीयः, आमन्त्रितस्य चेति निघातः ॥ ७ ॥

अष्टमीमृचमाह न हि त्वेति। हे इन्द्र, ऋघायमाणं शत्रुवधं कुर्वाणं त्वां द्यावापृथिव्यावपि त्वदीयं महिमानं नहि इन्वतः, व्याप्तुं न समर्थे इत्यर्थः, तादृशस्त्वं स्वर्वतीः स्वर्लोकयुक्ता अपो वृष्टिरूपाः जेषो जयेः, प्रेरयेत्यर्थः, अपां स्वर्गसम्बन्धश्चान्यत्र दिवो वृष्टिं * व्यावयति सतमिति, किञ्च वृष्टिप्रदानाच्चान्नसम्पत्तेरूर्द्धं अस्मभ्यं क्षीरादिरसप्रदा गाः संधूनुहि सम्यक्प्रेरय। नहि, नञो हिशब्देन, सहसुपा (पां २।१।४।) इति समासः, समासत्वादन्तो-दात्तत्वं। त्वा, अनुदात्तं सर्वमित्यनुवृत्तौ, त्वामौ द्वितीयाया इति त्वादेशः। रोदसी, रुदेरसुन्, नित्त्वादाद्युदात्तः, उगितश्च (पां ४।१।६।) इति ङीप्। उभे, प्रातिपदिकस्वरेणान्तोदात्तः, समासस्यकदेश उदात्तः। ऋघायमाणं, नॄन् हन्तीति ऋघा, अन्येभ्योऽपिदृश्यन्ते (पां ३।२।७५।) इति विच्, दृशिग्रहणस्यविधन्तरोपसङ्ग्रहणार्थत्वान्नकार-लोपो हकारस्य च घकारः, अन्ऋघा ऋघा भवतीत्यभूततद्भावे, लोहि-

(* व्यवयतीति कांसं)

१ ९ । आश्रुत्कर्ण श्रुधी हवं नू चिद्दधिष्व मे गिरः ।
इन्द्र स्तोममिमं मम कृष्वा युजश्चिदन्तरं ॥

तादिडाज्भ्यः क्यष् (पां ३ । १ । १३ ।) इति क्यष्प्रत्ययो भवति, सह्याकृतिगणः, लोपश्च हलइत्यनुवृत्तेर्नकारलोपश्च, वाक्यषः (पां १ । ३ । ९० ।) इत्यात्मनेपदं, लटः शानच्, शपोऽदुपदेशात् पराच्छानचो लसार्वधाकानुदात्तत्वं, क्यषः प्रत्ययस्वरः, एकादेशस्योदात्तत्वं । इन्वतः, इति व्याप्तौ, इदितो नुम्धातोः (पां ७ । १ । ५८ ।) इतिनुम्, शपः पित्त्वादनुदात्तत्वं, लुडादेशस्य तसश्च लसार्वधातुकस्वरेण धातुस्वर एव शिष्यते, हिचेति निषेधात्तिङ्ङ तिङ इति निघातो न भवति । जेषः जयेः, प्रार्थनायां, लिङर्थे लेट् (पां ३ । ४ । ७) इतिलिङर्थे-लेट, तस्य मध्यमपुरुषैकवचनं सिप्, इतश्चलोपः परस्मैपदेषु (पां ३ । ४ । ९७ ।) इति इकारलोपः, कर्त्तरि शपि प्राप्ते तदपवादः, सिब्बहुलं लेटि (पां ३ । १ । ३४ ।) इति सिप्, अडागमस्यानुदात्तत्वाद्धातुस्वर एव शिष्यते । स्वर्वतीः, स्वरासामस्तीति सर्वत्यः, न्यङ्स्वरौ स्वरिताविति फिट्सूत्रेण स्वर्शब्दः स्वरितः, मतुप्ङीपौ पित्त्वादनुदात्तौ, संहितायां, स्वरितात् संहितामनुदात्तानां (पां १ । २ । ३९ ।) इत्येकश्रुतिः स्वरित एव शिष्यते । अपः, ऊडिदमित्यादिना विभक्तेरुदात्तत्वं । धूनुहि, धूञ्कम्पने, लोटः सिप्, सेर्ह्यपिच्च (पां ३ । ४ । ८७ ।) इति सेर्हिरादेशः, स्वादिभ्यः श्नुः (पां ३ । १ । ७३ ।) इति श्नुः, उतश्च प्रत्ययादसंयोगपूर्वात् (पां ६ । ४ । १०९ ।) इति प्राप्तस्य लुकश्छान्दसत्वादभावः ॥ ८ ॥

अभिप्लवषडहस्योक्थेषु तृतीयसवनेऽच्छावाकस्य षट्स्तोत्रियानुरूपयुगलेषु द्वितीयस्मिन् युगलआश्रुत्कर्णेति तृचोऽनुरूपः, एह्यष्विति खण्डे श्रुधीहवन्तिरश्चा आश्रुत्कर्णश्रुधीहवमिति सूत्रितं, तस्मिंस्तृचे प्रथमां, सूक्ते नवमीमृचमाह आश्रुत्कर्णेति । हे आश्रुत्कर्ण सर्वतः श्रोतारौ कर्णौ यस्य तादृशेन्द्र, हवमस्मदीयमाह्वानं नु क्षिप्रं श्रुधि शृणु, मे मम होतुर्गिरश्चित्स्तुतीरपि दधिष्व चित्ते धारय, किञ्च मम मदीयमिमं स्तोमं स्तोत्ररूपं वाक्समूहं युजश्चित् स्वकीयसख्युरपि अन्तरं कृष्व आसन्नं कुरु, यथा वचनस्य प्रियं मन्यसे तद्वदस्मदीयस्तुतिष्वपि प्रीतिं कुर्व्वित्यर्थः । आश्रुत्कर्ण, आ समन्ताच्छृणुत इत्याश्रुत्,

१ १० १ विद्मा हि त्वा वृषन्तमं वाजेषु हवनश्रुतं १
वृषन्तमस्य हूमह ऊतिं सहस्रसातमां ॥

क्विप्, क्रुखस्य पिति कृति तुक् ( पां ६ । १ । ७१ ) इति तुक्, तादृशौ कर्णौ यस्य, आमन्त्रितस्य च ( पां ८ । १ । १९ । ) इत्याद्युदात्तत्वं । श्रुधि, श्रुश्रवणे, लोटोद्धिः, श्रुवः शृच्च ( पां ३ । १ । ७४ । ) इति विहितश्नो-र्बहुलं छन्दसीति लक् तत्सन्नियोगशिष्टत्वात् शृभावोऽपि निवर्त्तते, श्रुशृणुपृकृ हभ्यश्छन्दसि ( पां ६ । ४ । १०२ । ) इति हेर्धिरादेशः, सतिशिष्टत्वात् प्रत्ययस्वरः, आमन्त्रितं पूर्व्वमविद्यमानवत् ( पां ८ । १ । ७२ । ) इत्यविद्यमानवत्त्वेन पदादपरत्वात्तिङ्ङ् तिङइति निघातो न भवति, संहितायां, अन्येषामपि दृश्यते ( पां ६ । ३ । १३७ । ) इति दीर्घः । हवं, ह्वेञ्स्पर्द्धायां शब्दे च, बहुलं छन्दसीत्यनेनानैमित्तिके सम्प्रसारणे कृते यश्चादुकारान्तत्वेन, ऋदोरप् ( पां ३ । ३ । ५७ । ) इत्यप्प्रत्ययः, अपः पित्त्वाद्धातुस्वरः । नू, संहितायां, ऋचि तुनुघ मक्षुतङ् कुचोरुयाणां ( पां ६ । ३ । १३३ । ) इति दीर्घः । चित्, चादि-रनुदात्तः । दधिध्व, दधातेर्लोट्, धासस्से, सवाभ्यां वामौ, शपः स्लुः, अभ्यासस्य क्रुखत्वादिः, छन्दस्युभयथा ( पां ३ । ४ । ११७ । ) इत्यार्द्ध-धातुकत्वस्यापि स्वीकारादिडागमः, आकारलोपः, निघातः । मे, तेमया-वेकवचनस्य ( पां ८ । १ । २२ ) इति षष्ठ्येकवचनान्तस्यास्मच्छब्दस्य मे आदे-शोऽनुदात्तत्वञ्च । मम, तवममौ ङसि ( पां ७ । २ । ९९ । ) इत्यनेन मपर्य्यन्तस्य ममादेशः, प्रातिपदिकस्वरेणान्तोदात्तत्वे प्राप्ते, युष्मदस्मदो-र्ङसि ( पां ६ । १ । २११ । ) इत्याद्युदात्तत्वं । क्षय्य, डुक्षिञ् करणे, लोट्, धासस्से, सवाभ्यां वामौ, शपो बहुलं छन्दसीति लुक्, सति शिष्टत्वात् प्रत्ययस्वरः, पदादित्वान्न निघातः । युजः, सावेकाच इति विभक्तेरुदात्तत्वं । अन्तरं, वृषादित्वादाद्युदात्तः ॥ ९ ॥

दशमीमृचमाह विद्माहीति हे इन्द्र, त्वां विद्म जानीमः । कीदृशं त्वां वृषन्तमं, कामानामतिशयेन वर्षितारं । पुनः कीदृशं, वाजेषु सङ्ग्रामेषु हवनश्रुतं, अस्मदीयस्याह्वानस्य श्रोतारं । वृषन्तमस्या-तिशयेन कामादीनां वर्षितुस्तव ऊतिं रक्षामस्मद्विषयामुद्दिश्य हूमहे त्वामाह्वयामः । कीदृशीमूतिं, सहस्रसातमां अतिशयेन धनस-हस्राणां दात्रीं । विद्मा, विदोलटोवा ( पां ३ । ४ । ५३ । ) इति

१ १११ आ तू न इन्द्र कौशिक मन्दसानः सुतं पिब १
नव्यमायुः प्रसूतिर कृधी सहस्रसामृषिं ॥

मसौ मादेशः, प्रत्ययस्वरेणान्तोदात्तः, ह्यचोऽतस्तिङः ( पां ६ । ३ । १३५ ) इति संहितायां दीर्घः । दृषन्तमं, दृषु दृषु मृषु सेचने, कनिन्यु दृषि तक्षिराजि धन्विद्यु प्रतिदिवइति कनिन्, नित्त्वादाद्युदात्तः, तमपः पित्त्वात् स एव ङिष्यते, अयस्मयादीनि छन्दसि ( पां १ । ४ । २० । ) इति भत्वेन पदत्वाभावान्नलोपाभावः, पदत्वाच्चटिलोपाभावः । वाजेषु, वाजशब्दो दृषादित्वादाद्युदात्तः । हवनश्रुतं, क्रुश्रुत्यनुवृत्तौ, बहुलं छन्दसीति क्युटि सम्प्रसारणं, हवनं शृणोतीति क्विप्, तुगागमः । दृषन्तमस्य उक्तं । ह्वमहे, ह्वयतेर्बहुलं छन्दसीति सम्प्रसारणं, शप श्रुत्यनुवृत्तौ, बहुलं छन्दसीति शपोलुक् । ऊतिं, ऊति यूति जूति सातीत्यादिना भावेक्तिन्नन्त उदात्तोनिपातितः । सहस्रसातमां, सहस्रं सनोतीति सहस्रसा, षणुदाने, धात्वादेः षः स इति सत्वं, जन सन खन क्रम गमो विट्, ( पां ३ । २ । ६७ । ) इति विट्, विड्वनोरनुनासिकः स्यात् ( पां ६ । ४ । ४१ । ) इत्याकारादेशः, ह्रदुत्तरपदप्रकृतिस्वरत्वं, तमपः पित्त्वात्तदेव ङिष्यते ॥ १० ॥

एकादशीमृचमाह आ तू न इन्द्रेति । हे इन्द्र, तू क्षिप्रं नोऽस्मान् प्रत्यागच्छेति शेषः, हे कौशिक कुशिकपुत्रेन्द्र, मन्दसानो हृष्टो भूत्वा सुतमभिषुतं सोमं पिब, यद्यपि विश्वामित्रः कुशिकस्य पुत्रस्तथापि तद्रूपेणेन्द्रस्यैवोत्पन्नत्वात् कुशिकपुत्रत्वमविरुद्धं । अयं वृत्तान्तोऽनुक्रमणिकायामुक्तः, कुशिकस्त्वैधीरथिरिन्द्रतुल्यं पुत्रमिच्छन् ब्रह्मचर्य्यं चचार, तस्य इन्द्र एव गाधीपुत्रो यज्ञे इति । हे इन्द्र, नव्यं सर्वैर्देवैः स्तुत्यं कर्म्मानुष्ठानपरं आयुर्जीवितं प्रसूतिर प्रकर्षेण सुष्ठु वर्द्धय, ततो मां सहस्रसङ्ख्याकलाभोपेतं ऋषिमतीन्द्रियद्रष्टारं कृधि कुरु । तू, संहितायां ऋचि तुनुघमक्षुतङ् कुचोरुष्याणां ( पां ६ । ३ । १३३ । ) इति दीर्घः । मः, संहितायां, उदात्तादनुदात्तस्य स्वरितः (पां ८ । ४ । ६६ । ) इत्युदात्तात्परस्यानुदात्तस्य स्वरितत्वं । इन्द्र, आमन्त्रित निघातः । कौशिक, निघातः । मन्दसानो हृष्यन्, मदि स्तुति मोद मद स्वप्न कान्ति गतिषु, श्यसानजित्यनुवृत्तौ, ऋज्रि वृन्दि मन्दि सहिभ्यः किदित्यसानच्प्रत्ययः, चित्त्वादन्तोदात्तः । सुतं, प्रत्ययस्वरः । नव्यं, णु स्तुतौ, अचोयत् ( यां

११२१ परि त्वा गिर्वणो गिर इमा भवन्तु विश्वतः ।
वृद्धायुमनु वृद्धयो जुष्टा भवन्तु जुष्टयः ॥ २० ॥

३ । १ । ९७ । ) इति यत्, गुणः, वान्तोयिप्रत्यये ( पां ६ । १ । ७३ । ) इत्यवादेशः, यतोनावः ( पां ६ । १ । २१३ । ) इत्याद्युदात्तत्वं । आयुः, उसिरित्यनुवृत्तौ, एतेर्णिच्चेत्युसिः प्रत्ययः, णित्त्वाद्वृद्ध्यायादेशौ, नित्त्वादाद्युदात्तः । सू, निपातस्य च ( पां ६ । ३ । १३६ । ) इति संहितायां दीर्घत्वं । तिर, तरतेर्व्यत्ययेन शः, ऋतइद्धातोः ( पां ७ । १ । १०० । ) इतीत्वं, अतोहेः ( पां ६ । १ । १०५ । ) इति हेर्लुक् । कृधी, डुकृञ्करणे, बहुलं छन्दसीति शपोलुक्, श्रु शृणु पॄ कृ वृभ्यश्छन्दसि ( पां ६ । ४ । १०२ । ) इति हेर्धिरादेशः । सहस्रसामित्युक्तपूर्वं । ऋषिं, ऋषगतौ, इन्नित्यनुवृत्तौ इगुपधात् किदिति कित्, कित्त्वाद्गुणाभावः, नित्त्वादाद्युदात्तत्वं ॥ ११ ॥

प्रवर्ग्ये परित्वेत्यभिष्टुयात्, स्पृष्ट्वोदकमिति खण्डे परित्वा गिर्वणो गिरोऽधिद्वयोरदधात् उक्थं वच इति सूत्रितं, तथा हविर्द्धानप्रवर्त्तने सेयं परिधानीया, हविर्द्धाने प्रवर्त्तयन्तीति खण्डे परित्वा गिर्वण इति परिदध्यादिति सूत्रितं; तथा च ब्राह्मणं परित्वा गिर्वणो गिर इत्युत्तमया परिदधतीति, तामेतां द्वादशीमृचमाह परित्वेति । हे गिर्वणः, अस्मदीयस्तुतिभागिन्द्र, विश्वतः सर्वेषु कर्म्मसु प्रयुज्यमाना इमा गिरोऽस्मदीयाः स्तुतयस्त्वां परिभवन्तु सर्वतः प्राप्नुवन्तु । कीदृश्यो गिरः, वृद्धायुमनु, प्रवृद्धेनायुष्येणोपेतं त्वामनुसृत्य वृद्धयो वर्द्धमानाः, किञ्चैता गिरो जुष्टास्त्वया सेविताः सत्यो जुष्टयोऽस्माकं प्रति हेतवो भवन्तु । गिर्वणः, गीर्भिर्वण्यत इति गिर्वणः, वन षण सम्भक्तौ, सर्वधातुभ्योऽसुन्, गिर उपधाया दीर्घाभावश्छान्दसः, आमन्त्रितनिघातः । विश्वतः, लितीतिप्रत्ययात् पूर्वस्योदात्तत्वं । वृद्धायुं, वृधु वृद्धौ, क्तप्रत्ययः, उदितोवा ( पां ७ । २ । ५६ । ) इति इटः क्त्वाप्रत्यये विकल्पितत्वात्, यस्य विभाषा ( पां ७ । २ । १५ । ) इति इडभावः, प्रत्ययस्वरः, इण्गतौ, छन्दसीणः ( पां ८ । २ । १५ । ) इत्युण्, * णित्त्वादाद्युदात्तः, आयादेशश्च, वृद्धमायुर्यस्येति बहुव्रीहौ पूर्वपदप्र-

---

* णित्वाद्वृद्धिः । कां, सं ।

## एकादशसूक्तं।

१११ इन्द्रं विश्वा अवीवृधन्त्समुद्रव्यचसं गिरः।
रथीतमं रथीनां वाजानां सत्पतिं पतिं॥

क्षतिस्वरत्वं। वृद्धयः, वृधेः क्तिनि, तितुत्रतथसि सु सरकसेषु च (पां ७।२।९।) इतीडभावः नित्त्वादाद्युदात्तत्वं। जुष्टाः, श्वीदितो निष्ठायां (पां ७।२।१४।) इतीडभावः, जुष्टार्पितेत्यनुवृत्तौ, नित्यं मन्त्रे (पां ६।१।२१०।) इत्याद्युदात्तत्वं। जुष्टयः, जुषीप्रीतिसेवनयोः, क्तिन्, तितुत्रेतीडभावः नित्त्वादाद्युदात्तः॥ १२॥ इति प्रथमस्य प्रथमे विंशो वर्गः॥ २०॥

इन्द्रं विश्वा इत्यृर्चसूक्तस्य मधुच्छन्दसः पुत्रो जेटनामक ऋषिः, तथाचानुक्रान्तं इन्द्रमृषौ जेता माधुच्छन्दस इति, छन्दस्त्वानुष्टुभमिति पूर्वसूक्तोक्तं, इन्द्रो देवतानुवर्त्तते, विनियोगस्तु महाव्रते निष्केवल्ये हृत्सूक्तं शंसनीयं उरू इति खण्डे शौनकेन सूचितं. इन्द्रं विश्वा अवीवृधन्नित्यानुष्टुभं तस्य प्रथमायाः पूर्वमर्द्धर्चं शस्त्रोत्तरेणार्द्धर्चेनोत्तरस्याः पूर्वमर्द्धर्चं व्यतिषञ्जति, पादैः पादाननुष्टुप्कारं प्रागुत्तमाया इति, ब्राह्मणञ्च प्रथमारण्यके पठ्यते, प्रवोमह इति खण्डे इन्द्रं विश्वा अवीवृधन्निति पदानुषङ्गा इति, तथा पृष्ठस्य पञ्चमेऽहनि निष्केवल्ये शस्त्रे इन्द्रं विश्वा अवीवृधन्नित्यनुरूपस्तुचः, सोमे वर्द्धमानइतिखण्डे सूचितं, उपनो हरिभिः सुतमिन्द्रं विश्वा अवीवृधन्निति। अस्मिन् सूक्ते प्रथमामृचमाह इन्द्रं विश्वा अवीवृधन्निति। विश्वाः सर्वा गिरोऽस्मदीयाः स्तुतय इन्द्रमवीवृधन् वर्द्धितवत्यः। कीदृशमिन्द्रं समुद्रव्यचसं, समुद्रवद्व्याप्तवन्तं। पुनः कीदृशं रथीनां रथयुक्तानां योद्धॄणां मध्ये रथीतमं अतिशयेन रथयुक्तं। पुनः कीदृशं वाजानामन्नानां पतिं स्वामिनं। पुनः कीदृशं सत्पतिं, सतां सन्मार्गवर्त्तिनां पालकं। विश्वाः, विशेः क्वन्, नित्स्वरः। अवीवृधन्, वृधेर्णिचि चङीट्, ऋदित्यनुवृत्तौ, नित्यं छन्दसि (पां ७।४।८।) इति ऋकारस्य ऋकारविधानाल्लघूपधगुणाभावः, निघातस्वरः। समुद्रव्यचसं, व्यचेरसुन् माङ्कुटादिभ्योऽञ्णिन्ङित् (पां १।२।१।)

१२१ सख्ये त इन्द्र वाजिनो मा भेम शवसस्पते ।
त्वामभिप्रणोनुमो जेतारमपराजितं ॥

इति प्राप्तस्य ङित्त्वस्य व्यचेः कुटादित्वननसीति वार्त्तिकेन अनसि निषेधात्, ग्रहिज्यावयिव्यधि (पां ६ । १ । १६ ।) इत्यादिना ङिति विधीयमानं सम्प्रसारणं न भवति, समुद्रस्यव्यच इव व्यचोयस्येति बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वं । रथीतमं रथीनां, रथशब्दादुत्पन्नस्येन-श्छान्दसं दीर्घत्वं प्रत्ययस्वरेणोदात्तत्वञ्च । वाजानां, वृषादित्वादाद्युदात्तत्वं, सत्पतिं, पत्यावैश्वर्य्ये (पां ६ । २ । १८ ।) इति पूर्वपदप्रकृतिस्वरत्वं ॥ १ ॥

द्वितीयामृचमाह सख्ये त इति । हे शवसस्पते बलस्य पालकेन्द्र, ते तव सख्ये अनुग्रहप्रयुक्ते सखित्वे वर्त्तमाना वयं वाजिनोऽन्नवन्तो भूत्वा मा भेम शत्रुभ्यो भीतिं प्राप्ता माभूम, अतस्त्वामभयहेतुं अभिप्रणोनुमः सर्वतः प्रकर्षेण स्तुमः । कीदृशन्त्वां जेतारं युद्धेषु जयशीलं । पुनः कीदृशं अपराजितं क्वापि पराजयरहितं । सख्योः कर्म्म सख्यं, सख्युर्य्यः (पां ५ । १ । १२६ ।) इति यप्रत्ययः, प्रत्ययस्वरः । वाजिनः, वाजोऽन्नमेषामस्तीति वाजिनः प्रत्ययस्वरः । भेम, जि भी भये, लुङ्, उत्तमपुरुषबहुवचनं मस्, नित्यं ङितः (पां ३ । ४ । ९९ ।) इति सलोपः, बहुलं छन्दसीति श्लुलुक्, छन्दस्युभयथेति तिङ आर्द्धधातुकत्वेन ङित्त्वाभावाद्गुणः, नमाङ्योगे (पां ६ । ४ । ७४ ।) इत्यडागमप्रतिषेधः । शवसस्पते, षष्ठ्याः पतिपुत्रपृष्ठपारपदपयस्पोषेषु (पां ८ । ३ । ५३ ।) इति शवसो विसर्जनीयस्य संहितायां सत्वं, सुबामन्त्रितं पराङ्गवत्स्वरे (पां २ । १ । २ ।) इति पराङ्गवद्भावेन पदद्वयनिघातः । नोनुमः, गुस्तौ, णोनः (पां ६ । १ । ६५ ।) इति नत्वं यङोलुक् प्रत्ययलक्षणेन, सन्यङोः (पां ६ । १ । ९ ।) इति द्विर्भावः, गुणो यङ्लुकोः (पां ७ । ४ । ८२ ।) इत्यभ्यासस्य गुणः, प्रत्ययलक्षणेन धातुसञ्ज्ञायां लटोमस्, अदादिवद्भावाच्छपोलुक्, उपसर्गादसमासेऽपि णोपदेशस्य (पां ८ । ४ । १४ ।) इति संहितायां णत्वं । जेतारं, जिजये, ताच्छील्यादिषु ट्रन्, ञ्नित्यादिर्नित्यं (पां ६ । १ । १९७ ।) इत्याद्युदात्तत्वं । अपराजितं, अव्ययपूर्वपदप्रकृतिस्वरत्वेन नञउदात्तत्वं ॥ २ ॥

१३। पूर्वीरिन्द्रस्य रातयो न विदस्यन्त्यूतयः ।
यदी वाजस्य गोमतः स्तोतृभ्यो मंहते मघं ॥
१४। पुरां भिन्दुर्युवा कविरमितौजा अजायत ।
इन्द्रो विश्वस्य कर्म्मणो धर्त्ता वज्री पुरुष्टुतः ॥

तृतीयामृचमाह पूर्व्वीरिन्द्रस्येति । इन्द्रस्य सम्बन्धिन्यो रातयो धनदानानि पूर्वीः अनादिकालसिद्धाः प्रभूता वा अस्येन्द्रस्य सर्वदा यष्टृभ्यो धनदानमेव स्वभाव इत्यर्थः, एवं सति इदानीन्तनोऽपि यजमानः स्तोतृभ्यो ऋत्विग्भ्यो गोमतो गोसहितस्य वाजस्यान्नस्य पर्य्याप्तं मघं धनं यदि मंहते दक्षिणारूपेण ददाति, तदानीं ऊतयो बहुधनदानपूर्वकाणीन्द्रस्यास्मद्विषयाणि रक्षणानि न विदस्यन्ति विशेषेण नोपक्षीयन्ते । मघं रेक्णः इत्यादिष्वष्टाविंशतिसङ्ख्यकेषु धननामसु मघशब्दः पठितः । दाति दासति इत्यादिषु दशसु दानकर्म्मसु मंहत इति पठितं । पूर्वीः, पुरुशब्दस्य, वोतो गुणवचनात् ( पां ४ । १ । ४४ । ) इति ङीष्प्रत्ययः, आद्यस्योकारस्य दीर्घश्छान्दसः, जसि, दीर्घाज्जसि च ( पां ६ । १ । १०५ । ) इति निषेधं बाधित्वा, वाच्छन्दसि ( पां ६ । १ । १०६ । ) इति पूर्वसवर्णदीर्घत्वं । ङीषः प्रत्ययस्वरेणोदात्तत्वं । रातयः, मन्त्रे वृषेषपच मन विद भूवीरा उदात्तः ( पां । ३ । ३ । ९६ । ) इति क्तिन्नुदात्तः । दस्यन्ति, दसु उपक्षये, दिवादिभ्यः श्यन्, निघातः । ऊतयः, ऊति यूति जूति सातिहेति कीर्त्तयश्च ( पां ३ । ३ । ९७ । ) इति क्तिन्नुदात्तः । यदि, निपातत्वादाद्युदात्तः, संहितायां, निपातस्य च ( पां ६ । ३ । १३६ । ) इति दीर्घत्वं । वाजस्य, गोमत इति पूर्वे गतं । स्तोतृभ्यः, ष्टुञ्स्तुतौ, धात्वादेः षः सः ( पां ६ । १ । ६४ । ) इति ष्टोः षस्य सत्वं, तृचश्चित्त्वादन्तोदात्तत्वं । मंहते, महिदाने, इदितोनुम्धातोः ( पां ७ । १ । ५८ । ) इति नुमागमः, शप्, शपः पित्त्वादनुदात्तत्वं, तिङश्च लसार्वधातुकस्वरेण तिङ्ङ तिङ इति निघातो न भवति, निपातैर्यद्यदिहन्त ( पां ८ । १ । ३० । ) इत्यादिना निपातयुक्ततिङन्तस्यानुदात्तता निषेधात् ॥ ३ ॥

अभिप्लवषडहस्योक्थेषु तृतीयसवनेऽच्छावाकस्य पुरां भिन्दुर्युवाकविरिति स्तोत्रियस्तृचः, तथाच सूत्रितं एह्युष्वित्युपक्रम्य पुरां भिन्दु-

१५१ त्वं बलस्य गोमतोऽपावरद्रिवो * बिलं १
त्वां देवा अबिभ्युषस्तुज्यमानास आविषुः ॥

र्युवाकविर्वृषाह्यसिराधस इति तस्मिंस्तृचे प्रथमां सूक्ते चतुर्थीमृच-माह पुरां भिन्दुरिति। अयमिन्द्र उच्यमानगुणयुक्तोऽजायत सम्पन्नः। कीदृश इति तदुच्यते, पुरामसुरपुराणां भिन्दुर्भेत्ता। युवा कदा-चिदपि वलीपलितादिवार्द्धकरहितः। कविर्मेधावी। अमितौजाः प्रभूतबलः। विश्वस्य कर्म्मणः कृत्स्नस्य ज्योतिष्टोमादेर्द्धर्त्ता पोषकः। वज्री यजमानरक्षणार्थं सर्वदा वज्रयुक्तः। पुरुष्टुतः, बहुविधतत्तत् कर्म्मणि स्तुतः। भिन्दुः, भिदिर्विदारणे, कुरित्यनुवृत्तौ, पृभिदि व्यधि गृधि धृषि दृशिभ्य इति कुप्रत्ययस्तस्य छन्दस्युभयथेति सार्व-धातुकसञ्ज्ञायां, रुधादिभ्यः श्नम् (पां ३। १। ७८।) इति श्नम्, मित्त्वादन्त्यादचः परो भवति, श्नसोरल्लोपः (पां ६। ४। ११।) इत्यकारलोपः, अनुस्वारपरसवर्णौ, अचः परस्मिन् पूर्वविधौ (पां १। १।५७।) इति प्राप्तस्य स्थानिवद्भावस्य नपदान्तद्विर्वचनवरेयलोप स्वरसवर्णानुस्वारदीर्घजश्चर्व्विधिषु (पां १। १। ५८।) इति तन्निषेधः। युवा, युमिश्रणामिश्रणयोः, कनिन् यु वृषि तक्षि राजि धन्वि द्यु प्रति-दिव इति कनिन्, नित्त्वादाद्युदात्तः। कविः, कुशब्दे, अचइरित्यौणादिक इः प्रत्ययः, प्रत्ययस्वरः। अमिसौजाः, अमितशब्दस्याव्ययपूर्वपदप्रकृ-तिस्वरत्वं, बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वेन तदेव शिष्यते। विश्वस्य, अशू प्रुषि लटि कणि खटि विशिभ्यः क्वन्निति क्वन्प्रत्ययः, कित्त्वाद्गुणा-भावः, नित्त्वादाद्युदात्तः। कर्म्मणः, डुकृञ्करणे, अन्येभ्योऽपि दृश्यन्ते (पां ३। २। १७८।) इति मनिन्प्रत्ययो नित्स्वरः। धर्त्ता, तृच श्चित्त्वादन्तोदात्तत्वं। वज्री, मत्वर्थीय इनिःप्रत्ययः, प्रत्ययस्वरः। पुरु-ष्टुतः, स्तुतस्तोमयोश्छन्दसि (पां ८। ३। १०५।) इति षत्वं, बहुषु प्रदेशेषु स्तुतः, थाथ घञ् क्ताज बित्रकाणां (पां ६। २। १४४।) इत्य-न्तोदात्तत्वं, तृतीयासमासे हि थाथादिस्वरापवादः, तृतीया कर्म्मणि (पां ६। २। ४८।) इति पूर्वपदप्रकृतिस्वरः स्यात्॥ ४॥

पञ्चमीमृचमाह त्वं बलस्येति। बलनामकः कश्चिदसुरो देवसम्ब-

---

* बिलमितिबर्गीयोबकारो लिखितमूलपुस्तकेदृष्टः।

धिनीर्गा अपहृत्य कस्मिंश्चिद्विले गोपितवान् तदानीमिन्द्र स्तद्विलं स्वसैन्येन समावृत्य तस्माद्विलाद्गा निःसारयामास, तदिदमुपाख्यानं, इन्द्रो बलस्य विलमपोर्णोदित्यादिब्राह्मणेषु मन्त्रान्तरेषु च प्रसिद्धं, तदेतद्बुद्धि निधायायं मन्त्रः प्रवर्त्तते। हे अद्रिवो वज्रयुक्तेन्द्र त्वं गोमतो बलस्य गोभिर्युक्तस्य बलनामकस्यासुरस्य सम्बन्धि विलं अपावः, स्वसैन्यमुखेनापावृतवानसि, तदानीं तुज्यमानासो बलेन हिंस्यमाना देवा अविभ्युषस्त्वदीयरक्षया बलादभीताः सन्तस्त्वामाविषुः प्राप्तवन्तः। अप, निपातत्वादाद्युदात्तः। अवः, हृञ् वरणे, लङ्सिप्, इतश्चलोपः परस्मैपदेषु (पां ३। ४। ९७।) इति सिप इकारलोपः, स्वादिभ्यः श्नुः, तस्य बहुलं छन्दसीति लुक्, गुणोरपरत्वं, हल्ङ्याब्भ्यो दीर्घात् (पां ६। १। ६८।) इत्यादिना हल्ङ्यादिलोपः, विसर्जनीयः, अडागमः। अद्रिवः, अद्रिरस्यास्तीति मतुप्, छन्दसीरः (पां ८। २। १५।) इति वत्वं, सम्बोधने, उगिदचां सर्वनामस्थाने धातोः (पां ७। १। ७०।) इति नुमागमः हल्ङ्यादिलोपः संयोगान्तस्य लोपः (पां ८। २। २३।) इति संयोगान्तलोपः, मतुवसोरु सम्बुद्धौ छन्दसि (पां ८। ३। १।) इति रुत्वं। विलं, नञ्विषयस्यानिसन्तस्येत्याद्युदात्तत्वं। अविभ्युषः, जिभीभये, लिट् द्विर्भावः अभ्यासस्य झषजशखे, लिटः क्वसुरादेशः, क्वादिनियमात् प्राप्तइट्, वस्वेकाजाद्घसां (पां ७। २। ६७।) इति नियमान्निवर्त्तते, जसि सर्वनामस्थाने ऽपि व्यत्ययेन भत्वाद्धसोः सम्प्रसारणं परपूर्वत्वं, ष्णासि वसि घसीनाञ्च (पां ८। ३। ६०।) इतिषत्वं, अचिश्नुधातुभ्रुवां य्वोरियङुवङौ (पां ६। ४। ७७।) इति स्थानेन प्राप्तमियङादेशं बाधित्वा, एरनेकाचो ऽसंयोगपूर्वस्य (पां ६। ४। ८२।) इति यणादेशः, नञ्समासः, अव्ययपूर्वपदप्रकृतिस्वरत्वं। तुज्यमानासः, तुजेर्हिंसार्थात्परस्य कर्म्मणि शटः स्थाने शानच्, सार्वधातुके यक्(पां ३। १। ६७।) इति यक्, तस्माददुपदेशादुत्तरस्य लसार्वधातुकस्यानुदात्तत्वं, यकएव प्रत्ययस्वरः शिष्यते। आविषुः, अवरक्षणगतिकान्तिप्रीतिषु, अस्मादृत्वर्थाल्लुङोभि, तस्य, सिजभ्यस्त विदिभ्यश्च (पां ३। ४। १०९।) इति जुस्, सिच इडागमः, आडजादीनां (पां ६। ४। ७२।) इत्यडागमः, आदेशप्रत्यययोः (पां ८। ३। ५९।) इति षत्वं॥ ५॥

## १६१ तवाहं शूर रातिभिः प्रत्यायं सिन्धुमावदन्१ उपातिष्ठन्त गिर्वणो विदुष्टे तस्य कारवः ॥

षष्ठीमृचमाह तवाहमिति। हे शूर, सङ्ग्रामे शौर्ययुक्तेन्द्र, तव रातिभिः कर्म्मसु त्वदीयैर्धनदानैर्निमित्तभूतैरहं होता प्रत्यायं त्वां पुनरागतोऽस्मि, पुरा बहुषु कर्म्मसु त्वत्तो धनस्य लब्धत्वादस्मिन् कर्म्मणि प्रत्यागमनमित्युच्यते, किं कुर्व्वन्, सिन्धुं स्यन्दमानं सोममावदन् सर्वतः कथयन्, अस्मिन् सोमयागे त्वदीयां धनदानकीर्त्तिं प्रकटयन्नित्यर्थः, हे गिर्वणः गीर्भिर्वणनीय इन्द्र, कारवः कर्त्तार ऋत्विग्यजमाना उपातिष्ठन्त, पुरा धनलाभार्थं त्वामुपस्थितवन्तः, उपस्थाय च तस्य तादृशस्यौदार्य्योपेतस्य ते तव धनदानं विदुर्जानन्ति। गिर्वणस्शब्दं यास्क इत्थं निर्ब्रूते, गिर्वणो देवो भवति गीर्भिर्वर्णयन्तीति। रेजो जरित्रेत्यादिषु चयोदशसु स्तोटनामसु कारुशब्दः पठितः। तव, युष्मदस्मदोर्ङसि (पां १।१।२११।) इत्याद्युदात्तत्वं। रातिभिः, दैदाने, मन्त्रे वृषेषपच मन विद (पां ३।३।९६।) इत्यादिना क्तिन्नुदात्तः। आयं, इणोलङ्, तस्थस्थमिपां (पां ३।१।१०१।) इत्यमादेशः, अदिप्रभृतिभ्यः शपः (पां २।४।७२।) इति शपोलुक्, अडागमः, वृद्ध्यायादेशौ, तिङुतिङ इति निघातः। सिन्धुं, स्यन्दू प्रस्रवणे, निदित्यनुवृत्तौ, स्यन्देः सम्प्रसारणं धश्चेत्युः प्रत्ययः, सम्प्रसारणं, धकारश्चान्तादेशः उणादिसिद्धः, नित्त्वादाद्युदात्तः। आवदन्, वदव्यक्तायां वाचि, लटः शतृ, शपः पित्त्वादनुदात्तत्वं, शतुश्च ससार्वधातुकस्वरेण धातुस्वर एव शिष्यते, आङासह, कुगति प्रादयः (पां २।२।१८।) इति समासः, क्त्वादुत्तरपदप्रकृतिस्वरत्वं। उपातिष्ठन्त, उपान्मन्त्रकरणे (पां १।३।२५।) इत्यात्मनेपदं। गिर्वणः, वनषणसम्भक्तौ, असुन्, आमन्त्रितस्य च (पां ८।१।१९।) इति निघातः। विदुः, विदज्ञाने, लट्, अदिप्रभृतिभ्यः शप इति शपोलुक्, विदोलटो वा (पां १।३।८३) इति झेरुसादेशः, पादादित्वान्न निघातः, संहितायां युष्मत्तत्ततक्षुष्वन्तः पादं (पां ८।३।१०३।) इति षत्वं, ष्टुनाष्टुः (पां ८।४।४१।) इत्युत्तरस्य तकारस्य ष्टुत्वं, तस्य, सावेकाचस्तृतीयादिः (पां ६।१।१९८।) इति विभक्तेरुदात्तत्वं प्राप्तं, नगोश्वन् सावर्वेति निषिध्यते। कारवः, कृवा पाजि मिखदिसाध्य शूभ्यउण् इत्युणप्रत्ययः, प्रत्ययस्वरः ॥ ६ ॥

१७१ मायाभिरिन्द्र मायिनं त्वं शुष्णमवातिर ।
विदुष्टे तस्य मेधिरास्तेषां श्रवांस्युत्तिर ॥
१८१ इन्द्रमीशानमोजसाभि स्तोमा अनूषत ।
सहस्रं यस्य रातय उत वा सन्ति भूयसीः ॥ २१ ॥

सप्तमीमृचमाह मायाभिरिति । हे इन्द्र, त्वं मायिनं नानाविधकपटोपेतं, शुष्णं भूतानां शोषणहेतुमेतन्नामकमसुरं, मायाभिस्तत्प्रतिकूलैः कपटविशेषैः, यद्वा तद्धोपायगोचरप्रज्ञाभिरवातिरः हिंसितवानसि, एतच्च यास्केनोक्तं, इन्द्रः शुष्णं जघानेति, शुष्णं पिप्रुमित्यादिमन्त्रे चायमर्थो विस्पष्टः । मेधिराः मेधावन्तोऽनुष्ठातारस्तस्य तादृशस्य ते तव महिमानं विदुर्जानन्ति, तेषां जानतामनुष्ठातॄणां अवांस्यन्नानि उत्तिर वर्द्धय । केतः केतुरित्यादिष्वेकादशसु प्रज्ञानामसु माया वयुनमिति पठितं। अवःशब्दं यास्को निर्वक्ति, अवइत्यन्ननाम श्रूयत इति सत इति । मायाभिः, माङ्माने, माङ्हा ससिभ्यो य इति य प्रत्ययः, प्रत्ययस्वरः। मायिनं, मायास्यास्तीति मायी, व्रीह्यादित्वादिनिप्रत्ययः, प्रत्ययस्वरः । शुष्णं, शुष शोषणे, अस्मादन्तर्भावितण्यर्थान्निदित्यनुवृत्तौ, ल्टषि शुषि उषिभ्यः कित्वेति न प्रत्ययः, नित्त्वादाद्युदात्तः । अतिरः, तरतेर्लङि व्यत्ययेन शपः, तस्य ङित्त्वेन गुणाभावात्, ऋतश्च इङ्धातोः (पां ७ । १ । १०० ।) इतीत्वं, रपरत्वं । विदुष्टेतस्य, गतमन्त्रेगतं । मेधिराः, मिष्ट मेधाहिंसनयोः, औणादिक इरन्, नित्त्वादाद्युदात्तः । श्रवांसि, नव्विषयत्वादाद्युदात्तः ॥ ७ ॥

अष्टमीमृचमाह इन्द्रमीशानमिति । स्तोमाः स्तोतार ऋत्विज ओजसा बलेन ईशानं जगतो नियामकमिन्द्रं अभ्यनूषत सर्वत्र स्तुतवन्तः, यस्य इन्द्रस्य रातयो धनदानानि सहस्रं सहस्रसङ्ख्योपेतानि सन्ति, उतवा अथवा भूयसीः सहस्रसङ्ख्याया अप्यधिकाः सन्ति, तमिन्द्रमिति पूर्वेणान्वयः । इन्द्रं, ऋत्वेन्द्रेत्यादिना रन्, नित्त्वादाद्युदात्तः, ईशानं, लटः शानच्, अदिप्रभृतिभ्यः शपः ( पां २ । ४ । ७२ । ) इति शपोलुक्, धातोरनुदात्तेत्त्वात्, तास्यनुदात्तेन्ङिददुपदेशात् (पां ६ । १ । १८६ । ) इति शानचोऽनुदात्तत्वं । ओजसा, नव्विषयस्यानिसन्तस्येत्याद्युदात्तः । स्तोमाः, अर्त्तिस्तुसुहीत्यादिना मन्प्रत्ययो नित्त्वादाद्युदात्तः । अनूषत, ष्टुस्तुतौ, ओनः ( पां ६ । १ । ६५ । ) इति नत्वं, लुङ्

## द्वादशसूक्तं।

१ १ १ अग्निं दूतं वृणीमहे होतारं विश्ववेदसं।
अस्य यज्ञस्य सुक्रतुं ॥

व्यत्ययेन तस्यादादेशः, च्लेः सिच् (पां ३।१।४४।) इति च्लेः सिच्, अस्य कुटादित्वेन सिचोङित्त्वाद्गुणाभावः, इडभावश्छान्दसः, दीर्घत्वञ्च, अडागमः। सहस्रं, कर्द्दमादीनाञ्चेति द्वितीयाक्षरमुदात्तं। रातयः, मन्त्रेवृषेत्यादिना क्तिन्नुदात्तः। उत, प्रातिपदिकस्वरः। वा, चादिरनुदात्तः। सन्ति, प्रत्ययाद्युदात्तत्वं, तिङ्ङतिङइति निघातो न भवति, यद्वृत्तान्नित्यं (पां ८।१।६६।) इति निषेधात्, सहि व्यवहितेऽपि भवतीत्युक्तं। भूयसीः, सहस्रादतिशयेन बह्व्यो भूयस्यः, अत्र विभक्त्यव्ययस्य सहस्रस्य सन्निधिबलादुपपदत्वप्रतीतेः, द्विवचनविभज्योपपदे तरबीयसुनौ (पां ५।३।५७।) इति बहुशब्दादीयसुन्, बहोर्लोपोभूच बहोः (पां ६।४।१५८।) इति ईकारलोपः प्रकृतेर्भूरित्यादेशश्च, ईयसुनो नित्त्वादाद्युदात्तत्वं, उगितश्च (पां ४।१।६।) इति ङीष्॥ ८॥ इति प्रथमस्य प्रथमे एकविंशो वर्गः॥

अग्निं दूतमित्यादिकस्य द्वादशर्चस्य सूक्तस्य कण्वपुत्रो मेधातिथिर्ऋषिः, अपवादाभावादनुवर्त्तमानं प्राग्घिरण्यस्तूपादित्युक्तं, गायत्रमेवछन्दः, अग्निदेवताकत्वं विस्पष्टं, अतएवानुक्रम्यते, अग्निं द्वादश, मेधातिथिः काण्व आग्नेयमग्निनेति, पादोद्यग्निदैवतो निर्मथ्य आहवनीयश्चेति, विनियोगस्तु प्रातरनुवाके आग्नेये क्रतौ गायत्रे छन्दसि अग्निं दूतमिति सूक्तं, अथैतस्या रात्रेर्विवासकाल इति खण्डे अग्निमीले, अग्निं दूतमिति सूत्रितं, तथा * पृष्ठ्यषडहस्य द्वीतीयेऽहनि इदमेव सूक्तमाज्यशस्त्रं पृष्ठ्यस्याभिप्लवेनोक्ते अहनीति खण्डे सूत्रितं, अग्निं दूतमिति द्वितीय इति दर्शपूर्णमासयोः सामिधेनीष्वग्निं दूतमित्येकां, नमः प्रवक्ते इति खण्डे सूत्रितं ईलेन्योनमस्यस्तिरोग्निं दूतं वृणीमह इति, अस्मिन् सूक्ते प्रथमामृचमाह अग्निं दूतमिति। अग्नेर्दूतत्वमेतन्मन्त्रव्याने तैत्तिरीयब्राह्मणे समाम्नायते, अग्निर्देवानां दूत आसी

---

* व्यहस्येति सो।

## १२१ अग्निमग्निं हवीमभिः सदा हवन्त विश्पतिं १ हव्यवाहं पुरुप्रियं ॥

दुश्ना काव्यो सूराणामिति, तादृशं देवदूतमग्निमस्मिन् कर्म्मणि हवीमहे सम्भजामः। कीदृशमग्निं होतारं देवानामाक्रातारं। विश्ववेदसं सर्वधनोपेतं। अस्य प्रवर्त्तमानस्य यज्ञस्य निष्पादकत्वेन सुकृतं शोभनकर्म्माणं शोभनप्रज्ञं वा। मघमित्यादिष्वष्टाविंशतिसङ्ख्यकेषु धननामसु वेदस्शब्दः पठितः। होतारं, क्रेञ् स्पर्द्धायां शब्देच, ताच्छील्यादिषु तृन्, बहुलं छन्दसीति सम्प्रसारणे परपूर्वत्वे गुणः, नित्त्वादाद्युदात्तः, विश्ववेदसं, बहुव्रीहौ विश्वं सञ्ज्ञायां (पां ६।२। १०६।) इति पूर्वपदान्तोदात्तत्वं, अस्य, ऊडिदम्पदाद्यप्युम् (पां ६। १। १७१।) इत्यादिना विभक्तेरुदात्तत्वं। सुक्रतुं, क्रत्वादयश्च (पां ६। २। ११८।) इत्याद्युदात्तत्वं ॥ १ ॥

द्वितीयामृचमाह अग्निमग्निमिति। यद्यप्यग्निः स्वरूपेणैक एव तथापि प्रयोगभेदादाहवनीयादिस्थानभेदात् पावकादिविशेषणभेदाद्वा बहुविधत्वमभिप्रेत्याग्निमग्निमिति वीप्सान्तं, हवीमभिराक्रानकारणैर्मन्त्रैः सदा हवन्त निरन्तरमनुष्ठातार आह्वयन्ति। कीदृशन्तं, विश्पतिं विशां प्रजानां होत्रादीनां पालकं। हव्यवाहं, यजमानसमर्पितस्य हविषो देवान् प्रति वोढारं, अतएव पुरुप्रियं बहूनां प्रीत्यास्पदं। अग्निमग्निं, नित्यवीप्सयोः (पां ८। १। ४।) इति वीप्सायां द्विर्भावः, तस्य परमाम्रेडितं (पां ८। १। २।) इत्युत्तरस्याम्रेडितसञ्ज्ञायां, अनुदात्तञ्च (पां ८। १। ३।) इत्यनुदात्तत्वं। हवीमभिः, क्रेञ् स्पर्द्धायां शब्देच, आक्रानकारणभूतेषु मन्त्रेषु स्वव्यापारस्वातन्त्र्यात् कर्त्रविवक्षया, अन्येभ्योऽपि दृश्यन्त इति कर्त्तरि मनिन् प्रत्ययस्तस्य छान्दस ईडागमः, बहुलं छन्दसीति धातोः सम्प्रसारणं, परपूर्वत्वं, गुणावादेशौ, नित्त्वादाद्युदात्तत्वं। सदा, सर्वैकान्यकिं यत्तदः (पां ५। ३। १५।) इत्यादिना सर्वशब्दाद्दाप्रत्ययः, सर्वस्य सोऽन्यतरस्यां दि (पां ५। ३। ६।) इति सर्वस्य सभावः, व्यत्ययेनाद्युदात्तत्वं। हवन्त, क्रेञोलट्, झस्यान्तादेशः, टेरेत्वाभावश्छान्दसः, शपि, बहुलं छन्दसीति सम्प्रसारणं, तिङः तिङइति निघातः। विश्पतिं, पत्यावैश्वर्य्ये (पां ६।२। १८।) इति पूर्वपदप्रकृतिस्वरे प्राप्ते परादिश्छन्दसि बहुलं

१३१ अग्ने देवाँ इहावह जज्ञानो वृक्तबर्हिषे १
असि होता न ईड्यः ॥
१४१ ताँ उशतो विबोधय यदग्ने यासि दूत्यं १
देवैरासत्सि बर्हिषि ॥

(पां ६।२।९९।) इत्युत्तरपदान्तोदात्तत्वं। हव्यवाहं, वह प्रापणे, वहश्च (पां ३।२।६४।) इति खिप्रत्ययः, छदुत्तरपदप्रकृतिस्वरत्वं। पुरुप्रियं, पुरूणां प्रियं, समासान्तोदात्तत्वं ॥ २ ॥

तृतीयामृचमाह अग्ने देवाँइति। हे अग्ने, जज्ञानः अरणेरुत्पन्नत्वं वृक्तबर्हिषे आस्तरणार्थं छिन्नेन बर्हिषा युक्ताय तं यजमानमनुग्रहीतुमिह कर्म्मणि हविर्भुजो देवानावह, नोऽस्मदर्थं होता देवानामाक्राता त्वमीड्यः स्तुत्योऽसि। देवानित्यत्र, संहितायां दीर्घादटि समानपाद इति रुत्वं। जज्ञानः, जनी प्रादुर्भावे, लिटः कानच्, गमहनेत्युपधालोपः, द्विर्वचनेऽचि (पां १।१।५९।) इति तस्य स्थानिवद्भावाद्द्विर्वचनं, चित्त्वादाद्युदात्तः। वृक्तबर्हिषे, ओव्रश्चूछेदने, निष्ठा (पां ३।२।१०२।) इति क्तप्रत्ययः, वस्य विभाषा (पां ७।२।१५।) इति इट्प्रतिषेधः, वृक्तं बर्हिर्यजमानाय येन वा ऋत्विजा, बहुव्रीहौ पूर्वपदप्रकृतिस्वरः। असि, अस्तेः सिप्, अदिप्रभृतिभ्यः शपः इति शपोलुक्, तासस्त्योर्लोपः (पां ७।४।५०) इति सकारस्य लोपः, पादादित्वान्न निघातः। होता, क्रियते स्माच्छील्यादिषु तृन्, बहुलं छन्दसीति सम्प्रसारणं, नित्त्वादाद्युदात्तः। ईड्यः, ईडस्तुतौ, ऋहलो र्ण्यत् (पां ३।१।१२४।) इति ण्यत्, तित्स्वरिते प्राप्ते, ईड वन्द वृ भ्रंस दुहां ण्यतः (पां ६।१।२१४।) इत्याद्युदात्तत्वं ॥ ३ ॥

चतुर्थीमृचमाह ताँ उशत इति। हे अग्ने यद्यस्मात् कारणात् दूत्यं यासि देवानां दूतकर्म्म प्राप्नोषि, तस्मात् कारणात् उशतो हविः कामयमानान् देवान् हविः स्वीकारार्थं विबोधय, विबोध्य च बर्हिष्यस्मिन् कर्म्मणि तैर्देवैः सहासत्सि आसीद आगत्योपविश। तान्, दीर्घादटिसमानपाद इति संहितायां रुत्वं, आतोटि नित्यं (पां ८।३।३।) इत्यनुनासिकभावः। उशतः, वशकान्तौ, लटः शतृ,

१ ५ १ घृताहवन दीदिवः प्रति ष्म रिषतो दह १
अग्ने त्वं रक्षस्विनः ॥

अदिप्रभृतिभ्यः शप इति शपोलुक्, ग्रहिज्यावयिव्यधि ( पां ६ । १ । १६ । ) इति सम्प्रसारणं, शतुरनुमोनद्यजादी ( पां ६ । १ । १७३ । ) इति विभक्तेरुदात्तत्वं । यासि, यद्वृत्तान्नित्यं ( पां ८ । १ । ६६ । ) इति निघातप्रतिषेधः । दूतस्य भागः कर्म्म वेति दूत्यं, दूतस्य भागकर्म्मणी ( पां ४ । ४ । १२० । ) इति यत्, तस्य तित्स्वरितापवादत्वेन, यतोऽनावः ( पां ६ । १ । २१३ । ) इति प्राप्तमाद्युदात्तत्वं सर्वे विधयश्छन्दसि विकल्पन्त इति निवर्त्तते, अतस्तित्स्वरितमित्येव भवति, शेषनिघातः । सत्सि, सीदसि, शद्लृविशरणगत्यवसादनेषु, लटः सिपि शपो बहुलं छन्दसीति लुक्, नलुमताङ्गस्य ( पां १ । १ । ६३ । ) इति प्रत्ययलक्षणप्रतिषेधात्, पा घ्रा ध्मा स्था म्ना दाण् दृश्यर्त्ति सर्त्तिशद सदां ( पां ७ । ३ । ७८ । ) इत्यादिना सीदादेशो न भवति । वर्हिषि, वृह वृहि वृद्धौ, वृंहेर्न लोपश्चेति इषिः प्रत्ययः, प्रत्यय स्वरेणेकार उदात्तः ॥ ४ ॥

पञ्चमीमृचमाह घृताहवन इति । हे घृताहवन घृतेनाहूयमान, दीदिवो दीप्यमानाग्ने, त्वं रक्षस्विनो रक्षोयुक्तान् रिषतो हिंसकान् शत्रून् प्रति अस्माकं प्रतिकूलान् दहस्म सर्वथा भस्मीकुरु । घृताहवन, घृतेनाहूयतेऽस्मिन्निति, करणाधिकरणयोश्च ( पां ३ । ३ । ११७ । ) इत्यधिकरणे ल्युट्, अत्र जुहोतेरविवक्षितकर्म्मत्वेनाकर्म्मकत्वात् घृतस्य करणत्वमेव नतु कर्म्मत्वं, अतो नैषा, तृतीया च होश्छन्दसि ( पां २ । ३ । ३ । ) इति कर्म्मणि तृतीया, किन्तु, कर्तृकरणयोस्तृतीया, ( पां २ । ३ । १८ । ) इति करणवाचिन्येव, अतः, कर्तृकरणे कृता बहुलं ( पां २ । १ । ३२ । ) इति समासः, तत्र पूर्वपदप्रकृतिस्वरापवादे कृदुत्तरपदप्रकृतिस्वरे प्रातिपदिकावस्थायामेव कृते सति पश्चाद्विभक्तावुत्पन्नायां, आमन्त्रितस्य च ( पां ६ । १ । १९८ । ) इत्याद्युदात्तत्वं । दीदिवः, दीव्यतेर्लिटः क्वसुस्तस्य, वस्वेकाजाद्घसां ( पां ७ । २ । ६७ । ) इति नियमादिडभावः, द्विर्वचनं, हलादिशेषः, उत्तरवकारस्य, लोपोव्योर्वलि ( पां ६ । १ । ६६ । ) इति लोपः, क्वसोः कित्त्वाद्गुणाभावः, तुजादीनां दीर्घोऽभ्यासस्य ( पां ६ । १ । ७ । ) इति

१ ६१ अग्निनाग्निः समिध्यते कविर्गृहपतिर्युवा १
हव्यवाड्जुह्वास्यः ॥ २२ ॥

दीर्घत्वं, अभ्यासस्य सम्बुद्धौ, उगिदचां सर्वनामस्थाने धातोः ( पां ७ । १ । ७० । ) इति नुम्, संयोगान्तस्य लोपः ( पां ८ । २ । २३ । ) इति सकारलोपे नकारस्य, मतुवसोरुसम्बुद्धौ छन्दसि ( पां ८ । ३ । १ । ) इति रुत्वं, विसर्गः, पदात्परत्वादामन्त्रितनिघातः । ननु पूर्वामन्त्रितस्याविद्यमानवत्त्वात् पादादित्वेन न निघातोपपत्तिः, न च नामन्त्रिते समानाधिकरणे सामान्यवचनं ( पां ८ । १ । ७३ । ) इत्यविद्यमानवत्त्वप्रतिषेधः, उभयोरग्निपदविशेषणत्वेन विशेषवचनत्वात्, अतएव परस्परमन्वयेनासामर्थ्यात्, समर्थः पदविधिः ( पां २ । १ । १ । ) इति च नियमात् पूर्वस्य न पराङ्गवद्भावः, येनैकपद्येन निघातः स्यात् । अतएव ह्वीडेरन्तेदिते सरखतीत्यादौ एथक् एथगाद्युदात्तत्वमिति, उच्यते, अत्र दीदिव इति नाग्निपदस्य विशेषणं, किन्तु घृताहवनपदस्यैव द्योतनार्थं, घृताहवन इति विशेष्यत्वेन विवक्षितत्वात्, विशिष्टस्य तु पश्चादग्निविशेषणता, तत्र दीदिवः पदं प्रति घृताहवनपदस्य विशेष्यत्वात्, नामन्त्रिते समानाधिकरणइत्यविद्यमानवत्त्वप्रतिषेधान्निघातोपपत्तिः, अतएव परस्परविशेषणविशेष्यभावेन सामर्थ्यात्, सुबामन्त्रिते पराङ्गवत्स्वरे ( पां २ । १ । २ । ) इति पराङ्गवद्भावे शेषनिघातेनापि स्वरोपपत्तिरिति, ईडेरन्त इत्यादौतु नैवं परस्परान्वय इति वैषम्यं । रिषतः, रुष रिष हिंसार्थाविति भौवादिकस्य लटः शपश्चादेशे शपि छान्दसो गुणाभावः, तौदादिकस्य वा रुश रिश हिंसायामित्यस्य छान्दसं षत्वं, विकरणस्य शपस्य ङित्त्वादगुणाभावः । रक्षखिनः रक्षस्शब्दात्, अस्मायामेधा स्रजो विनिः ( पां ५ । २ । १२१ । ) इति मत्वर्थीयो विनिस्तस्य प्रत्ययाद्युदात्तत्वं ॥ ५ ॥

अग्निमन्थने अग्निनाग्निः समिध्यत इत्येषानुवचनीया, प्रातर्वैश्वदेव्यां प्रेषित इति खण्डे सूचितं अग्निनाग्निः समिध्यते त्वं ह्यग्ने, अग्निनेति, एषैवाग्निमत इत्यस्यानुवाक्या, अथाग्नेय्य इति खण्डे अग्नावग्निप्रणयन इत्युपक्रम्य सूचितं, यद्वो वयं प्रविनामव्रतान्यग्निनाग्निः समिध्यत इति, तामेतां षष्ठीमृचमाह अग्निनाग्निरिति । अग्निराहवनीयाख्यः खस्मिन् प्रक्षिप्यमाणेनाग्निना निर्मन्थ्येन प्रणीतेन वा सह समि-

१७१ कविमग्निमुपस्तुहि सत्यधर्म्माणमध्वरे।
देवममीवचातनं॥

ध्यते सम्यग्दीप्यते । कीदृशोऽग्निः कविर्मेधावी । गृहपतिर्गृहस्य पालकः। युवा नित्यतरुणः। हव्यवाट्, हविषोवोढा। जुह्वास्यः, जुहू-रूपेण मुखेन युक्तः। गृहपतिः, पत्यावैश्वर्य्ये (पां ६।२।१८।) इति पूर्वपदप्रकृतिस्वरत्वं । युवा, युमिश्रणे, कनिन्युवृषि तक्षि राजि धन्विद्युप्रतिदिवइति कनिन्प्रत्यय औनादिकः, नित्त्वादाद्युदात्तः। हव्यं वहतीति हव्यवाट्, वहश्च (पां ३।२।६४।) इति ण्विप्रत्ययः, णित्त्वादुपधावृद्धिः, गतिकारकोपपदात् कृत् (पां ६।२।१०९।) इति कृदुत्तइपरप्रकृतिस्वरत्वं। जुह्वास्यः, हूयतेऽनयेति जुहूः, जुहोत्यादिभ्यः श्लुः (पां २।४।७५।) इति श्लुः, ऊवः श्लुवच्चेत्यौणादिकः क्विप्, तत्सन्नियोगाद्दीर्घश्च, श्लुवद्भावाद्द्विर्भावः, श्चुत्वजश्त्वे, प्रातिपदिक-स्वरेणान्तोदात्तः, जुहूरास्यं यस्येति बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वेन स एव शिष्यते, शेषनिघातः, यणादेशे, उदात्तस्वरितयोर्यणःस्वरि-तोऽनुदात्तश्च (पां ८।२।४।) इत्याकारः स्वरितः॥ ६॥ इति प्रथ-मस्य प्रथमे द्वाविंशो वर्गः॥

सूक्ते सप्तमीमृचमाह कविमग्निमिति। हे स्तोतृसंघ, अध्वरे क्रतौ अग्निमुपस्तुहि, उपेत्य स्तुतिं कुरु। कीदृशमग्निं, कविं मेधाविनं। सत्यधर्म्माणं, सत्यवदनरूपेण धर्म्मेणोपेतं । देवं, द्योतमानं। अमी-वचातमं, अमीवानां हिंसकानां शत्रूणां रोगाणां वा घातकं। सत्यं धर्म्मो यस्येति सत्यधर्म्मा, धर्म्मादनिच् केवलात् (पां ५।४।१२४।) इत्यनिच्, समासान्तः, अन्तः पदेन तस्य समासत्वाभिधानाद्बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वे शेषनिघातेनानुदात्तत्वं। अमीवशब्दो अमरो-गइत्यस्मात्, शेव यक्ष जिह्वा ग्रीवा अघामीवा इति वन्प्रत्यये इडागमे च निपातः, नित्त्वादाद्युदात्तः। चत चद यातनेचेत्यस्माद्धिंसार्थात् णिजन्तान्नन्द्यादित्वाल्ल्युः, युवोरनाकौ (पां ७।१।१।) इति योरनादेशः, णेरनिटि (पां ६।४।५१।) इति णेर्लोपः, लिति (पां ६।१।१९३।) इति धातोरकारस्योदात्तत्वं, नच स्वरे कर्त्तव्ये णिलोपस्य स्थानिवद्भावः, न पदान्तद्विर्वचनवरेयलोपस्वरसवर्णानु-स्वारदीर्घजश्चर्विधिषु (पां १।१।५८।) इति तन्निषेधात्,

१८१ यस्त्वामग्ने हविष्पतिर्दूतं देव सपर्यति १
तस्य स्म प्राविता भव ॥
१९१ यो अग्निं देववीतये हविष्मां आविवासति १
तस्मै पावक-मृळय ॥

अमीवानां चातन इति समासे ह्रदुत्तरपदप्रकृतिस्वरेण स एव शिष्यते ॥ ७ ॥

अष्टमीमृचमाह यस्त्वामग्न इति । हे अग्ने देव, यो हविष्मति-र्यजमानो दूतं देवदूतं त्वां सपर्यति परिचरति, तस्य यजमानस्य प्राविता भव स्म, अवश्यं रक्षको भव । ह्वयत इति हविः, अर्चि शुचि ऊहत्यादिना इसिः प्रत्यय औणादिकः, प्रत्ययस्वरेणोकार उदात्तः, हविषःपांतर्हविष्पतिः, नित्यं समासेऽनुत्तरपदस्थस्य ( पां ८ । ३ । ४५ । ) इति षत्वं, पत्यावैश्वर्य्य इति पूर्वपदप्रकृतिस्वरत्वं । सपर्यति, सपरशब्दात्, कण्ड्वादिभ्योयक् ( पां ३ । १ । २७ । ) इति यक्, धातु-प्रकरणादूणप्रतिषेधात्, यकः कित्त्वाच्च, सपरशब्दस्य धातुत्वात्, ततो विहितस्य यक आर्द्धधातुकत्वे सति, अतोलोपः ( पां ६ । ४ । ४८ । ) इत्यकारलोपः, सन्नाद्यन्ताधातवः ( पां ३ । १ । ३२ । ) इति धातुसञ्ज्ञायां तिप्, कर्त्तरि शप्, तस्मिन् पूर्वस्य, अतोगुणे ( पां ६ । १ । ९७ । ) इति परपूर्वत्वं, यकः प्रत्ययस्वरेणोदात्तत्वं, शपासहैकादेशस्य एकादेश उदात्तेनोदात्त इत्युदात्तत्वं, तिङ्ङ् तिङ-इति निघातो न भवति, यद्वृत्तान्नित्यं ( पां । ८ । १ । ६६ । ) इति प्रतिषेधात् ॥ ८ ॥

गार्हपत्याहवनीययोः परस्परसंसर्गे विहितस्य हविषो याज्या योऽग्निं देववीतय इत्येषा, अथाग्नेय इष्टय इति खण्डे सूचितं, यो अग्निं देववीतये कुवित्सुनो गविष्टय इति, तामेतां याज्यां सूक्तगतां नवमीमृचमाह यो अग्निमिति । हविष्मान् हविर्युक्तो यो यजमानो देववीतये देवानां हविर्भक्षणहेतुयागार्थमग्निमाविवासति, अग्नेः समीपे विशेषेणागत्य परिचर्य्यां करोति, हे पावकाग्ने, तस्मै मृळय तं यजमानं सुखय । देववीतये, वीगतिप्रजननकान्त्यशनखादनेष्वित्यस्मा-दशनार्थात् क्तिन्, देवानां वीतिर्यस्मिन् यागे स देववीतिः, बव्रीहौ पूर्वपदप्रकृतिस्वरत्वं । हविष्मान्, नव्विषयस्यानिसन्तस्येति मत्वर्थदी-

११०१ स नः पावक दीदिवोऽग्ने देवाँ इहावह ।
उप यज्ञं हविश्च नः ॥

साद्विःशब्दोऽन्तोदात्तः, मतुपः सर्वानुदात्तत्वात् स एव शिष्यते। आविवासति, वागतिगन्धनयोरित्यस्मादन्तर्भावितण्यर्थादागमयितुमिच्छतीत्यस्मिन्नर्थे सन्, आङ्पूर्वेच्छा परिचर्य्यायां पर्य्यवस्यतीति विवासतिशब्दः परिचर्य्यार्थे निघण्टौ पठितः, द्विर्भावः, अभ्यासस्य झखः, सन्यतः (पां ७। ४। ७९।) इतीत्वं, ज्ञित्यादिर्नित्यं (पां ६। १। १९७।) इत्याद्युदात्तत्वं, तिङ्ङतिङ इति निघातो न भवति, यद्वृत्तान्नित्यमिति प्रतिषेधात्, तिङ्चोदात्तवति (पां ८। १। ७१।) इत्यङो निघातः, सहसुपा (पां २। १। ४।) इत्यत्र सहेतियोगविभागात्, आङस्तिङासह समासे समासान्तोदात्तत्वे प्राप्ते, परादिश्छन्दसि बहुलं (पां ६। २। १९९।)* इत्युत्तरपदाद्युदात्तत्वं। तस्मै, क्रियाग्रहणं कर्त्तव्यमिति वार्त्तिकेन सम्प्रदाने चतुर्थी ॥ ९ ॥

पवमानेष्टावग्नेः पावकस्यानुवाक्या, स नः पावक दीदिव इति, पौर्णमासेष्टि पशुसोमा उपदिष्टा इति खण्डे सूचितं स नः पावक दीदिवोऽग्ने पावकरोचिषेति। तामेतामनुवाक्यां सूक्तगतां दशमीमृचमाह स नः पावक इति। हे दीदिवो दीप्यमान पावक श्रेष्ठकाग्ने, स त्वं नोऽस्मदर्थं इह देवयजनदेशे देवानावह, ततो नोऽस्मदीयं यज्ञं तत्रत्यं हविश्च उप देवसमीपे प्रापयेति श्लेषः। दीदिवः, दिवु क्रीडादौ, छन्दसि लुङ् लङ् लिटः (पां ३। ४। ६।) इति वर्त्तमाने लिट्, क्वसुर्द्विर्भावो हलादिश्लेषः, तुजादीनां दीर्घोऽभ्यासस्य (पां ६। १। ७।) इत्यभ्यासस्य दीर्घत्वं, वस्वेकाजाद्धसां (पां ७। २। ६७।) इति नियमादसो रिट्प्रतिषेधः, खोपोयोर्वलि (पां ६। १। ६६।) इति वकारलोपः, सम्बुद्धौ, उगिदचां (पां ७। १। ७०।) इत्यादिना नुम्, हल्ङ्यादिलोपः, मतुवसोरुसम्बुद्धौ (पां ८। ३। १।) इति रुत्वं, विसर्गः। अग्ने, पादादित्वान्न निघातः। देवाँ इहेत्यत्र, दीर्घादटिसमानपादे (पां ८। ३। ९।) इति रुत्वं, आतोऽटि नित्यं (पां ८। ३। ३।) इत्याकारः सानुनासिकः, भो भगो अघो अपूर्वस्य

* उत्तरपदान्तोदात्तत्वं सं।

१११ स नः स्तवान आभर गायत्रेण नवीयसा १
रयिं वीरवतीमिषं ॥
११२ अग्ने शुक्रेण शोचिषा विश्वाभिर्देवहूतिभिः १
इमं स्तोमं जुषस्व नः ॥ २३ ॥

योऽग्नि ( पां ८ । ३ । १७ । ) इति रेर्यकारः, स च, लोपः शाकल्यस्य ( पां ८ । ३ । १९ । ) इति लुप्यते, तस्यासिद्धत्वादुणो न भवति । इह, इदमोहः ( पां ५ । ३ । ११ । ) इति सप्तम्यन्ता ङः प्रत्ययः, तद्धितान्तत्वात् प्रातिपदिकत्वे, सुपोधातुः प्रातिपदिकयोः ( पां २ । ४ । ७१ । ) इति सप्तम्या लुक्, तद्धितश्चासर्वविभक्तिः ( पां १ । १ । ३८ । ) इत्यव्ययसञ्ज्ञायां, अव्ययादाप्सुपः (पां २ । ४ । ८२ । ) इत्युत्तरस्याः सप्तम्या लुक्, अकारः प्रत्ययस्वरेणोदात्तः ॥ १० ॥

एकादशीमृचमाह स नः स्तवान इति । हे अग्ने, नवीयसा नवतरेण पूर्वकैरसम्पादितेन गायत्रेण गायत्रीच्छन्दस्केनानेन सूक्तेन स्तवानः स्तूयमानः स त्वं नोऽस्मदर्थं रयिं धनं, वीरवतीं शूरयुक्तप्रभूत्यापत्ययुक्तां इषमन्नञ्चाभर सम्पादय । स्तवानः, स्तुञ्स्तुतौ, धात्वादेः षः सः ( पां ६ । १ । ६४ । ) इति षः सः । खरितजितः कर्त्रभिप्राये ( पां १ । ३ । ७२ । ) इत्यादिनात्मनेपदं, लटः शानच्, कर्त्तरिशप्, बहुलं छन्दसीति शपो लुगभावः, गुणावादेशौ, आनेमुक् ( पां ७ । २ । ८२ । ) इति मुग् न भवति, अनित्यमागमशासनमित्यागमानुशासनस्यानित्यत्वाच्छपः पित्त्वादनुदात्तत्वं शानचश्चित्त्वादन्तोदात्तत्वादुपदेशाच्छपः परत्वाल्लसार्वधातुकानुदात्तत्वं, धातुस्वर एव शिष्यते । भर, हृग्रहोर्भश्छन्दसीति भत्वं । गायत्रेण, गायत्र्याः सम्बन्धि गायत्रं, तस्येदं ( पां ४ । ३ । १२० । ) इत्यण्प्रत्ययः प्रत्ययस्वरः । नवीयसा, नवशब्दादातिशायनिक इयसुनप्रत्ययः, नित्त्वादाद्युदात्तः । वीरवतीं, मतुप्ङीषोः पित्त्वादनुदात्तत्वं, अकारः प्रातिपदिकस्वरेणोदात्तः ॥ ११ ॥

द्वादशीमृचमाह अग्ने शुक्रेणेति । हे अग्ने, शुक्रेण शोचिषा त्वदीयश्वेतवर्णदीप्त्या विश्वाभिर्देवहूतिभिस्त्वत्कृतसर्वदेवताज्ञानसाधनस्तोत्रैश्च युक्तस्त्वं नोऽस्मदीयमिमं स्तोमं स्तोत्रविशेषं जुषस्व सेवस्व । विश्वशब्दो विशेः क्वनिति क्वनन्तो नित्त्वादाद्युदात्तः । देवहूतिभिः,

## त्रयोदशर्चसूक्तं।

१११ सुसमिद्धो न आवह देवाँ अग्ने हविष्मते।
होतः पावक यक्षि च॥

देवशब्दः पचाद्यजन्तश्चित्त्वादन्तोदात्तः, देवानां हूतय आह्वाना-न्यासु स्तुतिष्विति देवहूतयः स्तुतयः, बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वं। स्तूयतेऽनेनेति स्तोमः, अर्त्तिस्तुसुहुसृधृदृभ्यादिना मन्, नित्त्वादाद्युदात्तः॥१२॥ इति प्रथमस्य प्रथमे त्रयोविंशो वर्गः॥ २३॥

सुसमिद्धइत्यादिकं द्वादशर्चमाप्रीसूक्तं, तस्य काण्वो मेधातिथि-र्ऋषिः, गायत्रं छन्दः, प्रत्यृचं प्रतीयमानाः सुसमिद्धतनूनपादादिका द्वादशदेवताः, तथा चानुक्रमणिकायामृक्सङ्ख्यामृषिच्छन्दस्यानुवृत्ति-बलात् सिद्धवत्कृत्य देवता उदाहृताः, सुसमिद्ध इतीध्मः समिद्धो वाग्निस्तनूनपान्नराशंस इलो वर्हिर्देवीर्द्वार उषासा नक्ता दैव्यौ होतारौ प्रचेतसौ तिस्रो दैव्यः सरस्वतीलाभारत्यस्त्वष्टात्वनस्पतिस्वाहा हुतय इति प्रत्यृचं देवता एतदाप्रीसूक्तमिति, विनियोगस्तु पञ्चौ सुसमिद्धो न आवहेति, काण्ववदाप्रीसूक्तं, एकादशप्रयाजा इति खण्डे सूचितं, समिद्धो अद्येति सर्वेषां यथर्ध्विवेति, तस्मिन् सूक्ते प्रथमा-मृचमाह सुसमिद्धो न इति। हे अग्ने, सुसमिद्धनामकस्त्वं नोऽस्मदी-याय हविष्मते यजमानाय तदनुग्रहार्थं देवानावह, हे पावक शोधक होतर्होमनिष्पादकाग्ने यक्षि च यज च। सुसमिद्धः, समः क्रिया-विशेषणत्वेन गतिसञ्ज्ञकत्वात् प्रादिसमासः, शोभनवाचिनः सुशब्दस्य तु, विशेषणं विशेष्येण बहुलं (पां २।१।५७।) इति समिद्ध-पदेन कर्मधारयः समासः, सुशब्दः प्रातिपदिकस्वरेणोदात्तः, कर्म-धारयेऽनिष्ठा (पां ६।२।१४।) इति पूर्वपदप्रकृतिस्वरत्वं, क्रिया-विशेषणत्वे हि सुशब्दस्य गतिसञ्ज्ञकत्वात् प्रादिसमासे, गतिरनन्तरः (पां ६।२।४९।) इति समो यदुदात्तत्वं तदेव कृदुत्तरपदप्रकृति-स्वरत्वेन स्थास्यतीति सुशब्दोऽनुदात्तः स्यात्। देवाँ अग्ने, पूर्ववद्वृत्वा-नुनासिकौ। हविष्मते, हविरस्यास्तीति मतुप्, तसौ मत्वर्थे (पां १।४।१९।) इति भत्वेन पदत्वस्य बाधितत्वान्न रुत्वं। होतः पाव-कशब्दयोरामन्त्रितयोः पृथक् पृथगेव क्रियान्वये परस्परमसामर्थ्यात् पराङ्गवद्भावान्न तन्निबन्धनमेकस्वर्यं, न च द्वितीयस्यामन्त्रितस्याष्टमिक

१२१ मधुमन्तं तनूनपाद्यज्ञं देवेषु नः कवे ।
अद्या कृणुहि वीतये ॥

निघातेनैकस्वर्यं, आमन्त्रितं पूर्वमविद्यमानवत् (पां ८ । १ । ७२ ।) इति पूर्वस्याविद्यमानवत्त्वेन पदात्परत्वाभावात्, पादादित्वाच्च परस्परसामानाधिकरण्येऽपि होतरित्यस्य विशेषणत्वेन समानमेवाविद्यमानवत्त्वं, अतएवाविद्यमानवत्त्वात् सामर्थ्येऽपि न पराङ्गवद्भाव इति नैकस्वर्यसिद्धिः, अतो होतरिति विशेष्यं, अतः पुनातीति पावक इत्यवयवप्रसिद्धिस्वीकारेण विशेषणत्वात् होतरितिविशेष्यं, तच्च सामान्यवचनमिति, नामन्त्रिते समानाधिकरण इत्यविमानवत्त्वप्रतिषेधात्, पदात्परत्वादपादादित्वाच्च द्वितीयामन्त्रितस्याष्टमिकनिघातेन पराङ्गवद्भावे सति शेषनिघातेन सर्वानुदात्तत्वसिद्धिः । यच्चि, यजेर्बाटः सिप्, बहुलं छन्दसीति शपोलुक्, व्रश्चादिना षत्वं, षढोः कः सीति कत्वं, सेर्हिरादेशश्छान्दसत्वान्न भवति, सिपः पित्त्वेनानुदात्तत्वाद्धातुस्वर एव शिष्यते, न च तिङ्ङ् तिङ इति निघातः, पूर्वस्य पावकेत्यामन्त्रितस्याविद्यमानवत्त्वेन पदादपरत्वात्, अतएव तस्याव्यवधायकत्वेन होतरित्यपेक्षया निघातः स्यादितिचेन्न, यच्चिपदापेक्षया होतरित्यस्यापि पूर्वत्वेनाविद्यमानवत्त्वात्, नतु नामन्त्रिते समानाधिकरण इति तस्य निषिद्धमविद्यमानवत्त्वं, न च पावकस्याविद्यमानवत्त्वेन समानाधिकरणपरत्वाभावः, यच्चिपदस्यैवहि कार्थं प्रातिपदिकपदं पूर्वत्वादविद्यमानवत्त्वात्, होतरिति पदं कार्थमविद्यमानवत्त्वप्रतिषेधं प्रति तु परत्वाद्विद्यमानवदेवेति भवति, एवं होतरित्यस्याविद्यमानवत्त्वप्रतिषेधः, अतस्तस्य विद्यमानवत्त्वात्तदपेक्षया यच्चीत्यस्य निघातः प्राप्नोत्येव, सत्यं, अत्र यच्चीत्यस्य चशब्दपरत्वात्, चादिषु च (पां ८ । १ । ५८ ।) इति निघातप्रतिषेधो भविष्यतीत्यदोषः ॥ १ ॥

द्वितीयामृचमाह मधुमन्तमिति । हे कवे मेधाविन् अग्ने, तनूनपादेतन्नामकस्त्वं अद्यास्मिन्दिने नोऽस्मदीयं मधुमन्तं रसवन्तं यज्ञं हविर्वीतये भक्षणार्थं देवेषु कृणुहि कुरु प्रापयेत्यर्थः । मधुमन्तं, फालिपाटिनमिमनिजनां गुक्पटिनाकिधतस्येति मन्यतेरुः प्रत्ययो धकारश्चान्तादेशः, निदित्यनुवृत्तेः प्रत्ययस्य नित्त्वादाद्युदात्तो मधुशब्दः ।

१ ३ १ नराशंसमिह प्रियमस्मिन्यज्ञ उपह्वये १
मधुजिह्वं हविष्कृतं ॥

तनूनपात्, आमन्त्रितनिघातः। अद्य, सद्यःपरुत्परार्य्यैषमः (पां ५।३।२२।) इत्यादिना अस्मिन् काल इत्यर्थे द्यप्रत्ययान्तो निपातितः, प्रत्ययस्वरेणान्तोदात्तः, अत्र, तद्धितश्चासर्वविभक्तिः (पां १।१।३८।) इत्यव्ययत्वात्, अव्ययादाप् सुपः (पां २।४।८२।) इत्युपरि सप्तम्या लुक्, संहितायां, अन्येषामपि दृश्यते (पां ६।३।१३७।) इति दीर्घत्वं। कृणुहि, कृविहिंसाकरणयोश्च, इदितोनुम् धातोः (पां ७।१।५८।) इतिनुम्, लोटः सेर्हिरादेशः, धिन्विकृण्वोरच (पां ३।१।८०।) इति शपोऽपवादो विकरण उः प्रत्ययः, तत्सन्नियोगेन उकारस्याकारः, तस्य अतोलोपः (पां ६।४।४८।) इति लोपः, तस्य स्थानिवद्भावाल्लघूपधगुणो न भवति, उतश्च प्रत्ययादसंयोगपूर्वात् (पां ६।४।१०६।) इति हेर्लुङ् न भवति, उतश्च प्रत्ययाच्छन्दो वावचनमिति वचनात्, तिङ्ङ् तिङ इति निघातः। वीतये, मन्त्रेवृषेषपचमन विदभू वीरा उदात्ताः (पां ३।३।९६।) इति क्तिन्नुदात्तः ॥ २ ॥

तृतीयामृचमाह नराशंसमिति। इह देवयजनदेशे अस्मिन् प्रवर्त्तमाने यज्ञे नराशंसमेतन्नामकमग्निं उपह्वये आह्वयामि। कीदृशमग्निं प्रियं देवानां प्रीतिहेतुं। मधुजिह्वं मधुरभाषिजिह्वोपेतं माधुर्य्यरसास्वादकजिह्वोपेतं वा। हविष्कृतं, हविषो निष्पादकं। नराशंसमित्यत्र, नराशब्दो नृनयइत्यस्मादवन्तः, प्रत्ययस्य पित्त्वाद्धातुस्वर एव शिष्यते, शंसत्यस्मिन्निति शंसः, हलश्च (पां ३।३।१२१।) इत्यधिकरणे घञ्, नराणां शंस इति समासे कृदुत्तरपदप्रकृतिस्वरत्वे प्राप्ते, उभे वनस्पत्यादिषु युगपत् (पां ६।२।१४०।) इति पूर्वोत्तरपदे प्रकृतिस्वरे भवतः, अतएव वनस्पत्यादिषु पाठान्नराशब्दस्य दीर्घत्वं। इह, इदमो हः (पां ५।३।११) इति हः प्रत्ययः, इदम इश्, (पां ५।३।३।) इति इशादेशः, प्रत्ययस्वरः। प्रियं प्रीणातीति प्रियः, इगुपधज्ञाप्रीकिरः कः (पां ३।१।१३५।) इति कः प्रत्ययः प्रत्ययस्वरः। अस्मिन्, ऊडिदमित्यादिना विभक्तेरुदात्तत्वं। ह्वये, निघातः। मधुशब्दस्याद्युदात्तत्वमुक्तं, बहुव्रीहौ पूर्वपदप्रकृति-

१४१ अग्ने सुखतमे रथे देवाँ ईलित आवह।
असि होता मनुर्हितः॥

स्वरेण स एव शिष्यते। हविष्कृतं, हविष्करोतीति हविष्कृत्, क्विपि, ह्रस्वस्यपितिकृति तुक् (पां ६।१।७१।) इति तुक्, नित्यं समासेऽनुत्तरपदस्थस्य (पां ८।३।४५।) इतिषत्वं, कृदुत्तरपदप्रकृतिस्वरत्वं॥ ३॥

चतुर्थीमृचमाह अग्ने सुखतमइति। इट्शब्दाभिधेय हे अग्ने, ईलितोऽस्माभिः स्तुतः सन् सुखतमेऽतिशयेन सुखहेतौ कस्मिंश्चिद्रथे देवान् स्थापयित्वा कर्म्मभूमावावह, इट्शब्दाभिधेयत्वमत्र सूचयितुं ईलित इति विशेषणं। मनुर्हितः मनुना मन्त्रेण, मनुष्येण वा यजमानादिरूपेण हितोऽत्र स्थापितस्त्वं होता देवानामाह्वातासि। सुखतमे, सुखमस्मिन्नस्तीति मतुप्, तस्य गुणवचनेभ्यो मतुपोलुग्वक्तव्य इति लुक्, अतिशयेन सुखः सुखतमः, तमपोऽनुदात्तत्वात् प्रातिपदिकस्वरः। रथे, रमु क्रीडायां, रमन्तेऽस्मिन्निति रथः, हनि कुषिनीरमिकाशिभ्यः क्थन्निति क्थन्प्रत्ययः, एकाचउपदेशेऽनुदात्तात् (पां ७।२।१०।) इति इट्प्रतिषेधः, अनुदात्तोऽपदेशे (पां ६।४।३७।) इत्यादिना मकारलोपः, नित्त्वादाद्युदात्तत्वं। ईलितः, ईडस्तुतौ, निष्ठा (पां ३।२।१०२।) इति क्तः, इडागमस्तस्यागमा अनुदात्ता इत्यनुदात्तत्वं, प्रत्ययस्वरः। देवाँ, देवानिति नकारस्य संहितायां, दीर्घादटिसमानपाद इति रुत्वं, आतोऽटिनित्यं (पां ८।३।३।) इत्याकारस्य सानुनासिकभावः, भोभगो अघो (पां ८।३।१७।) इत्यादिना रोर्यत्वं, तस्य, लोपः शाकल्यस्य (पां ८।३।१९।) इति लोपः, तस्यासिद्धत्वाद्गुणो न भवति। आ, निपातत्वादाद्युदात्तः। असि, अस भुवि, लटः सिप्, अदिप्रभृतिभ्यः शपः (पां २।४।७२।) इति शपोलुक्, तासस्त्योर्लोपः (पां ७।४।५०।) इति सकारस्य लोपः, होता, ताच्छील्ये तृन्, सौ, ऋदुशनस्पुरुदंशो, (पां ७।१।९४।) इत्यादिना अनङ्, ङित्त्वादन्तादेशः, अप्तृन्तृच्स्वसृ (पां ६।४।११।) इत्यादिना उपधादीर्घः, हाल्ङ्यादिलोपनलोपौ, नित्त्वादाद्युदात्तः। मनुर्हितः, मन्यत इति मनुः, मनज्ञाने, शृस्वृस्निहित्रप्यसि वसिहनि क्लिदिबन्धिमनिभ्यश्चेत्युः प्रत्यय औणा-

१५१ स्तृणीत बर्हिरानुषग्घृतपृष्ठं मनीषिणः १
यत्रामृतस्य चक्षणं ॥

दिक्कः, तत्र निदित्यनुदात्तेर्नित्वादाद्युदात्तः । हितः, दधातेर्निष्ठेति कर्म्मणि क्तः, दधातेर्हिः (पां ७ । ४ । ४२ ।) इति हिरादेशः, मनुना-हित इति समासे ङीयायाः स्थाने, सुपांसुलुक् (पां ७ । १ । ३९ ।) इत्यादिना खित्यादेशस्तस्य रुत्वं, सुलुगभावश्छान्दसः, ङीया कर्म्मणि (पां ६ । २ । ४८ ।) इति पूर्वपदप्रकृतिस्वरत्वं ॥ ४ ॥

पञ्चमीमृचमाह स्तृणीत बर्हिरिति । हे मनीषिणो बुद्धिमन्तऋत्विजो, बर्हिरास्तरणीयं दर्भं स्तृणीत वेदेरुपर्य्याच्छादयत, अत्रापि बर्हिर्नामकोऽग्निः स्तूयते । कीदृशं बर्हिरास्तरणीयं आनुषक् अनुक्रमेण सक्तं परस्परं सम्बद्धं । पुनः कीदृशं घृतपृष्ठं घृतपूर्णानां स्रुवां बर्हिष्यासादितत्वात् घृतं पृष्ठे उपरिभागे यस्य बर्हिष स्तद्घृतपृष्ठं, यत्र यस्मिन् बर्हिषि अमृतस्य अमृतसमानस्य घृतस्य चक्षणं दर्शनं भवति, यद्वा अमृतस्य मरणरहितस्य देवस्य बर्हिर्नामकस्याग्नेर्दर्शनं भवति, तद्बर्हिस्तृणीतेति पूर्वत्रान्वयः । स्तृणीत, स्तृञ् आच्छादने, लोट्, मध्यमपुरुषस्य बऊवचनं, लोटोलङ्वत् (पां २ । ४ । ८५ ।) इति लोटो लङ्वद्भावः, तस्यस्मिपान्तात्तन्तामः (पां ३ । ४ । १०१ ।) इति यस्य तादेशः, क्र्यादिभ्यः श्ना (पां ३ । १ । ८१ ।) इति श्ना, ईहल्यघोः (पां ६ । ४ । ११३ ।) इतीत्वं, ऋवर्णाच्चेति वक्तव्यमिति वार्त्तिकेन रुत्वं, घ्रादीनां ङ्कृतः (पां ७ । ३ । ८० ।) इति धातोर्ङ्कत्वं, सतिशिष्टस्वरबलीयस्त्वमन्यत्रविकरणेभ्य इत्यत्रास्तिङ एव प्रत्ययस्वरेणोदात्तत्वं । बर्हिः, बृंहेर्नलोपश्चेति इसुप्रत्ययनलोपौ, प्रत्ययस्वरः । आ समन्तादनुषञ्जतीत्यानुषक्, षन्ज सङ्गे, धात्वादेः षः सः (पां ६ । १ । ६४ ।) इति षस्य सत्वं, क्विप्च (पां ३ । २ । ७६ ।) इति क्विप्, अनिदितांहलः (पां ६ । ४ । २४ ।) इति नलोपः, आङ्न्योरुपसर्गयोः प्राक्प्रयोगः, गतिसमासः, उपसर्गात्सुनोति (पां ८ । ३ । ६५ ।) इत्यादिना षत्वं । घृतपृष्ठं, घृत्तरणादीयोः, निष्ठेति क्तः, प्रत्ययस्वरेणोदात्तः, घृतयुक्तं पृष्ठमस्येति बऊव्रीहौ पूर्वपदप्रकृतिस्वरत्वं । मनीषिणः, आमन्त्रितनिघातः । अमृतस्य, न विद्यते मृतं मरणमस्मिन्नित्यमृतं बऊव्रीहौ पूर्वपदप्रकृतिस्वरत्वं बाधित्वा, नञ्सुभ्यां (पां ६ । २ । १७२ ।) इत्यु-

१६१ विश्रयन्तामृतावृधो द्वारो देवीरसश्चतः ।
अद्या नूनं च यष्टवे ॥ २४ ॥

त्तरपदान्तोदात्तत्वे प्राप्ते, नञोजरमरमित्रमृताः ( पां ६ । २ । ११६ । ) इत्युत्तरपदाद्युदात्तत्वं । चक्षणं, चक्षिङ् व्यक्तायां वाचि, वागभिव्यक्तिवाची धातुरिहाभिव्यक्तिमात्रं लक्षयति, ल्युट्च ( पां ३ । ३ । ११५ । इति भावे ल्युट्, योरणादेशः, तस्यार्द्धधातुकत्वात्, चक्षिङः ख्याञ् ( पां २ । ४ । ५४ । ) इति ख्याञादेशे प्राप्ते, असनयोश्चेतिवार्त्तिकेन प्रतिषेधः ॥ ५ ॥

षष्ठीमृचमाह विश्रयन्तामिति । द्वारो यज्ञशालाद्वाराणि विश्रयन्तां कवाटोद्घाटनेन विव्रियन्तां । कीदृश्यो द्वारः, ऋतावृधः, ऋतस्य सत्यस्य यज्ञस्य वा वर्द्धयित्र्यः, । देवीर्द्योतमानाः । असश्चतः, असश्चन्त्यः, उद्घाटनेन न प्रवेष्टृपुरुषसङ्गरहिताः । यद्वा असश्चतः प्रवेष्टृपुरुषरहितान् यत्र गृहान् तत्पुरुषप्रवेशाय द्वाराभिमानिन्यः, एतत्सञ्ज्ञिका अग्निविशेषमूर्त्तयो विश्रयन्तां विशेषेण सेवन्तां, द्वारसेवया तत्र पुरुषप्रवेशेन वा किं प्रयोजनमिति तदुच्यते, अद्य अस्मिन्दिने नूनमवश्यं यष्टवे यष्टुं, चकाराद्दिनान्तरेष्वपीति द्रष्टव्यं । ऋतावृधः, ऋतं वर्द्धयन्तीत्यर्थे वृधेरन्तर्भावितण्यर्थात्, क्विप्च ( पां ३ । २ । ७६ । ) इति क्विप्, उपपदसमासः, अन्येषामपि दृश्यते ( पां ६ । ३ । १३७ । ) इति पूर्वपदस्य दीर्घत्वं, वृधिर्धातुस्वरेणोदात्तः, कृदुत्तरपदप्रकृतिस्वरत्वेन स एव शिष्यते । देवीः, वाच्छन्दसि ( पां ६ । १ । १०६ । ) इति पूर्वसवर्णदीर्घत्वं, देवशब्दात् पचाद्यजन्तात्, पुंयोगादाख्यायां ( पां ४ । १ । ४ । ) इति ङीष्, प्रत्ययस्वरेणोदात्तः, विभक्त्या सह, एकादेश उदात्तेनोदात्तः ( पां ८ । २ । ५ । ) इत्युदात्तः । असश्चतः, षञ्ज षस्जगतौ, जकारस्य व्यत्ययेन चकारः, लटः शत्रादेशः, द्वाराभावे न विद्यन्ते षश्चन्तो गच्छन्तो येषु प्राग्वंशादिषु तान् असश्चतः । अद्य, अस्मिन् काल इत्यर्थे, सद्यः परुत् ( पां ५ । ३ । २२ । ) इत्यादिना द्यप्रत्ययान्तो निपातितः, तद्धितश्चासर्वविभक्तिः ( पां १ । १ । ३८ । ) इत्यव्ययसञ्ज्ञकत्वात् परस्या विभक्तेर्लुक्, प्रत्ययस्वरेणान्तोदात्तः, संहितायां, अन्येषामपि दृश्यते ( पां ६ । ३ । १३७ । ) इति दीर्घत्वं । नूनं, एवमादीनामन्त इत्यन्तोदात्तत्वं । यष्टवे, यजेः, तुमर्थे से सेनसेऽसेन्

१७१ नक्तोषासा सुपेशसास्मिन्यज्ञ उपह्वये ।
इदं नो बर्हिरासदे ॥
१८१ ता सुजिह्वा उपह्वये होतारा दैव्या कवी
यज्ञं नो यक्षतामिमं ॥

क्से क्सेनथै क्थेन् कथै कथैन् ग्थै ग्थैन् तवै तवेङ् तवेनः (पां ३। ४। ९।) इति तुमर्थे तवेन् प्रत्ययः, व्रश्चादिना षत्वं, नित्त्वादाद्युदात्तः ॥ ६ ॥ इति प्रथमस्य प्रथमे चतुर्विंशो वर्गः ॥ २४ ॥

सप्तमीमृचमाह नक्तोषासेति । नक्तशब्दः, उषस्शब्दश्च लौकिककालवाचिनौ, इह तु तत्कालाभिमानिवह्निमूर्त्तिद्वये प्रयुज्येते, नक्तोषासा नक्तोषोनामिके वह्निमूर्त्ती अस्मिन् प्रवर्त्तमाने यज्ञकर्म्मणि उपह्वये आह्वयामः, किमर्थं नोऽस्मदीयमिदं वेद्यामास्तीर्णं बर्हिर्दर्भमासदे आसत्तुं प्राप्तुं । कीदृश्यौ मूर्त्ती, सुपेशसा, शोभनरूपयुक्ते । पुनः कीदृशे नक्तोषासा, नक्तञ्चोषश्च नक्तोषासा, प्रथमाद्विवचनस्य, सुपांसुलुक् (पां ७। १। ३९।) इत्याकारः, मलोपोपधादीर्घो छान्दसौ, देवताद्वन्द्वे च (पां ६। २। १४१।) इति पूर्वोत्तरपदयोर्युगपत् प्रकृतिस्वरत्वं । सुपेशसा, शोभनं पेशो रूपं ययोस्ते, पूर्ववदाकारः, पेशस्शब्दो नब्विषयत्वादाद्युदात्तः, बहुव्रीहौ, नञ्सुभ्यां (पां ६। २। १७२।) इत्युत्तरपदान्तोदात्तस्यापवादत्वेनाद्युदात्तत्वं, ह्यचश्छन्दसि (पां ४। ३। १५०।) इति उत्तरपदाद्युदात्तत्वं । अस्मिन्, ऊडिदम्पदाद्यप्पुम् (पां ६। १। १७१।) इति विभक्तिरुदात्ता । आसदे, षदॢ्लविशरणगत्यवसादनेषु, धात्वादेः षः सः (पां ६। १। ६४।) इति षस्य सत्वं, आङ्पूर्वादस्मात् सम्पदादिभ्यो भावे क्विप्, प्रादिसमासः, छन्दुत्तरपदप्रकृतिस्वरत्वं ॥ ७ ॥

अष्टमीमृचमाह ता सुजिह्वाविति । तच्छब्दोऽत्र सर्वनामत्वात् प्रसिद्धार्थवाची, तौ याज्ञिकप्रसिद्धौ द्वावग्नी उपह्वये आह्वयामि, नोऽस्मदीयमिमं यज्ञं यक्षतां, तावुभौ यजतामनुतिष्ठतां । कीदृशौ तौ सुजिह्वा, शोभनजिह्वेपेतौ, प्रियवचनौ, शोभनज्वालौ वेत्यर्थः । होतारा, होमनिष्पादकौ । दैव्या दैव्यौ देवसम्बन्धिनौ, अतएवेमावग्नी दैव्यहोतृनामकौ । कवी मेधाविनौ । ता, तौ, द्वितीयाद्विवचनस्य,

१६१ इला सरस्वती मही तिस्रो देवीर्मयोभुवः १
बर्हिः सीदन्त्वस्रिधः ॥

सुपांसुलुगित्याकारः, एकादेशः उदात्तेनोदात्त इत्युदात्तः। सुजिह्वा, शोभना जिह्वा ययोस्तौ, नञ्सुभ्यामित्युत्तरपदान्तोदात्तत्वं, पूर्ववदेकादेशस्वरः, संहितायामावादेशः, तस्य, लोपः शाकल्यस्येतिलोपः। होतारा, जुहोतेस्तृन्, द्विवचने, ऋतोऽङिसर्वनामस्थानयोः (पां ७।१।११०।) इति गुणः, अप्तृन् ट्वच्स्वसृनप्तृनेष्टृत्वष्टृक्षत्तृहोटृपोटृप्रशास्तॄणां (पां ६।४।११।) इत्युपधादीर्घः, पूर्ववदाकारः, नित्त्वादाद्युदात्तः। दैव्या, देवानामिमौ, देवाद्यञञाविति सूत्रवार्त्तिकेन यञ्, यस्येति च (पां ६।४।१४८।) इत्यकारलोपः, ञ्नित्यादिर्नित्यं (पां ६।१।१९७।) इति जित्त्वादाद्युदात्तः, पूर्ववदाकारः। यक्षतां, यजतां, लेटि शपि परतः, सिब्बहुलं लेटि (पां ३।१।३४।) इति बहुलग्रहणात् सिप्, कुत्वचर्त्वधत्वानि ॥ ८ ॥

नवमीमृचमाह इला सरस्वती महीति। अत्र महीशब्दो महत्त्वगुणयुक्तां भारतीमाचष्टे, अन्येष्वाप्रीसूक्तेषु सप्तशेषु इला सरस्वतीभारतीत्याम्नातत्वादिलाशब्दाभिधेया वह्निमूर्त्तयस्तिस्रो देवीर्दीप्यमाना बर्हिर्वेद्यामास्तीर्णं सीदन्तु प्राप्नुवन्तु। कीदृश्यो मूर्त्तयः, मयोभुवः, सुखोत्पादिकाः। अस्रिधः, शोषेण क्षयेण वा रहिताः। इला, ईडस्तुतौ, छान्दसं ह्रस्वत्वं, क्विप्, धातुस्वरः, आपश्चैव इलन्तानां यथा वाचा दिशा निशेति टाप्। सरस्वती, असुन्नन्तो नित्त्वादाद्युदात्तः, तदस्यास्तीति मतुप्, अदुपधत्वाद्वत्वं, तसौमत्वर्थे (पां १।४।१९।) इति भत्वेन पदत्वस्य बाधितत्वाद्रुत्वाद्यभावः, उगितश्च (पां ४।१।६।) इति ङीप्, मतुप् ङीपौ नित्त्वादनुदात्तौ। मही, महतीशब्दे तकारलोपश्छान्दसः, यस्येति च (पां ६।४।१४८।) इत्यकारलोपः, उदात्तनिवृत्तिस्वरेण ङीप उदात्तत्वं। तिस्रः, त्रिशब्दाज्जसि, त्रिचतुरोस्त्रियान्तिस्रृचतस्रृ (पां ७।२।९९।) इति तिस्रादेशः, अचिरशृतः (पां ७।२।१००।) इति रेफादेशः, तिस्रृभ्यो जसः (पां ६।१।१६६।) इति जस उदात्तत्वं। देवीः, देवानां पत्न्यो देव्यः, पुंयोगादाख्यायां (पां ४।१।४८।) इतिङीष्, यस्येति च (पां ६।४।१४८।) इत्यकारलोपः, प्रत्ययस्वरेण ङीष उदात्तत्वं, जसि, दीर्घा-

१।१०१ इह त्वष्टारमग्रियं विश्वरूपमुपह्वये ।
अस्माकमस्तु केवलः ॥

ज्झलि च (पां ६ । १ । १०५ ।) इति निषिद्धं दीर्घत्वं, वाच्छन्दसि (पां ६ । १ । १०६ ।) इति पक्षेऽभ्यनुज्ञायते । मयोभुवः, मीञ् हिंसायां, हिनस्ति दुःखमिति मयः सुखं, यास्कद्भावयन्तीति मयोभुवः, अन्तर्भावितण्यर्थाद्भुवः क्विप्, कृदुत्तरपदप्रकृतिस्वरत्वं । बर्हिः, वृंहेर्नलोपश्चेति इसिप्रत्ययः, प्रत्ययस्वरः । सीदन्तु, षद्लृ विशरणगत्यवसादनेषु, पा घ्रा ध्मा स्था म्ना दाण् (पां ७ । ३ । ७८ ।) इत्यादिना सीदादेशः । ऋषिधः, ऋधेर्हिंसार्थस्य शीघ्रार्थस्य वा सम्पदादिभ्यो भावे क्विपि नञा बहुव्रीहिः, पूर्वपदप्रकृतिस्वरं बाधित्वा, नञ्सुभ्यां (पां ६ । २ । १७२ ।) इत्युत्तरपदान्तोदात्तत्वं ॥ ६ ॥

पत्नीसंयाजे त्वष्टुः पुरोऽनुवाक्या इह त्वष्टारमग्रियमिति, प्रयुवाकाय सम्प्रेषित इति खण्डे सूचितं, सन्ते पयांसि समुयन्तु वाजा इह त्वष्टारमग्रियमिति, तामेतां पुरोऽनुवाक्यां सूक्ते दशमीमृचमाह इह त्वष्टारमग्रियमिति । त्वष्टारं त्वष्टृनामकमग्निमिह कर्म्मण्युपह्वये । कीदृशं अग्रियं श्रेष्ठं, विश्वरूपं बहुविधरूपोपेतं । सोऽस्माकं केवलोऽसाधारणोऽस्तु, इतरयजमानेभ्योऽप्यधिकमनुग्रहं करोत्वित्यर्थः । त्वष्टारं, तक्षू त्वक्षू तनूकरणे, ष्टन्, स्वरतिसूतिसूयति धूञूदितो वा (पां ७ । २ । ४४ ।) इति इडभावपक्षे, स्कोः संयोगाद्योरन्ते च (पां ८ । २ । २९ ।) इति ककारलोपः, ष्टुत्वं, द्वितीयैकवचने, ऋतोऽङि सर्वनामस्थानयोः (पां ७ । ३ । ११० ।) इति गुणे, अमृन् (पां ६ । ४ । ११ ।) इत्यादिना उपधाया दीर्घः, ष्टनो नित्त्वादाद्युदात्तत्वं । अग्रियं, अग्र्यादित्यनुवृत्तौ, घछौ च (पां ४ । ४ । ११७ ।) इति घः प्रत्ययः, आयनेयीनीयियः (पां ७ । १ । २ ।) इत्यादिना घकारस्य इयादेशः, यस्येति च (पां ६ । ४ । १४८ ।) इत्यलोपः, आयन्नादिषु व्यपदेशिवद्वचनं स्वरसिद्ध्यर्थमिति व्यपदेशिवद्भावात् प्रत्ययाद्युदात्तत्वात्, नवा क्वचिच्चित्करणादिति भाष्यात् घच्श्चित्त्वादन्तोदात्तत्वं । विश्वरूपं, विश्वानि रूपाणि त्वष्टृत्पन्नत्वेन यस्य, त्वष्टा वै पशूनां मिथुनानां रूपकृदिति श्रुतेः, विश्वशब्दस्याद्युदात्तत्वात् पूर्वपदप्रकृतिस्वरत्वे प्राप्ते, बहुव्रीहौ विश्वं संज्ञायां (पां ६ । २ । १०६ ।) इति

१११ अवसृजा वनस्पते देव देवेभ्यो हविः १
प्रदातुरस्तु चेतनं ॥
११२ स्वाहा यज्ञं कृणोतनेन्द्राय यज्वनो गृहे १
तत्र देवाँ उपह्वये ॥ २५ ॥

पूर्वपदान्तोदात्तत्वं। अस्माकं, अयु क्षेपणे, युष्मसिभ्यां मदिगिति मदिक् प्रत्यय औणादिकः, प्रत्ययस्वरेणान्तोदात्तः, षष्ठीबहुवचनम्, अच परमपि, यौऽचि ( पां ७। २। ८६। ) इति यत्वं बाधित्वा, नित्यत्वात् प्रतिपदविधित्वाच्च, साम आकम् ( पां ७। १। ३३। ) इति आम आकमादेशे कृते, अनादेश इति निषेधेन यत्वाभावात्, शेषे लोपः ( पां ७। २। ९०। ) इति दकारलोपे अकारान्तत्वेन पश्चात् प्राप्तस्यापि सुटः साम इति निर्देशे स्थानिन्यन्तर्भावेन निवृत्तिः, एवमर्थ एव हि साम इति ससुट्कनिर्देशः। केवलः, वृषादेराकृतिगणत्वादाद्युदात्तः ॥ १० ॥

एकादशीमृचमाह अवसृजेति। हे वनस्पते, एतन्नामकाग्ने देव, हविर्भुग्भ्यो देवेभ्योऽस्मदीयं हविरवसृज समर्पयेत्यर्थः, प्रदातुर्यजमानस्य चेतनं परलोकविषयं विज्ञानं त्वत्प्रसादादस्तु। वनस्पते, आमन्त्रितनिघातः। देव, पादादित्वान्न निघातः, षाष्ठिकमामन्त्रिताद्युदात्तत्वं। हविः, अर्चि शुचि ऊर्णु कृदि कृर्दिभ्य इसिरिति इसिः प्रत्ययः, प्रत्ययस्वरः। दातुः, ददातेस्तृच्, चितः ( पां ६। १। १६३। ) इत्यन्तोदात्तः, ङसि, ऋतउत् ( पां ६। १। १११। ) इत्युत्वमेकादेशः, रपरत्वं, रात्सस्य ( पां ८। २। २४। ) इति सलोपः, एकादेशस्वरेणोकार उदात्तः। चेतनं, चिती सञ्ज्ञाने, करणे ल्युट्, योरनादेशः, लघूपधगुणः, लिति ( पां ६। १। १९३। ) इति प्रत्ययात् पूर्वस्योदात्तत्वं ॥ ११ ॥

द्वादशीमृचमाह स्वाहा यज्ञमिति। स्वाहाशब्दो हविःप्रदानवाचो सन्, एतन्नामकमग्निविशेषं लक्षयति, तदग्निसम्पादितं यज्ञं इन्द्रायेन्द्रतुष्ट्यर्थं यज्वनो यजमानस्य गृहे ऋत्विजः कृणोतन कुरुत, तत्र यज्ञे देवान् उपह्वये। कृणोतन, कृवि हिंसाकरणयोश्च, इदित्वान्नुम्, लोण्मध्यमपुरुषबहुवचनस्य, तस्थस्थमिपां ताम् तम् तामः ( पां

## चतुर्दशसूक्तं ॥

१११ एभिरग्ने दुवो गिरो विश्वेभिः सोमपीतये १
देवेभिर्याहि यक्षि च ॥

३ । ४ । १०१ । ) इति तादेशः, तनननघनाञ्च ( पां ७ । १ । ४५ । ) इति तनबादेशः, प्रपि प्राप्ते, धिन्विकृण्व्योरच ( पां ३ । १ । ८० । ) इत्युप्रत्ययः, तत्सन्नियोगेन वकारस्य चाकारस्तस्य, अतो लोपः ( पां ६ । ४ । ४८ । ) इति लोपस्तस्य, अचः परस्मिन् पूर्वविधौ ( पां १ । १ । ५७ । ) इति स्थानिवद्भावाट्टकारस्य लघूपधगुणो न भवति, तनपः पित्त्वेनाङित्त्वादुकारस्य गुणः । इन्द्राय, इदि परमैश्वर्य्य इति धातोः, ऋचेन्द्राग्नेत्यादिना रन्प्रत्यय औणादिकः, ञित्त्वादाद्युदात्तः । यज्वनः, यजदेवपूजा सङ्गतिकरणदानेषु, सुयजोर्ङ्वनिप् ( पां ३ । २ । १०३ । ) इति ङ्वनिप्, ङसि भसञ्ज्ञायां अल्लोपे प्राप्ते, नसंयोगाद्वमन्तात् ( पां ६ । ४ । १३७ । ) इति निषेधः, ङ्वनिपः पित्त्वेन धातुस्वर एव शिष्यते । गृहे, ग्रह उपादाने, गेहे कः ( पां ३ । १ । १४४ । ) इति कप्रत्ययः, ग्रहिज्या ( पां ६ । १ । १६ । ) इत्यादिना सम्प्रसारणं, परपूर्वत्वं । देवानुपेत्यत्र संहितायां, दीर्घादटिसमानपादे ( पां ८ । ३ । ९ । ) इति नकारस्य रुत्वं, आतोऽटिनित्यं ( पां ८ । ३ । २ । ) इत्याकारः सानुनासिकः, भो भगो अघो अपूर्वस्य योऽशि ( पां ८ । ३ । १७ । ) इति यत्वं, तस्य, लोपः शाकल्यस्य ( पां ८ । ३ । १९ । ) इति लोपः ॥ १२ ॥ इति प्रथमस्य प्रथमे पञ्चविंशो वर्गः ॥ २५ ॥

एभिरग्न इत्यादिकस्य द्वादशर्चस्य सूक्तस्य ऋषिच्छन्दसी पूर्ववत्, तच्च सूक्तं बऋदेवताकं, अतएवानुक्रम्यते एभिर्वैश्वदेवमिति । विनियोगस्तु व्यूढद्वादशाहस्य प्रथमे छन्दोमे ढतीयसवने वैश्वदेवशस्त्रे एभिरग्ने दुवो गिर इति सूक्तं, तथा च सूचितं, अथ छन्दोमाः समुद्रादुर्मिरित्युपक्रम्य एभिरग्ने दुवो गिर इति वैश्वदेवं तत्, तच्च प्रथमामृचमाह एभिरग्न इति । हे अग्ने, एभिरस्मिन् पक्षे सम्भावितैर्विश्वेभिः सर्वैर्देवैः सह सोमपीतये सोमपानोपेतयागार्थं दुवोऽस्मदीयां परिचर्य्यां, गिरोऽस्मदीयाः स्तुतीश्च प्रति आयाहि आगच्छ, आगत्य यक्षि च यज च । एभिः, पूर्ववन्निर्दिष्टानां देवानामिदमा परामर्शात्,

१२१ आ त्वा कण्वा अहूषत गृणन्ति विप्र ते धियः।
देवेभिरग्न आगहि ॥

इदमोऽन्वादेशेऽशनुदात्तस्तृतीयादौ ( पां २ । ४ । ३२ । ) इत्यशनुदात्तः, णित्त्वात्सर्वादेशः, नेदमदसोः ( पां २ । १ । ११ । ) इति भिस ऐसादेशाभावः, विभक्तिरनुदात्तैव, न च ऊडिदमित्यादिना विभक्तेरुदात्तत्वं, तत्रान्तोदात्तादित्यधिकारात् । दुवः, नव्विषयस्यानिषन्तस्येत्यादुदात्तत्वं । विश्वेभिः, विश्वशब्दो, विशेः क्वनिति क्वनन्तो नित्त्वादाद्युदात्तः, बहुलं छन्दसीति भिस ऐस् न भवति, बहुवचने झल्येत् ( पां ७ । ३ । १०३ । ) इत्येत्वं । सोमपीतये, सोमशब्दः, अर्त्तिस्तुसुहुसृधृक्षीत्यादिनामन्नन्तो नित्त्वादाद्युदात्तः, सोमस्य पीतिर्यस्मिन्यागे स सोमपीतिस्तस्मै, तादर्थे चतुर्थी । देवेभिः, बहुलं छन्दसीति भिस ऐसादेशाभावः, बहुवचने झल्येदित्येत्वं । यत्ति, यजेर्लेटः सिप्, बहुलं छन्दसीति शपोलुक्, व्रश्च भ्रस्ज ( पां ८ । २ । ३६ । ) इति षत्वं, षढोः कः सि ( पां ८ । २ । ४१ । ) इति कत्वं, सेर्हिरादेशश्छान्दसत्वान्न भवति, सिपः पित्त्वेनानुदात्तत्ताद्धातुस्वर एव ॥ १ ॥

द्वितीयामृचमाह आ त्वा कण्वेति । हे विप्र मेधाविन्नग्ने, कण्वा मेधाविन ऋत्विजः, त्वा यज्ञनिष्पादकं त्वां, अहूषत आह्वयन्ति, तथा ते धियस्त्वदीयानि कर्म्माणि गृणन्ति कथयन्ति, अतो हे अग्ने, देवेभिर्देवैः सह आगहि आगच्छ । विप्र इत्यादिषु चतुर्विंशतिसङ्ख्यकेषु मेधाविऋत्विङ्नामसु कण्वा ऋभुरिति .पठितं । त्वा, त्वामाद्द्वितीयायाः ( पां ८ । १ । २३ । ) इति त्वादेशः सर्वानुदात्तः । कण्वा, कण शब्दार्थे, अशू पुषि लटि कणि खटि वणिभ्यः क्वनिति क्वन्प्रत्यय औणादिकः, नित्त्वादाद्युदात्तः । अहूषत, ह्वेञ्स्पर्द्धायां शब्दे च, छन्दसि लुङ् लङ्लिटः ( पां ३ । ४ । ६ । ) इति वर्त्तमाने लुङ्, ङित्त्वादात्मनेपदं, झस्य, आत्मनेपदेष्वनतः ( पां ७ । १ । ५ । ) इत्यदादेशः, च्लेः सिच्, एकाच उपदेशेऽनुदात्तात् ( पां ७ । २ । १० । ) इतीट्प्रतिषेधः, बहुलं छन्दसीति सम्प्रसारणं, परपूर्वत्वं, हलः ( पां ६ । ४ । २ । ) इति दीर्घत्वं, आदेशप्रत्यययोः ( पां ८ । ३ । ५० । ) इति षत्वं, छान्दसत्वादुकारस्य न गुणः, अडागमः । गृणन्ति, गॄशब्दे, लटो झि, झोऽन्तः ( पां ७ । १ । ३ । ) इति झस्यान्तादेशः, क्र्यादिभ्यः श्ना ( पां ६ । १ । ८१ । )

## १३१ इन्द्रवायू बृहस्पतिं मित्राग्निं पूषणं भगं १ आदित्यान्मारुतं गणं ॥

इति आ, घादीनां ङिति ह्रस्वः ( पां ७ । ३ । ८० । ) इति धातोर्ह्रस्वत्वं, आभ्यस्तयोरातः ( पां ६ । ४ । ११२ । ) इत्याकारलोपः, ऋवर्णाच्चेति वक्तव्यमिति वार्त्तिकेन णत्वं, तिङ्स्वर एव शिष्यते। विप्र, आमन्त्रितनिघातः । ते, अनुदात्तमित्यनुवृत्तौ, तेमयावेकवचनस्य ( पां ८ । १ । २२ । ) इति षष्ठ्यास्ते इत्यादेशः । देवेभिः, छान्दस ऐसाभावः । गहि, गस्लृ, स्लृ गतौ, लोटः सिप्, सेर्ह्यपिच्च ( पां । ३ । ४ । ८७ । ) इति सेर्हिरादेशः, कर्त्तरिश्यप् ( पां ३ । १ । ६८ । ) इति श्यप्, तस्य, बहुलं छन्दसीतिलुक्, अनुदात्तोपदेश ( पां ६ । ४ । ३२ । ) इत्यादिना मकारस्य लोपः, तस्य, असिद्धवदत्राभात् ( पां ६ । ४ । २२ । ) इत्यसिद्धत्वात्, अतोहेः ( पां ६ । ४ । १०५ । ) इति हेर्लुङ्न भवति ॥ २ ॥

तृतीयाम्रचमाह इन्द्रवायू बृहस्पतिमिति । इन्द्रादिदेवान्, मारुतं मरुतां वायूनां सम्बन्धिनं गणञ्च, हे अग्ने यज्ञीति पदद्वयमनुवर्त्तते । इन्द्रश्च वायुश्च इन्द्रवायू, देवताद्वन्द्वे च ( पां ६ । ३ । २६ । ) इति प्राप्तस्यानङः, उभयत्र वायोः प्रतिषेधो वक्तव्य इति वार्त्तिकेन प्रतिषेधः, देवताद्वन्द्वे च ( पां ६ । २ । १४१ । ) इति प्राप्तस्योभयपदप्रकृतिस्वरत्वे, नोत्तरपदेऽनुदात्तादौ ( पां ६ । २ । १४२ । ) इति निषेधः, समासान्तोदात्तत्वमेव । बृहस्पतिं, तद्धृतोः करपत्योश्चोरदेवतयोरभिधेययोः सुट् तलोपो वक्तव्य इति वार्त्तिकेन तलोपः सुडागमश्च, बृहच्छब्दमाद्युदात्तं केचिदर्षयन्तीति वामनः, पा रक्षणे, पातीति पतिः, पातेर्डतिः प्रत्ययः, प्रत्ययस्वरेणाद्युदात्तः, समासे, उभे वनस्पत्यादिषु युगपत् ( पां ६ । २ । १४० । ) इत्युभयपदप्रकृतिस्वरत्वं । मित्रा, द्वितीयायाः, सुपांसुलुगित्यादिना विभक्तेराजादेशः। चित्त्वादन्तोदात्तत्वं । आदित्यान्, दितेरपत्यानि आदित्याः, दित्यदित्यादित्यपत्युत्तरपदाण्ण्यः ( पां ४ । १ । ८५ । ) इति ण्यः प्रत्ययः, प्रत्ययस्वरः । मारुतं, मरुतां विकारः, अनुदात्तादेश्च ( पां ४ । ३ । १४० । ) इत्यञ्, जित्त्वादाद्युदात्तः ॥ ३ ॥

१४। प्र वो भ्रियन्त इन्दवो मत्सरा मादयिष्णवः।
द्रप्सा मध्वश्चमूषदः॥
१५। ईलते त्वामवस्यवः कण्वासो वृक्तबर्हिषः।
हविष्मन्तो अरङ्कृतः॥

चतुर्थीमृचमाह प्र वो भ्रियन्त इति। हे इन्द्रादिदेवाः, वो युष्मदर्थमिन्दवः सोमाः प्रभ्रियन्ते प्रकर्षेण सम्पाद्यन्ते। कीदृशाः, मत्सरास्तृप्तिकारकाः। मत्सरः सोमो मन्दतेस्तृप्तिकर्म्मण इति यास्कः। मादयिष्णवः, हर्षहेतवः। द्रप्सा विन्दुरूपाः। मध्वः, मधुराः। चमूषदः, चमूषु चमसादिपात्रेष्ववस्थिताः। प्र, व्यवहिताश्च (पां १। ४।८२।) इति व्यवहितप्रयोगः। भ्रियन्ते, भृञोयकि, रिङ्शयग्लिङ्क्षु (पां ७।४।२८।) इति रिङादेशः, हृञो वा, हृग्रहोर्भश्छन्दसीति हकारस्य भकारः। इन्दवः, उन्दी क्लेदने, उन्दन्ति पात्राणीति, निदित्यनुवृत्तौ, उन्देरिच्चादेरिति उप्रत्यय औणादिकः, आदेरिकारश्च, नित्त्वादाद्युदात्तत्वं,। मत्सराः, मद तृप्तियोगे, चिदित्यनुवृत्तौ, कृधूमादिभ्यः किदिति सरःप्रत्ययः, तितु त्र थ सि सु सरकसेषु च (पां ७।२।९।) इतीट्प्रतिषेधः, चित्त्वादन्तोदात्तः। मादयिष्णवः, मदी हर्षग्लेपनयोः, मदेर्ण्यन्तात्, णेश्छसि (पां ३।२।१३७।) इतीष्णुच्, णेरनिटि (पां ६।४।५१।) इति णिलोपे प्राप्ते अयामन्ताल्वाय्येत्विष्णुषु (पां ६।४।५५।) इति अयादेशः, चित्त्वादन्तोदात्तः। मध्वः, मधुशब्द आद्युदात्त उक्तः, मधुशब्दस्य व्यत्ययेन पुंलिङ्गत्वं, सञ्ज्ञापूर्वको विधिरनित्य इति परिभाषया, जसि च (पां ७।३।१०९।) इति गुणो न भवति। चमूषदः, चमु छमु जमु अदने, चम्यते भक्ष्यते येषु चमसेषु ते चम्वः, कृषि चमीत्यादिना उः प्रत्यय औणादिकः, तत्र सीदन्तीति चमूषदः, सत्सूद्विष (पां ३।२।६१।) इत्यादिनाक्विप्, सुषामादेराकृतिगणत्वात् षत्वं, कृदुत्तरपदप्रकृतिस्वरत्वं॥ ४॥

पञ्चमीमृचमाह ईलते त्वामिति। हे अग्ने, त्वामीलते ऋत्विजः स्तुवन्ति। कीदृशाः, अवस्यवः, अवनं रक्षणं तद्धेतून् देवानिच्छन्तः। कण्वासो मेधाविनः। वृक्तबर्हिषः, आस्तरणार्थं छिन्नदर्भाः। हविष्मन्तो हविर्युक्ताः। अरङ्कृतः, अलङ्कर्त्तारः। ईलते, ईडस्तुतौ, अनुदात्तेत्त्वा-

१६१ घृतपृष्ठा मनोयुजो ये त्वा वहन्ति वह्नयः १
आ देवान्त्सोमपीतये ॥ २६ ॥

ल्लटो झ, अदिप्रभृतिभ्यः शपः ( पां २ । ४ । ७२ । ) इति शपो लुक्, आत्मनेपदेष्वनतः ( पां ७ । १ । ५ । ) इति झस्यादादेशः, टित आत्मनेपदानां टेरे ( पां ३ । ४ । ७९ । ) इति टेरेत्वं, तास्यनुदात्तेत् ( पां ६ । १ । १८६ । ) इत्यादिना लसार्वधातुकस्यानुदात्तत्वाद्धातुस्वरः शिष्यते । अवस्यवः, अवन्तीत्येवा देवास्तानतिशयेनेच्छन्ति, सुप आत्मनः क्यच् ( पां ३ । १ । ८ । ) इति क्यच्, क्यचि च ( पां ७ । ४ । ३३ । ) इति ईत्वं न भवति, न छन्दस्यपुत्रस्य ( पां ७ । ४ । ३५ । ) इति निषेधात्, सर्वप्रातिपदिकेभ्यो लालसायां सुग्वक्तव्य इति वार्त्तिकेन सुक्, क्याच्छन्दसि (पां ३ । २ । १७० ।) इति उप्रत्ययः, अतो लोपः ( पां ६ । ४ । ४८ । ) इत्यकारस्य लोपः, प्रत्ययस्वरेणान्तोदात्तत्वं । कण्वासः, कणशब्दार्थे, कण्वन्ति ध्वनन्ति स्तोत्रादिपाठेनेति कण्वा ऋत्विजः, अशू प्रुषि लटीत्यादिना क्वन्प्रत्यय औणादिकः, नित्त्वादाद्युदात्तः, आज्जसेरसुक् ( पां ७ । १ । ५० । ) इत्यसुक् । वृक्तबर्हिषः, वृक्तमुक्तं, बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वं । हविष्मन्तः, हविरेषामस्तीति हविष्मन्तः, तसौमत्वर्थे (पां १ । ४ । १९ । ) इति भत्वेनापदत्वान्न रुत्वं । अरङ्कृतः, अलङ्कुर्व्वन्तीत्यलङ्कृतः, क्विप् च (पां ३ । २ । ७६ । ) इति क्विप्, ह्रस्वस्य पितिकृति तुक् ( पां ६ । १ । ७१ । ) इति तुक्, कपिलादीनां सञ्ज्ञाछन्दसोर्वा लोरत्वमापद्यते, इति लकारस्य रेफादेशः ॥ ५ ॥

षष्ठीमृचमाह घृतपृष्ठा इति । हे अग्ने, त्वा त्वां ये अश्वा रथेन वहन्ति । कीदृशाः, घृतपृष्ठाः, पुष्टाङ्गत्वेन दीप्तपृष्ठाः । मनोयुजः, मनः सङ्कल्पमात्रेण रथे युज्यमानाः । वह्नयो वोढारः । तैरश्वैः सोमपीतये सोमपानहेतुयागार्थं देवानावहेति शेषः । घृतपृष्ठाः, घृ क्षरणदीप्तिकान्तिगतिषु, घृतं दीप्तं पृष्ठं येषान्ते घृतपृष्ठाः, घृतशब्दः प्रत्ययस्वरेणान्तोदात्तः, बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वं । मनोयुजः, मनसा युञ्जत इति मनोयुजः, ऋत्विग्दधृक्स्रग्दिगुष्णिगच्चुयुजिक्रुञ्चाञ्च ( पां ३ । २ । ५९ । ) इति क्विन्प्रत्ययः, कृदुत्तरपदप्रकृतिस्वरत्वं । त्वा, त्वामौ द्वितीयायाः ( पां ८ । १ । २३ । ) इत्यनुदात्तस्त्वादेशः, वहन्ति, शप्तिपोरनुदात्तत्वाद्धातुस्वरः, यद्वृत्तयोगान्निघाताभावः । वह्नयः, निरि-

१७१ तान्यजत्राँ ऋतावृधोऽग्ने पत्नीवतस्कृधि १
मध्वः सुजिह्व पायय ॥

त्यनुवृत्तौ, वह्निश्रिश्रयुग्लाहात्वरिभ्यो निदिति निः प्रत्यय औणादिकः, तस्य नित्त्वादाद्युदात्तत्वं। आ देवानत्सोमपीतये, सोमपीतये, उक्तपूर्वमिति। सकारेपरतो नकारस्य संहितायां, नश्च (पां ८। ३। ३०।) इति धुडागमः, खरि च (पां ८। ४। ५५।) इति चर्त्वं, चयोद्वितीयाः शरि पौष्करसादेरिति वाच्यमिति वार्त्तिकेन द्वितीयस्यकारः' ॥ ६ ॥ इति प्रथमस्य प्रथमे षड्विंशो वर्गः ॥ २६ ॥°

सूक्ते सप्तमीमृचमाह तान्यजत्रानिति। हे अग्ने, तानिन्द्रादीन् देवान् यजत्रान् यजनीयान्, ऋतावृधः, ऋतस्य सत्यस्य यज्ञस्य वा वर्द्धकान्, पत्नीवतः पत्नीयुक्तान् कृधि कुरु। हे सुजिह्व शोभनजिह्वोपेत, मध्वो मधुरस्य सोमस्य भागं देवान् पायय। यजत्रान्, अमि नक्षि यजि बन्धि प्रतिभ्योऽत्रन्निति यजेरत्रन्प्रत्यय औणादिकः। ऋतावृधः, वृधु वृद्धौ, अन्तर्भावितण्यर्थात्, क्विप् च (पां ३। २। ७६।) इति क्विप्, अन्येषामपि दृश्यते (पां ६। ३। १३७।) इति पूर्वपदस्य दीर्घत्वं, वृधेर्धातुस्वरः समासे कृदुत्तरपदप्रकृतिस्वरत्वं। अग्ने, पादादित्वान्नामन्त्रितनिघातः, षष्ठिकमाद्युदात्तत्वं। पत्नीवतः, पत्युर्नो यज्ञसंयोगे (पां ४। १। ३३।) इतिङीप्, इकारस्य च नकारः, तावेषां सन्तीति मतुप्, छन्दसीरः (पां ८। २। १५।) इति वत्वं, पतिशब्दो ङितिप्रत्ययान्तत्वादाद्युदात्तः, ङीप्मतुपोरनुदात्तत्वात्स एव शिष्यते। कृधि, ह्रञो लोटः सिप्, सेर्ह्यपिच्च (पां ३। ४। ८७।) इति सेर्हिरादेशः, बहुलं छन्दसीति विकरणलुक्, श्रु शृणु पॄ कृ कृभ्यश्छन्दसि (पां ६। ४। १०२।) इति हेर्धिरादेशः, हेर्ङित्त्वादुणाभावः। मध्वः, उक्त एषः। सुजिह्व, आमन्त्रितनिघातः। पायय, पा पाने, पिबन्तं प्रयुङ्क्त इत्यर्थे, हेतुमति च (पां ३। १। २६।) इति णिच्. शाकाशाका वावेषां युक्, (पां ७। ३। ३७) इति युक्, पूर्वस्यामन्त्रितस्यावद्यमानवत्त्वे, अतएवाद्यवधायकत्वान्मध्व इत्यपेक्ष्य, तिङ्ङ तिङः (पां ८। १। २८।) इति निघातः ॥ ७ ॥

अष्टमीमृचमाह ये यजत्रा इति। ये देवा यजत्रा यष्ट्यास्तथा ये देवा ईड्याः स्तुत्यास्ते सर्वेऽपि वषट्कृति वषट्कारकाले वषट्कारयुक्ते यागे वा, हे अग्ने, ते त्वदीयया जिह्वया मधोर्मधुरस्य सोमस्य भागं पिबन्तु।

१८१ ये यजत्रा य ईड्यास्ते पिबन्तु जिह्वया।
मधोरग्ने वषट्कृति॥

१९१ आकीं सूर्य्यस्य रोचनाद्विश्वां देवां उषर्बुधः।
विप्रो होतेह वक्षति॥

यजत्रा इति गतं। ईड्याः, ईडस्तुतौ, ऋहलोर्ण्यत् (पां ३।१।१२४।) इति ण्यत्प्रत्ययः, तित्स्वरिते प्राप्ते, ईडवन्दवृशंसदुहां ण्यतः (पां ६।१।२१४।) इत्याद्युदात्तत्वं। ते, ते, इत्युभयत्र द्वितीयस्य ते इति शब्दस्य युष्मदादेशस्य सर्वानुदात्तत्वं। मधोः, प्रत्ययस्य नित्त्वादाद्युदात्तत्वमुक्तं। अग्ने, आमन्त्रितनिघातः। वषट्कृति, करोतेः सम्पदादिभ्यो भावे क्विप्, वषडित्यस्य करणं यस्मिन् याग इति बहुव्रीहिः, वषडित्यस्य निपातत्वादाद्युदात्तत्वं, बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वं॥ ८॥

नवमीमृचमाह, आकीं सूर्य्यस्येति। विप्रो मेधावी होता होमनिष्पादकोऽग्निः उषर्बुधः, उषः काले यागसमये यागगमनाच्च प्रबुध्यमानान् विश्वान् देवान् सूर्य्यस्य सम्बन्धिनो रोचनात्स्वर्गलोकादिह कर्म्मणि आकीं वक्षति आवहतु। आकीं, निपात आद्युदात्तः। सूर्य्यस्य, सूर्य्यशब्दो, राजसूयसूर्य्यमृषोद्य (पां ३।१।११४।) इत्यादिना क्यप्प्रत्ययान्तो निपातितः, क्यपः पित्त्वाद्धातुस्वरेणाद्युदात्तः। रोचनात्, रोचमानात्, रुच दीप्तौ, अनुदात्तेतश्च हलादेः (पां ३।२।१४९।) इति कर्त्तरि युच्, चितः (पां ६।१।१६३।) इति चित्त्वादन्तोदात्तत्वं। विश्वान्, विश्वशब्दो विशेः क्वनिति क्वन्तो नित्त्वादाद्युदात्तः। उषर्बुधः, उषर्बुध्यन्त इत्युषर्बुधः, क्विप् च (पां ३।२।७६।) इति क्विप्, धातुस्वरेणोकार उदात्तः, समासे बहुव्रीहिपूर्वपदप्रकृतिस्वरत्वं। विप्र, ऋत्विग्दधृगित्यादिना रन्प्रत्ययः औणादिकः, नित्त्वादाद्युदात्तः। होता, ह्वयतेस्तृच्छील्ये तृन्, बहुलं छन्दसीति सम्प्रसारणं, परपूर्वत्वं, गुणः, नित्त्वादाद्युदात्तः। इह, इदमो हः (पां ५।३।११।) इति हः प्रत्ययः, इदम इश् (पां ५।३।३।) इति इश्प्रत्ययः, इशः पित्त्वात् सर्वादेशः, प्रत्ययस्वरः। वक्षति, वहेः प्रार्थनायां लिङर्थे लेट्, तस्य तिप्, कर्त्तरि शप्, शपि परतः, सिब्बहुलं लेटि (पां ३।१।३४।) इति सिप्, ढ्वेकत्वषत्वानि, तिङु तिङ इति निघातः॥ ९॥

१०१ विश्वेभिः सोम्यं मध्वग्न इन्द्रेण वायुना १
पिबा मित्रस्य धामभिः ॥
१११ त्वं होता मनुर्हितोऽग्ने यज्ञेषु सीदसि १
सेमं नो अध्वरं यज १

अग्निष्टोमे प्रउगशस्त्रस्य याज्या विश्वेभिः सोम्यं मधीति, स्तोत्रमग्ने, शस्त्रादितिखण्डे सूचितं विश्वेभिः सोम्यं मधीति याज्येति, तामेतां याज्यां सूक्ते दशमीमृचमाह विश्वेभिः सोम्यं मधीति। हे अग्ने, त्वं विश्वेभिः सर्वैः ऋषभगादिभिर्देवैरिन्द्रेण वायुना मित्रस्य सम्बन्धिभिर्धामभिस्तेजोभिर्मूर्त्तिविशेषरूपैश्च सह सोम्यं सोमसम्बन्धि, मधु मधुरं भागं पिब। विश्वेभिः, बहुलं छन्दसीति भिसऐसादेशाभावः। सोम्यं, सोममर्हति य इत्यनुवृत्तौ, मये च (पां ४। ४। १३८।) इति यः प्रत्ययः, सोमस्य विकार इत्यर्थे, यस्येति च (पां ६। ४। १४८।) इत्यन्त्याकारलोपः, प्रत्ययस्वरः। मधु, फलि पाटि नमि मनि जनाङ्कुक् पटिनाकिधतस्येति उः प्रत्यय औणादिकः, निदित्यनुवृत्तेर्नित्त्वादाद्युदात्तः। वायुना, कृ वा पाजि मि स्वदि साध्यशुभ्य उसीति उण्प्रत्यय औणादिकः, आतो युक् चिण्कृतोः (पां ७। ३। ३३।) इति युगागमः, प्रत्ययस्वरः। पिब, पापाने, लोटः सेर्हिरादेशः, शपि, पा घ्रा ध्मा स्थाम्नादाण् (पां ७। ३। ७८।) इत्यादिना पिबादेशः, अतोहेः (पां ६। ४। १०५।) इति हेर्लुक्, शपः पित्त्वाद्धातुस्वरः पादादित्त्वान्निघातः, ह्यचोऽतस्तिङः (पां ६। ३। १३५।) इति संहितायां दीर्घः, धामभिः, धाञ् धातोः, आतो मनिन् (पां ३। २। ७४।) इति मनिन् प्रत्ययो नित्स्वरः ॥१०॥

एकादशीमृचमाह त्वं होतेति। हे अग्ने, मनुर्हितः मनुषा होत्रादिरूपेण मनुष्येण हितः सम्पादितो होता होमनिष्पादको यस्त्वं यज्ञेषु सीदसि तिष्ठसि, स त्वं नोऽस्मदीयमिममध्वरं यज्ञं यज निष्पादय। मनुर्हितः, मन्यत इति मनुः, जनेरुसिरित्यनुवृत्तौ, बहुलमन्यत्रापि उस्, ऋत्तिं यू वपीत्यादिना, निदित्यनुवृत्तौ नित्त्वादाद्युदात्तः, हितः, धाञ् धातोः, निष्ठा (पां ३। २। १०२।) इति क्तः प्रत्ययः, दधातेर्हिः (पां ७। ४। ४२।) इति दधातेर्हिरादेशः, मनुषा हितो मनुर्हितः, कर्तृकरणे कृता बहुलं (पां २। १। ३२।) इति

१।१२१ युक्ष्वा ह्यरुषी रथे हरितो देव रोहितः १
ताभिर्देवाँ इहावह ॥ २७ ॥

समासः, छत्वरापवादेन, तृतीयाकर्म्मणि (पां ६।२।४८।) इति पूर्वपदप्रकृतिस्वरत्वं। सीदसि, षद्लृ विशरणगत्यवसादनेषु, लटः सिप्, शपि, पाघ्राध्मा (पां ७।३।७८।) इत्यादिना सीदादेशः, निघातः। सेमं, इत्यत्र संहितायां, सोर्लोपे चेत्यादपूरणं (पां ६।१।३४।) इति सोर्लोपे गुणः। अध्वरं, न विद्यते ध्वरो यस्मिन् सोऽध्वरः, नञ्सुभ्यां (पां ६।२।१७२।) इत्युत्तरपदान्तोदात्तत्वं। नोऽध्वरमित्यत्र संहितायां, एङः पदान्तादति (पां ६।१।१०९।) इति पूर्वरूपं प्राप्तं, प्रकृत्यान्तः पादमव्यपरे (पां ६।१।११५।) इति प्रकृतिभावान्निवर्त्तते ॥ ११ ॥

द्वादशीमृचमाह युक्ष्वा हीति। हे देवाग्ने, रोहितो रोहिच्छब्दाभिधेयास्वदीया बडवा रथे युक्ष्व योजय, हिशब्दः पादपूरणार्थः। कीदृशीर्बडवाः, अरुषीर्गतिमतीः। हरितः, हर्त्तुं रथारूढान् पुरुषान् नेतुं समर्थाः। ताभिर्बडवाभिरिहास्मिन् कर्म्मणि देवानावह। युक्ष्व, युजिर् योगे, लोटः खरितेत्त्वादात्मनेपदं थास्, थासःसे (पां ३।४।८०।) इति थासः से आदेशः, सवाभ्यां वामौ (पां ३।४।९१।) इति वादेशः, रुधादिभ्यः श्नम्, बाऽऽलकाल्लुक्, कुत्वषत्वे, प्रत्ययस्वरेणान्तोदात्तः, संहितायां, ह्यचोऽतस्तिङः (पां ६।३।१३५।) इति दीर्घः। अरुषीः, ऋ गतौ, रन्ति गच्छन्तीत्यरुष्यो बडवाः, ऋहनिभ्यामुषण् इति उषण्प्रत्यय औणादिकः, धातोर्गुणो रपरत्वं, नित्त्वादाद्युदात्तोऽरुषशब्दस्तस्मात् स्त्रियां छान्दसो ङीप्, शसि, प्रथमयोः पूर्वसवर्णः (पां ६।१।१०२।) इति दीर्घः। रथे, हनिकुषिनीरमिकाशिभ्यः क्थन्निति रमेरौणादिकः क्थन्प्रत्ययः, नित्त्वादाद्युदात्तः। हरितः, हरुरुचिरधिभ्य इति रिति हरतेरितिप्रत्ययः, इकारः प्रत्ययस्वरेणोदात्तः। रोहितः, रुहेरपि तेनैव सूत्रेणेतिः प्रत्ययः, इकारः प्रत्ययस्वरेणोदात्तः। ताभिः, सावेकाचस्तृतीयादिः (पां ६।१।१६८।) इति विभक्तेः प्राप्तमुदात्तत्वं, नगोश्वन्त्सावर्धातुके (पां ६।१।१८२।) इति निषिध्यते। देवानित्यत्र पूर्ववत् सवानुनासिकौ ॥ १२ ॥ इति प्रथमस्य प्रथमे सप्तविंशो वर्गः ॥ २७ ॥

## पञ्चदशसूक्तं।

१ १ १ इन्द्र सोमं पिब ऋतुना त्वा विशन्त्विन्दवः।
मत्सरासस्तदोकसः॥

१ २ १ मरुतः पिबत ऋतुना पोत्राद्यज्ञं पुनीतन।
यूयं हि ष्ठा सुदानवः॥

इन्द्रसोममित्यादिकस्य द्वादशर्चस्य सूक्तस्य ऋषिछन्दसी पूर्ववत्, यद्यप्येतत् सूक्तं कृत्स्नमृतुदेवताकं, तथापि प्रत्यृचमिन्द्रादिदेवतान्तराणि मिलितानि, तथाचानुक्रम्यते इन्द्र सोममृतव्यं, तत्रैन्द्रीमारुती त्वाष्ट्र्याग्नेय्यैन्द्री मैत्रावरुणी चतस्रो द्रविणोदस आश्विन्याग्नेय्यृतुदेवताः सर्वत्रेति। विनियोगस्तु स्मार्त्ते द्रष्टव्यः, तस्मिन् सूक्ते प्रथमामृचमाह इन्द्रसोममिति। हे इन्द्र, ऋतुना सह सोमं पिब, इन्दवः पीयमानाः सोमाः त्वा त्वां आविशन्तु। कीदृशाः, मत्सरासः तृप्तिकराः। तदोकसस्त्वन्निवासाः, सर्वदा त्वदुदरस्थायिन इत्यर्थः। इन्द्र, षाष्ठिकमामन्त्रिताद्युदात्तत्वं। सोमं, अर्त्तिस्तुसुहुसृभ्यो मन्प्रत्यय औणादिकः, नित्त्वादाद्युदात्तः। पिब, पिबामित्रस्येत्यत्रोक्तं। आ त्वा विशन्त्वित्युत्तरवाक्यगताख्यातार्थेन सह समुच्चयार्थश्चकारो लुप्तः,। अतः, चादिलोपे विभाषा (पां ८। १। ६३।) इतीयं प्रथमातिङ्विभक्तिर्न निहन्यते। विशन्त्वितिलोपसाम्येऽपि द्वितीयात्वान्निहन्यत एव, संहितायां, आद्गुणः (पां ६। १। ८७।) इति प्राप्तस्य गुणस्य, ऋत्यकः (पां ६। १। १२८।) इति शाकल्यमते प्रकृतिभावादभावः। इन्दवः, प्र वो भ्रियन्त इत्यत्रोक्तं। मत्सरासः, तत्रैवोक्तं, आज्जसेरसुक् (पां ७। १। ५०।) इत्यसुक्, इत्ययं मात्र विशेषः। तदोकसः, तदेवौकः स्थानं येषां ते तथोक्ताः, बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वं॥ १॥

द्वितीयामृचमाह मरुत इति। हे मरुतः, ऋतुना सह पोत्रात् पोतृनामकस्य ऋत्विजः पात्रात् सोमं पिबत, ततोऽस्मदीयं यज्ञं पुनीतन, शोधयत,। हे सुदानवः, शोभनदातारो मरुतः हि यस्माद्यूयं स्थ, युष्माकं शोधयितृत्वं प्रसिद्धं, तस्माच्छोधयतेत्यर्थः। पिबत, अत्र तिङोऽदुपदेशाच्छपः परत्वाल्लसार्वधातुकानुदात्तत्वं, धातुस्वरः, पूर्वामन्त्रितस्याविद्यमानवत्त्वेन पदादपरत्वान्निघाताभावः, पूर्ववत्प्रकृतिभावः।

पोत्रात्, पोतुः सम्बन्धि पात्रं पोत्रं, तस्येदं (पां ४।३।१२०।) इत्यण्, तद्धितेष्वचामादेः (पां ७।२।११७।) इति प्राप्ता वृद्धिः, सर्वे विधयश्छन्दसि विकल्प्यन्त इति परिभाषया न भवति। नन्वेवमन्त्यस्य ऋकारस्य, अचोञ्णिति (पां ७।२।११५।) इति वृद्धिः प्राप्नोति। त्वाष्ट्रोजाग तइत्यत्रहि, विप्रतिषेधे परं कार्य्यं (पां १।४।२।) इति परया आदिवृद्ध्या अन्त्योपधालक्षणा वृद्धिर्बाध्यत इत्युक्तं, इहतु परस्या आदिवृद्धेश्छान्दसत्वेन निवृत्तत्वादन्त्यवृद्धिः प्राप्नोत्येवेति, एवं तर्हि अत्राप्यादिवृद्धिरौकारः क्रियतां, तस्य तु छान्दस ओकारो भविष्यति। पुनीतन, पूञ् पवने, लोट्, लोटो लङ्वद्भावात्, तस्थस्थमिपां ताम् तम् तामः (पां ३।४।१०१।) इति तादेशः, क्र्यादिभ्यः श्ना (पां ३।१।८१।) इति श्ना, ईहल्यघोः (पां ६।४।११३।) इतीकारः, तप्तनप्तनथनाश्च (पां ७।१।४५।) इति तनादेशः, प्वादीनां ह्रस्वः (पां ७।३।८०।) इति ह्रस्वः, प्रत्ययस्यापि, सार्वधातुकमपित् (पां १।२।४।) इति ङित्त्वात् स्वपूर्वयोरिकोर्गुणाभावः। यूयं, युष्मदःपरस्य जसो, ङेप्रथमयोरम् (पां ७।१।२८।) इत्यमादेशः, न विभक्तौतुस्माः (पां १।३।४।) इति मकारस्येत् सञ्ज्ञाप्रतिषेधः, यूयवयौजसि (पां ७।२।९३।) इति मपर्य्यन्तस्य यूयादेशः शेषेलोप इति सूत्रेणात्र यूयादेशात् प्रागेवान्तरङ्गत्वात् प्रातिपदिकस्यान्तोदात्तत्वं, शेषनिघातस्ततो यूयादेशः, स्थानेऽन्तरतमः (पां १।१।५०।) इति सर्वानुदात्तः, तत्र, शेषेलोपोऽन्त्यलोप इति पक्षे पूर्वसवर्णदीर्घत्वं बाधित्वा योऽयं, अमिपूर्वः (पां ६।१।१०७।) इति पूर्व्वरूपमेकादेशस्तेन प्रातिपदिकान्तेनोदात्तेन सहानुदात्तस्य सुपः, एकादेश उदात्तेनोदात्तः (पां ८।२।५।) इत्यनुदात्तत्वं, टिलोपपक्षे तु उदात्तनिवृत्तिस्वरेण विभक्तेरुदात्तत्वं। स्थ, अस भुवि, लटो मध्यमपुरुषबहुवचनं थः, अदिप्रभृतिभ्यः शपः (पां २।४।७२।) इति शपो लुक्, श्नसोरल्लोपः (पां ६।४।१११।) इत्यकारलोपो व्यत्ययेन षत्वं, हि च (पां ८।१।३४।) इति निषेधात्, तिङ्ङतिङः (पां ८।१।२८।) इति निघातो न भवति, संहितायां, अन्येषामपि दृश्यते (पां ६।३।१३७।) इति दीर्घत्वं, हे सुदानवः यूयं हि स्थेति विवक्षितं, सुदानवः, दावाभ्यां नुरिति नुः, सोः प्रादिसमासः, आमन्त्रितनिघातः, अत्र यूयमित्युद्दिश्य सुदानवः स्थेति न विधीयते, येन आमन्त्रितत्वान्निघातो न स्यात्, किन्तु सुदानव इति सुदानसिद्धव-

१३१ अभि यज्ञं गृणीहि नो ग्रावा नेष्टः पिब ऋतुना ।
त्वं हि रत्नधा असि ॥

द्वाटत्वेन सम्बोधनेऽन्येषु मारुतसूक्तेषु मरुतां प्रसिद्धत्वात् प्रभावातिशयाद्यूयं स्थेति युष्मच्छब्देन तानिनिर्दिश्य पुनीतनेति प्रार्थनवचने तेषां हेतुत्वं हिशब्देनोच्यते ॥ २ ॥

तृतीयामृचमाह अभि यज्ञमिति । आशब्दः स्तोवाची, तथाच यास्क आह मेना मा इति स्तोमान्, मेना मानयन्त्येनान्, मा गच्छन्त्येनानिति, मा अस्य सन्तीति मावान्, नेष्टृशब्दोऽपि त्वष्टारं देवमाह, कस्मिंश्चिद्देवसत्रे नेष्टृत्वेन त्वष्टृतत्वात्, हे मावः पत्नीयुक्त नेष्टस्त्वष्टः, नोऽस्मदीयं यज्ञं अभिगृणीहि, अभितो देवानां समीपे स्तुहि, ऋतुना सह त्वं सोमं पिब, हि यस्मात्त्वं रत्नधा असि, रत्नानां दाता असि भवसि, तस्मात् सोमं पातुमर्हसीत्यर्थः । अभि, उपसर्गाश्चाभिवर्जमिति पर्युदासादभेरन्तोदात्तत्वं । गृणीहि, गॄ शब्दे, लोटः सिपो हिः, क्र्यादिभ्यः श्ना इति श्ना, हेर्ङित्त्वात् ईडित्यघोः (पां ६ । ४ । २२३ ।) इति ईत्वं, श्नाप्रत्ययस्य ङित्त्वाद्गुणाभावः, घादीनां झलः (पां ८ । २ । ८० ।) इति झलः, तिङ्ङ् तिङः (पां ८ । १ । २८ ।) इति निघातः । मावः, मा अस्य सन्तीति मतुप्, व्यत्ययेन वत्वं, सम्बुद्धौ, मतुवसोरु (पां ८ । ३ । १ ।) इति रुत्वं, विसर्गः, पादादित्वेनामन्त्रितनिघाताभावात् षाष्ठिकामन्त्रितायुदात्तत्वं, माव इत्यस्य विशेषणतया विशेषवचनत्वात्, नामन्त्रिते समानाधिकरणे (पां ८ । १ । ७३ ।) इति निषेधाभावात्, अविद्यमानवत्त्वेनोत्तरस्य नेष्टृशब्दस्य षाष्ठिकमायुदात्तत्वं । पिब, श्नपः पित्त्वाद्धातुस्वरः, पूर्वयोरामन्त्रितयोरविद्यमानवत्त्वेन निघाताभावः । रत्नानि दधातीति रत्नधाः, क्विप् च (पां ३ । २ । ७६ ।) इति क्विप्, धातुस्वरः, समासे क्षदुत्तरपदप्रकृतिस्वरत्वेन स एव शिष्यते । असि, सिपः पित्त्वाद्धातुस्वरः, तिङ्ङ् तिङ इतिनिघातो न भवति, हिच्च (पां ३ । २ । ७६ ।) इति प्रतिषेधात् ॥ ३ ॥

१ ४ १ अग्ने देवाँ इहावह सादया योनिषु त्रिषु १
परिभूष पिब ऋतुना ॥
१ ५ १ ब्राह्मणादिन्द्र राधसः पिबा सोममृतूँरनु १
तवेद्धि सख्यमस्तृतं ॥

चतुर्थीमृचमाह अग्ने देवानिति। हे अग्ने, देवानिह कर्म्मणि आवह, ततो योनिषु स्थानेषु त्रिषु सवनेषु सादय देवानुपवेशय, ततस्तान् परिभूषालङ्कुरु, ऋतुना सह त्वं सोमं पिब। अग्ने देवानित्ययं पादो गतः। योनिषु, यु मिश्रणे, वहिश्रीत्यादिना निःप्रत्यय औणादिकः, नित्त्वादाद्युदात्तः। त्रिषु, षट्त्रिचतुर्भ्योहलादिः (पां ६।१।१७९।) इति विभक्तेरुदात्तत्वं। परिभूष, भूष अलङ्कारे, तिङ्ङतिङ इति निघातः। पिब ऋतुना इति शब्दौ गतौ ॥ ४ ॥

पञ्चमीमृचमाह ब्राह्मणादिति। हे इन्द्र, ब्राह्मणात्, ब्राह्मणाच्छंसिसम्बन्धात्, राधसो धनभूतात् पात्रात् सोमं पिब, किं कृत्वा ऋतून् ऋतुदेवान् अनुसृत्य ऋतवोऽपि पिबन्त्वित्यर्थः। हि यस्मात्तवेत् तवैव सख्यं ऋतूनामविच्छिन्नं तस्मादृतुभिः सह पानं युक्तं। ब्राह्मणात्, ब्रह्मशब्देनात्र ब्रह्मवर्गे द्वितीयो ब्राह्मणाच्छंसी कथ्यते, स च पुंलिङ्गे शेषनिघातेनानुदात्तादिस्तस्य सम्बन्धी उत्तष्ठश्चमसः, स च तस्यैवावयववन्नियत इत्यवयवविवक्षायां, अनुदात्तादेरञ् (पां ४।२।४४।) इति अञ्, तेन ञित्त्वादाद्युदात्तश्चमसपरोऽत्र ब्राह्मणशब्दः। राधसः, सर्वधातुभ्योऽसुन्नित्यसुन्, नित्त्वादाद्युदात्तः। पिब, पादादित्वादाद्युदात्तत्वं, द्व्यचोऽतस्तिङः (पां ६।३।१३५।) इति दीर्घत्वं। ऋतूँरन्वित्यत्र, दीर्घादटिसमानपादे (पां ८।३।९।) इति नकारस्य रुत्वं, अत्रानुनासिकः पूर्वस्य तु वा (पां ८।३।२।) इत्युकारस्य सानुनासिकत्वं। तव, युष्मदस्मद्भ्यां ङसोऽश् (पां ७।१।२७।) इत्यश्, शित्त्वात् सर्वादेशः, तवममौ ङसि (पां ७।२।७६।) इति तवादेशः, युष्मदस्मदोर्ङसि (पां ६।१।१२१।) इत्याद्युदात्तत्वं सख्यं, सख्युः कर्म्म सख्यं, सख्युर्यः (पां ५।१।११५।) इति यः, यस्येति च (पां ६।४।१४८।) इतीकारलोपः, प्रत्ययस्वरः। अस्तृतं, स्तृणोतेर्हिंसार्थस्य क्तः, नञ्समासः, अव्ययपूर्वपदप्रकृतिस्वरत्वं ॥ ५ ॥

१ ६ १ युवं दक्षं धृतव्रत मित्रावरुण दूलभं १
ऋतुना यज्ञमाशाथे ॥ २८ ॥

षष्ठीमृचमाह युवं दक्षमिति। हे धृतव्रत क्षीक्षतकर्म्माणौ, मित्रावरुण हे मित्रावरुणनामकौ देवौ, युवं उभौ युवां ऋतुना सह अस्मदीयं यज्ञमाशाथे व्याप्नुथः। कीदृशं यज्ञं, दक्षं प्रवृद्धं। दूलभं दुर्दृहं, शत्रुभिर्दग्धुं विनाशयितुमशक्यमित्यर्थः। युवं युवां, प्रथमादिवचनं औ, ङेप्रथमयोरम् (पां ७।१।२८।) इत्यमादेशः, युवावौद्विवचने (पां ७।२।९१।) इति मपर्य्यन्तस्य युवादेशः, श्वेवेलोपः (पां ७।२।९०।) इति टिलोपोऽन्त्यलोपो वा, अमिपूर्वत्वं, भाषायामेव ह्रास्वं, टिलोपपक्षे उदात्तनिवृत्तिस्वरेण अम उदात्तत्वं, अन्त्यलोपपक्षे तु एकादेश उदात्तेनोदात्त इत्येकादेश उदात्तः। दक्षं, दक्ष वृद्धौ, दक्षन्त्यनेनेति करणे घञ्, एवं हि पुंलिङ्गत्वनियमः, अनस्य नियम इति वार्त्तिकेन नपुंसकत्वं। धृतव्रत, मित्रावरुण। धृतानि व्रतानि याभ्यां तौ, मित्रश्च वरुणश्च मित्रावरुणौ, उभयत्र सुपांसुलुगित्यादिना विभक्तेराकारः, मित्रशब्दस्य, देवताद्वन्द्वे च (पां ६।३।२६।) इत्यानङादेशः, प्रथमस्यामन्त्रितनिघातः, द्वितीयस्य पादादित्वादाद्युदात्तत्वं, संहितायां छान्दसं ह्रस्वत्वं। दूलभं दुर्दृहं, दृह भस्मीकरणे, दुःखेन दह्यते इति दुर्दृहं, ईषद्दुः सु षु कृच्छ्रा (पां ३।३।१२६।) इत्यादिना दुरित्युपपदे दृहेः खल्, व्यत्ययो बहुलं (पां ७।१।८५।) इति रेफस्य लोपः, उकारस्य ऊकारो, दकारस्य लकारो, हकारस्य च भकारः, लिति (पां ६।१।१९३।) इति प्रत्ययात् पूर्वमुदात्तं, छन्दसस्तरपदप्रकृतिस्वरत्वेन स एव शिष्यते। आशाथे, अशू व्याप्तौ, छन्दसि लुङ्लङ्लिटः (पां ३।४।६।) इति वर्त्तमाने लिट्, मध्यमपुरुषद्विवचनामथां, टेरेत्वं, अत आदेः (पां ७।४।७०।) इत्यभ्यासस्य दीर्घः, अश्नोतेश्च (पां ७।४।७२।) इति प्राप्तो नुडागमः, अनित्यमागमशासनमिति परिभाषया निवर्त्तते ॥ ६ ॥ इति प्रथमस्य प्रथमे अष्टाविंशो वर्गः ॥ २८ ॥

। ७ । द्रविणोदा द्रविणसो ग्रावहस्तासो अध्वरे ।
यज्ञेषु देवमीळते ॥

सूक्ते सप्तमीमृचमाह द्रविणोदा इति । अध्वरे अग्निष्टोमे प्रकृतिरूपे, यज्ञेषु विकृतिरूपेषु उक्थादिषु देवमग्निमीळते ऋत्विजः स्तुवन्ति । कीदृशा ऋत्विजः, द्रविणसो धनार्थिनः, ग्रावहस्तासः, अभिषवसाधनपाषाणधारिणः । कीदृशं देवं, द्रविणोदाः धनप्रदं । यद्वा धनप्रदोऽग्निः, सोमं पिबत्विति शेषः । तमेतं मन्त्रं यास्क एवं निर्वक्ति, द्रविणोदाः कस्मात् धनं द्रविणमुच्यते, यदेनदभिद्रवन्ति, बलं वा द्रविणं, यदेनेनाभिद्रवन्ति, तस्य दाता द्रविणोदाः, तस्यैषा भवति द्रविणोदा द्रविणसइत्यादि । सोऽयं यास्कोक्तो निर्वचनप्रपञ्चस्तस्मिन्नेव यज्ञेऽवगन्तव्यः । द्रविणोदाः, दुदाञ्भ्यामिनन्निति दुधातोरिनन्प्रत्यय औणादिकः, नित्त्वादाद्युदात्तो द्रविणशब्दस्तद्दातीति द्रविणोदाः, क्विप् च ( पां ३ । २ । ७६ । ) इति क्विप्, पूर्वपदस्य सकारोपजनश्छान्दसः, रुत्वेत्वे, छदुत्तरपदप्रकृतिस्वरत्वं । देवविशेषणत्वेनैकवाक्यतापक्षे द्वितीयायाः सु आदेशः । अथवा द्रविणमात्मन इच्छन्ति, द्रविणस्यति, सुप आत्मनः क्यच् ( पां ३ । १ । ८ । ) इति क्यच्, सर्वप्रातिपदिकेभ्यो लालसायां सुग्वक्तव्य इति वार्त्तिकेन क्यचि परतः सुगागमः, द्रविणस्यतेः सम्पदादित्वाद्भावे किप्, अतो लोपः ( पां ६ । ४ । ४८ । ) इत्यकारलोपः, क्वौसुप्तं न स्थानिवदिति परिभाषया स्थानिवत्त्वप्रतिषेधाद्यलोपः, एवं द्रविणस्शब्दो धनेच्छावचनः, द्रविणेच्छां दस्यति यथेष्टधनप्रदानेनोपक्षयतीत्यर्थं, दसु उपक्षये इत्यस्मादन्तर्भावितण्यर्थात्, क्विप्चेतिक्विप्, एवं द्रविणोदस्शब्दः सकारान्तो भवति, तथाच द्रविणोदसाः प्रवादा भवन्तीति नैरुक्तो व्यवहार उपपद्यते । अतो द्रविणोदस्शब्दो भिन्नवाक्यत्वे स्वार्थे प्रथमा, एकवाक्यत्वे तु व्यत्ययेन द्वितीयार्थो भवति । द्रविणस इत्यत्रापि वाक्यभेदपक्षे द्रविणसः सोममस्येत्यर्थे, सकारोपजनश्छान्दसः, आद्युदात्तत्वन्तु नियमेनास्थितं, ऋत्विग्विशेषणत्वेनैकवाक्यत्वपक्षे तु क्यजन्तात् किप्, अतो लोपादिपूर्ववत्, अत्र तु पक्षे क्यचश्चित्त्वेनान्तोदात्तत्वे प्राप्ते व्यत्ययेनाद्युदात्तत्वं । ग्रावयुक्ता हस्ता येषां ते ग्रावहस्तासः, आज्ञसेरसुक् ( पां ७ । १ । ५० । ) इत्यसुक्, ग्रावशब्दो दृषादित्वादाद्युदात्तः,

१८१ द्रविणोदा ददातु नो वसूनि यानि शृण्विरे १
देवेषु ता वनामहे ॥
१९१ द्रविणोदाः पिपीषति जुहोत प्र च तिष्ठत १
नेष्टादृतुभिरिष्यत ॥

बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वं । अध्वरे, न विद्यते ध्वरो हिंसा यस्मिन्, नञ्सुभ्यां (पां ६ । २ । १७२) इत्युत्तरपदान्तोदात्तत्वं । ईळते, अनुदात्तेत्त्वादात्मनेपदं, अदिप्रभृतिभ्यः शपः (पां २ । ४ । ७२ ।) इति शपो लुक्, झोऽन्तः (पां ७ । १ । ३ ।) इति झस्यान्तादेशः ॥ ७ ॥

अष्टमीमृचमाह द्रविणोदा ददात्विति । द्रविणोदा देवो नोऽस्मभ्यं वसूनि धनानि ददातु, यानि धनानि शृण्विरे हविरुपयुक्तत्वेन श्रूयन्ते, तानि सर्वाणि धनानि देवेषु निमित्तभूतेषु वनामहे सम्भजामः, धनैर्देवान् यष्टुं तानि स्वीकुर्म इत्यर्थः । द्रविणोदा इति गतं । वसूनि, शॄ स्वृ स्निहीत्यादिना उः प्रत्यय औणादिकः, निदित्यनुवृत्तेराद्युदात्तः । शृण्विरे, श्रु श्रवणे, छन्दसि लुङ्लङ् लिटः (पां ३ । ४ । ६ ।) इति वर्त्तमाने लिटो झ, लिटस्तझयोरेशिरेच् (पां ३ । ४ । ८१ ।) इति लिटो झस्य इरेच्, छन्दस्युभयथा (पां ३ । ४ । ११७ ।) इति सार्वधातुकत्वे व्यत्ययेन शृः, तत्सन्नियोगेन शृभावश्च, उवङादेशे, ऊश्रुवोः सार्वधातुके (पां ६ । ४ । ८७ ।) इति यणादेशः, चितः (पां ६ । १ । १६३ ।) इत्यन्तोदात्तत्वं, यद्वृत्तान्नित्यं (पां ८ । १ । ६६ ।) इति निघातप्रतिषेधः । ता तानि, शेश्छन्दसि बहुलं (पां ६ । १ । ७० ।) इति शेर्लोपः, नलोपः प्रातिपदिकान्तस्य (पां ८ । २ । ७ ।) इति नलोपः । वनामहे, वनषणसम्भक्तौ, व्यत्ययेनात्मनेपदं ॥ ८ ॥

नवमीमृचमाह द्रविणोदाः पिपीषतीति । द्रविणोदा देव ऋतुभिः सह नेष्टात् नेष्तृसम्बन्धिपात्रात् पिपीषति सोमं पातुमिच्छति, ततो हे ऋत्विजः, इष्यत होमस्थाने गच्छत, गत्वा च जुहोत, होमं कुरुत, कृत्वा प्रतिष्ठत च, होमस्थानात् स्थानान्तरं प्रति प्रस्थानमपि कुरुत । द्रविणोदा इति गतं । पिपीषति, पा पाने, पातुमिच्छतीति सन्, छान्दस ईकारः, तिङ्ङतिङः (पां ८ । १ । २८ ।) इति निघातः । जुहोत, लोट्, मध्यमपुरुषबहुवचनं, तस्य लङ्वद्भावात् तादेशः, तस्य, तप्-

१ १० १ यत्त्वा तुरीयमृतुभिर्द्रविणोदो यजामहे १
अध स्मा नो ददिर्भव ॥

नप्तनथनाश्च ( पां ७ । १ । ४५ । ) इति तबादेशः, तस्य पित्त्वाद्गुणः, अभ्यस्तानामादिः ( पां ६ । १ । १८९ । ) इत्यनुवृत्तौ, अनुदात्ते च ( पां ६ । १ । १९० । ) इत्यनुदात्तत्वे प्राप्ते, भीह्रीहुमदजनधनदरिद्राजागरां प्रत्ययात् पूर्वं पिति ( पां ६ । १ । १९२ । ) इत्योकार उदात्तः । तिष्ठत, ष्ठा गतिनिवृत्तौ, लोण्मध्यमबहुवचनस्य थस्य लङ्भावात् तादेशः, शपि, पा घ्रा ध्मा स्था म्ना दाण् ( पां ७ । ३ । ७८ । ) इत्यादिना तिष्ठादेशः, समवप्रविभ्यस्थः ( पां १ । ३ । २२ । ) इत्यात्मनेपदं, तत्रानुवृत्तस्य निर्द्दिष्टग्रहणस्यानन्तर्य्यार्थत्वात्, अत्र चशब्देन व्यवधानात्, तेप्राग्धातोः ( पां १ । ४ । ८० । ) इत्युपसर्गत्वेन प्राक्प्रयोक्तव्यस्यापि प्रशब्दस्य, व्यवहिताश्च ( पां १ । ४ । ८२ । ) इति छन्दसि व्यवहितप्रयोगः, अत्र चशब्दो जुहोतेति पूर्वेण सह समुच्चयार्थो न पुनरिष्यतेत्युत्तरेण, तेनाप्रथमत्वात्, चवायोगे प्रथमा ( पां ८ । १ । ५९ । ) इति निषेधाभावात्, तिङ्ङतिङ इति निघातः । नेष्ट्रात्, पोत्राद्यज्ञं पुनीतनेत्यत्र पोत्रशब्दे यदुक्तं तदत्र द्रष्टव्यं । इष्यत, इषगतौ, लोण्मध्यमबहुवचनं ॥ ९ ॥

दशमीमृचमाह यत्त्वा तुरीयमिति । हे द्रविणोदो देव यद्यस्मात् कारणात्, ऋतुभिः सह त्वा तुरीयं चतुर्थं त्वां यजामहे । अधेत्ययं निपातस्तच्छब्दार्थस्तस्मात् कारणान्नोऽस्मभ्यं ददिर्धनस्य दाता भव स्म अवश्यम्भव । तुरीयं, चतूर्णां पूरणं, चतुरश्छयतावाद्युक्षरलोपश्चेतिवार्त्तिकेन छः, प्रत्ययस्वरेणोदात्तात् प्रागेव, आयन्नेयीनीयियः ( पां ७ । १ । २ । ) इति ईयादेशः, आयन्नादिषु उपदेशिवद्वचनं स्वरसिद्ध्यर्थमिति वचनात्, कृते आदेशे प्रत्ययस्वरेण ईकार उदात्तः । द्रविणोदः उक्तं, पादादित्वादामन्त्रिताद्युदात्तत्वं । यजामहे, अत्र शपः पित्त्वेन, तिङश्च लसार्वधातुस्वरेण धातुकस्वर एव, पूर्वस्यामन्त्रितस्याप्यविद्यमानवत्त्वात्, यद्वृत्तयोगान्न निघातः, व्यवहितयोगे पि हि स निषेध इत्युक्तं । अध अतः, छान्दसो धकारः । स्म, चादिरनुदात्तः, संहितायां, निपातस्य च ( पां ६ । ३ । १३६ । ) इति दीर्घः । ददिः, डुदाञ् दाने, आदृगमहनजनः किकिनौ लिट् च

१११ अश्विना पिबतं मधु दीद्यग्नी शुचिव्रता।
ऋतुना यज्ञवाहसा॥

(पां ३।२।१७१।) इति किः प्रत्ययः, जिष्वङ्गावाद्विर्वचनादिः, आतो लोप इटि च (पां ६।४।६४।) इत्याकारलोपः, प्रत्ययस्वरः॥ १०॥

एकादशीमृचमाह अश्विना पिबतमिति। हे अश्विना अश्विनौ, मधु माधुर्योपेतं सोमं पिबतं। कीदृशौ दीद्यग्नी दीप्यमानाहवनीयाद्यग्नियुक्तौ। शुचिव्रता, शुद्धकर्म्माणौ। ऋतुना ऋतुदेवतया सह यज्ञवाहसा यज्ञस्य निर्वाहकौ। अश्विना, सम्बोधनद्विवचनस्य, सुपांसुलुक् (पां ७।१।३९।) इत्यादिना आकारः, आमन्त्रिताद्युदात्तः। पिबतं, श्नपः पित्त्वादनुदात्तत्वं, तिङश्च ससार्वधातुकस्वरेण धातुस्वर एव शिष्यते। मधु. फलि पाटि नमि मनि जनां गुक् पटिनाकिधतस्त्रेत्युः प्रत्यय औणादिकः, निदित्यनुवृत्तेर्नित्त्वादाद्युदात्तः। दीद्यग्नी, दिवु क्रीडादौ, अन्येभ्योऽपि दृश्यन्ते (पां ३।२।७५।) इति विच्, वेरपक्तलोपाद्वलिलोपो बलीयानितिपरिभाषया प्रथमवकारस्य लोपः, प्रथमं प्रत्ययलोपे हि, वर्णाश्रयविधौ प्रत्ययलक्षणं नास्तीतिपरिभाषया निषेधाद्वलिलोपो न स्यात्, छान्दसं द्विर्वचनं, तुजादीनां दीर्घोऽभ्यासस्य (पां ६।१।७।) इति तुजादित्वादभ्यासस्य दीर्घत्वं, यङ्लुगन्ताद्वा, सञ्ज्ञापूर्वको विधिरनित्य इति परिभाषयाभ्यासस्य गुणाभावः, दीदिरग्निर्ययोस्तौ दीद्यग्नी, आमन्त्रितायुदात्तत्वं, पादादित्वान्न निघातः। शुचिव्रता, शुचि व्रतं ययोस्तौ, सुपांसुलुगित्याकारः, दीद्यग्निशब्दस्य सामन्यवचनत्वेन, नामन्त्रिते समानाधिकरणे (पां ८।१।७३।) इति अविद्यमानवत्त्वप्रतिषेधादाद्यमिकनिघातत्वं, पूर्वस्य पराङ्गवद्भावादैकस्वर्यं। यज्ञवाहसा, वह प्रापणे, यज्ञं वहत इति यज्ञवाहसौ, वहिहाधाज्भ्यश्छन्दसीत्यसुन्प्रत्यय औणादिकः, तत्र हि, गतिकारकयोरपि पूर्वपदप्रकृतिस्वरत्वं वक्तव्यमितिवचनात् सोमपदानामपि भवतीत्युक्तं, निदित्यनुवृत्तेरुपधाद्वृद्धिः, सुपांसुलुगित्यादिना विभक्तेराकारः, आमन्त्रितनिघातः, असामर्थ्यात् पूर्वस्य पराङ्गवद्भावः॥ ११॥

१ १२ १ गार्हपत्येन सन्त्य ऋतुना यज्ञनीरसि १
देवां देवयते यज ॥२९॥ इति तृतीयोऽनुवाकः ॥

षोडशर्चसूक्तं।

१ १ १ आ त्वा वहन्तु हरयो वृषणं सोमपीतये १
इन्द्र त्वा सूरचक्षसः ॥

द्वादशीमृचमाह गार्हपत्येन सन्त्येति। हे सन्त्य फलप्रदाग्निदेव, गार्हपत्येन गृहपतिसम्बन्धिना रूपेण युक्तः सन्, ऋतुना ऋतुदेवेन सह यज्ञनीर्यज्ञनिर्वाहकोऽसि, तस्मात्त्वं देवयते देवविषयकामनायुक्ताय यजमानाय देवान् यज। गार्हपत्येन, गृहपतिना संयुक्तो ष्यः (पां ४। ४। ९०।) इति ष्यः, यस्येति च (पां ६। ४। १४८।) इतीकारस्य लोपः, ञित्त्वादाद्युदात्तत्वं, गृहपतित्वमित्यर्थे पत्यन्तपुरोहितादिभ्यो यक् (पां ५। १। १२८।) इति यक्, कित्त्वेनाद्युदात्तत्वं स्यात्। सन्त्य, सननं भवः, षणु दाने, क्तिचक्तौच सञ्ज्ञायां (पां ३। ३। १७४।) इति क्तिच्, नक्तिचि दीर्घश्च (पां ६। ४। ३९।) इति दीर्घनलोपयोरभावः, भवे छन्दसि (पां ४। ४। ११०।) इति यत्, तत्र साधुः (पां ४। ४। ९८।) इति वा निघातः। यज्ञं नयतीति यज्ञनीः, सत् सूद्विषद्रुहदुहयुज (पां ३। २। ६१।) इत्यादिना क्विप्, क्वदुत्तरपदप्रकृतिस्वरः। देवयते, देवानात्मन इच्छतीति देवयति, सुप आत्मनः क्यच् (पां ३। १। ८।) इति क्यच्, तस्मात्, क्यचि च (पां ७। ४। ३३।) इति ईत्वं न भवति, न छन्दस्यपुत्रस्य (पां ७। ४। ३५।) इति निषेधात्, अस्वाङ्गस्यात् (पां ७। ४। ३७।) इत्यात्त्वविधानात्, आत्त्वनिषेधे प्राप्तस्य दीर्घस्याप्येष निषेध इत्युक्तं, भृतुरनुमोनद्यजादी (पां ६। १। १७३।) इति विभक्तेरुदात्तत्वं, अत्र क्यचश्चित्त्वादन्तोदात्तत्वं, भृपः पित्त्वादनुदात्तत्वं, भृतुश्चलसार्वधातुकस्वरयोरभयोः क्यचासहैकादेशे, एकादेश उदात्तेनोदात्तः (पां ८। २। ५।) इत्युदात्तः, तस्मादन्तोदात्तत्वात् परस्या विभक्तेः, भृतुरनुमोनद्यजादीत्युदात्तत्वं ॥ १२ ॥ इति प्रथमस्य प्रथमे एकोनत्रिंशो वर्गः ॥ २९ ॥ इति तृतीयोऽनुवाकः ॥ ३ ॥

आ त्वा वहन्त्विति चतुर्थेऽनुवाके नवर्चं सूक्तं, ऋषिछन्दसीपूर्ववदनुवर्त्तेते, विशेषदेवताभावादिन्द्रो देवता, विनियोगस्तु प्रातःसवने

## १२१ इमा धाना घृतस्नुवो हरी इहोपवक्षतः १ इन्द्रं सुखतमे रथे ॥

मैत्रावरुणस्य उन्नीयमाने इदं सूक्तं आत्मा वहन्तु हरय इति। तथाच द्विदैवत्यैश्चरन्तीति खण्डे सूचितं, उन्नीयमानेभ्योऽन्वाहात्मा वहन्तिति। तथा षोडशीतिशस्त्रे आत्मा वहन्तु हरय इति तिस्रः, तथाच सूचितं, अथ षोडशीतिखण्डे आत्मा वहन्तु हरय इति तिस्रो गायत्र्य इति, तस्मिन् सूक्ते प्रथमामृचमाह आत्मा वहन्तिति। हे इन्द्र, वृषणं कामानां वर्षितारं त्वां सोमपीतये सोमपानार्थं हरयस्त्वदीया अश्वा आवहन्तु, अस्मिन् कर्म्मण्यानयन्तु। तथाच सूरचक्षसः सूर्यसमानप्रकाशयुक्ता ऋत्विजस्त्वां मन्त्रैः प्रकाशयन्तिति शेषः, हरन्तीति हरयः, सर्वधातुभ्य इन्निति इन्प्रत्यय औणादिकः, नित्त्वादाद्युदात्तः। वृषणं, कनिन् युवृषि तक्षीत्यादिना कनिन् प्रत्यय औणादिकः, कित्त्वाल्लघूपधगुणाभावः, वासपूर्वस्य निगम इति विकल्पितमुपधादीर्घत्वं। सोमपीतये, एभिरभ इत्यत्रोक्तं। सूरचक्षसः, चक्षिङ् व्यक्तायां वाचि, सर्वधातुभ्योऽसुन्, चक्षिङः ख्याञ् (पां २। ४। ५।) इति ख्याञ् न भवति, अनसोः प्रतिषेधो वक्तव्य इति निषेधात्। सृ प्रेरणे, सरतीति सूरः, सृसुधाद्यधिभ्यः कन्निति कन् प्रत्यय औणादिकः, कित्त्वादृणाभावः, नित्त्वादाद्युदात्तः, सूरवच्चक्षः ख्यानं प्रकाशो येषां, बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वं ॥ १ ॥

द्वितीयामृचमाह इमा धाना इति। हरीशब्दश्च इन्द्ररथस्य वोढारावश्वावित्याचष्टे, तथाच श्रुत्यन्तरं, हर्य्योः स्थातेति, हरिभ्यां त्वेन्द्रो देवतां गमयत्विति च। एतदेवाभिप्रेत्य निघण्टुकार आह हरी इन्द्रस्येति। तादृशौ हरी इमा यागार्थं वेद्यामासादितत्वेन पुरोवर्त्तिनीर्धाना भक्षयवतण्डुलानुद्दिश्य सुखतमे रथे इन्द्रमुपस्थाप्यास्मिन् कर्म्मण्युपवक्षतः वेदीसमीपे वहतां। कीदृशीर्धानाः, घृतस्नुवः क्षरितघृताः। धानाः, धारवस्त्र्यौतिभ्यो न इति दधातेर्नः प्रत्यय औणादिकः, प्रत्ययस्वरः। घृतं स्रवन्तीति घृतस्नुवः, क्विपि तुगभावश्छान्दसः, धातुस्वरः, समासे क्रादुत्तरपदप्रकृतिस्वरत्वं, स्रोः संयोगपूर्वत्वेन यणभावादुवङादेशः। हरी, हृञ् हरणे, सर्वधातुभ्य इन्निति इन्प्रत्यय औणादिकः, नित्त्वादाद्युदात्तः, प्रगृह्यत्वात् संहितायां प्रकृतिभावः।

१३। इन्द्रं प्रातर्हवामह इन्द्रं प्रयत्यध्वरे।
इन्द्रं सोमस्य पीतये॥
१४। उप नः सुतमागहि हरिभिरिन्द्र केशिभिः।
सुते हि त्वा हवामहे॥

वक्षतः, प्रार्थनायां लिङर्थे लेट्, तस्य प्रथमपुरुषद्विवचनं तस्, लेटोऽडाटौ (पां ३।४।९४।) इत्यडागमः, शपि प्राप्ते, सिब्बहुलं लेटि (पां ३।१।३४।) इति सिप्, ढत्वकुत्वषत्वानि, तिङ्ङतिङः (पां ८।१।२८।) इति निघातः। सुखतमे, गतं॥ २॥

तृतीयामृचमाह इन्द्रं प्रातरिति। प्रातः कर्म्मारम्भप्राप्ते प्रातः सवने इन्द्रं हवामहे आह्वयामः, तथैवाध्वरे सोमयागे प्रयति प्रगच्छति प्रारभ्य वर्त्तमाने सति माध्यन्दिने सवने तमिन्द्रं हवामहे, तथा यज्ञस्य समाप्त्यवसरे तृतीयसवने सोमस्य पीतये सोमपानार्थं तमिन्द्रं हवामहे। प्रातः, स्वरादिष्वन्तोदात्तो निपातितः। हवामहे, ह्वेञो लटि शपि परतः, ह्वः सम्प्रसारणं (पां ६।१।३२।) इत्यनुवृत्तौ, बहुलं छन्दसि (पां ६।१।३४।) इति सम्प्रसारणं, परपूर्वत्वं, गुणावादेशौ। प्रयति, इण् गतौ, लटः शतृ, अदिप्रभृतिभ्यः शपः (पां २।४।७२।) इति शपो लुक्, शतुर्ङित्त्वाद्गुणाभावः, प्रादिसमासः, कृद्ग्रहणे गतिकारकपूर्वस्यापि ग्रहणमितिवचनात्, प्रत्ययग्रहण इति नियमाभावात्, शतुरनुमोनद्यजादी (पां ६।१।१७३।) इति विभक्तेरुदात्तत्वं। अध्वरे, उक्तं, संहितायां, उदात्तस्वरितयोर्यणः स्वरितोऽनुदात्तस्य (पां ८।२।४।) इति अकारस्य स्वरितत्वं। पीतये, पापाने, क्तिनि छान्दसमन्तोदात्तत्वं॥ ३॥

चतुर्थीमृचमाह उपनः सुतमागहीति। हे इन्द्र, केशिभिः केशरयुक्तैर्हरिभिरश्वैस्त्वं नोऽस्मदीयं सुतमभिषुतं सोमं प्रति उप समीपे आगहि आगच्छ, सुतेऽभिषुते सोमे निमित्तभूते सति हि यस्मात् कारणात् त्वां हवामहे त्वामाह्वयामस्तस्मादागच्छेति पूर्वत्रान्वयः। गहि, गमेर्लोटः सेर्हिः, शप इत्यनुवृत्तौ, बहुलं छन्दसीति शपो लुक्, इषु गमियमां छः (पां ७।३।७७।) इति छत्वं न भवति, नलुमताङ्गस्य (पां १।१।६३।) इति निषेधात्, अनुदात्तोपदेशे

१५१ सेमं नः * स्तोममागह्युपेदं सवनं सुतं १
गौरो न तृषितः पिब ॥ ३० ॥
१६१ इमे सोमास इन्दवः सुतासो अधि बर्हिषि १
ताँ इन्द्र सहसे पिब ॥

(पां ६ । ४ । ३७ ।) इत्यादिनानुनासिकलोपः, तस्य, असिद्धवदत्राभात् (पां ६ । ४ । २२ ।) इत्यसिद्धत्वात्, अतो हेः (पां ६ । ४ । १०५ ।) इति हेर्लुङ् न भवति। केभिर्भिः, क्लिशेरन् लोलोपश्चेति अन्, ललोपश्च, मत्वर्थीय इनिः प्रत्ययः, प्रत्ययस्वरः। हवामहे, ङः सम्प्रसारणमित्यनुवृत्तौ, बह्वलं छन्दसीति सम्प्रसारणं, प्रपः पित्त्वादनुदात्तत्वं, तिङश्च लसार्वधातुकस्वरेण धातुस्वर एव, तिङ्ङ् तिङ इति न निघातः, हि च (पां ८ । १ । ३४ ।) इति प्रतिषेधात् ॥ ४ ॥

पञ्चमीमृचमाह सेममिति। हे इन्द्र, स त्वं नोऽस्मदीयस्तोमं प्रति आगहि आगच्छ, आगमने हेतुरुच्यते, उप देवयजनसमीपे सुतमभिषुतसोमयुक्तमिदमिदानीमनुष्ठीयमानं सवनं प्रातःसवनादिरूपं कर्म वर्त्तते, तस्माद्गौरो न गौरमृग इव तृषितः सन्निमं सोमं पिब। सः-इममित्यत्र संहितायां, सोऽचिलोपेत्यादपूरणं (पां ६ । १ । १३४ ।) इति सुलोपः। गहि गतं। सवनं, सूयतेऽस्मिन्निति सोम इत्यधिकरणे ल्युट्, लिति (पां ६ । १ । १९३ ।) इति प्रत्ययात् पूर्वस्योदात्तत्वं, ल्युडन्तात्सप्तम्याः, सुपां सुपो भवन्तीति वक्तव्यमिति वचनाद् द्वितीया, अभिषुतसोमयुक्तमिदं सवनमिति कर्मण्येव वा द्वितीया, तदा सुतशब्दात्, अर्शआदित्वादच्। तृषितः, ज्वि तृषा पिपासायां, निष्ठा (पां ३ । २ । १०२ ।) इति क्तः, प्रत्ययस्वरेणोदात्तः, पच्चादिट्, आगमा अनुदात्ता इत्यनुदात्तत्वं ॥ ५ ॥ इति प्रथमस्य प्रथमे त्रिंशो वर्गः ॥ ३० ॥

सूक्ते षष्ठीमृचमाह इमे सोमास इति। इन्दुशब्द उन्दीक्लेदन इति धातोरुत्पन्नः, इन्दवः क्लेदनयुक्ता इमे वेद्यामुपस्थिताः सोमासस्तत्त्वाच्चगताः सोमा बर्हिषि यज्ञे अधि आधिक्येन सुतासः, अभिषुताः,

* सोममिति संकां।

१७१ अयं ते स्तोमो अग्रियो हृदिस्पृगस्तु शन्तमः।
अथा सोमं सुतं पिब॥
१८१ विश्वमित्सवनं सुतमिन्द्रो मदाय गच्छति।
वृत्रहा सोमपीतये॥

हे इन्द्र, सहसे बलार्थं तान् सोमान् पिब। सोमासः, आज्जसेरसुक् (पां ७। १। ५०।) इति जसोऽसुगागमः। इन्दवः, उक्तं। सुतासः, पूर्ववदसुक्, संहितायां, प्रकृत्यान्तः पादमव्यपरे (पां ६। १। ११५।) इति प्रकृतिभावात् परपूर्वत्वं न भवति। वर्हिषि, दंहेर्नलोपश्चेति इसप्रत्ययो नलोपश्चाऽऽदिकः, प्रत्ययस्वरः। तॉं इन्द्रेत्यत्र, दीर्घादटिसमानपादे (पां ८। ३। ९।) इति रुत्वं, यत्वयलोपौ, अनुनासिकः। सहसे, षह मर्षणे, असुन्नन्तो नित्त्वादाद्युदात्तः॥ ६॥

सप्तमीमृचमाह अयन्तइति। हे इन्द्र, अयमस्माभिः क्रियमाणः स्तोमः स्तोत्रविशेषः, अग्रियः श्रेष्ठः सन्, ते तव हृदिस्पृक् मनस्यङ्गीकृतः, शन्तमः सुखतमोऽस्तु, अथ स्तुतेरनन्तरं सुतमभिषुतं सोमं पिब। अग्रियः, अग्रादित्यनुवृत्तौ, घछौ च (पां ४। ४। ११७।) इति घप्रत्ययः, चित्त्वादन्तोदात्तः। हृदि स्पृशतीति हृदिस्पृक्, स्पृशोऽनुदके क्विन् (पां ३। २। ५८।।) इति क्विन्, तत्पुरुषे कृति बहुलं (पां ६। ३। १४।) इत्यलुक्, क्विन्प्रत्ययस्य कुः (पां ८। २। ६२।) इति शकारस्य कुत्वं, हृदुत्तरपदप्रकृतिस्वरत्वं। शन्तमः, सुखकरद्रव्यवचनोऽव्ययशम्शब्दः, ततस्तमप्, अत्र सुखप्रकर्षस्य गुणद्वारा गुणिनिष्ठद्रव्ये सङ्क्रान्तत्वात्, अद्रव्यप्रकर्ष इति निषेधात्, किमेत्तिङव्यय (पां ५। ४। ११।) इत्यादिना आम् न भवति, द्रव्यस्य स्वतः प्रकर्षाभावात्, ईदृगर्थ एव हि स निषेधः। अथा सोमं, संहितायां, निपातस्य च (पां ६। १। १३६।) इति दीर्घः॥ ७॥

अष्टमीमृचमाह विश्वमिदिति। वृत्रहा शत्रुघातक इन्द्रः सोमपीतये सोमपानाय, मदाय तत्पानजन्यहर्षाय च विश्वमित् सर्वमपि सुतमभिषुतसोमयुक्तसवनं प्रातः सवनादिरूपं कर्म्म गच्छति। विश्वं, अम्बाम्बगोमीत्यादिना क्वन्, नित्त्वादाद्युदात्तः। सवनं सुतं पूर्ववत्। मदाय, मदी हर्षग्लेपनयोः, मदोऽनुपसर्गे (पां ३। १। ६७।) इत्यप्,

१ ९ १ सेमं नः काममापृण गोभिरश्वैः शतक्रतो १
स्तवाम त्वा स्वाध्यः॥ ३१॥

पित्त्वाद्धातुस्वरः । गच्छति, इषुगमियमाञ्छः ( पां ७ । ३ । ७७ । ) इति छः । वृत्रहा, वृत्रं हन्तुं हतवान्, ब्रह्मभ्रूणवृत्रेषु क्विप् ( पां ३ । २ । ८७ । ) इति क्विप्, इन् हन् पूषार्य्यमणांशौ ( पां ६ । ४ । १२ । ) इति निहतं दीर्घत्वं, सौ च ( पां ६ । ४ । १३ । ) इति प्रतिप्रसवाद्भवति, हदुत्तरपदप्रकृतिस्वरत्वं । सोमपीतये, व्यधिकरणबहुव्रीहिरित्युक्तं, तत्पुरुषो वा, दासीभारादित्वात् पूर्वपदप्रकृतिस्वरत्वं॥ ८॥

नवमीष्टचमाह सेमं नः काममिति । हे शतक्रतो, स त्वं नोऽस्मदीयमिमं कामं काम्यमानं फलं गोभिरश्वैश्च सहाएण सर्वतः पूरय, वयमपि स्वाध्यः सुष्ठु सर्वतो ध्यानयुक्ताः सन्तस्त्वां स्तवाम। सेमं, संहितायां, सोऽचि लोपे चेत्पादपूरणं ( पां ६। १ । १३४ । ) इति सुलोपः। कामं, कमेर्घञि, कर्षात्वतो घञोऽन्त उदात्तः ( पां ६ । १ । १५९ । ) इत्यन्तोदात्तत्वे प्राप्ते वृषादिषु पाठादाद्युदात्तत्वं । आपृण, पृण प्रीणने, लोटः सेर्हिः, तुदादिभ्यः शः, तस्य ङित्त्वादुणाभावः, अतो हेः ( पां ६ । ४ । १०५ । ) इति हेर्लुक्। गोभिः, सावेका चः ( पां ६ । १ । १६८ । ) इति प्राप्तं विभक्तेरुदात्तत्वं, न गोश्वन्सावर्वर्ण ( पां ६ । १ । १८२ । ) इति प्रतिषिध्यते। अश्वैः, क्वन्नन्त इत्युक्तं, असामर्थ्यान्न परादिवद्भावः। स्तवाम, ष्टुञ् स्तुतौ, धात्वादेः षः सः ( पां ६ । १ । ६४ । ) इति षस्य सत्वं, लोडुत्तमबहुवचनस्य, लोटोलङ्वत् (पां ३ । ४ । ८५ । ) इति लङ्वद्भावात्, नित्यं ङितः ( पां ३ । ४ । ९९ । ) इति सकारलोपः, आडुत्तमस्य पिच्च ( पां ३ । ४ । ९२ । ) इत्याडागमः, पित्त्वच्च, पित्त्वादनुदात्तत्वं, धातुस्वर एव । स्वाध्यः, ध्यै चिन्तायां, स्वाङोरुपसर्गयोः पाक् प्रयोगः, अन्येभ्योऽपि दृश्यन्ते ( पां ३ । २ । १७८ । ) इति क्विप्, इण्निग्रहणस्य विध्यन्तरोपसङ्ग्रहणार्थत्वादत्र सम्प्रसारणे सति परपूर्वत्वं, हलः ( पां ६ । ४ । २ । ) इति दीर्घः, जसि, अरुर्द्विषदजन्तस्य मुः ( पां ७ । १ । ८४ । ) इति मुगादेशः, गतिकारकोपपदात् कृत् ( पां ६ । २ । १३९ । ) इत्युत्तरपदप्रकृतिस्वरत्वं, उदात्तयणो हल्पूर्वात् ( पां ६ । १ । १७४ । ) इति जस उदात्तत्वं न भवति, तत्र सर्वनामस्थान इत्यनुवृत्तेः, अतः, उदात्तस्वरितयोर्यणः स्वरितोऽनुदात्तस्य ( पां ८ ।

## सप्तदशसूक्तं।

१११ इन्द्रावरुणयोरहं सम्राजोरव आवृणे।
ता नो मृलात ईदृशे॥

२।४।) इति खरितत्वमेव भवति॥ ९॥ इति प्रथमस्य प्रथमे एकचिंशो वर्गः॥ २१॥

इन्द्रावरुणयोरित्यादिकं नवर्चं सूक्तं, अतएव नवशब्दानुवृत्तावनुक्रम्यते, इन्द्रावरुणयोरैन्द्रावरुणं युवाकुपादनिवृत्ताविति, अत्र देवता विस्पष्टा, ऋषिछन्दसी पूर्ववदनुवर्त्तते। अयन्तु विशेषः युवाकुहीत्यादिके द्वे ऋचौ पादनिवृन्नामकछन्दोयुक्ते, विनियोगस्तु स्मार्त्तो लैङ्गिको वा कश्चिदवगन्तव्यः, तस्मिन् सूक्ते प्रथमामृचमाह इन्द्रावरुणयोरिति, अहमनुष्ठाता सम्राजोः समीचीनराज्योपेतयोः सम्यगदीप्यमानयोर्वा इन्द्रावरुणयोर्देवयोः सम्बन्धि अवो रक्षणं आवृणे सर्वतः प्रार्थये। ता तौ देवौ ईदृशे एवम्विधेऽस्मदीयवरणे निमित्तभूते सति मृडातः, अस्मान् सुखयतः। इन्द्रशब्दो रन्प्रत्ययान्तः, वरुणशब्द उणन्प्रत्ययान्तः, उभौ नित्त्वादाद्युदात्तौ, समासे, देवताद्वन्द्वे च (पां ६।३।२६।) इति पूर्वपदस्यानङादेशः, उभे युगपदित्यनुवृत्तौ, देवताद्वन्द्वे च (पां ६।२।१४१।) इति युगपदुभयपदप्रकृतिस्वरत्वं, सम्राजोः राज दीप्तौ, सत्सूद्विष (पां ३।२।६१।) इत्यादिना क्विप्, समो, मोऽनुस्वारः (पां ८।३।२३।) इत्यनुस्वारे प्राप्ते, मोराजिसमः क्वौ (पां ८।३।२५।) इति मकारस्य मकारादेशः, छदुत्तरपदप्रकृतिस्वरत्वं, कर्तृकर्म्मणोः कृति (पां २।३।६५।) इति कर्त्तरि षष्ठी। अवः, अव रक्षणादिषु, भावेऽसुन्, नित्त्वादाद्युदात्तः। ता, सुपांसुलुक् (पां ७।१।३९।) इत्यादिना द्विवचनस्य डादेशः, टिलोपे, विभक्तेरुदात्तनिवृत्तिस्वरः। मृडातः, मृड सुखने, प्रार्थनायां, लिङर्थे लेट् (पां ३।४।७।) इति लिङर्थे लेट्, द्विवचनं तस्, लेटोऽडाटौ (पां ३।४।९४।) इत्यडागमः, तुदादिभ्यः शः, ङित्त्वाल्लघूपधगुणाभावः। ईदृशे, त्यदादिषुदृशेऽनालोचनेकञ्च (पां ३।२।६०।) इतीदम्शब्द उपपदे दृशेः कञ्, उपपदसमासे इ इत्यस्याद्युदात्तत्वं, उपपदसमासे छदुत्तरपदप्रकृतिस्वरत्वेन तदेव शिष्यते।

१२१ गन्तारा हि स्थोऽवसे हवं विप्रस्य मावतः।
धर्त्तारा चर्षणीनां॥

इदं किमोरीश्की ( पां ६ । ३ । ९० । ) इति इदम ईशादेशः, शित्त्वात्सर्वादेशः, कञः कित्त्वाद्गुणाभावः, ञित्त्वादाद्युदात्तः ॥ १ ॥

द्वितीयामृचमाह गन्तारा हीति। हे इन्द्रावरुणौ, अवसे, अवितुमनुष्ठातारं रक्षितुं मावतो मद्विधस्य विप्रस्य ब्राह्मणर्त्विजो हवमाह्वानं गन्तारा स्थो हि, प्राप्तिशीलौ भवथः खलु। कीदृशौ, चर्षणीनां मनुष्याणां धर्त्तारा, योगक्षेमसम्पादनेन धारयितारौ। गन्तारा, गमेस्ताच्छील्ये तृन्, द्विवचनस्य, सुपांसुलुक्, ( पां ७ । १ । ३९ । ) इत्यादिना आकारादेशः, ऋदृशोऽङि गुणः ( पां ७ । ४ । १६ । ) इति गुणः, अप्तृन्तृच् ( पां ६ । ४ । ११ । ) इत्यादिनोपधादीर्घत्वं, तृनो नित्त्वादाद्युदात्तत्वं। स्थः, अस भुवि, लट्, मध्यमपुरुषद्विवचनं थस्, अदिप्रभृतिभ्यः शपः ( पां २ । ४ । ७२ । ) इति शपो लुक्, हि च ( पां ८ । १ । ३४ । ) इति निघातप्रतिषेधः, अवसे, अव रक्षणे, तुमर्थेसेसेनसेन् ( पां ३ । ४ । ९ । ) इत्यसेन्प्रत्ययः, नित्त्वादाद्युदात्तः। हवं, ह्वेञो, बहुलं छन्दसीत्यनेन नैमित्तके सम्प्रसारणे परपूर्वत्वे च, ( ऋदोरप् ( पां ३ । ३ । ५७ । ) इत्यप्, गुणावादेशौ, अपः पित्त्वादनुदात्तत्वं, धातुस्वर एव। विप्रस्य, टुवप् बीजतन्तुसन्ताने, अस्य, ऋज्रेन्द्रेत्यादिना निपातिततेति, नित्त्वादाद्युदात्तः। मावतः, वतुप्प्रकरणे, युष्मदस्मद्भ्यां छन्दसि सादृश्य उपसङ्ख्यानमिति वार्त्तिकेन वतुप्, प्रत्ययोत्तरपदयोश्च ( पां ७ । २ । ९८ । ) इत्यस्मदो मपर्य्यस्य मादेशः, आ सर्वनाम्नः ( पां ६ । ३ । ९१ । ) इति दकारस्याकारः, सवर्णदीर्घः, पित्त्वादाद्युदात्तत्वं, प्रातिपदिकान्तोदात्तत्वेन स एव शिष्यते। धर्त्तारा, धृञ् धारणे, ण्वुल्तृचौ ( पां ३ । १ । १३३ । ) इति तृच्, एकाच उपदेशेऽनुदात्तात् ( पां ७ । २ । १० । ) इति इट्प्रतिषेधः, गुणो रपरत्वं, अप्तृन्तृच् ( पां ६ । ४ । ११ । ) इत्युपधादीर्घः, सुपांसुलुगित्याकारः, तृचश्चित्त्वादन्तोदात्तत्वं। चर्षणीनां, कृषेरादेश्चचइत्यनिः प्रत्यय औणादिकः, तत्सन्नियोगेन ककारस्य चकारः, प्रत्ययाद्युदात्तत्वं बाधित्वा छान्दसमन्तोदात्तत्वं, अत एव, नामन्यतरस्यां ( पां ६ ।

१३१ अनुकामं तर्पयेथामिन्द्रावरुण राय आ ।
ता वां नेदिष्ठमीमहे ॥

१ । १७७ । ) इति विभक्तेरुदात्तत्वं, तत्र हि मतुपि योऽक्षस्यान्तस्तत उत्तरस्य नाम्न उदात्तत्वमिति व्याख्यातं ॥ २ ॥

तृतीयामृचमाह अनुकाममिति । इन्द्रावरुणा हे इन्द्रावरुणौ, अनुकाममस्मदीयाभिलाषमनु रायो धनस्य प्रदानेन आतर्प्रयेथां सर्वतोऽस्मांस्तृप्तान् कुरुतं, यदा यदा धनं कामयामहे, तदा तदा प्रयच्छतमित्यर्थः, ता वां तादृशौ युवां । नेदिष्ठं, अतिशयेन सामीप्यं यथा भवति तथा ईमहे याचामहे, कालविलम्बमन्तरेण धनं दातव्यमित्यर्थः । सप्तदशसु याच्ञाकर्म्मसु ईमह इति पठितं । अनुकामं, कामस्य पश्चादनुकामं, अथ वा कामे अनु अनुकामं, अनुरिह पश्चादर्थे, अथवा वीप्सालक्षणे यथार्थे योग्यतावीप्सापदार्थानतिवृत्तिः सादृश्यक्षेति चत्वारोऽर्था गृहीताः, अव्ययं विभक्ति ( पां २ । १ । ६ । ) इत्यादिनाव्ययीभावसमासः, अव्ययीभावश्च ( पां १ । १ । ४१ । ) इत्यव्ययसञ्ज्ञायां, अव्ययादाप्सुपः ( पां २ । ४ । ८२ । ) इति प्राप्तस्य लुकोऽपवादः, नाव्ययीभावादतोऽम्त्वपञ्चम्याः ( पां २ । ४ । ८३ । ) इति विभक्तेरमादेशः, समासस्य ( पां ६ । १ । २२३ । ) इत्यन्तोदात्तत्वं । तर्पयेथां, तृपेर्ण्यन्ताल्लोटो, णिचश्च ( पां १ । ३ । ७४ । ) इत्यात्मनेपदं, मध्यमपुरुषद्विवचनमाथाम्, टेरेत्वे, आमेतः ( पां ३ । ४ । ९० । ) इत्यामादेशः, शपि सति, अतो येयः ( पां ७ । २ । ८० । ) इत्यनुवृत्तौ, आतोऽडितः ( पां ७ । २ । ८१ । ) इत्याकारस्य इयादेशः, आद्गुणः ( पां ६ । १ । ८७ । ) इति गुणो यलोपश्च । इन्द्रावरुणा, सुपां सुलुगिति द्विवचनस्याकारः, आमन्त्रिताद्युदात्तत्वं, संहितायामाकारस्य ह्रस्वत्वं । रायः, ऊडिदंपदाद्यप्पुम् ( पां ६ । १ । १७१ । ) इत्यादिना विभक्तेरुदात्तत्वं, सुपांसुलुगिति विभक्तेराकारः, पदात्परत्वाद्युवामित्यस्य वामादेशोऽनुदात्तः । नेदिष्ठं, अतिशयेनान्तिकं, अतिशायने तमबिष्ठनौ ( पां ५ । ३ । ५५ । ) इतीष्ठन्प्रत्ययः, अन्तिकबाढयोर्नेदसाधौ ( पां ५ । ३ । ६३ । ) इति नेदादेशः, यस्येति च ( पां ६ । ४ । १४८ । ) इत्यलोपः, इष्ठनो नित्त्वादाद्युदात्तत्वं । ईमहे, ईड् गतौ, ङित्त्वादात्मनेपदं, बहुलं छन्दसीति श्यनो लुक्, निघातः ॥ ३ ॥

१४१ युवाकु हि शचीनां युकाकु सुमतीनां १
भूयाम वाजदावां ॥
१५१ इन्द्रः सहस्रदावां वरूणः शंस्यानां १
क्रतुर्भवत्युक्थ्यः ॥ ३२ ॥

चतुर्थीमृचमाह युवाकु हीति। यस्मात् कारणाच्छचीनामस्मदीयकर्म्मणां सम्बन्धि सोमरूपं हविर्युवाकु, वसतीवर्य्येकधनात्मकैरुदकैः पयःसत्कादिद्रव्यान्तरैश्च मिश्रितं, तथा सुमतीनां शोभनबुद्धियुक्तानामृत्विजां स्तोत्ररूपं वचनमपि युवाकु, नानाविधैः स्तुत्यगुणैर्मिश्रितं, तस्मात् कारणात्, हे इन्द्रावरुणौ, तथाविधं हविः स्वीकुर्वतोर्युवयोः प्रसादाद्वयं वाजदावां वाजदानां अन्नप्रदानां पुरुषाणां मध्ये मुख्या भूयाम भवेम। अपः, अन्न इत्यादिषु षड्विंशतिसङ्ख्यकेषु कर्म्मनामसु शची शमीति पठितं। युवाकु, यु मिश्रणे, कटिकुषिभ्यां काकुरित्यच बाऽलकाद्यौतेरपि काकुः प्रत्ययः, कित्त्वेन गुणाभावादुकारस्योवङादेशः, प्रत्ययस्वरेण मध्योदात्तत्वं, शचीशब्दः केषाञ्चिन्मते, शार्ङ्गरवाद्यञो ङीन् ( पां ४। १। ७३। ) इति शार्ङ्गरवादिर्ङीनन्तो नित्त्वादाद्युदात्त इति, उभे वनस्पत्यादिषु युगपत् ( पां ६। ४। १४०। ) इत्यत्र वृत्तिकृतोक्तं। सुमतीनां, विद्यामसुमतीनामित्यत्रोक्तं। भूयाम, प्रार्थनायां लिङ्, उत्तमपुरुषबहुवचनं मस्, नित्यं ङितः ( पां ३। ४। ९९। ) इति सकारलोपः, यासुट् परस्मैपदेषूदात्तो ङिच्च ( पां ३। ४। १०३। ) इत्युदात्तोयासुडागमः, लिङः सलोपोऽनन्तस्य ( पां ७। २। ७९। ) इति सकारलोपः, बहुलं छन्दसीति श्नपो लुक्, सतिशिष्टत्वाद्यासुडुदात्त एव शिष्यते। वाजदावां, वाजं ददतीति वाजदावानः, आतो मनिन् ( पां ३। २। ७४। ) इत्यादिना वनिप्, तस्य पित्त्वादातुखर एव शिष्यते, समासे क्रतूत्तरपदप्रकृतिस्वरत्वेन स एव शिष्यते, आमि, अल्लोपोऽनः ( पां ६। ४। १३४। ) इत्यकारलोपः, तस्य, अचः परस्मिन् ( पां १। १। ५७। ) इति स्थानिवद्भावात्, लोपोव्योर्वलि ( पां ६। १। ६६। ) इति वकारस्यलोपो न भवति ॥ ४ ॥

पञ्चमीमृचमाह इन्द्रः सहस्रदावामिति। अयमिन्द्रः सहस्रदावां सहस्रसङ्ख्यकधनप्रदानां मध्ये क्रतुः, धनदानस्य कर्त्ता भवति, प्रभूतं

१६१ तयोरिदवसा वयं सनेम नि च धीमहि १
स्यादुत प्ररेचनं ॥

ददातीत्यर्थः, तथा वरुणः शंस्यानां स्तुत्यानां मध्ये उक्थ्यः स्तुत्यो भवति, अतिशयेन स्तुत्य इत्यर्थः । वरुणः, उनन्प्रत्ययान्तो निंत्त्वादाद्युदात्तः । शंस्यानां, शंसु स्तुतौ, ऋदृहलोर्ण्यत् ( पां ३ । १ । १२४ । ) इति ण्यत्, तित्स्वरितमिति स्वरितत्वे प्राप्ते, ईड्वन्दवृशंसदुहां ण्यतः (पां ६ । १ । २१४ । ) इत्याद्युदात्तः । क्रतुः, छन्दः क्रतुरिति क्रतुरौणादिकः, कित्त्वाद्गुणाभावो, यणादेशः, प्रत्ययस्वरेणाद्युदात्तः । उक्थ्यः, उक्थं शस्त्रं तेन स्तुत्यत्वेन तत्र भव उक्थ्यः, भवे छन्दसि ( पां ४ । ४ । ११० । ) इति यत्, यस्येति च ( पां ६ । ४ । १४८ । ) इत्यकारलोपः, अत्र, तित्स्वरितं ( पां ६ । १ । १८५ । ) इत्येतद्बाधित्वा, तीर्थाय कुप्याय इत्यादिवत् द्व्यच्त्वात्, यतोऽनावः ( पां ६ । १ । २१३ । ) इति प्राप्तमाद्युदात्तं, सर्वे विधयश्छन्दसि विकल्पन्त इति न क्रियते । ननु यस्येतिलोपात् प्रागेव तित्स्वरितत्वमस्तु, नहि तदा यतोऽनाव इत्येदस्ति द्व्यच्त्वाभावात्, अतएव भूम्याम्यचेत्यादौ स्वरितत्वं दृश्यते । न च परत्वान्नित्यत्वाच्च यस्येतिलोपेन प्रथमतो भाव्यमिति वाच्यं, प्रकृतिप्रत्ययाश्रयाद्बहिरङ्गाद्यस्येतिलोपात् प्रत्ययमात्राश्रयतया अन्तरङ्गत्वेन तित्स्वरितमित्येतस्य प्राबल्यात्, अत ऊर्म्यायेत्यादिवत् उक्थ्य इत्यत्रापि लक्षणत एव स्वरितत्वं भविष्यतीति किं छान्दस्येन, यत्र हि लोपमन्तरेणैव द्व्यच्त्वं, तत्र यतोऽनाव इत्येतद्भवति, तथा चेयं जेयमिति लोपनिबन्धेन द्व्यच्त्वप्रदेशेषु तु स्वरितेनैव भवितव्यमिति, एवं तर्हि तीर्थाय कुप्यायेत्यादौ पदाद्युदात्तत्वं तदेव छान्दसमस्तु * अथ अत्रतु वार्णादाङ्गं बलीय इत्यन्तरङ्गत्वेऽपि स्वरितं बाधित्वा लोप एव भविष्यति, तर्हि उक्थ ऊर्म्याय सूर्म्यायेत्यादौच छान्दस्यमस्तु, सर्वथैकत्र छान्दस्यान्न मुच्यते ॥ ५ ॥ इति प्रथमस्य प्रथमे द्वाविंशो वर्गः ॥ ३२ ॥

सूक्ते षष्ठीमृचमाह तयोरिदिति । पूर्वोक्तयोरिन्द्रावरुणयोरेव अवसा रक्षणेन वयमनुष्ठातारः सनेम सम्भजेम धनमिति शेषः, निधीमहि च, प्राप्ते धने यावदपेक्षितं तावद्भुक्त्वा ततोऽवशिष्टं धनं

---

* अथेतिपाठो नास्ति सं।

१७॥ इन्द्रावरुण वामहं हुवे चित्राय राधसे।
अस्मान्त्सु जिग्युषस्कृतं॥

कर्मणि निधिरूपेण स्थापयामश्च, उत अपि च प्रेरेचनं भुक्तान्निहितात्च प्रकर्षेणाधिकं धनं स्यात् सम्पाद्यतां। अवसा, अव रक्षणे, असुन्प्रत्ययः नित्त्वादाद्युदात्तः। वयं, यूयं हि स्थेत्यत्र यदुक्तं तदत्र द्रष्टव्यं। सनेम, आशिषि लिङ्, तस्य मस्, नित्यं ङितः (पां ३।४।९९।) इति तस्य सकारलोपः, किदाशिषि (पां ३।४।१०४।) इति यासुट्, छन्दस्युभयथा (पां ३।४।११७।) इति सार्वधातुकत्वमप्यस्तीति, लिङः सलोपोऽनन्तस्य (पां ६।२।७९।) इति सकारलोपः, अतो येयः (पां ७।२।८०।) इति इयादेशः, लोपोव्योर्वलि (पां ६।१।६६।) इति यलोपः, लिङ्याशिष्यङ् (पां ३।१।८६।) इत्यङादेशो, आदृगमः (पां ६।१।८७।) इति गुणः, पादादित्वान्न निघातः। धीमहि, डुधाञ् धारणपोषणयोः, आशिषि लिङो मह्लिङादेशः, यासुडागमः, तस्य छन्दस्युभयथेति सार्वधातुकार्द्धधातुकसञ्ज्ञे, तत्र सार्वधातुकत्वेन, लिङः सलोपोऽनन्तस्येति सकारलोपः, पूर्ववदियादेशः, यलोपः, सार्वधातुकमपित् (पां १।२।४।) इति ङित्त्वं, श्नप् च, बहुलं छन्दसीति जुहोत्यादेरपि श्नपो लुक्, आर्द्धधातुकत्वात्, आतो लोप इटि च (पां ६।४।६४।) इत्याकारलोपः, निघातस्वरः, सनेमेत्यपेक्षया द्वितीयात्वादत्र चवायोगे प्रथमेति न निषेधः स्यात्, अस्तेः प्रार्थनायां लिङ्, तिप्, इतश्च (पां ३।४।१००।) इतीकारलोपः, यासुट् परस्मैपदेषूदात्तो ङिच्च (पां ३।४।१०३।) इति यासुटो ङित्त्वे, अदिप्रभृतिभ्यः शपः (पां २।४।७२।) इति शपोलुक्, अस्तेर्लोपः (पां ६।४।१११।) इत्यकारलोपः, पादादित्वान्न निघातः। उत, एवमादीनामन्त इति फिट्सूत्रेणान्तोदात्तः। प्रेरेचनं, रिचिर् विरेचने, भावे ल्युट्, युवोरनाकौ (पां ७।१।१।) इति योरनादेशः, लिति (पां ६।१।१९३।) इति प्रत्ययात् पूर्वस्योदात्तत्वं, पादिसमासः छदुत्तरपदप्रकृतिस्वरत्वं॥ ६॥

सप्तमीमृचमाह इन्द्रावरुण वामहमिति। इन्द्रावरुणा हे इन्द्रावरुणौ, वां युवामुभौ अहं हुवे आह्वयामि, किमर्थं चित्राय मणिमुक्तादिरूपेण विविधाय राधसे धनाय, तत्र आहूतौ युवां अस्मा-

१ ८ १ इन्द्रावरुण नूनु वां सिषासन्तीषु धीष्वा १
अस्मभ्यं शर्म्म यच्छतं॥

ननुष्ठात्तृन् सुजिग्युषः शत्रुविषये सुष्ठु जययुक्तान् कृतं कुरुतं। इन्द्रावरुण, सुपांसुलुगित्यादिना सम्बोधनद्विवचनस्याकारादेशः, देवताद्वन्द्वे च (पां ६। ३। २६।) इति पूर्वपदस्यानङ्, आमन्त्रितायुदात्तत्वं, संहितायां छान्दसं ह्रस्वत्वं। ऊवे, क्रयतेर्लुङ्, उत्तमपुरुषैकवचनं इट्, शप इत्यनुवृत्तौ, बहुलं छन्दसीति शपो लुक्, क्र इत्यनुवृत्तौ बहुलं छन्दसीति सम्प्रसारणं, परपूर्वत्वं, अचि श्नुधातु (पां ६। ४। ७७।) इत्यादिनोवङ्, न च, ऊर्ध्नुवोः (पां ६। ४। ८७।) इत्यादिना यणादेशः, जुहोतेरेव हि प्रतिपदोक्तस्य तत्, नपुनरस्य लाक्षणिकत्वात्, इटः प्रत्ययस्वरेणोदात्तत्वं, पादादित्वान्न निघातः। राधसे, असुन्, नित्त्वादाद्युदात्तत्वं। अस्मान्, शसि, द्वितीयायाश्च (पां ७। २। ८७।) इत्यात्वं। शसो नः (पां ७। १। २९।) इति नत्वं, नश्चेति धुडागमः। जिग्युषः, जि जये, लिटः स्थाने, क्वसुश्च (पां ३। २। १०७।) इति क्वसुः, द्विर्भावः, सन्लिटोर्जेः (पां ७। ३। ५७।) इति द्वितीयस्य कुत्वं, क्वसोः कित्त्वाद्गुणाभावः, क्रादिनियमप्राप्तस्येटो, वस्वेकाजाद्धसां (पां ७। २। ६७।) इति नियमेन निवृत्तिः, द्वितीयाबहुवचनं शस्, भसंज्ञायां, वसोः सम्प्रसारणं (पां ६। ४। १३१।) इति सम्प्रसारणं, परपूर्वत्वं, एरनेकाचः (पां ६। ४। ८२।) इति यणादेशः, शासिवसिघसीनाञ्च (पां ८। ३। ६०।) इति षत्वं, प्रत्ययस्वरेणोकार उदात्तः। कृतं, डुकृञ् करणे, लोण्मध्यमद्विवचनस्य लङ्डावात्तमादेशः, शपो बहुलं छन्दसीति लुक्, तिङ्डतिङः (पां ८। १। २८।) इति निघातः॥ ७॥

अष्टमीमृचमाह इन्द्रावरुण नूनिति। इन्द्रावरुण इन्द्रावरुणौ हे इन्द्रावरुणौ, धीष्वस्मदीयबुद्धिषु वां युवां सिषासन्तीषु सनितुं सम्भक्तुं सम्यक्सेवितुमिच्छन्तीषु तदानीमासमन्तादस्मभ्यं शर्म्म सुखं नूनु अतिशयेन क्षिप्रं यच्छतं प्रयच्छतं दत्तं। षट्त्रिंशत्सङ्ख्यकेषु क्षिप्रनामसु नु मत्तु इति पठितं, तस्य द्विरावृत्तिबलादातिशय्यं लभ्यते। इन्द्रावरुण, उक्तं। नूनु, ऋचि तु नु घ मत्तु तङ्कुचोरुष्याणां (पां ६। ३। १३३।) इति पूर्वस्य दीर्घत्वं। सिषासन्तीषु, वन षण सम्भक्तौ, धात्वादेः

१६१ प्र वामश्नोतु सुष्टुतिरिन्द्रावरुणा यां हुवे १
यामृधाथे सधस्तुतिं ॥ ३३ ॥

षः सः (पां ६।१।६४। इति षः सः, इच्छायां सन्, द्विर्भावो हलादिशेषः, सन्यतः (पां ७।४।७९।) इतीत्वं, आदेशप्रत्यययोः (पां ८।३।५९।) इति षत्वं, सनीवन्त (पां ७।२।४९।) इत्यादिना विकल्पादिडभावः, जनसनखनांसञ्झलोः (पां ६।४।४२।) इति नकारस्याकारः, उपरि लटःशट, कर्त्तरि शपि, उगितश्च (पां ४।१।६।) इति ङीप्, शप्श्यनोर्नित्यं (पां ७।१।८१।) इति नुम्, ङीपः शपश्च पित्त्वाच्छतुश्च ङसार्वधातुकत्वेन चानुदात्तत्वं, सनो नित्त्वादाद्युदात्तत्वं तदेव शिष्यते। धीषु, सावेकाचस्तृतीयादिः (पां ६।१।१९८।) इति विभक्तेरुदात्तत्वं। अस्मभ्यं, अस्मभ्यमप्रतिष्कुत इत्यत्रोक्तं। यच्छतं, दाण् दाने, शपि, याघ्राध्मास्थाम्नादाण् (पां ७।३।७८।) इत्यादिना यच्छादेशः ॥ ८ ॥

नवमीमृचमाह प्र वामिति। इन्द्रावरुणा हे इन्द्रावरुणौ, यामस्मत्कर्तृकां शोभनस्तुतिं प्रति ऊवे युवामुभावाह्वयामि, किञ्च सधस्तुतिं सहस्तुतिं युवयोरुभयोः साहित्येन क्रियमाणा या स्तवक्रिया तया युक्तां यां सुष्टुतिं प्रतिलभ्य ऋधाथे ऋध्नवाथे युवां वर्द्धाथे, तादृशी सुष्टुतिः शोभनस्तुतिहेतुभूत ऋक्समूहो वामश्नोतु युवां व्याप्नोतु। अश्नोतु, अशू व्याप्तौ, लोटो व्यत्ययेन तिप्, स्वादिभ्यः श्नुः (पां ३।१।७३।) इति श्नुः। सुष्टुतिः, न विन्धे अस्य सुष्टुतिमित्यत्रोक्तं। इन्द्रावरुणा, ऊवे, इत्युक्ते,। अचतु, यदुक्तान्नित्यं (पां ८।१।६३।) इति यदुक्तयोगान्न निघातः। ऋधाथे, ऋधु वृद्धौ, लट्, व्यत्ययेनात्मनेपदं, मध्यमद्विवचने, श्नोर्बहुलं छन्दसीति लुक्, प्रत्ययस्वरेणाकार उदात्तः, यच्छब्दयोगान्न निघातः। सधस्तुतिं, सहस्तुतिर्यस्यां सुष्टुतौ सा सहस्तुतिः, अत्र सुष्टुतिरित्यन्यपदार्थे स्तुतिशब्दस्य स्तूयतेऽनयेति करणसाधनत्वेन ऋक्परत्वे अयं स्तुतिशब्दो भावसाधनतया स्तवनक्रियापरस्तस्मिन् भावसाधनत्वेन क्रियापरेऽयं करणसाधनतया ऋक्पर इति समस्यमानपदार्थादन्यः, सहेत्यत्र हकारस्य व्यत्ययेन धकारः, सहशब्द एवमादित्वादन्तोदात्तः, बहुव्रीहित्वेन पूर्वपदप्रकृतिस्वरत्वं ॥ ९ ॥ इति प्रथमस्य प्रथमे त्र्यस्त्रिंशो वर्गः ॥ ३३ ॥

## अष्टादशसूक्तं।

१११ सोमानं स्वरणं कृणुहि ब्रह्मणस्पते।
कक्षीवन्तं य औशिजः॥

सोमानमित्यादिकं नवर्चं सूक्तं, ऋषिछन्दसी पूर्ववत्, देवताविशेषस्त्वेवमनुक्रम्यते सोमानमिति पञ्च ब्राह्मणस्पत्याश्चतुर्थ्यामिन्द्रश्च सोमश्च पञ्चम्यां दक्षिणाचान्त्याः सादसस्पत्या नाराशंसो वान्त्येति। सूक्तगता आद्याः पञ्चर्चो ब्रह्मणस्पतिदेवताकाः, तासां मध्ये स घा वीर इत्येतस्याश्चतुर्थ्या ऋचो ब्रह्मणस्पतिरिन्द्रश्च सोमश्चेति तिस्रो देवताः, त्वं तमित्येतस्याः पञ्चम्या दक्षिणया सह पूर्वोक्तास्तिस्रो देवताः। षष्ठीमारभ्य तिसृणां सदसस्पतिर्देवता, नराशंसमित्येतस्या नवम्याः सदसस्पतिर्नराशंसो वा विकल्प्यते, विनियोगस्तु पूर्ववत्, तस्मिन् सूक्ते प्रथमामन्त्रमाह सोमानमिति। हे ब्रह्मणस्पते एतन्नामकदेव, सोमानमभिषवस्य कर्त्तारं मामनुष्ठातारं स्वरणं देवेषु प्रकाशयन्तं कृणुहि कुरु, अत्र दृष्टान्तः, कक्षीवन्तमेतन्नामकमृषिं, इवशब्दोऽध्याहर्त्तव्यः, कक्षीवान् यथा देवेषु प्रसिद्धस्तद्वदित्यर्थः, यः कक्षीवान् ऋषिरौशिज उशिजः पुत्रस्तमिवेति पूर्वत्र योजना। कक्षीवतोऽनुष्ठातृषु मुनिषु प्रसिद्धिस्तैत्तिरीयैराम्नायते, एवं वै पर आङ्गारः कक्षीवाँ औशिजो वीतहव्यः, आयशस्यः सदस्यः पौरुकुत्स्यः प्रजाकामा अचिन्वतेति। ऋगन्तरेष्वृषित्वकथनेनानुष्ठातृत्वप्रसिद्धिरुच्यते, अहं कक्षीवानृषिरस्मि विप्र इति, तस्मादस्यानुष्ठातारं प्रति दृष्टान्तत्वं युक्तं। सोऽयं मन्त्रो यास्केनैवं व्याख्यातः, सोमानं सोतारं प्रकाशयन्तं कुरु ब्रह्मणस्पते कक्षीवन्तमिव य औशिजः कक्षीवान् कक्षावानौशिज उशिजः पुत्र उशिक्, वष्टेः कान्तिकर्म्मणोऽपि त्वयं मनुष्यकक्ष एवाभिप्रेतः स्यात्, तं सोमानं सोतारं मां प्रकाशयन्तं कुरु ब्रह्मणस्पत इति। अस्मिन् मन्त्रे सोमानमिति पदेन ब्रह्मणस्पत इति पदेन सूचितं तात्पर्य्यं तैत्तिरीया आमनन्ति, सोमानं स्वरणमित्याह सोमपीथमेवावरुन्धे, कृणुहि ब्रह्मणस्पत इत्याह ब्रह्मवर्चसमेवावरुन्ध इति। सोमानं, सुनोतीति, षुञ् अभिषवे, अन्येभ्योऽपि दृश्यन्ते (पां ३। २। ७५।) इति मनिन्, दृशि ग्रहणस्य विधन्तरोपसङ्ग्रहणार्थत्वात् नित्त्वेऽपि नाद्युदात्तत्वं, किन्तु प्रत्ययस्वर एव, उञ्छादिषु वा सोमानशब्दो द्रष्टव्यः,

१२१ यो रेवान्यो अमीवहा वसुवित्पुष्टिवर्धनः।
स नः सिषक्तु यस्तुरः।

बज्रलयहणादौणादिको मनिर्द्रष्टव्यः। खरणं प्रख्यातं, खृ शब्दोपतापयोः, क्तयल्युटो बज्रलं (पां ३।३।११३।) इति कर्म्मणि ल्युट्, लिति (पां ६।१।१९३।) इत्यकार उदात्तः। क्षणुहि, क्षवि हिंसाकरणयोश्च, इदितोनुम्धातोः (पां ७।१।५८।) इति नुम्, लोटः सिपो हि, श्नपि प्राप्ते, धिन्विकृण्व्योर च (पां ३।१।८०।) इत्युः प्रत्ययस्तत्सन्नियोगेन च वकारस्य चाकारस्तस्य, अतो लोपः (पां ६।४।४८।) इति लोपस्तस्य स्थानिवद्भावान्न पूर्वस्य लघूपधगुणः, हेर्डित्त्वादुकारस्य न गुणः, उतश्च प्रत्ययाच्छन्दो वा वचनमितिवार्त्तिकेन हेर्लुक्, सतिशिष्टस्वरबलीयस्त्वमन्यत्र विकरणेभ्य इतिवचनात् हेरेव प्रत्ययस्वरेणोदात्तत्वं, पादादित्वान्न निघातः। ब्रह्मणस्पते, ब्रह्मणः, षष्ठ्याः पतिपुत्र (पां ८।३।५३।) इत्यादिना संहितायां विसर्जनीयस्य सकारः, सुबामन्त्रिते पराङ्गवत्स्वरे (पां २।१।२।) इति पराङ्गवद्भावात् पदद्वयस्यामन्त्रितनिघातः। कक्षीवन्तं, कक्षे भवा कक्ष्या अश्वोदरसम्बन्धिनी रज्जुः, भवे छन्दसि (पां ४।४।११०।) इति यः प्रत्ययः, सास्यास्तीत्यर्थे मतुप्, आसन्दीवदष्ठीवच्चक्रीवत् कक्षीवत् (पां ८।२।१२।) इति ऋषिविशेषनामककक्षीवच्छब्दो निपातितः, छन्दसीरः (पां ८।२।१५।) इति मस्य वत्वं, प्रत्ययस्वरेणादुपदेशो निपातितः, इकार उदात्तः, मतुप्सुपौ पित्त्वादनुदात्तौ। ओषिजः, वष्ट कान्तौ, इजिरित्यनुवृत्तौ, वष्टेः क्विप्चेति इजिः प्रत्यय औणादिकः, तस्य कित्त्वात्, ग्रहि ज्या वयि व्यधि (पां ६।१।१६।) इत्यादिना सम्प्रसारणं, परपूर्वत्वे गुणाभावस्तेन उशिज इति भवति, तस्यापत्यमित्यर्थे प्राग्दीव्यतोऽण् (पां ४।१।८३।) इत्यण्प्रत्ययः आदिवृद्धिः, प्रत्ययस्वरेणान्तोदात्तत्वं॥ १॥

द्वितीयामृचमाह यो रेवानिति। यो ब्रह्मणस्पतिः, रेवान् धनवान्, यश्चामीवहा रोगाणां हन्ता, वसुवित्, धनस्य लब्धा, पुष्टिवर्द्धनः पुष्टेर्वर्द्धयिता, यश्चतुरस्वरोपेतः शीघ्रफलप्रदः, स ब्रह्मणस्पतिर्नोऽस्मान् सिषक्तु सेवतां, परिग्रह्याप्यनुग्रह्णात्वित्यर्थः, अत्र सिषक्तुशब्दस्य सेवार्थत्वं यास्क आह, सिषक्तु सचत इति सेवमानस्येति

प्रत्ययश्च शब्दाविति शेषः । रेवान्, रयिरस्यास्तीत्यर्थे, तदस्यास्त्य-स्मिन् (पां ५ । २ । ९४ ।) इति मतुप्, रयेर्मतौ बह्वलमिति सूत्र-वार्त्तिकेन यकारस्य सम्प्रसारणं, परपूर्वत्वं, छन्दसीरः (पां ८ । २ । १५ ।) इति वत्वं, आदृणः (पां ६ । १ ८७ ।) इति गुणः । ननु वत्वस्यासिद्धत्वात् वचिरङ्गत्वाच्च प्रागेव गुणे कृते इवर्णाभावान्न वत्वं, नवान्तादिवच्चेत्यादिवद्भावेन इवर्णसम्पादनं वर्णाश्रयविधौ तन्न तिषे-धादन्यथा खट्वाभिरित्यत्र सवर्णदीर्घस्यान्तवद्भावेनाकारत्वादतो भिस-ऐसित्यैसादेशः स्यात् । नच निरवकाशत्वेन वत्वस्यानवकाशत्वं अग्निवान् बर्हः दर्भस्तम्बः, उपब्रह्माणि हरिव इत्यादाववकाशलाभात्, सत्यं, अत्र गुणप्रवृत्तेः प्रागिकारात् परो मतुप्, कदाचिदिवर्णात् परस्य मतुपः पश्चादेकारादेशेन इवर्णाभावेऽपि भवति वत्वमिति छन्दसीर इति सूत्रकृता विवक्षितं, अमुनैवाभिप्रायेण हरिव इत्यादिकमुदाहृत्यापि अन्ते वृत्तिकृता रेवानित्युदाहृतं, क्षयनुड्भ्यामित्यत्रारेशब्दाच्च मतुप उदात्तत्वं वक्तव्यमित्यत्रारेशब्दो रेशब्दस्याप्युपलक्षणं, अत एव हि रेवाँ इन्द्रेवत इत्यादौ मतुप उदात्तत्वं दृष्टं, अथवा क्षयनुड्भ्या-मित्यत्रापि कदाचिद्ध्रस्वात् परस्य मतुप उदात्तत्वमित्येव व्याख्येयं, एवञ्च सम्प्रसारणपरपूर्वत्वयोः कृतयोर्गुणात् प्राक् क्षयात् परो मतुरिति रेवानारेवानित्यादौ सर्वत्रोदात्तत्वं सिध्यति, अयमेव सूत्रकृतोऽभि-प्रायो वार्त्तिककृता व्याख्यात इति । अमीवहा, अम रोग इत्येतस्मा-दौणादिकेन अमीवशब्दो निपातितस्तं हन्तीति, बह्वलं छन्दसीति क्विप्, कृदुत्तरपदप्रकृतिस्वरत्वं । वसुवित्, वसुं विन्दतीति वसुवित्, क्विप्च (पां ३ । २ । ७६ ।) इति क्विप्, उत्तरपदप्रकृतिस्वरत्वं । पुष्टि-वर्द्धनः, वर्द्धयतेर्नन्द्यादिलक्षणल्युः, लिति (पां ६ । १ । १९३ ।) इति प्रत्ययात् पूर्वस्योदात्तत्वं, पुष्टेर्वर्द्धन इति कर्म्मणि षष्ठ्याः समासः, कृदुत्तरपदप्रकृतिस्वरत्वं । सिषक्तु, षच समवाये, लोटि, बह्वलं छन्दसीति शपः श्लुः, श्लौ (पां ६ । १ । १० ।) इति द्वित्वे हलादि-शेषे च, बह्वलं छन्दसीत्यभ्यासाकारस्येकारः । तुरः, तुर त्वरणे, इगु-पधज्ञाप्रीकिरः कः (पां ३ । १ । १३५ ।) इति कः, प्रत्ययस्वरः ॥ २ ॥

१३१ मा नः शंसो अररुषो धूर्तिः प्रणङ्मर्त्यस्य १
रक्षा णो ब्रह्मणस्पते ॥
१४१ स घा वीरो न रिषति यमिन्द्रो ब्रह्मणस्पतिः १
सोमो हिनोति मर्त्यं ॥

तृतीयामृचमाह मा नः शंस इति । अररुषो मर्त्यस्योपद्रवं कर्त्तुमस्मत्समीपं प्राप्तस्य शत्रुरूपस्य मनुष्यस्य धूर्त्तिर्हिंसकः शंसः शंसनमधिक्षेप इत्यर्थः, तादृशो वाग्विक्षेपो नोऽस्मान् मा प्रणक् मा सम्यगाक्षीत्, शत्रुणा प्रयुक्तोऽधिक्षेपः कदाचिदस्मान् मा प्रापोत्वित्यर्थः, तदर्थं हे ब्रह्मणस्पते, नोऽस्मान् रक्ष पालय । मा, निपातः । शंसनं शंसः, भावे घञ्, ञित्त्वादाद्युदात्तः । अररुषः, अर्त्तेररुसित्यन्तर्भावितण्यर्थात्, ऋ गतावित्यस्मादरुस्, गुणो रपरत्वं, प्रत्ययस्वरे प्राप्ते वृषादित्वादाद्युदात्तः । धूर्त्तिः, धुर्वी हिंसायां, क्तिचक्तौ चसञ्ज्ञायां (पां ३ । ३ । १७४ ।) इति क्तिच्, तितुत्रथसिसुसरकसेषु च ( पां ७ । २ । ९ ।) इति इट्प्रतिषेधः, उपधायाश्च ( पां ७ । १ । १०१ ।) इत्युपधादीर्घत्वं, वलिलोपं बाधित्वा ऊठि प्राप्ते, रात्सोपः ( पां ६ । ४ । २१ ।) इति वकारलोपः । प्रणक्, एची सम्पर्के, लङस्तिप् । इतश्च ( पां ३ । ४ । १०० ।) इति इकारलोपः, हल्ङ्यादिलोपः, कुत्वं, रुधादिभ्यः श्नम्, तस्य, व्यत्ययो बहुलं (पां ३ । १ । ८५ ।) इत्यडागमः, यणादेशः, अकारस्यागमानुदात्तत्वं बाधित्वा, व्यत्ययेनोदात्तत्वं, चादिलोपे विभाषा (पां ८ । १ । ६३ ।) इति निघाताभावः । मर्त्यस्य, मृङ् प्राणत्यागे, असिहसिमृग्रु इत्यादिनौणादिकत्तन्प्रत्ययः, मर्तेषु भवइत्यर्थे, भवे छन्दसि ( पां ४ । ४ । ११० ।) इति यत्, यतोऽनावः ( पां ६ । १ । ११३ ।) इत्याद्युदात्तत्वं । रक्ष, रक्ष पालने, शपः पित्त्वादनुदात्तत्वं, धातुस्वर एव शिष्यते, पादादित्वान्न निघातः, रक्ष णः, ह्रचोऽतस्तिङः ( पां ६ । ३ । १३५ । ) इति दीर्घः, उपसर्गाद्बहुलमिति बहुग्रहणादनुपसर्गादपि नसो णत्वं । ब्रह्मणस्पते, षष्ठ्याः पतिपुत्र ( पां ८ । ३ । ५३ ।) इति संहितायां विसर्गस्य सकारः, सुबामन्त्रिते पराङ्गवत्स्वरे ( पां २ । १ । २ ।) इति पराङ्गवद्भावात् पदद्वयस्यामन्त्रितनिघातः ॥ ३ ॥

चतुर्थीमृचमाह स घा वीर इति । इन्द्रो देवो यं मर्त्यं यज्ञमाणं

१५१ त्वं तं ब्रह्मणस्पते सोम इन्द्रश्च मर्त्यं १
दक्षिणा पात्वंहसः ॥ ३४ ॥
१६१ सदसस्पतिमद्भुतं प्रियमिन्द्रस्य काम्यं १
सनिं मेधामयासिषं ॥

हिनोति प्राप्नोति वर्द्धयति वा, तथा ब्रह्मणस्पतिर्देवो हिनोति, तथा सोमो हिनोति, स घ, स एव यजमानो वीरो वीर्ययुक्तः सन् न रिष्यति न विनश्यति। स घ, चादिरनुदात्तः, संहितायां, ऋचितुनु घ मच्चु तङ्कुचोरुष्याणां ( पां ६।३।१३३। ) इति दीर्घः। ब्रह्मणस्पतिरित्युक्तं। हिनोति, हि गतौ वृद्धौ च, स्वादिभ्यः श्नुः, तिप्, तिपः पित्त्वात् श्नुप्रत्ययस्वर एव शिष्यते ॥ ४ ॥

पञ्चमीमृचमाह त्वं तं ब्रह्मणस्पत इति। हे ब्रह्मणस्पते, त्वं तं मर्त्यमनुष्यातारं मनुष्यं अंहसः पापात्, पाहीतिशेषः, तथा सोमः पातु, इन्द्रश्च पातु, दक्षिणादेवता च पातु। दक्ष वृद्धौ, नुदक्षिभ्यामिनन्निन्द्यौणादिक इनन्प्रत्ययः, नित्त्वादाद्युदात्तः। अंहसः, नब्विषयस्येत्यादिना फिट्सूत्रेणाद्युदात्तः ॥ ५ ॥ इति प्रथमस्य प्रथमे चतुस्त्रिंशो वर्गः ॥ ३४ ॥

ऋनुप्रवचनीयचरोर्होमे सदसस्पतिमित्येषा विनियुक्ता, तथा च गृह्ये मेखलामाबध्येतिखण्डे पठ्यते, आचार्यः समन्वारब्धे जुहुयात् सदसस्पतिमद्भुतमिति, तामेतां सूक्ते षष्ठीमृचमाह सदसस्पतिमद्भुतमिति। मेधां लब्धुं सदसस्पतिं एतन्नामकं देवमयासिषं प्राप्तवानस्मि। कीदृशं देवं, अद्भुतमाश्चर्यकरं। पुनः कीदृशं इन्द्रस्य प्रियं। सोमपानसहचारित्वात् काम्यं कमनीयं। सनिं धनस्य दातारं। सदसः, षद्लृ विशरणादौ, सर्वधातुभ्योऽसुन्, नित्त्वादाद्युदात्तः। पतिं, पातेर्डतिः, टिलोपः, प्रत्ययस्वरः। प्रियं, इगुपधज्ञाप्रीकिरः कः ( पां ३।१।१३५। ) इति कः, इयङादेशः, प्रत्ययस्वरः। काम्यं, कामयतेः, अचोयत् ( पां ३।१।९७। ) इति यत्, णेरनिटि ( पां ६।४।५१। ) इति णिलोपः, यतोऽनावः ( पां ६।१।११३। ) इत्याद्युदात्तत्वं। सनिं, षणु दाने, धात्वादेः षः सः ( पां ६।१।६४। ) इति षस्य सत्वं, अचइत्यनुवृत्तौ, खनिकषिञ्यसिवसिवनिसनिध्वनिग्रन्थिवलिभ्यश्चेत्यौणा-

१७। यस्मादृते न सिध्यति यज्ञो विपश्चितश्च न।
स धीनां योगमिन्वति॥

१८। आदृध्नोति हविष्कृतिं प्राञ्चं कृणोत्यध्वरं।
होत्रा देवेषु गच्छति॥

दिक इः प्रत्ययः, प्रत्ययस्वरः। अयासिषं, या प्रापणे, लुङ्मिप्, तस्थस्थमिपां ताम् तम् तामः (पां ३।४।१०१।) इति तस्यामादेशः, यमरमनमातां सक् च (पां ७।२।७३।) इति सिच्, इडागमः, धातोः सगागमः, निघातः॥ ६॥

सप्तमीमृचमाह यस्मादृतेनेति। यज्ञोऽयमनुष्ठातव्यो विपश्चितश्च न विदुषोऽपि यजमानस्य यस्मात् सदसस्पतेर्देवादृते न सिध्यति, सोऽयं सदसस्पतिर्देवो धीनां मनोऽनुष्ठानविषयाणामस्मद्बुद्धीनां अनुष्ठेयकर्म्मणां वा योगं सम्बन्धं इन्वति व्याप्नोति, यजमानमनुगृह्य तदीयं यज्ञं निष्पादयतीत्यर्थः। यस्मात्, अन्यारात् (पां २।३।२९।) इत्यादिना ऋतेशब्दयोगात् पञ्चमी, सावेकाचः (पां ६।१।१६८।) इति विभक्तेरुदात्तत्वे प्राप्ते, नगोश्वन्साववर्ण (पां ६।१।१८२।) इति प्रतिषेधः। सिध्यति, षिधू संराद्धौ, श्यन्, तस्य नित्त्वादाद्युदात्तत्वं, यद्वृत्तान्नित्यं (पां ८।१।६६।) इति निघातप्रतिषेधः। धीनां, सावेकाच इति भिवक्तेरुदात्तत्वं। योगं, युजिर् योगे, घञ्, तस्य ञित्त्वादाद्युदात्तत्वं। इन्वति, इवि व्याप्तौ, शप्, इदितोनुम्धातोः (पां ७।१।५८।) इति नुमागमः, निघातः॥ ७॥

अष्टमीमृचमाह आदृध्नोतीति। आदनन्तरमेव हविष्कृतिं हविःसम्पादनयुक्तं यजमानं ऋध्नोति, सदसस्पतिर्देवो वर्द्धयति, हविर्दानानन्तरमेव फलं प्रयच्छतीत्यर्थः, तथाविधफलसिद्धये अध्वरं यजमानेनानुष्ठीयमानं यज्ञं प्राञ्चं प्रकर्षेण गच्छन्तं अविघ्नेन परिसमाप्तियुक्तं कृणोति करोति, होत्रा हूयमाना देवता तुष्टा सती यजमानं प्रख्यापयितुं देवेषु गच्छति। यद्वा होत्रा अस्मदीयस्तुतिरूपा वाक् देवान् परितोषयितुं देवेषु गच्छति। श्लोकाधारेत्यादिषु सप्तपञ्चाशत्सु वाङ्नामसु होत्रा गीरिति पठितं। हविष्कृतिं, हविषः कृतिः सम्पादनं यस्य यजमानस्य सोऽयं हविष्कृतिः, बहुव्रीहौ प्रकृत्यापूर्वपदं

१९१ नराशंसं सुधृष्टममपश्यं सप्रथस्तमं १
दिवो न सद्ममखसं ॥ ३५ ॥

( पां ६ । २ । १ । ) इति पूर्वपदप्रकृतिस्वरत्वं। प्राञ्चं, अनिगन्तोऽञ्चेतावप्रत्यये ( पां ६ । २ । ५२ । ) इति गतेः प्रकृतिस्वरत्वं, पश्चादेकादेशस्वरः। अध्वरं, न विद्यते ध्वरो हिंसा यस्मिन्, नञ्सुभ्यां ( पां ६ । २ । १७२ । ) इत्युत्तरपदान्तोदात्तत्वं। ह्वयतेऽस्यामिति होत्रा देवता, ऊर्यामाश्वभसिभ्यस्त्रन्नित्यौणादिकस्त्रन्प्रत्ययः ॥ ८ ॥

नवमीमृचमाह नराशंसमिति। नराशंसं एतन्नामकं देवविशेषं, यद्वा अवयवार्थव्युत्पत्त्या सदसस्पतिदेवतापरोऽयं शब्दः। व्युत्पत्तिञ्च यास्को दर्शयति, नराशंसो यज्ञ इति, कात्थक्यः नरा अस्मिन्नासीनाः शंसन्ति अग्निरिति, शाकपूणिः नरैः प्रशस्यो भवतीति। अंत्राग्निवत् सदसस्पतेरपि नरैः शस्यमानत्वान्नराशंसत्वं, एतमेवाभिप्रायं हृदि निधाय ब्राह्मणमेवमाम्नायते, प्रजा वै नरो वाक्शंस इति, अतो मनुष्यैः शस्यमानो यः सदसस्पतिर्यो वा नराशंसको देवस्तमपश्यं शास्त्रदृष्ट्या दृष्टवानस्मि। कीदृशं सुधृष्टमं, अत्याधिक्येन धार्ष्ट्ययुक्तं। सप्रथस्तमं, अतिशयेन प्रख्यातं। सद्ममखसं, प्राप्ततेजस्कं। तत्र दृष्टान्तः, दिवो न द्युलोकानिव, आदित्यचन्द्रादिभिरधिष्ठिता द्युलोकविशेषा यथा तेजस्विनस्तद्वदयं नराशंसस्तेजस्वीत्यर्थः। सुधृष्टमं, शोभनं धृष्णोतीति सुधृट्, क्विप्च ( पां ३ । २ । ७६ । ) इति क्विप्, आतिशायिनिकस्तमप्, षकारस्य जश्त्वाभावश्छान्दसः,क्रादुत्तरपदप्रकृतिस्वरत्वेन ऋकार उदात्तः। अपश्यं, दृशिर् प्रेक्षणे, पा घ्रा ध्मा ( पां ७ । ३ । ७८ । ) इत्यादिना पश्यादेशः, लुङ्लङ्लृङ्क्ष्वडुदात्तः ( पां ६ । ४ । ७१ । ) इत्यट उदात्तत्वं, पादादित्वादनिघातः। सप्रथस्तमं, प्रथ प्रख्यापने, प्रथनं प्रथः, सर्वधातुभ्योऽसुन् औणादिकः, नित्त्वादाद्युदात्तत्वं, सह प्रथसा वर्त्तत इति, तेन सहेतितुल्ययोगे ( पां २ । २ । २८ । ) इति बहुव्रीहिसमासः, वोपसर्जनस्य ( पां ६ । ३ । ८२ । ) इति सादेशः, पूर्वपदप्रकृतिस्वरत्वे प्राप्ते, परादिश्छन्दसि बहुलं ( पां ६ । २ । १९९ । ) इत्युत्तरपदाद्युदात्तत्वं। दिवः, ऊडिदं ( पां ६ । १ । १७१ । ) इत्यादिना विभक्तेरुदात्तत्वं। सद्ममखसं, सीदतीति सद्म, षदॢ विशरणादौ, अन्येभ्योऽपि दृश्यते ( पां ३ । २ । ७५ । ) इति मनिन्, नित्त्वादाद्युदात्तः, सद्म-

## ऊनविंशर्चसूक्तं।

१।१।१ प्रति त्यं चारुमध्वरं गोपीथाय प्रहूयसे।
मरुद्भिरग्न आगहि॥
१।२।१ न हि देवो न मर्त्यो महस्तव क्रतुं परः॥
मरुद्भिरग्न आगहि॥

महो यस्येति बहुव्रीहौ इकारस्य व्यत्ययेन खकारः॥ ९॥ इति प्रथमस्य प्रथमे पञ्चविंशो वर्गः॥ २५॥

प्रति त्यमिति नवर्चं सूक्तं, ऋषिच्छन्दसी पूर्ववत्, देवता अनुक्रम्यते प्रतित्यमाग्निमारुतमिति, कारीरेष्टौ प्रतित्यमित्येषा धाय्या, तथाच, सूचितं वर्षकामेष्टिः कारीरी तस्यां प्रति त्यं चारुमध्वरमीळेऽग्निं स्रुवसं नमोभिरिति धाय्य इति, तामेतां सूक्तगतां प्रथमामृचमाह प्रतित्यमिति। त्यच्छब्दः सर्वनामतच्छब्दपर्य्यायः, हे अग्ने, यो यज्ञश्चाङ्गवैकल्यरहितस्त्वं तथाविधं चारुमध्वरं प्रतिलभ्य गोपीथाय सोमपानाय प्रह्वयसे प्रकर्षेण त्वं ह्वयसे, तस्मादस्मिन्नध्वरे त्वं मरुद्भिः सह देवविशेषैः सह आगह्यागच्छ। सेयमृक् याख्येनैवं व्याख्याता, तं प्रतिचारुमध्वरं सोमपानाय प्रह्वयसे, सोऽग्ने मरुद्भिः सहागच्छेति। प्रति, तिप्रात आद्युदात्तः। त्यं, त्यदादीनामः (पां ७।२।१०२।) इति अ इत्यन्तादेशः, प्रातिपदिकस्वरः। चारुं, दृसनिजनिचरिचटिभ्यो युण् इति युण्प्रत्यय औणादिकः, अत उपधायाः (पां ७।२।११६।) इति वृद्धिः, नित्त्वादाद्युदात्तः। गोपीथाय, निशीथ गोपीथावसथा इति थक्प्रत्ययान्तो निपातितः, निपातस्वरः॥ १॥

द्वितीयामृचमाह न हि देवेति। हे अग्ने, महो महतस्तव सम्बन्धिक्रतुं कर्म्मविशेषमुल्लङ्घ्य परो देवो न हि, उत्कृष्टदेवो न भवति खलु, तथा मर्त्यो मनुष्यश्च परो न भवति, ये मनुष्यास्त्वदीयं क्रतुमनुतिष्ठन्ति, ये च देवास्त्वदीये क्रताविज्यन्ते त एवोत्कृष्टा इत्यर्थः। मरुद्भिरित्यादि पूर्ववत्। न हि, एवमादीनामन्त इति फिट्सूत्रेणान्तोदात्तः। देवः, पचाद्यजन्तश्चित्त्वादन्तोदात्तः। महः, महतस्तलोपश्छान्दसः, यद्वा महतोरूपसङ्ख्यानमिति वार्त्तिकेन विभक्तेरुदात्तत्वं। तव, युष्मद-

१३१ ये महो रजसो विदुर्विश्वे देवासो अद्रुहः ॥
मरुद्भिरग्न आगहि ॥
१४१ य उग्रा अर्कमानृचुरनाधृष्टास ओजसा ॥
मरुद्भिरग्न आगहि ॥

स्मदोर्ङसि ( पां ६ । १ । २११ ) इत्याद्युदात्तत्वं । गहि, गम्लृ गतौ, लोटः सेर्हिः, बहुलं छन्दसीति श्लोर्लुक्, अनुदात्तोपदेश ( पां ६ । ४ । ३७ । ) इत्यादिना अनुनासिकलोपस्तस्य, असिद्धवदत्राभात् ( पां ६ । ४ । २२ । ) इति असिद्धत्वात्, अतो हेः ( पां ६ । ४ । १०५ ) इति हेर्लुङ्न भवति, निघातः ॥ २ ॥

तृतीयामृचमाह ये मह इति । हे अग्ने, ये मरुतो महो रजसो महत उदकस्य वर्षणप्रकारं विदुस्तैर्मरुद्भिरित्यन्वयः । कीदृशा मरुतः, विश्वे सर्वे सप्तविधगणोपेताः, सप्तगणा वै मरुत इति श्रुतेः । देवासो द्योतमानाः । अद्रुहः, द्रोहरहिताः, वर्षणेन सर्वभूतोपकारित्वात्, तथाचोपरिष्टादाम्नायते उदीरयथा मरुतः समुद्रतो यूयं वृष्टिं वर्षयथा पुरीषिण इति । शाखान्तरेऽपि मन्त्रान्तरस्य ब्राह्मणमेवमाम्नायते मरुतां वृषतयस्थेत्याह, मरुतो वै वृषा ईशते इति । रजःशब्दो यास्केन बहुधा व्याख्यातः, रजो रजतो ज्योतीरज उच्यते, उदकं रज उच्यते, लोका रजांस्युच्यन्ते, अहरहनी रजसी उच्येत इति । रजसः, नञ्विधर्थस्यानिसन्तस्येत्याद्युदात्तः । विदुः, विद ज्ञाने, विदो लटो वा ( पां ३ । ४ । ८३ । ) इत्युसादेशः, प्रत्ययस्वरः, यदुक्तान्नित्यं ( पां ८ । १ । ६६ । ) इति यदुक्तयोर्निघाताभावः । विश्वे, विशेः क्वन्तस्य नित्त्वादाद्युदात्तत्वं । देवासः, आज्जसेरसुक् ( पां ७ । ३ । ५० । ) इत्यसुगागमः, देवशब्दः पचाद्यजन्तश्चित्त्वादन्तोदात्तः । अद्रुहः, सम्पदादित्वाद्भावे क्विपि बहुव्रीहौ, नञ्सुभ्यां ( पां ६ । २ । १७२ । ) इत्यन्तोदात्तत्वं, कर्तरि वा क्विप्, तत्पुरुषे हि अव्ययपूर्वपदप्रकृतिस्वरत्वं स्यात्, नच क्वदुत्तरपदप्रकृतिस्वरत्वं, यतो नञ् नगतिर्नचकारकमिति ॥ ३ ॥

चतुर्थीमृचमाह य उग्रा इति । ये मरुत उग्रास्तीव्राः सन्त अर्कमुदकं आनृचुरानर्चुरर्चितवन्तः वर्षणेन सम्पादितवन्त इत्यर्थः, तैर्मरुद्भिरित्यन्वयः । कीदृशा मरुतः, ओजसा बलेन अनाधृष्टासः

१५१ ये शुभ्रा घोरवर्पसः सुक्षत्रासो रिशादसः ।
मरुद्भिरग्न आगहि ॥ ३६ ॥
१६१ ये नाकस्याधि रोचने दिवि देवास आसते ॥
मरुद्भिरग्न आगहि ॥

अतिरस्कृताः, सर्वेभ्योऽपि प्रवणा इत्यर्थः । अर्कशब्दस्योदकवाचित्वं वाजसनेयिन आमनन्ति, आपो वा अर्क इति, तन्निर्वचनञ्च त एवामनन्ति, सोऽर्चन्नचरत्तस्यार्चत आपो जायन्तार्चतो वै मे कमभूदिति तदर्कस्यार्कत्वमिति । स जगत्स्रष्टा हिरण्यगर्भ उदकं स्रष्टुमुद्युक्तोऽर्चन्नुदकं सत्यसङ्कल्पमहिमप्रख्यापनेन स्वात्मानं पूजयन्नचरत्, तथा पूजयतो हिरण्यगर्भस्य सकाशादुदकमुत्पन्नं, तदानीमर्चतो मेऽन्तः कमभूदित्यवोचत्, तेनोदकस्याप्यर्कनाम निष्पन्नमित्यर्थः । आनृचुः, अर्चतेर्धातोः, अपस्पृष (पां ६ । १ । ३६ ।) इत्यादिना निपातितः, प्रत्ययस्वरः, यद्वृत्तयोगान्ननिघातः । अनाधृष्टासः, अव्ययपूर्वपदप्रकृतिस्वरत्वं । ओजसा, उब्जेर्बलेबलोपश्चेत्यौणादिकोऽसुन्प्रत्ययः, नित्त्वादाद्युदात्तः ॥ ४ ॥

पञ्चमीमृचमाह ये शुभ्रा इति । ये मरुतः शुभ्रत्वादिगुणोपेतास्तैर्मरुद्भिरित्यन्वयः । कीदृशा मरुतः, शुभ्राः शोभमानाः । घोरवर्पसः, उग्ररूपधराः । सुक्षत्रासः, शोभनधनोपेताः । रिशादसः, हिंसकानां भक्षकाः । मघमित्यादिष्वष्टाविंशतिधननामसु क्षत्रं भग इति पठितं । शुभ्राः, स्फायितञ्चिवञ्चीत्यादिना शुभेरौणादिको रक्प्रत्ययः, प्रत्ययस्वरः । घोरवर्पसः, घोरं वर्पो येषां, बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वं । सुक्षत्रासः, बहुव्रीहौ, नञ्सुभ्यां (पां ६ । २ । १७२ ।) इत्युत्तरपदान्तोदात्तत्वं, आद्युदात्तं द्व्यच्छन्दसि (पां ६ । २ । ११९ ।) इत्येव तु न भवति, क्षत्रशब्दस्यान्तोदात्तत्वात् । रिशन्ति हिंसन्तीति रिशास्तानदन्तीति रिशादसः, सर्वधातुभ्योऽसुन्प्रत्ययः, नित्स्वरेणोत्तरपदाद्युदात्तत्वं, कृदुत्तरपदप्रकृतिस्वरेण स एव शिष्यते ॥ ५ ॥ इति प्रथमस्य प्रथमे षट्त्रिंशो वर्गः ॥ ३६ ॥

सूक्ते षष्ठीमृचमाह ये नाकस्येति । ये मरुतो नाकस्याधि, दुःखरहितस्य सूर्य्यस्योपरि दिवि द्युलोके रोचने दीप्यमाने ये देवासः स्वय-

१७१. य ईङ्खयन्ति पर्वतां तिरः समुद्रमर्णवं ॥
मरुद्भिरग्न आगहि ॥
॥ ८ ॥ आ ये तन्वन्ति रश्मिभिस्तिरः समुद्रमोजसा ।
मरुद्भिरग्न आगहि ॥

मपि दीप्यमाना आसते, तैर्मरुद्भिरित्यन्वयः। नाकस्य, कं सुखं तद्यस्मिन्न विद्यतेऽसावकः इति बहुव्रीहिं कृत्वा पश्चान्नञ्, न अको नाक इति नञ्तत्पुरुषः, न लोपो नञः ( पां ६ । ३ । ७३ । ) इति नञो लोपो न भवति, नभ्राण्नपात् ( पां ६ । ३ । ७५ । ) इत्यादिना प्रकृतिभावात्, तत्पुरुषेतुल्यार्थतृतीया ( पां ६ । २ । २ । ) इत्यादिनाव्ययपूर्वपदप्रकृतिस्वरत्वेनोदात्तत्वं, प्रथमातत्पुरुषं कृत्वा पश्चाद्बहुव्रीहौ उत्तरपदान्तोदात्तत्वं स्यात्। अधिशब्द उपर्यर्थे उपसर्गप्रतिरूपको निघातः। रोचने, रुच दीप्तौ, अनुदात्तेतश्च हलादेः ( पां ३ । २ । १४९ । ) इति युच्, चितः ( पां ६ । १ । १६६ । ) इत्यन्तोदात्तत्वं। दिवि, ऊडिदंम्दाद्यप्णुम् ( पां ६ । १ । १७१ । ) इत्यादिना विभक्तेरुदात्तत्वं। देवासः, आज्जसेरसुक् ( पां ७ । १ । ५० । ) इत्यसुक्। आसते, आस उपवेशने, अनुदात्तेत्त्वादात्मनेपदं झ, तस्यान्तादेशः, अदिप्रभृतिभ्यः शपः ( पां २ । ४ । ७२ । ) इति शपो लुक्, अनुदात्तेत्त्वाल्लसार्वधातुकानुदात्तत्वं, यदुक्तयोगान्निघातः ॥ ६ ॥

सप्तमीमृचमाह य ईङ्खयन्तीति। ये मरुतः पर्वतां पर्वतान् मेघान् ईङ्खयन्ति चालयन्ति, तथा अर्णवं उदकयुक्तं समुद्रं तिरस्कुर्वन्तीतिशेषः, निश्चलस्य जलस्य तरङ्गाद्युत्पत्तये चालनं तिरस्कारस्तैर्मरुद्भिरित्यन्वयः। ईङ्खयन्ति, उखउखिवखवखिमखमखीत्यादौ ईखिर्गत्यर्थः, हेतुमति च ( पां ३ । १ । २६ । ) इति णिच्, इदितो नुम् धातोः ( पां ७ । १ । ५८ । ) इति नुम्, णिजन्तधातोः, चितः ( पां ६ । १ । १६३ । ) इत्यन्तोदात्तत्वं, शपः पित्त्वादनुदात्तत्वं, तिङश्च लसार्वधातुकस्वरेण धातुस्वर एव शिष्यते। पर्वतान्, पुर्वपर्वमर्वपूरणे, भ्रस्ज दृशि यजिपर्व्वीत्यादीना औणादिकोऽतच्प्रत्ययः, प्रत्ययस्वरः ॥ ७ ॥

अष्टमीमृचमाह आ ये तन्वन्तीति। ये मरुतो रश्मिभिः सूर्यकिरणैः सह आतन्वन्ति आप्नुवन्ति आकाशमितिशेषः, किञ्चौजसा

१९१ अभि त्वा पूर्वपीतये सृजामि सोम्यं मधु ।
मरुद्भिरग्न आगहि ॥ ३७ ॥

॥ इति प्रथमाष्टके प्रथमोऽध्यायः ॥

स्वकीयबलेन समुद्रं तिरस्कुर्वन्ति, तैर्मरुद्भिरित्यन्वयः । तन्वन्ति, तनु-विस्तारे, लटो झोऽन्तः, तनादिकृञ्भ्य उः (पां ३ । १ । ७९ ।) इति उः, सति शिष्टस्वरबलीयस्त्वमन्यत्रविकरणेभ्य इति तिङ एवाद्युदात्तत्वं । समुद्रं, उन्दी क्लेदने, स्फायि तञ्चीत्यादिना रक्प्रत्यय औणादिकः, समासे क्रादुत्तरपदप्रकृतिस्वरः ॥ ८ ॥

नवमीमृचमाह अभि त्वेति । हे अग्ने, पूर्वपीतये पूर्वकाले प्रथमाय पानाय त्वा त्वां सोम्यं मध सोमसम्बन्धिमधुररसं अभिसृजामि सर्वतः सम्पादयामि, अतस्त्वं मरुद्भिः सहागच्छ । अभि, एवमादीनामन्त इति फिट्सूत्रेणान्तोदात्तः । त्वा, त्वामौदितीयायाः ( पां ८ । १ । २३ । ) इति त्वादेशः सर्वानुदात्तः । पूर्वपीतये, पूर्व्वाचासौ पीतिश्च, पुम्वत्कर्म्मधारय ( पां ६ । ३ । ४२ । ) इत्यादिना पुम्वद्भावः । सृजामि, सृज विसर्गे, मिप्, मिपः पित्त्वादनुदात्तत्वं, विकरणस्वरः । सोम्यं, सोममर्हति यः ( पां ४ । ४ । १३७ । ) इति यप्रत्ययः, प्रत्ययस्वरेणान्तो-दात्तः । मधु, फलिपाटिनमिमनिजनां गुक्पटिनाकिधतञ्चेत्यौणादिक उः प्रत्ययः, निदित्यनुवृत्तेराद्युदात्तत्वं । अन्यदृतं ॥ वेदार्थस्य प्रकाशेन तमो हार्दं निवारयन् । पुमर्थांश्चतुरो देयाद्विद्यातीर्थमहेश्वरः ॥ पुम-र्थान् धर्मार्थकाममोक्षानित्यर्थः ॥ ९ ॥ ३७ ॥ इति प्रथमस्य प्रथमे सप्तचिंशो वर्गः । इति श्रीमद्राजाधिराजपरमेश्वरवैदिकमार्गप्रवर्त्तक-श्रीबुक्कभूपालसाम्राज्यधुरन्धरेण सायणाचार्येण विरचिते माधवीये वेदार्थप्रकाशे ऋक्संहिताया भाष्ये प्रथमाष्टके प्रथमोऽध्यायः समाप्ति-मगमत् ॥

( ॐ तत्सत् । )

ॐ तत्सत् ॐ

---

# ऋग्वेदद्वितीयाध्यायानुक्रमणिकारम्भः १

अयमष्टावार्भव, मिन्द्रषडैन्द्राग्नं, प्रातर्युजा सैका, चतस्र आश्विन्य-स्तथा सावित्र्य, आग्नेय्यौ द्वे देवीनामेके, न्द्राणीवरुणान्यग्नायीनां, द्यावा पृथिव्येपार्थिवी, षड्वैष्णव्योऽतो देवा देवी वा, तीव्राश्चतुर्विंशति, र्वाय-व्यैकैन्द्रवायव्यौ मैत्रावरुणमरुत्वतीयवैश्वदेवपौष्णास्तृचाः, शिष्टा आप्रो-न्त्याध्यर्धाग्नेय्य, न्तः पुर उष्णिक् परानुष्टुप्, तिस्रस्त्रान्त्या एकविंशी-प्रतिष्ठा, कस्य पञ्चानाजीगर्त्तः शुनः शेपः, सप्तर्चिमो वैश्वामित्रो देवरातो वारुणं तुत्रैष्टुभमादौकाय्याग्नेय्यौ, सावित्र्यस्तृचो गायत्रो स्त्रान्त्या भार्गवित्रा, यच्चित्सैकावसिष्ठदप्राग्नेयं त्वाश्वं सप्तोना, गायत्रेन्त्या दैवी त्रिष्टुप्, यत्र ग्रावा नवषडनुष्टुबादि, यच्चित्थौलूखल्यौ, मरु मौसल्यौ च, प्रजापतेर्हरिश्चन्द्रस्त्रान्त्या चर्म्मप्रशंसा वा, यच्चित्सप्त यांक्तं, मावोद्यधिकास्माकं, यादनिरुक्तस्त्रिष्टुप्परोष्टचावाश्विनौ-षसौ, त्वमग्नेद्यूना, हिरण्यस्तूप आग्नेयं त्रिष्टुबन्त्याष्टमीषोडश्यौ चेन्द्रस्य पञ्चोना ॥ हरिः ॐ ॥

---

## प्रथमाष्टकद्वितीयाध्यायः।

### विंशऋक्तं।

१११ अयं देवाय जन्मने स्तोमो विप्रेभिरासया।
अकारि रत्नधातमः॥

१२१ य इन्द्राय वचोयुजा ततक्षुर्मनसा हरी।
शमीभिर्यज्ञमाशत॥

यस्य निश्वसितं वेदा यो वेदेभ्योऽखिलं जगत्। निर्ममे तमहं वन्दे विद्यातीर्थमहेश्वरं॥ अथ प्रथमाष्टके द्वितीयोऽध्याय आरभ्यते। तत्रायं देवायेत्यष्टर्चं सूक्तं, अस्य ऋषिछन्दसी पूर्ववत्, ऋभुदेवताकत्वमनुक्रम्यते, अयमष्टावार्भवमिति, विनियोगस्तु सूक्तस्य लैङ्गिकः स्मार्त्तो वा द्रष्टव्यः, बृहत्यस्य प्रथमे छन्दोमे वैश्वदेवशस्त्रेऽयं देवाय जन्मन इत्यार्भवस्तृचः, अथ छन्दोमा इति खण्डे सूचितं, अभित्वादेवसवितः प्रेतां यज्ञस्य शंभुवा यं देवाय जन्मन इति ऽचा इति, तस्मिन् सूक्ते प्रथमाऽचमाह अयं देवायेति। ऋभवो हि मनुष्याः सन्तस्तपसा देवत्वं प्राप्ताः तेचाऽत्र सूक्ते देवताः, तत्सङ्घो जायमानवाचिना जन्मशब्देनैकवचनान्तेनाऽत्र निर्दिश्यते, जन्मने जायमानाय ऋभुसम्भवरूपाय देवाय तत्प्रीत्यर्थमयं स्तोमः स्तोत्रविशेषो विप्रेभिर्मेधाविभिर्ऋत्विग्भिरासया स्वकीयेनास्येनाकारि निष्पादितः। कीदृशः स्तोमः, रत्नधातमः, अतिशयेन रमणीयमणिमुक्तादिधनप्रदः, स्तोत्रेण तुष्टा ऋभवो धनं प्रयच्छन्तीत्यर्थः। आसया, आस्यशब्दतृतीयैकवचनस्य, सुपांसुलुक् (पां ७।१।३९।) इत्यादिना याजादेशः, व्यत्ययेन प्रकृतियकारस्य लोपः, चितः (पां ६।१।१६३।) इत्यन्तोदात्तः। रत्नधातमः, रत्नानि दधातीति रत्नधाः, छदुत्तरपदप्रकृतिस्वरत्वं॥ १॥

द्वितीयामृचमाह य इन्द्रायेति। ये ऋभव, इन्द्राय इन्द्रप्रीत्यर्थं वचोयुजा ताडनादिकं विना वाङ्मात्रेण रथे युज्यमानौ सुशिक्षितौ हरी एतन्नामकावश्वौ मनसा ततक्षुः सम्पादितवन्तः, ऋभूणां सत्यसङ्कल्पत्वात्तत्सङ्कल्पमात्रेणेन्द्रस्याश्वौ सम्पन्नावित्यर्थः, ते ऋभवः शमीभिर्मेहचमसादिनिष्पादनरूपैः कर्मभिर्यज्ञमस्मदीयमाशत व्याप्तवन्तः

१३१ तक्षन्नासत्याभ्यां परिज्मानं सुखं रथं १
तक्षन्धेनुं सबर्दुघां ॥
१४१ युवाना पितरा पुनः सत्यमन्त्रा ऋजूयवः १
ऋभवो विष्ट्यक्रत ॥

अपः अभ्र इत्यादिषु षड्विंशतिसङ्ख्यकेषु कर्म्मनामसु भ्रमी भ्रिमीति पठितं । वचोयुजा, वचसा युञ्जत इत्यर्थे, सत्सूद्विष ( पां ३ । २ । ६१ । ) इत्यादिना क्विप्, सुपांसुलुक् ( पां ७ । १ । ३९ । ) इत्यादिना विभक्तेराकारः, कृदुत्तरपदप्रकृतिस्वरत्वं। ततक्षुः, तक्षू त्वक्षू तनूकरणे, लिटि झेरुसादेशः, पादादित्वादनिघातः। भ्रमीभिः, भ्रमयन्ति यानानीति भ्रम्यः कर्म्माणि, औणादिक इन्, कृदिकारादक्तिन इति वार्त्तिकेन ङीष्, कृषादित्वादन्तोदात्तः। आशत, अशू व्याप्तौ, लङो झस्य अदादेशः, स्वादिभ्यः श्नुः, तस्य बहुलं छन्दसीति लुक्, अडागमः, तिङ्ङ् तिङः ( पां ८ । १ । २८ । ) इति निघातः ॥ २ ॥

तृतीयामृचमाह तक्षन्निति । नासत्याभ्यां अश्विदेवप्रीत्यर्थं रथं तक्षन्, ऋभवो देवाः कक्षिद्रथमतक्षन्, तक्षणेन सम्पादितवन्तः। कीदृशं रथं, परिज्मानं परितो गन्तारं । सुखं, उपर्य्युपवेशने सुखकरं। किञ्च धेनुं काञ्चिद्गां तक्षन्, धातुनामनेकार्थत्वात् तक्षतिरत्र सम्पादनवाची। कीदृशीं धेनुं, सबर्दुघां सबरः क्षीरस्य दोग्ध्रीं । तक्षन्, बहुलं छन्दसीत्यडभावः। नासत्याभ्यां, न विद्यतेऽसत्यं ययोस्तावसत्यौ न असत्यौ नासत्यौ, नञ्सुभ्याम्नञ्वेदानासत्यान्नमुचि ( पां ६ । ३ । ७५ । ) इत्यादिना नञोपाभावः । परिज्मानं, अजेः परिपूर्वस्य, श्वन्नुक्षन्नित्यादिना मन्प्रत्ययः, अकारलोपः, आद्युदात्तत्वञ्च औणादिकनियातनात्। सबर्दुघां, सबः पयो दोग्धीति सबर्दुघा, दुहः कप् घश्च ( पां ३ । २ । ७० । ) इति कप्, हकारस्य घकारश्च, सबरिति रेफान्तं प्रातिपदिकं क्षीरवाचीति सम्प्रदायविदः, कपः पित्त्वादनुदात्तत्वं, धातुस्वर एव शिष्यते, समासे कृदुत्तरपदप्रकृतिस्वरः ॥ ३ ॥

द्वितीये छन्दोमे वैश्वदेवशस्त्रे युवाना पितरा पुनरित्यार्भवस्तृचः, द्वितीयस्यामिं वो देव इति खण्डे सूत्रितं, मही द्यौः पृथिवी च नो युवाना पितरा पुनरिति तृचाविति, तस्मिंस्तृचे प्रथमां सूक्ते चतुर्थीमृच-

## १५१ सं वो मदासो अग्मतेन्द्रेण च मरुत्वता १ आदित्येभिश्च राजभिः ॥ १ वर्गः ॥

माह युवाना पितरेति । ऋभव एतन्नामका देवाः पितरा पितरा स्वकीयौ मातापितरौ पूर्वं दृष्ट्वापि पुनर्युवाना तरुणौ चक्रत कृतवन्तः । कीदृशा ऋभवः, सत्यमन्त्राः, अवितथमन्त्रसामर्थ्योपेताः, पुरश्चरणाद्यनुष्ठानेन सिद्धमन्त्रत्वाद्यद्यत्फलमुद्दिश्य मन्त्राः प्रयुज्यन्ते तत्फलं तथैव सम्पद्यते, तस्माज्जीर्णयोः पित्रोर्युवत्वं सम्पादयितुं समर्था इत्यर्थः । पुनःकीदृशाः, ऋजूयवः ऋजुतामात्मन इच्छन्तः, छलरहिता इत्यर्थः, अतएवैतेषामनुष्ठिता मन्त्राः सिध्यन्ति । पुनरपि कीदृशाः, विष्टी विष्टयो व्याप्तियुक्ताः, सर्वेषु कार्येषु एतदीयस्य मन्त्रसामर्थ्यस्याप्रतिघातोऽत्र व्याप्तिरुच्यते । ऋभुशब्दं यास्क एवं निर्वक्ति, ऋभव उरु भान्तीति वर्त्तेन भान्तीति वेति । युवाना, युवन्शब्दो यातेः क्वनिन्नन्तो नित्त्वादाद्युदात्तः, सुपांसुलुक् इत्यादिना विभक्तेराकारः । पितरा, पूर्ववदाकारः । सत्यमन्त्राः, बहुव्रीहौ पूर्वपदप्रकृतिस्वरः । ऋजूयवः, ऋजुशब्दोऽत्र भावपरः ऋजुत्वमात्मन इच्छन्तीति क्यच्, अकृत्सार्वधातुकयोः ( पां ७ । ४ । २५ । ) इति दीर्घः, क्याच्छन्दसि ( पां ३ । २ । १७० । ) इत्युप्रत्ययः, प्रत्ययस्वरः । विष्टी, विष्लृव्याप्तौ, क्तिचक्तौचसञ्ज्ञायां ( पां ३ । ३ । १७४ । ) इति क्तिच्, तितुत्रतथसिसुसरकसेषु च ( पां ७ । २ । ९ । ) इति इट्प्रतिषेधः, तस्माज्जस ईयाडियाजीकारागामुपसङ्ख्यानमिति वार्त्तिकेन ईकारादेशः, न च, अलोऽन्त्यस्य ( पां १ । १ । ५२ । ) इति सकारस्य भवति, तत आदृगुपधत्वे, प्रथमयोः पूर्वसवर्णः ( पां ६ । १ । १०२ । ) इति पूर्वसवर्णदीर्घत्वं बाधित्वा परत्वात्, जसि च ( पां ७ । ३ । १०९ । ) इति क्नुसस्य गुणेन भवितव्यमिति चेन्न, सञ्ज्ञापूर्वकस्य विधेरनित्यत्वात् । अकृत, कृञो लुङ् आत्मनेपदं झ, तस्य अदादेशः, मन्त्रेघस ( पां २ । ४ । ८० । इत्यादिना च्लेर्लुक्, यणादेशः, अडागमः, निघातः ॥ ४ ॥

पञ्चमीमृचमाह सं वइति । हे ऋभवो, युष्माकं सम्बन्धिनो मदासो मदहेतवः सोमा इन्द्रेण चादित्येभिरादित्यैश्च समग्मत सङ्गताः, ऋभूणामिन्द्रादित्यैः सह सोमपानं तृतीयसवनेऽस्ति, अतएवावाहननिगद आश्वलायनेनैवं पठितं, इन्द्रमादित्यवन्तमृभुमन्तं वाजवन्तं बृहस्पति-

१६१ उत त्यं चमसं नवं त्वष्टुर्देवस्य निष्कृतं १
अकर्त चतुरः पुनः ॥

मन्त्रं विश्वदेव्यावन्तमाऽऽहवे इति । कीदृशेनेन्द्रेण, मरुत्वता मरुद्भिर्युक्तेन, अत एव मन्त्रान्तरमेवमाम्नायते मरुद्भिरिन्द्रसख्ये अस्विति । कीदृशैरादित्येभीराजभिर्दीप्यमानैः । मदासः, माद्यन्त्येभिरिति मदाः सोमाः, मदोऽनुपसर्गे ( पां ३ । १ । ६७ । ) इत्यप्, तस्य पित्त्वादनुदात्तत्वं, धातु स्वर एव शिष्यते, आज्जसेरसुक् ( पां ७ । १ । ५० । ) इति जसोऽसुगागमः । अगमत, गमेः संपूर्वाल्लुङ्, समोगम्यृच्छि ( पां १ । ३ । २९ । ) इत्यादिनात्मनेपदं भ, तस्य अदादेशः, मन्त्रेघस ( पां २ । ४ । ८० । ) इत्यादिना च्लेर्लुक्, गम हन जन खन घसां ( पां ६ । ४ । ९८ । ) इत्युपधालोपः, व्यवहिताश्च ( पां १ । ४ । ८२ । ) इति समो व्यवहितप्रयोगः, निघातः । मरुत्वता, मरुतोऽस्य सन्तीति मरुत्वान्, तसौ मत्वर्थे ( पां १ । ४ । १९ । ) इति भसञ्ज्ञया पदसञ्ज्ञाया बाधितत्वाज्झलाभावः, झयः ( पां ८ । २ । १० । ) इति मतुपो वत्वं । आदित्येभिः, बह्वलं छन्दसीति भिस ऐसादेशाभावे, बह्ववचने झल्येत् ( पां ७ । ३ । १०३ । ) इत्येत्वं । राजभिः, राजन्शब्दस्य क्विन्नन्तत्वेन नित्त्वादाद्युदात्तत्वं ॥ ५ ॥ इति प्रथमस्य द्वितीये प्रथमो वर्गः ॥ १ ॥

सूक्ते षष्ठीमृचमाह उत त्यमिति । उत अपि वा त्वष्टुः, एतन्नामकस्य देवस्य सम्बन्धी तक्षणव्यापारः, नवं नूतनं चमसन्तं सोमधारणक्षमं काष्ठपात्रविशेषं निष्कृतं, निशब्देन सम्पादितमकरोदिति शेषः, तक्षणव्यापारकुशलस्य तस्य त्वष्टुः शिष्या ऋभवस्तेन निर्मितं तमेकं चमसं पुनरपि चतुरोऽकर्त्त, चतुर्धा विभक्तांश्चमसान् कृतवन्तः, एकस्य चतुर्विधकरणत्वरूपोऽयमर्थो मन्त्रान्तरेऽपि विस्पष्टः, एकं चमसं चतुरः कृणोतनेति । नवं, णु स्तुतौ, नूयत इति नवं कर्मण्यप्रत्ययः, सर्वधातुभ्योऽप्यवादत्वात् घञर्थे सर्वत्र भवति, घञ्प्रत्ययश्च, अकर्त्तरि च कारके सञ्ज्ञायां ( पां ३ । ३ । १९ । इति कर्तृव्यतिरिक्ते सर्वत्र कारके भवति । यद्यपि घञ् सञ्ज्ञायामित्युक्तं, तथापि च कारकसञ्ज्ञाव्यभिचारार्थत्वादसञ्ज्ञायामपि भवत्येव, सम्बध्यत इति सम्बन्धः कर्मणि घञित्युक्तं । त्वष्टुः, तक्षू त्वक्षू तनूकरणे, औणादिकस्तृन्, ऊदितत्वात् पक्षे इडभावः, स्कोः संयोगाद्योरन्ते च ( पां ८ । २ । २९ । ) इति ककार-

१७१ ते नो रत्नानि धत्तन त्रिरा साप्तानि सुन्वते।
एकमेकं सुशस्तिभिः॥

लोपः। निष्कृतं, कृञोनिरुपसृष्टात् कर्म्मणि क्तः, प्रादिसमासे, नित्यं समासेऽनुत्तरपदस्थस्य (पां ८।३।४५।) इति षत्वं, अत्र, कर्तृकर्म्मणोः कृति (पां २।३।६५।) इति प्राप्ता षष्ठी यद्यपि, नलोकाव्ययनिष्ठाखलर्थतृणां (पां २।३।६९।) इति निषिद्धा, तथापि कर्तुः शेषत्वेन विवक्षितत्वात्, कर्तृकरणयोस्तृतीया (पां २।३।१८।) इत्येतस्याः प्राप्तेः शैषिकी षष्ठी, यथा कर्म्मणि शेषत्वेन विवक्षिते मासानामश्नीयादिति, वत् गतिरनन्तरः (पां ६।२।४९।) इति निस उदात्तत्वं। अकर्त्त अष्टषत, कृञो लुङि तस्य व्यत्ययेन तादेशः, मन्त्रेघस (पां २।४।८०।) इति च्लेर्लुक्, छन्दस्युभयथा (पां ३।४।११७।) इति तिङ आर्द्धधातुकत्वात् ङित्त्वाभावेन गुणः। चतुरः, शसि (पां ६।१।१६७।) इत्युकार उदात्तः। पुनः खरादिष्वाद्युदात्तः पठितः॥ ६॥

तृतीये छन्दोमे वैश्वदेवशस्त्रे ते नो रत्नानि धत्तनेति द्वे ऋचावार्भव्यौ, तृतीयस्यागन्महेति खण्डे सूचितं, इन्द्र इधे दधातुनस्त्रेनो रत्नानि धत्तनेत्येका द्वे चेति, तयोराद्यां सूक्ते सप्तमीमृचमाह ते नो रत्नानीति। पूर्वास्वृक्षु ये प्रतिपादिता ऋभवस्ते यूयं सुशस्तिभिः शोभनैरस्मदीयशंसनैर्युक्ताः सन्तो नोऽस्माकं सम्बन्धिने सुन्वते सोमाभिषवं कुर्वते यजमानाय रत्नानि रमणीयानि सुवर्णमणिमुक्तादीनि एकमेकं क्रमेण प्रत्येकं धत्तन प्रयच्छत। सुवर्णादीनां मध्ये प्रतिद्रव्यं यावदपेक्षितं तावदिति विवक्षया एकमेकमित्युक्तं। कीदृशानि रत्नानि, त्रिरा त्रिवारमाहृत्तानि, उत्तमानि मध्यमान्यधमानि चेत्येवं रत्नानां त्रिराहृत्तिः। किञ्च साप्तानि सप्तसङ्ख्यकानि सप्तसङ्ख्या निष्पन्नवर्गरूपाणि कर्म्माणि च धत्तन सम्पादयत। कीदृशानि साप्तानि, त्रिरा त्रिवारमाहृत्तानि, अग्न्याधेयं दर्शपौर्णमास इत्यादीनां सप्तानां हविर्यज्ञानामेको वर्गः। औपासनहोमो वैश्वदेवमित्यादीनां सप्तानां पाकयज्ञानां वर्गो द्वितीयः *।

* श्रौतसूत्रव्याख्यायां औपासनहोमादीनां प्रथमवर्गत्वेन अग्न्याधेयादीनां द्वितीयवर्गत्वेन प्रतिपादनमस्तीति विशेषः।

१८१ अधारयन्त वह्नयोऽभजन्त सुकृत्यया १
भागं देवेषु यज्ञियं ॥ २ ॥

अग्निष्टोमोऽत्यग्निष्टोम इत्यादीनां सप्तानां सोमसंस्थानां वर्गस्तृतीयः। रत्नानि, रमुक्रीडायां, निदित्यनुवृत्तौ रमेस्तचेति नक्प्रत्ययः, तत्सन्नियोगेन मकारस्य तकारः, निच्त्वादाद्युदात्तः। धत्तन धत्त, तप्तनप्तनथनाश्च (पां ७। १। ४५।) इति तप्तब्दस्य तनादेशः। साप्तानि, सप्तानां वर्गः साप्तं, सप्तनोऽञ्छन्दसि (पां ५। १। ६१।) इति वर्गेऽञ्प्रत्ययः, नस्तद्धिते (पां ६। ४। १४४।) इति टिलोपः, ञित्वादादिर्ञ्णिद्वद्धिराद्युदात्तत्वञ्च, अत्र वर्गप्रवचनेन वर्गिणो लक्ष्यन्ते, तेन बहुवचनं, अन्यथा ह्येक एव वर्गस्त्रिरावृत्त इत्येकवचनमेव स्यात्। सुन्वते, शृतुद्रुनुमोनद्यजादी (पां ६। १। १७३।) इति विभक्तेरुदात्तत्वं। एकमेकं नित्यवीप्सयोः (पां ८। १। ४।) इति द्विर्भावः, एकशब्दः इणः क्वनन्तस्य निच्त्वादाद्युदात्तत्वं, द्वितीयस्यैकशब्दस्य, तस्य परमाम्रेडितं (पां ८। १। २।) इत्याम्रेडितसञ्ज्ञायां, अनुदात्तञ्च (पां ८। १। ३।) इत्यनुदात्तत्वं। सुशस्तिभिः, शस्यन्ते आभिरिति शस्त्य ऋचः शंसु स्तुतौ, करणे क्तिन् तस्य कित्त्वान्न लोपः, शोभनाः शस्त्य इति प्रादिसमासे यद्यपि क्तिनो निच्त्वादाद्युदात्तत्वे न क्वुत्तरपदप्रकृतिस्वरत्वेन तदेव प्राप्तं, तत्तु परेण, मन्क्तिन्व्याख्यान (पां ६। २। १५१।) इत्यादिना उत्तरपदान्तोदात्तत्वेन बाध्यते ॥ ७ ॥

अष्टमीमृचमाह अधारयन्तेति। वक्रयज्ञमसादिसाधननिष्पादनेन यज्ञस्य वोढार ऋभवोऽधारयन्त पूर्वं मनुष्यत्वेन मरणयोग्या अपि मृतत्वलाभेन प्राणान् धारितवन्तः। तथाच मन्त्रान्तरमाम्नायते मर्त्तासः सन्तोऽमृतत्वमानशुरिति। किञ्चते सुकृत्यया यज्ञसाधनद्रव्यसम्पादनरूपेण शोभनव्यापारेण देवेषु मध्ये स्थित्वा यज्ञियं यज्ञार्हं भागं हविर्लक्षणमभजन्त सेवितवन्तः, अयमर्थः सौधन्वना यज्ञियं भागमानशेत्यादिमन्त्रान्तरे विस्पष्टः, ब्राह्मणेऽप्यृभवो देवेषु तपसा सोममैयमधयजन्नित्याद्युपाख्यानं विस्पष्टं। वक्रयः, निदित्यनुवृत्तौ, वहिश्रीत्यादिना निः प्रत्यय औणादिकः, निच्त्वादाद्युदात्तः। अभजन्त, पादादित्वान्न निघातः। सुकृत्यया, विभाषा कृवृषोः (पां। ३। १। १२०।) इति कृञः कर्म्मणि क्यप्, शोभनं कृत्यमस्यां भजनक्रियायां

## एकविंशसूक्तं।

१११ इहेन्द्राग्नी उपह्वये तयोरित्स्तोममुश्मसि।
ता सोमं सोमपातमा॥

सा सुक्तया, बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वं बाधित्वा, नञ्सुभ्यां (पां ६।२।१७२।) इत्युत्तरपदान्तोदात्तत्वं। ननु क्त्वाप्रत्यये क्वपः पित्त्वेनानुदात्तत्वाद्धातुस्वरेणादिरुदात्तः, ततश्च, आद्युदात्तं द्व्यचछन्दसि (पां ६।२।११९।) इत्यनेनाद्युदात्तत्वेन भवितव्यं, तेन हि पुरस्तादपवादो न परमपि, नञ्सुभ्यामित्युत्तरपदान्तोदात्तत्वं बाधत इत्युक्तं, एवं तर्हि, क्त्वाः प्रच (पां ३।३।१००।) इति स्त्रियां भावे क्वप्प्रत्ययान्तः क्त्वाप्रत्ययशब्दः, क्वपः पित्त्वेऽपि व्यत्ययेनोदात्तत्वं, प्रादिसमासे क्त्वादुत्तरपदप्रकृतिस्वरत्वेन तदेव शिष्यते। भागं, कर्षात्वतोघञो (पां ६।१।१७९।) इत्यन्तोदात्तः। यज्ञियं, यज्ञमर्हतीत्यर्थे, यज्ञर्त्विग्भ्यां घखञौ (पां ५।१।७१।) इति घः, तस्य इयादेशः, प्रत्ययस्वरः॥ ८॥
इति प्रथमस्य द्वितीये द्वितीयो वर्गः॥ २॥

इहेन्द्राग्नीत्यादि षडृचं सूक्तं तस्य ऋषिछन्दसी पूर्ववत्, देवतानुक्रम्यते, इह षडैन्द्राग्नमिति, विनियोगस्तु अग्निष्टोमे आच्छावाकशस्त्रे इहेन्द्राग्नी उपह्वय इति सूक्तं, स्तोत्रमग्नेशस्त्रादिति खण्डे इहेन्द्राग्नी उपेयं वामस्य मन्मन इति नवेति सूचितत्वात्, तथाभिप्लवषडहे प्रातःसवने आच्छावाकशस्त्रे स्तोमातिशंसनार्थमेतदेव सूक्तं, तथा च सूचितं अभिप्लवषडहानीत्युपक्रम्य इहेन्द्राग्नी इन्द्राग्नी आगच्छतमिति, तस्मिन्सूक्ते प्रथमामृचमाह इहेन्द्राग्नी उपह्वय इति। इहास्मिन् कर्मणि इन्द्राग्नी देवावुपह्वये आह्वयामि, तयोरिन्द्राग्नयोरेव स्तोमं स्तोत्रमुश्मसि कामयामहे, सोमपातमा ता, अतिशयेन सोमं पातुं क्षमौ तौ द्वौ देवौ सोमं पिबतामिति शेषः। इन्द्राग्नी, अत्र देवताद्वन्द्वेऽपि पूर्वपदस्यानङ् न भवति, तत्र हि द्वन्द्व इत्यनुवृत्तौ, पुनर्द्वन्द्वग्रहणाल्लोकप्रसिद्धसाहचर्य्याणामेव द्वन्द्वे आनङित्युक्तं, तस्मादत्रावग्रहे ऋत इन्शब्दः, समासस्य (पां ६।१।२२३।) इत्यन्तोदात्तत्वं, देवताद्वन्द्वे च (पां ६।२।१४१।) इत्युभयपदप्रकृतिस्वरत्वं न भवति, अग्निशब्दस्यानुदात्तत्वेन, नोत्तरपदानुदात्तादौ (पां ६।२।१४२।)

१२१ ता यज्ञेषु प्रशंसतेन्द्राग्नी शुम्भता नरः १
ता गायत्रेषु गायत ॥
१३१ ता मित्रस्य प्रशस्तय इन्द्राग्नी ता हवामहे १
सोमपा सोमपीतये ॥
१४१ उग्रा सन्ता हवामह उपेदं सवनं सुतं १
इन्द्राग्नी एह गच्छतां ॥

इति प्रतिषेधात्। उम्भसि, वृञ् कान्तौ लटो मस्, इदन्तो मसिः (पां ७।१।४६।) इति इकारोपजनः, ऋदादित्वाच्छपो लुक्, मसेर्ङित्त्वात्, ग्रहिज्या वयि व्यधि (पां ६।१।१६।) इत्यादिना सम्प्रसारणं। ता सोमपातमा, उभयत्र सुपांसुलुक् पूर्वसवर्णा (पां ७।१।३९।) इत्यादिनाकारः ॥ १ ॥

द्वितीयामृचमाह ता यज्ञेष्विति। हे नरो मनुष्या ऋत्विजस्ता पूर्वोक्तौ ताविन्द्राग्नी यज्ञेषु अनुष्ठीयमानकर्मसु प्रशंसत प्रशस्तैः, तथा शुम्भत नानाविधैरलङ्कारैः शोभितौ कुरुत, तथा ता पूर्वोक्ताविन्द्राग्नी गायत्रेषु गायत्रीच्छन्दस्केषु मन्त्रेषु सामरूपेण गायत। ता, सुपांसुलुगित्याकारः। शुम्भत, अस्य संहितायां, अन्येषामपि दृश्यते (पां ६।३।१३७।) इति दीर्घः ॥ २ ॥

तृतीयामृचमाह ता मित्रस्येति। मित्रस्य स्नेहविषयस्य ममानुष्ठातुः प्रशस्तये ता पूर्वोक्तौ देवौ सम्पादयतामिति शेषः, यद्वा मित्रस्य मम सम्बन्धिनौ ताविन्द्राग्नी प्रशस्तये प्रशंसितुमिच्छाम इति शेषः, सोमपा-सोमपानत्तमौ, ता, पूर्वोक्ताविन्द्राग्नी, सोमपीतये सोमपानार्थं हवामहे आह्वयामः। प्रशस्तये, तुमर्थाच्च भाववचनात् (पां २।३।१५।) इति चतुर्थी, क्रादुत्तरपदप्रकृतिस्वरत्वं बाधित्वा, तादौचनितिकृत्यतौ (पां ६।२।५०।) इति गतेः प्रकृतिस्वरत्वं। सोमपीतये, सोमस्य पीतिर्यस्मिन् कर्मणि तस्मै, बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वं, सोमस्य पीतिरिति तत्पुरुषे वा दासीभारादित्वा दाक्षितगणत्वेन पूर्वपदप्रकृतिस्वरत्वं ॥ ३ ॥

चतुर्थीमृचमाह उग्रा सन्तेति। सुतमभिषवोपेतमिदमनुष्ठीयमानं सवनं प्रातः सवनादिरूपं कर्म उप सामीप्येन प्राप्तुं उग्रा सन्ता वैरि-

१५१ ता महान्ता सदस्पती इन्द्राग्नी रक्ष उब्जतं १
अप्रजाः सन्त्वत्रिणः ॥
१६१ तेन सत्येन जागृतमधि प्रचेतुने पदे १
इन्द्राग्नी शर्म्म यच्छतं ॥ ३ ॥

बधादिषु क्रूरौ सन्तौ देवौ हवामहे आह्वयामः, इन्द्राग्नी देवौ इह कर्म्मण्यागच्छतां। सन्ता, अस्तेः शतरि, अस्तेर्भूः ( पां ६ । ४ । १११ । ) इत्यल्लोपः। सवनं सुतमितिदयं सेमं नः स्तोममागच्छीत्यत्रोक्तं ॥ ४ ॥

पञ्चमीमृचमाह ता महान्तेति। ता तौ पूर्वोक्तावित्राग्नी युवां रक्षो राक्षसजातिं उब्जतं, ऋजुकुरुतं, क्रौर्य्यं परित्याजयतमित्यर्थः। कीदृशौ तौ, महान्ता महान्तौ गुणैरधिकौ। सदस्पती, सभापालकौ, तयोः प्रसादादत्रिणो भक्षका राक्षसा अप्रजा अनुत्पन्नाः सन्तु। महान्ता, सान्तमहतः संयोगस्य ( पां ६ । ४ । १० । ) इति दीर्घः। सदस्पती, समासे, षष्ठ्या लुकि, प्रातिपदिकसकारस्य रुत्वाभावश्छान्दसः, उभे वनस्पत्यादिषु युगपत् ( पां ६ । ३ । १४० । ) इत्युभयपदप्रकृतिस्वरत्वं। इन्द्राग्नी, आमन्त्रितस्यादुदात्तत्वं। अप्रजाः, प्रजायन्त इति प्रजाः, अन्येष्वपि दृश्यते ( पां ३ । २ । १०१ । ) इति जनेर्डः प्रत्ययः, न प्रजाः, अप्रजाः, अप्रजाशब्दस्य बहुव्रीहौ, नित्यमसिच्प्रजामेधयोः ( पां ५ । ४ । १२२ । ) इत्यसिजादेशः स्यात्, अव्ययपूर्वपदप्रकृतिस्वरः। अत्रिणः, दजन्तस्य अत्तृशब्दस्य जसश्छान्दस इत्यनुडागमः, चितः ( पां ६ । १ । १६३ । ) इत्यकार उदात्तस्तस्य यणादेशे, उदात्तयणो हल्पूर्वात् ( पां ६ । १ । १७४ । ) इति इकार उदात्तः ॥ ५ ॥

षष्ठीमृचमाह तेन सत्येनेति। हे इन्द्राग्नी, सत्येन अवश्यं फलदानादवितथेन तेनास्माभिरनुष्ठितेन कर्म्मणा प्रचेतुने प्रकर्षेण फलभोगज्ञापके पदे स्वर्गलोकादिस्थानेऽधिजागृतं आधिक्येन सावधानौ भवतं, ततोऽस्मभ्यं शर्म्म यच्छतं सुखं गृहं वा दत्तं, गयः क्षदरित्यादिषु द्वाविंशतिसङ्ख्यकेषु गृहनामसु शर्म्म वर्म्मेत्युक्तं। जागृतं, जागृ निद्राक्षये, अदिप्रभृतिभ्यः शपः ( पां २ । ४ । ७२ । ) इति शपो लुक्, तिङ्ङतिङः ( पां ८ । १ । २८ । ) इति निघातः। प्रचेतुने, चितीसंज्ञाने, इत्यस्मात्यन्तात् शकिसकन्नन्नं इति विहितत्वाद्धाञ्लकादौ-

## द्वाविंशसूक्तं।

१ १ १ प्रातर्युजा विबोधयाश्विनावेह गच्छतां १
अस्य सोमस्य पीतये ॥

णादिक उन्प्रत्ययः, समासे कृदुत्तरपदप्रकृतिस्वरत्वं । इन्द्राग्नी, इहेन्द्राग्नीत्यत्रोक्तं, आमन्त्रितत्वादाद्युदात्तत्वमत्र विशेषः। हिनस्ति दुःखमिति शर्म्म, शॄ हिंसायां, अन्येभ्योऽपि दृश्यन्ते (पां ३ । २ । ७५ ।) इति मनिन् प्रत्ययः, नित्त्वादाद्युदात्तत्वं। यच्छतं, इषुगमियमांछः ( पां ७। ३ । ७७ । ) इति छः ॥ ६ ॥ इति प्रथमस्य द्वितीये तृतीयो वर्गः ॥

प्रातर्युजेत्यादिकमेकविंशत्यृचं सूक्तं,तस्य ऋषिछन्दसी पूर्ववत्, देवताविशेषस्त्वनुक्रम्यते, प्रातर्युजा सैका चतस्र आश्विन्यस्तथा सावित्र्य आग्नेय्यौ द्वे देवीनामेकेन्द्राणी वरुणान्यग्नायीनां द्यावा पृथिव्ये पार्थिवी षड्वैष्णव्योऽतो देवादैवी वेति । सूक्तसङ्ख्यानुवर्त्तत इति, अस्मिन् खण्डे अनिरुक्तासङ्ख्या विंशतिरिति परिभाषितत्वात् प्रातर्युजेति सूक्ते सङ्ख्याविशेषस्यानिरुक्त्या विंशतिसङ्ख्या द्रष्टव्या, सा च विंशतिरेकयाधिकया सह वर्त्तत इति सैका, तत्रादौ चतस्र ऋचोऽश्विदेवताकाः, पञ्चमीमारभ्याष्टम्यन्ताश्चतस्रः सवितृदेवताकाः, नवमी दशमी च द्वे अग्निदेवताके, एकादश्या ऋचो देवसम्बन्धिन्य इन्द्रावरुणाग्निपत्न्यो देवता द्वादश्या अपि, त्रयोदशीचतुर्दश्यौ द्यावापृथिवीदेवताके, पञ्चदशी पृथिवीदेवताका, षोडशीमारभ्यैकविंशत्यन्ताः षड्विष्णुदेवताकाः, अतो देवा इत्येतस्याः षोडश्यास्तु कृत्स्ना देवता विष्णुर्वा विकल्पेन देवता। अत्र सूक्तविनियोगो लैङ्गिकः, प्रातरनुवाके आश्विने क्रतौ प्रातर्युजा विबोधयेति चतस्र ऋचः। सूत्रितञ्च अथाश्विनं षोडश, प्रातर्युजेति चतस्र इति। आश्विनग्रहस्य प्रातर्युजेत्येका पुरोऽनुवाक्या, द्विदैवत्यैश्चरन्तीतिखण्डे सूत्रितं, आश्विनस्य प्रातर्युजा विबोधयेति, तत्र प्रथमामृचमाह, प्रातर्युजा विबोधयेति। अत्र होताध्वर्य्युमुद्दिश्य ब्रूते, हे अध्वर्य्यो, प्रातर्युजा प्रातःसवनग्रहेण संयुक्तावश्विनौ देवौ विबोधय विशेषेण प्रबुद्धौ कुरु, अश्विनौ प्रबुद्धौ तावश्विनौ देवौ च अस्याभिषवसंस्कारयुक्तस्य सोमस्य पीतये सोमपानाय इह कर्म्मण्यागच्छतां। प्रातर्युञ्जाते गृह्यमाणेन ग्रहेण सहेति प्रातर्युजा, सत्सू-

१२१ या सुरथा रथीतमोभा देवा दिविस्पृशा १
अश्विना ता हवामहे ॥
१३१ या वां कशा मधुमत्यश्विना सूनृतावती १
तया यज्ञं मिमिक्षतं ॥

दिषद्गुहदुहयुज (पां ३।२।६१।) इत्यादिना क्विप्, सुपांसुलुक् (पां ७।१।३९।) इत्यादिना आकारः, क्षदुत्तरपदप्रकृतिस्वरत्वं। अस्य, ऊडिदम्पदाद्यप्पुम्रैद्युभ्यः (पां ६।१।१७१।) इत्यादिना विभक्तेरुदात्तत्वं। पीतये, व्यत्ययेन क्विन उदात्तत्वं ॥ १'॥

द्वितीयामृचमाह या सुरथेति। या उभा अश्विना देवा, यावुभावश्विनौ देवौ सुरथा शोभनरथयुक्तौ रथीतमा अतिशयेन रथिनौ, दिविस्पृशा द्युलोकनिवासिनौ ता हवामहे तादृशावश्विनावाह्वयामः। येत्यादिष्वष्टसु पदेषु, सुपांसुलुक् (पां ७।१।३९।) इत्यादिना द्विवचनस्याकारः। सुरथा, शोभनो रथो ययोस्तौ सुरथौ, समासान्तोदात्तत्वापवादं बहुव्रीहौ पूर्वपदप्रकृतिस्वरं बाधित्वा, नञ्सुभ्यां (पां ६।२।१७२।) इत्युत्तरपदान्तोदात्तत्वे प्राप्ते, आद्युदात्तं द्यच्छन्दसि (पां ६।२।११९।) इत्युत्तरपदाद्युदात्तत्वं। रथीतमा, अन्येषामपि दृश्यते (पां ६।३।१३७।) इति संहितायामिकारस्य दीर्घत्वं। दिविस्पृशा, दिविस्पृशतः इति दिविस्पृशौ, क्विप् च (पां ३।२।७६।) इति क्विप्, तत्पुरुषे कृति बहुलं (पां ६।३।१४।) इत्यलुक्, गतिकारकोपपदात्कृत् (पां ६।२।१३९।) इति क्षदुत्तरपदप्रकृतिस्वरत्वं ॥ २ ॥

तृतीयामृचमाह या वां कशेति। अश्विना हे अश्विनौ देवौ, वां युवयोः सम्बन्धिनी या कशा अश्वताडनी विद्यते, तया सह आगत्य यज्ञमस्मदीयं मिमिक्षतं सोमरसेन सेक्तुमिच्छन्तौ कशयाश्वं दृढं ताडयित्वा सहसा समागत्य भवद्विषयां सोमरसाहुतिं निष्पादयितुमुद्युक्तौ भवतमित्यर्थः। कीदृशी कशा, मधुमती, अर्शः क्षोद इत्यादिषु एकशतसङ्ख्येषूदकनामसु मधु पुरीषमिति पाठितं, तस्मादुदकवतीत्युक्तं भवति, अश्वस्य शीघ्रगत्या यत्स्वेदोदकं स्रवति तेनेयं कशा क्लिन्नेत्यर्थः। पुनः कीदृशी सूनृतावती, प्रियसत्यवाग्युक्ता, तीव्रेण कशाघातेन

१४१ न हि वामस्ति दूरके यत्रा रथेन गच्छथः १
अश्विना सोमिनो गृहं ॥
१५१ हिरण्यपाणिमूतये सवितारमुपह्वये १
स चेता देवता पदं ॥ ४ ॥

यो ध्वनि र्निष्पद्यते ताडनवेलायामस्यारूढस्य च य आक्रोशः क्रियते तदुभयं शीघ्रमागमनहेतुत्वेन यजमानस्य प्रियं, यदा श्लोकाधारेत्यादिषु सप्तपञ्चाशद्दाङ्गामसु कक्षा धिषणेति पठितं, अश्विनोर्या वाक् मधुमती माधुर्य्येण पारुष्यरहिता, सूनृतावती प्रियत्वसत्यत्वोपेता फलप्रदानविषयेत्यर्थः, तया वाचायुक्ष्वौ, यज्ञं मिमिक्षतमिति योजनीयं। कक्षा, कक्ष गतिशासनयोः, पचाद्यच्, दृषादित्वादाकृतिगणत्वेनाद्युदात्तः। सूनृतावती, ऊनपरिहाणे, सुष्ठु ऊनयत्यप्रियमिति सून्, तथाविधमृतं सत्यं यस्यां वाचि सा सूनृता, नञ्सुभ्यां (पां ६। २। १७२।) इत्युत्तरपदान्तोदात्तत्वं बाधित्वा, परादिश्छन्दसि बहुलं (पां ६। २। १९९।) इत्युकार उदात्तः, सा यस्या अस्ति सा सूनृतावतीति कक्षायाः सञ्ज्ञा, एवंनामा या कक्षेत्यर्थः, सञ्ज्ञायां (पां ८। २। ११।) इति मतुपो वत्वं। मिमिक्षतं, सेचनार्थान्मिहेः सन्, हलन्ताच्च (पां १। २। १०।) इति कित्त्वादुणाभावः, ढत्वकत्वषत्वानि ॥ ३ ॥

चतुर्थीमृचमाह नहि वामिति। अश्विना हे अश्विदेवौ, युवां सोमिनः सोमवतो यजमानस्य गृहम्प्रति रथेन गच्छथः, स मार्गो वां युवयोर्दूरके दूरदेशे न ह्यस्ति न वर्त्तते, यदा यत्र गृहे गच्छथस्तच्च गृहं दूरे न भवति। न हि, एवमादीनामन्त इति फिट्सूत्रेणान्तोदात्तः। अस्ति, चादिलोपे विभाषा (पां ८। १। ६३।) इति निघाताभावः, अत्र हि गृहं दूरे च नास्ति, युवाञ्च रथेन गच्छथ इति समुच्चयार्थश्चार्थो गम्यते, चशब्दो न प्रयुज्यत इति चलोपे प्रथमा तिङ्विभक्तिरस्तीति। यत्र, निपातस्य च (पां ६। ३। १३६।) इति संहितायां दीर्घत्वं। गच्छथः, इयं यद्यपि न प्रथमा, तथापि यत्रेति यद्वृत्तयोगान्निघाताभावः ॥ ४ ॥

व्यूढस्य द्वितीये छन्दोमे वैश्वदेवशस्त्रे हिरण्यपाणिमूतय इति सावित्र्यृतस्तः, द्वितीयस्येति खण्डे सूचितं हिरण्यपाणिमूतय इति चतस्रो

१६१ अपां न पातमवसे सवितारमुपस्तुहि १
तस्य व्रतान्युश्मसि ॥

महीद्यौः पृथिवीचनइति तत्र प्रथमां सूक्ते पञ्चमीमृचमाह हिरण्य-पाणिमूतय इति। ऊतयेऽस्मद्रक्षार्थं सवितारं देवमुपह्वये आह्वयामि, स च सविता देव एतन्मन्त्रप्रतिपाद्यदेवता भूत्वा पदं यजमानेन प्राप्यं स्थानं चेत्ता ज्ञापयिता भवति। कीदृशं सवितारं, हिरण्यपाणिं यजमानाय दातुं हस्ते सुवर्णधारिणं, यद्वा देवकर्तृके यागे सविता स्वयमृत्विग्भूत्वा ब्रह्मत्वेनावस्थितस्तदानीं कस्याञ्चिदिष्टावध्वर्य्यवस्तस्मै सवित्रे ब्रह्मणे प्राशित्रनामकं पुरोडाशभागं दत्तवन्तः, तच्च प्राशित्रं हस्ते सवित्रा गृहीतं सत् तदीयं पाणिं चिच्छेद, अतः प्राशित्र दातारोऽध्वर्य्यवः सुवर्णमयं पाणिं निर्म्माय प्रक्षिप्तवन्तः। सोऽयमर्थः कौषीतकिब्राह्मणे समाम्नातः, सवित्रे प्राशित्रं प्रतिजह्रुस्ततस्तत्पाणी प्रचिच्छेद, तस्मै हिरण्यमयौ दधुः, तस्माद्धिरण्यपाणिरिति। हिरण्यशब्दं पाणिशब्दञ्च यास्क एवं निर्वक्ति, हिरण्यं कस्माद्ध्रीयत आयम्यमानमिति वा ह्रीयते जनाज्जनमिति वा, हितरमणं भवतीति वा, हृदयरमणम्भवतीति वा, हर्य्यतेर्वा स्यात् प्रेप्साकर्म्मण इति, तथा पाणिः पणायतेः पूजाकर्म्मण इति। हिरण्यशब्दो नब्विषयस्यानिसन्तस्येति फिट्सूत्रेणाद्युदात्तः, बहुव्रीहौ पूर्वपदप्रकृतिस्वरः। ऊतये, उदात्त-इत्यनुवृत्तौ, ऊति यूति जूति साति हेति कीर्त्तयश्च (पां ३। ३। ९७।) इति क्तिन्नुदात्तो निपातितः। सवितारं, तृच्, तृचश्चित्त्वा-दन्तोदात्तत्वं। चेत्ता, चिती सञ्ज्ञाने, अस्मादन्तर्भावितण्यर्थात्ताच्छील्ये तृन्, अनित्यमागमशासनमिति इडभावः, नित्त्वादाद्युदात्तः। देवता, देवात्तल् (पां ५। ४। २७।) इति स्वार्थे तल्, लिति (पां ६। १। १९३।) इति प्रत्ययात्पूर्वमुदात्तत्वं। पदशब्दः पचाद्यजन्तः, चितः (पां ६। १। १६३।) इत्यन्तोदात्तः ॥ ५ ॥ इति प्रथमस्य द्वितीये चतुर्थो वर्गः ॥ ४ ॥

सूक्ते षष्ठीमृचमाह अपां न पातमिति। अत्र होता सामगमृत्वि-जमन्यं वा शस्त्रिणं ब्रूते, अवसेऽस्मान्रक्षितुं सवितारमुपस्तुहि, तस्य सवितुः सम्बन्धीनि कर्म्माणि सोमयागादिरूपाणि उश्मसि कामयामहे। कीदृशं सवितारं, अपां न पातं जलस्य न पालकं सन्तापेन शोष-

१७१ विभक्तारं हवामहे वसोश्चित्रस्य राधसः।
सवितारं नृचक्षसं॥

कमित्यर्थः। अपां, ऊडिदं (पां ६।१।१७१) इत्यादिना विभक्तेरुदात्तत्वं। न पातं, पा रक्षणे, अयं शत्रन्तः पाच्छब्दः, तस्य नञसमासे, नभ्राण्नपात् (पां ६।३।७५।) इत्यादिना नलोपप्रतिषेध इति वृत्तिकारः, अग्निर्हि अपो न पाति तच्छोषकत्वात्, तर्हि कथमपामिति षष्ठी, नलोकाव्ययनिष्ठाखलर्थतृनां (पां २।३।६९।) इति कर्म्मणि षष्ठ्याः प्रतिषेधादिति चेत्, तर्हि एषा शेषलक्षणास्तु, अग्न्यादित्यौ अपां कारणतया सम्बन्धिनौ, अग्नेराप इति श्रुतेः, आदित्याज्जायते वृष्टिरिति स्मृतेश्च, अस्मिन् पक्षे उगिदचामिति नुमभावोऽपि निपातनादेवेति मन्तव्यं। पातेः क्विबन्तस्य तुग्वा निपातनाद्द्रष्टव्यः। अथवा न पातयतीति नपात्, पत्लृ गताविति धातोर्ण्यन्तात् क्विप्, अग्न्यादित्यौ ह्यपां न प्रापकौ, प्रत्युत तच्छोषकौ, अव्ययपूर्वपदप्रकृतिस्वरत्वं। अवसे, तुमर्थे सेसेनसेऽसेन् (पां ३।३।९।) इत्यादिना असेन् प्रत्ययः, नित्त्वादाद्युदात्तः। उश्मसि, वश कान्तौ, अदिप्रभृतिभ्यः शपः (पां २।४।७२।) इति शपो लुक्, इदन्तो मसिः (पां ७।१।४९।) इति इकारोपजनः॥ ६॥

सप्तमीमृचमाह विभक्तारमिति। वसोर्निवासहेतोश्चित्रस्य सुवर्णरजतादिरूपेण बहुविधस्य राधस्य धनस्य विभक्तारं अस्य यजमानस्यैतावद्धनदानमुचितमिति विभागकारिणं, नृचक्षसं मनुष्याणां प्रकाशकारिणं सवितारं हवामहे आह्वयामः। कौषीतकिन एतस्या ऋचो व्याख्यानरूपे ब्राह्मणे सवितुर्विभागहेतुत्वमेवमामनन्ति, तदेतद्वसु चित्रं राधस्तदेष सविता विभक्ताभ्यः प्रजाभ्यो विभजतीति। विभक्तारं, तृच्, तृचश्चित्त्वादन्तोदात्तत्वं, कृदुत्तरप्रकृतिस्वरत्वेन तदेव शिष्यते। हवामहे, ह्वयतेर्बहुलं छन्दसीति सम्प्रसारणं। वसोः, वस निवासे, शृस्वृस्निहित्रप्यसिवसिहनीत्यादिना उः प्रत्यय औणादिकः, निदित्यनुवृत्तेर्नित्त्वादाद्युदात्तः। राधसः, राध साध संसिद्धौ, सर्वधातुभ्योऽसुन्नित्यसुन् प्रत्यय औणादिकः, नित्त्वादाद्युदात्तः। नृचक्षसं, नॄंश्चष्ट इति नृचक्षाः, चक्षेर्बहुलं शिच्चेत्यसुन्, शित्त्वादार्द्धधातुकत्वेन ख्याञादेशाभावः, कृदुत्तरपदप्रकृतिस्वरत्वं॥ ७॥

१८१ सखाय आनिषीदत सविता स्तोम्यो नु नः १
दाता राधांसि शुम्भति ॥
१९१ अग्ने पत्नीरिहावह देवानामुशतीरुप १
त्वष्टारं सोमपीतये ॥

अष्टमीमृचमाह सखाय इति। सखिभूता हे ऋत्विजः, आनिषीदत सर्वतोपविशत, नोऽस्माकमयं सविता नु क्षिप्रं स्तोम्यः स्तुतियोग्यः, राधांसि धनानि दाता प्रदातुमुद्युक्तः, स एष सविता शुम्भति शोभते। समानाः सन्तः ख्यान्ति प्रकाशन्त इति सखायः, ख्या प्रकथने, समाने ख्येखोदात्त इति इण् प्रत्यय औणादिकः, तत्सन्नियोगेन डित्त्वं, यलोपश्च, डित्त्वादाकारलोपः, समानस्य छन्दसि (पां ६। ३। ८४।) इत्यादिना समानस्य सादेशः, इण्सन्नियोगेनोदात्तत्वं, जसि, सख्युरसम्बुद्धौ (पां७। १। ९२।) इति णित्त्वाद्वृद्धिरायादेशश्च। निषीदत, सदिरप्रतेः (पां ८। ३। ६६।) इति षत्वं। स्तोमेषु प्रतिपाद्यत्वेन स्तोमे भवः स्तोम्यः, भवे छन्दसि (पां ४। ४। ११०।) इति यत्, यतोऽनावः (पां ६। १। २१३।) इत्याद्युदात्तत्वं। दाता, दानशीलः, ताच्छील्ये तृन्, नित्त्वादाद्युदात्तः। राधांसि गतं, कर्टकर्म्मणोः कृति (पां २। ३। ६५।) इति प्राप्तायाः षष्ठ्याः, नलोकाव्ययनिष्ठा (पां २। ३। ६९।) इति प्रतिषेधः ॥ ८ ॥

अग्निष्टोमे प्रातःसवने अग्ने पत्नीरिहावहेति नेष्टुः प्रस्थितयाज्या, प्रशास्ता ब्राह्मणाच्छंसीति खण्डे सूचितं, अग्ने पत्नीरिहावहोक्तान्नाय. वशान्नायेति, तामेतां नवमीमृचमाह अग्नेपत्नीरिति। हे अग्ने, उशतीः कामयमाना देवानां पत्नीः इन्द्राण्याद्या इह देवयजनदेशे आवह, तथा त्वष्टारं सोमपीतये सोमपानार्थं उप समीपे आवह। पत्नीः, ऊत्यन्तः पतिशब्द आद्युदात्तः, पत्युर्नोयज्ञसंयोगे (पां ४। १। ३३।) इति ङीप्, तत्सन्नियोगेन नकारश्च, ङीपः णित्त्वाद्धातुस्वर एव। उशतीः, वश कान्तौ, लटः शतृ, अदिप्रभृतिभ्यः शपः (पां २। ४। ७२।) इति शपो लुक्, शतुर्ङित्त्वात्, ग्रहिज्यावयिव्यधि (पां ६। १। १६।) इति सम्प्रसारणं, उगितश्च (पां ४। १। ६।) इति ङीप्, शतुरनुमो-नद्यजादी (पां ६। ४। १७३।) इति ङीप् उदात्तः ॥ ९ ॥

११०१ आ ग्ना अग्न इहावसे होत्रां यविष्ठ भारतीं ।
वरूत्रीं धिषणां वह ॥ ५ ॥
१११ १ अभि नो देवीरवसा महः शर्म्मणा नृपत्नीः ।
अच्छिन्नपत्राः सचन्तां ॥

दशमीमृचमाह आ ग्ना अग्न इति । हे अग्ने, अवसेऽस्मानवितुं ग्ना देवपत्नीरिहावह, तथा हे यविष्ठ युवतमाग्ने, होत्रां होमनिष्पादिकामिपत्नीं, भारतीं भरतनामकस्यादित्यस्य पत्नीं, वरूत्रीं वरणीयां धिषणां वाग्देवताञ्चावह । वाग्वै धिषणेति वाजसनेयकं। भरत आदित्य इति यास्केनोक्तत्वात्तस्य पत्नी भारतीत्युच्यते । गमन्त इति ग्नाः, गम्लृ ख्लृ गतौ, औणादिको ड्न प्रत्ययः, डित्त्वाट्टिलोपः, प्रत्ययस्वरः। होत्रां, ऊ या मा श्रु भसिभ्यस्त्रिति चन्नन्तो नित्त्वादाद्युदात्तः। अतिशयेन युवा यविष्ठः, अतिशायने तमबिष्ठनौ ( पां ५ । ३ । ५५ । ) इति इष्ठन्प्रत्ययः, स्थूलदूर ( पां ६ । ४ । १७३ । ) इत्यादिना यणादिपरस्य लोपः, पूर्वस्य च गुणः । भारतीं, ष्णार्ङरवादराकृतिगणत्वात्, ष्णार्ङरवाद्यञो ङीन् ( पां ४ । १ । ७३ । ) इति ङीन्, ङीनो नित्त्वादाद्युदात्तः। वरूत्रीं, ग्रसित स्कभित ( पां ७ । २ । ३४ । ) इत्यादौ वरूटशब्दस्तृजन्त इत्युक्तं, तथाप्यन्ते इतिकरणस्य प्रदर्शनार्थत्वादवरूटशब्दस्तृन्नन्तोऽपि द्रष्टव्यस्तेन नित्त्वादाद्युदात्तत्वं, ग्रहेर्निघातेन ऋकारस्यानुदात्तत्वात्, उदात्तयणो हल्पूर्वात् ( पां ६ । १ । १७४ । ) इत्यनेनापि न ङीप उदात्तत्वं ॥ १० ॥ इति प्रथमस्य द्वितीये पञ्चमो वर्गः ॥ ५ ॥

सूक्ते एकादशीमृचमाह अभि नो देवीरिति । देवीर्देव्यो देवपत्न्यः, अवसा रक्षणेन, महो महता शर्म्मणा च सुखेन च, नोऽस्मानभिसचन्तां आभिमुख्येन सेवन्तां । कीदृश्यो देव्यः, नृपत्नीर्मनुष्याणां पालयित्र्यः । अच्छिन्नपत्रा अच्छिन्नपक्षाः, न हि पक्षिरूपाणां देवपत्नीनां पक्षाः केन क्रियन्ते । देवीः, पुंयोगाख्यायां ( पां ४ । १ । ४८ । ) इति ङीषन्तः, प्रत्ययस्वरेणान्तोदात्तः, दीर्घाज्जसि च ( पां ६ । १ । १०५ । ) इति प्रतिषेधस्य, वा छन्दसि ( पां ६ । १ । १०६ । ) इति पाक्षिकस्योक्तेः पूर्वसवर्णदीर्घत्वं। अवसा, अव रक्षणे, असुन्, नित्त्वादाद्युदात्तः । महः, मह पूजायां, क्विप्, सुपां सुपो भवन्तीति तृतीयैक-

।१२। इहेन्द्राणीमुपह्वये वरुणानीं स्वस्तये ।
अग्नायीं सोमपीतये ॥
।१३। मही द्यौः पृथिवी च न इमं यज्ञं मिमिक्षतां ।
पिपृतां नो भरीमभिः ॥

वचनस्य ङसादेशः, सावेकाचः ( पां ६ । १ । १६८ । ) इति विभक्तेरुदात्तत्वं । नृपत्नीः, समासान्तोदात्तत्वे प्राप्ते, परादिश्छन्दसि बहुलं ( पां ६ । २ । १६६ । ) इत्युत्तरपदाद्युदात्तत्वं । अच्छिन्नपत्राः, न छिन्नानि अच्छिन्नानि, अव्ययपूर्वपदप्रकृतिस्वरत्वं, अच्छिन्नानि पत्राणि यासान्ता बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वं ॥ ११ ॥

द्वादशीमृचमाह इहेन्द्राणीमिति । इहास्मिन् कर्म्मणि स्वस्तये अस्माकमविनाशाय, सोमपीतये सोमपानाय च इन्द्रवरुणाग्नीनां पत्नीराह्वयामि । इन्द्राणीं, वरुणानीं, इन्द्रवरुणभवशर्ववरुद्रमृड ( पां ४ । १ । ४६ । ) इत्यादिना पुंयोगे ङीप्प्रत्ययः, आनुगागमश्च, प्रत्ययस्वरः । अग्नायीं, वृषाकप्यग्निकुसितकुसिदानामुदात्तः ( पां ४ । १ । ३७ । ) इति ङीप्, तत्सन्नियोगेनैकारस्यैकार उदात्तः । सोमपीतये, असङ्गतपूर्वोक्तं ॥ १२ ॥

द्वितीये छन्दोमे वैश्वदेवशस्त्रे मही द्यौः पृथिवी च न इति द्यावापृथिव्यानि हविर्द्धानीयस्तृचः, द्वितीयस्यामिं व इति खण्डे सूचितं, मही द्यौः पृथिवी च नो युवाना पितरा पुनरिति, आग्नयणेष्टौ मही द्यौरित्येषा द्यावा पृथिवैककपालस्यानुवाक्या, आग्नयणं व्रीहिश्यामाकेतिखण्डे सूचितं, ये के च जामहिनो अहिमायां मही द्यौः पृथिवी च न इति, अभिमन्थनेऽप्येषा विनियुक्ता । प्रातर्वैश्वदेव्यमितिखण्डे सूचितं, अभित्वादेवसवितर्मही द्यौः पृथिवी च न इति, विध्यन्दमानं सान्नाय्यमनयैवाहवनीयदेशे निनयेत्, विध्यपराध इति खण्डे तथैव सूचितं, विध्यन्दमानं मही द्यौः पृथिवी च न इति, अन्तः परिधिदेशे निनयेयुरिति, आश्विनशस्त्रेऽप्येषा, संश्रितेष्वाश्विनाविति खण्डे सूचितं, मही द्यौः पृथिवी च न स्तेहि द्यावापृथिवी विश्वशम्भुवेति, तामेतां सूक्ते त्रयोदशीमृचमाह मही द्यौरिति । मही महती द्यौर्द्युलोकदेवता, पृथिवी भूमिदेवता च, नोऽस्मदीयमिमं यज्ञं मिमिक्षतां, स्वकीयसार-

११४१ तयोरिद्धृतवत्पयो विप्रा रिहन्ति धीतिभिः १
गन्धर्वस्य ध्रुवे पदे १
११५१ स्योना पृथिवि भवानृक्षरा निवेशनी १
यच्छा नः शर्म्म सप्रथः ॥ ६ ॥

भूतेन रसेन मिमिक्षतां सेक्तुमिच्छतां, तथा भरीमभिर्भरणैः पोषणैर्नोऽस्मान् पिपृतामुभे द्यावा पृथिवी पूरयतां। मही, महच्छब्दात्, उगितश्च (पां ४। १। ६।) इति ङीप्, अच्छन्दसोपश्छान्दसः, वृन्महतो-रुपसङ्ख्यानमिति वार्त्तिकेन ङीप उदात्तत्वं। द्यौः, दिव्शब्दः प्रातिपदिकस्वरेणान्तोदात्तः, गोतो णित् (पां ७। १। ९०।) इति ततः परस्य सोर्णिद्भावाद्भवन्ती वृद्धिरपि स्थानिवद्भावेनोदात्ता। पृथिवी, प्रथ प्रख्याने, प्रथेः षिवन् सम्प्रसारणञ्चेत्यौणादिसूत्रेण षिवन्प्रत्ययः, षिद्गौरादिभ्यश्च (पां ४। १। ४१।) इति ङीष्, प्रत्ययस्वरः। मिमिक्षतां, मिह सेचने, सनि, दिर्भावहलादिशेषौ, ढलकत्वषत्वानि। पिपृतां, पॄ पालनपूरणयोः, पॄ इत्येके, शपः श्लुः, अर्त्तिपिपर्त्योश्च (पां ७। ४। ७७।) इत्यभ्यासाकारस्य इकारः, तिङ्प्रत्ययस्वरः। भरीमभिः, डुभृञ् धारणपोषणयोः, हृभृहृसृस्तृभ्य इम्निन् इत्यौणादिक इमनिन्प्रत्ययः, नित्त्वादाद्युदात्तः ॥ १३ ॥

चतुर्दशीमृचमाह तयोरिदिति। गन्धर्वस्य ध्रुवं पदमन्तरिक्षं, तथाच तापनीयशाखायां समाम्नायते, यद्गन्धर्वाप्सरोगणसेवितमन्तरिक्षमिति, तेनान्तरिक्षेणोपलक्षित आकाशे वर्त्तमानयोस्तयोरित् द्यावा-पृथिव्योरेव सम्बन्धि पयो जलं घृतवद्घृतसदृशं विप्रा मेधाविनः प्राणिनो धीतिभिः कर्म्मभिः, रिहन्ति लिहन्ति, यद्वा घृतवद्घृतं सारं तेनोपेतं। रिहन्ति, लिहेर्व्यत्ययेन रेफः। गन्धर्वस्य, धृञ् धारणे, गविधृजो व इत्यौणादिको व प्रत्ययः, तत्सन्नियोगेन गोशब्दस्य च गमादेशः ॥ १४ ॥

स्योना पृथिवीत्येषा महानाम्नीव्रते भूमिस्पर्शने विनियुक्ता, एतद्दिदं ब्रह्मचारिणमितिखण्डे सूचितं, स्योना पृथिवि भवेति समाप्येति स्नात्वेति हेमन्तप्रत्यवरोहणेऽप्येषा जप्या, मार्गशीर्षप्रत्यवरोहमितिखण्डे सूचितं, तस्मिन्नुपविश्य स्योना पृथिवि भवेति जपित्वेति, तामेतां सूक्तीं पञ्चदशीमृचमाह स्योना पृथिवीति। हे पृथिवि स्योनत्वादिगुण-

१ १६१ अतो देवा अवन्तु नो यतो विष्णुर्विचक्रमे १
पृथिव्याः सप्तधामभिः ॥

युक्ता भव, स्योनशब्दो विस्तीर्णवाची, तथा वाजसनेयब्राह्मणे स्योनशब्दोपेतं कञ्चिन्मन्त्रमुदाहृत्य व्याख्यातं, इन्द्रस्योरुमाविशस्योनमिति विस्तीर्णमित्येव तदाहेति । यद्वा स्योनशब्दः सुखवाची । तथाच यास्कवाक्यमुदाहरिष्यते । अनृक्षरा कण्टकरहिता, निवेशनी निवासस्थानभूता, सप्रथो विस्तारभूतं शर्म्म शरणं नोऽस्मभ्यं यच्छ, हे पृथिवि देहि, तामेतामृचमुदाहृत्य यास्क एवं व्याचष्टे, सुखानः पृथिवि भवानृक्षरा निवेशं ऋक्षरः कण्टकः ऋष्यतेः कण्टकः कन्तपो वा कृन्ततेर्वा कङ्कतेर्वास्याद्गतिकर्म्मण उद्गततरो भवति, यच्छ नः शर्म्मशरणं सर्वतः पृथ्वि इति । स्योना, षिवु तन्तुसन्ताने, सिवेष्टेर्य्योचेति नप्रत्यय औणादिकः, टेश्च यो इत्यादेशः, प्रत्ययस्वरः, स्योना पृथिवीत्यनयोर्भवेत्याख्यातेनैवान्वयो न परस्परं, अतोऽसामर्थ्येनैव पराङ्गवद्भावादोकारस्य नामन्त्रिताद्युदात्तत्वं । अनृक्षरा, ऋष गतौ, गच्छत्यन्तरित्यृक्षरः कण्टकः, तन्यृषिभ्यां क्सरन्निति क्सरन् प्रत्यय औणादिकः, षढोः कस्सि ( पां ८ । २ । ४१ । ) इति कत्वं, आदेशप्रत्यययोः ( पां ८ । ३ । ५९ ) इति षत्वं, नञा बहुव्रीहिः, तस्मान्नुडचि (पां ६ । ३ । ७४ ।) इति नुडागमः, नञ्सुभ्यां ( पां ६ । २ । १७२ ।) इत्युत्तरपदान्तोदात्तत्वं । निविशन्त्यस्यामिति निवेशनी, करणाधिकरणयाश्च ( पां ३ । ३ । ११७ ।) इति ल्युट्, लिति ( पां ६ । १ । १९३ ।) इति प्रत्ययात् पूर्वोदात्तत्वं । यच्छ, दाण् दाने, पाघ्राध्मास्थाम्नादाण् ( पां ७ । ३ । ७८ । ) इत्यादिना यच्छादेशः, द्व्यचोऽतस्तिङः ( पां ६ । ३ । १३५ । ) इति दीर्घः । सप्रथः, प्रथ प्रख्याने, असुन्, प्रथसा सह वर्त्तत इति, तेन सहेतितुल्ययोगे ( पा २ । २ । २८ । ) इति तृतीयासमासः, वोपसर्जनस्य (पां ६ । ३ । ८२ । ) इति सभावः, कृत्स्वरः ॥ १५ ॥ इति प्रथमस्य द्वितीये षष्ठो वर्गः ॥ ६ ॥

प्रातः सवने सोमातिरेके एकं शंसनीयं, तत्र अतो देवा इत्याद्याः षडृचः, सोमातिरेक इति खण्डे सूत्रितं, महाँ इन्द्रो य ओजसा अतो देवा अवन्तु न इत्यैन्द्रीभिर्वैष्णवीभिश्चेति, अप्तोर्यामेऽच्छावाकातिरिक्तोक्थेऽपि एताः षडृचस्तोत्रियानुरूपार्थाः, तथाच यस्य पशव इति

१ १७ १ इदं विष्णुर्विचक्रमे त्रेधा निदधे पदं १
समूल्हमस्य पांसुरे ॥

खण्डे सूचितं, अतो देवा अवन्तु न इति स्रोत्रियानुरूपाविति, दर्शपूर्णमासयोः प्रायश्चित्तहोमेष्वाद्ये विनियुक्तो, तथैव वेदं पन्या इति खण्डे सूचितं, अतो देवा अवन्तु न इति द्वाभ्यां व्याहृतिभ्यश्चेति, याज्यानुवाक्ययोर्मध्ये लौकिकभाषणे अतो देवा अवन्तु न इत्येषा जप्या, सूच्यते हि, आपद्यतो देवा अवन्तु न इति जपेदिति, तामेतां सूक्ते षोडशीमृचमाह अतो देवा इति । विष्णुः परमेश्वरः सप्तधामभिः सप्तभिर्गायत्र्यादिभिश्छन्दोभिः साधनभूतैर्यतः पृथिव्या यस्माद्भूप्रदेशादिचक्रमे विविधं पादक्रमणं कृतवान्, अतोऽस्मात् पृथिवीदेशान्नोऽस्मान् देवा अवन्तु । विष्णोः पृथिव्यादिलोकेषु छन्दोभिः साधनैर्जयं तैत्तिरीया आमनन्ति, विष्णुमुखा वै देवाश्छन्दोभिरिमां लोकाननयजय्यमभ्यजयन्निति, विष्णोस्त्रिविक्रमावतारे पादत्रयक्रमणस्य पृथिव्यादानं पृथिवीप्रदेशाद्रक्षणं नाम भूलोकवर्त्तमानानां पापनिवारणं। अतः, एतच्छब्दात्, पञ्चम्यास्तसिल् ( पां ५ । २ । ७ । ) इति तसिल्, एतदाऽश् ( पां ५ । ३ । ५ । ) इत्यशादेशः, लित्स्वरेणाकार उदात्तः । यतः, तसिलादिप्रत्ययो विभक्तिः ( पां ५ । ३ । १ । ) इति विभक्तिसञ्ज्ञायां, त्यदादीनामः (पां ७ । २ । १०२ । ) इत्यत्वं, लित्स्वरः। विष्णुः, विषेः किच्चेति औणादिको नु प्रत्ययः, कित्त्वान्न गुणः, निदित्यनुवृत्तेराद्युदात्तत्वं, विचक्रमे, सह सुपा ( पां २ । १ । ४ । ) इति योगविभागाद्विशब्दस्य समासः, समासान्तोदात्तत्वं, यदुक्तान्नित्यं ( पां ८ । १ । ६६ । ) इति यदुक्तयोगान्ननिघातः । सप्त, सुपां सुलुक् ( पां ७ । १ । ३९ । ) इति भिसो लुक् । धामभिः, दधातेः, आतो मनिन् ( पां ३ । २ । ७४ । ) इति मनिन्प्रत्ययः, नित्स्वरः ॥ १६ ॥

वैष्णवोपांशुयागस्य इदं विष्णुरित्यनुवाक्या, उक्ता देवता इति खण्डे सूचितं, इदं विष्णुर्विचक्रमे त्रिर्देवः पृथिवीमेष एतामिति, गार्हपत्याहवनीययोर्मध्ये स्रातिक्रमणेऽन्यत्र स्रुवदेषु भस्म प्रक्षिपेत्, विध्यपराध इति खण्डे सूचितं, गार्हपत्याहवनीययोरन्तरा स्रुवातिक्रमेत् भस्मना पुनः पदं प्रतिवपेदिदं विष्णुर्विचक्रमे तदस्य प्रियमभिपाथो अश्यामिति, उपसत्सु वैष्णवस्यैवानुवाक्या, अथोपसदिति खण्डे सूचितं, गय-

१।१८।१ त्रीणि पदा विचक्रमे विष्णुर्गोपा अदाभ्यः।
अतो धर्म्माणि धारयन्॥

स्थानो अमीवहेदं विष्णुर्विचक्रम इति, आतिथ्यायां प्रधानविषय एषानुवाक्या, अथातिथ्येडान्तेतिखण्डे सूचितं, गयस्थानो अमीवहा इदं विष्णुर्विचक्रम इति। तामेतां सूक्ते सप्तदशीमृचमाह इदं विष्णुरिति। विष्णुस्त्रिविक्रमावतारधारी इदं प्रतीयमानं सर्वं जगदुद्दिश्य विचक्रमे विश्वेषेण पादक्रमणं कृतवान्, त्रेधा त्रिभिः प्रकारैः पदं निदधे, स्वकीयं पादं प्रक्षिप्तवान्, अस्य विष्णोः पांसुरे धूलियुक्ते पादस्थाने समूढं, इदं सर्वं जगत् सम्यगन्तर्भूतं। सेयमृक् यास्केनैवं व्याख्याता, विष्णुर्विशतेर्वा व्यश्नोतेर्वा यदिदं किञ्च तद्विक्रमते विष्णुस्त्रेधा निधत्ते पदं त्रेधाभावाय पृथिव्यामन्तरिक्षे दिवीति शाकपूणिः, समारोहणे विष्णुपदे गयशिरसीत्यौर्णनाभः, समूढमस्य पांसुरे इव पदं न दृश्यते, अपिवोपमार्थे स्यात्, समूल्हमस्य पांसुरे इव पदं न दृश्यत इति, पांसवः पादे सूयन्त इति वायन्नाः प्रेरत इति वा पिंशनीया भवन्तीति वेति। त्रेधा, एधाच्चेत्येधा, चितोऽन्त उदात्तः। समूल्हं, वह प्रापणे, निष्ठा (पां ३। २। १०२।) इति क्तः, वचिस्वपियजादीनां किति, (पां ६। १। १६।) इति सम्प्रसारणं, ढ्वधत्वष्टुत्वढ्लोपदीर्घत्वानि, गतिरनन्तरः (पां ६। २। ४९।) इति गतेः प्रकृतिस्वरत्वं। अस्य, इदमोऽन्वादेशेऽशनुदात्तस्तृतीयादौ (पां २। ४। ३२।) इत्यशनुदात्तः, प्रत्ययस्तु सप्तस्वरेण। पांसुरे, नगपांसुपाण्डुभ्यश्चेति वार्त्तिकेन मत्वर्थीयो रः प्रत्ययः, प्रत्ययस्वरः॥ १७॥

उपसदि वैष्णवयागस्य प्रातःकाले याज्या, सायङ्काले ऽनुवाक्या त्रीणि पदेत्येषा, सूच्यते च, त्रीणि पदा विचक्रम इति, स्विष्टकृदादि लुप्यत इति, तामेतामष्टादशीमृचमाह त्रीणि पदेति। अदाभ्यः केनापि हिंसितुमशक्यः, गोपाः सर्वस्य जगतो रक्षकः, विष्णुः पृथिव्यादिस्थानेष्वत एव तेषु त्रीणि पदानि विचक्रमे, किं कुर्वन् धर्म्माणि अग्निहोत्रादीनि धारयन् पोषयन्। पदा, सुपां सुलुक् (पां ७। १। ३९।) इत्यादिना विभक्तेर्डादेशस्तस्य स्थानिवद्भावेन अनुदात्तत्वे प्राप्ते ऽनुदात्तनिमित्तस्वरेणोदात्तत्वं। गोपाः, गोपामृतस्येत्यत्रोक्तं। अदाभ्यः, दभेः, ऋहलोर्ण्यत् (पां ३। १। १२४।) इति ण्यत्, नञ्समासः, अव्ययपूर्व-

११९१ विष्णोः कर्म्माणि पश्यत यतो व्रतानि पस्पशे १
इन्द्रस्य युज्यः सखा ॥
१२०१ तद्विष्णोः परमं पदं सदा पश्यन्ति सूरयः १
दिवीव चक्षुराततं ॥

पदप्रकृतिस्वरत्वं। धारयन्, भ्रपः पित्त्वादनुदात्तत्वं, भ्रतुश्च लसार्वधातुकस्वरेण णिच एव स्वरः शिष्यते ॥ १८ ॥

एकोनविंशीमृचमाह विष्णोः कर्म्माणीति। हे ऋत्विगादयः, विष्णोः कर्म्माणि पालनादीनि पश्यत, यतो यैः कर्म्मभिः व्रतान्यग्निहोत्रादीनि पस्पशे, सर्वो यजमानः स्पृष्टवान्, विष्णोरनुग्रहादनुतिष्ठतीत्यर्थः, तादृशो विष्णुरिन्द्रस्य युज्योऽनुकूलः सखा भवति। विष्णोरिन्द्रानुकूल्यं त्वयाहृतपुत्र इत्यनुवाके अथ वै तर्हि विष्णुरित्यादिना प्रपञ्चेन तैत्तिरीया आमनन्ति। पस्पशे, स्पश बाधनस्पर्शनयोः, लिट्द्विर्भावे, भ्रर्पूर्वाः खयः (पां ७। ४। ६१।) इति पकारः शिष्यते, सकारो लुप्यते, यदृत्तान्नित्यं (पां ८। १। ६६।) इति यदृत्तयोगान्ननिघातः। युज्यः, युजेर्बाऽऽलकात् क्यप्, कित्त्वादुणाभावः, क्यपः पित्त्वादनुदात्तत्वं, धातुस्वरः ॥ १९ ॥

विंशीमृचमाह तद्विष्णोरिति। सूरयो विद्वांस ऋत्विगादयो विष्णोः सम्बन्धि परममुत्कृष्टं तच्छास्त्रप्रसिद्धं पदं स्वर्गस्थानं श्रास्त्रदृष्ट्या सर्व्वदा पश्यन्ति, तत्र दृष्टान्तः, दिवीव, आकाशे यथा आततं सर्वतः प्रसृतं चक्षुर्निरोधाभावेन विष्णुदं पश्यति तद्वत्। सदा, सर्वैकान्यकिंयत्तदः (पां ५। ३। १५।) इति दा प्रत्ययः, सर्वस्य सोऽन्यतरस्यांदि (पां ५। ३। ६।) इति सर्वशब्दस्य सभावः, व्यत्ययेनाद्युदात्तत्वं। दिवि, ऊडिदम्पदादप्युभ्यैद्युभ्यः (पां ६। १। १७१।) इति विभक्तेरुदात्तत्वं, इवेन विभक्त्यलोपः, पूर्वपदप्रकृतिस्वरत्वं चेति तदेव शिष्यते। चक्षुः, नव्विषयस्यानिसन्तस्येति क्षिटसूचेराद्युदात्तत्वं। आततं, तनोतेः कर्म्मणि क्तः, यस्य विभाषा (पां ७। २। १५।) इति इट्प्रतिषेधः, क्षुदात्तोपदेशे (पां ६। ४। १७।) इत्यादिना नलोपः, क्तादुत्तरपदप्रकृतिस्वरत्वे प्राप्ते, गतिरनन्तरः (पां ६। २। ४९।) इति गतेरुदात्तत्वं ॥ २० ॥

१२११ तद्विप्रासो विपन्यवो जागृवांसः समिन्धते ।
विष्णोर्यत्परमं पदं ॥ ७ ॥

## त्रयोविंशसूक्तं ॥

१ १ १ तीव्राः सोमास आगह्याशीर्वन्तः सुता इमे ।
वायो तान्प्रस्थितान्पिब ॥

एकविंशीमृचमाह तद्विप्रास इति। पूर्वोक्तं विष्णोर्यत्परमं पदमस्ति, तत्पदं विप्रासो मेधाविनः समिन्धते सम्यग्दीपयन्ति। कीदृशा विप्रासः, विपन्यवो विशेषेण स्तोतारः। जागृवांसः, शब्दार्थयोः प्रमादराहित्येन जागरूकाः। विप्रासः, आज्जसेरसुक् ( पां ७। १। ५०। ) इत्यसुगागमः। विपन्यवः, स्तुत्यर्थस्य पनेर्बाऽुलक औणादिको यु प्रत्ययस्तस्य प्रत्ययस्वरः। जागृवांसः, जागृ निद्राक्षये, लिटः क्वसुः, क्वादिनियमात् प्राप्तस्येटो, वस्वेकाजाद्घसां ( पां ७। २। ६७। ) इति नियमान्निवृत्तिः ॥ २१ ॥ इति प्रथमस्य द्वितीये सप्तमो वर्गः ॥ ७ ॥

तीव्रा इति चतुर्विंशत्यृचं सूक्तं, ऋचेयमनुक्रमणिका, तीव्राश्चतुर्विंशतिर्वायव्यैकैन्द्रवायव्यौ मैत्रावरुणमरुत्वतीयवैश्वदेवपौष्णास्तृचाः, शिष्टा आप्योन्त्याधर्द्धाग्नेय्यस्तन्तः पुर उष्णिक् परानुष्टुप् तिसृभ्यान्त्या इति, ऋषिश्चान्यस्मादितिपरिभाषयानुवर्त्तनान्मेधातिथिः काण्व ऋषिः, अप्स्वन्तरित्येषा पुर उष्णिक्, प्रथमाच्चरस्य द्वादशाक्षरेणाद्यश्चेत् पुर उष्णिगिति लक्षणसद्भावात्। अपु मे सोम इत्येषानुष्टुप्, इदमाप इत्याद्यास्तिस्रोऽनुष्टुभः, शिष्टा एकोनविंशतिसङ्ख्याका ऋचो गायत्र्यः, आदौ गायत्रमिति परिभाषितत्वात्। आद्या वायुदेवताका, ततो द्वे ऋचाविन्द्रवायुदेवताके, तत एकस्तृचो मित्रावरुणदेवताकः, तत उत्तरतृचस्य मरुद्भिरुग्निरिन्द्रो देवता, तत एकस्तृचो वैश्वदेवः, तदनन्तरभावी पौष्णः, शिष्टा ऋचो बऋदेवताकाः, पयस्वानग्न इत्यर्द्धर्चयुक्ता सम्माग्न इत्येषा त्वग्निदेवताका, सूक्तविनियोगो लिङ्गादवगन्तव्यः। अभिन्नवषडहस्य द्वितीयेऽहनि प्रउगशस्त्रे वायव्यत्रचस्य तीव्राः सोमास इत्येषा तृतीया, द्वितीयस्य चतुर्विंशेऽहनीति खण्डे सूचितं, तीव्राः सोमास

१ २ १ उभा देवा दिविस्पृशेन्द्रवायू हवामहे १
अस्य सोमस्य पीतये ॥

आगहीत्येकेति। पृष्ठ्यषडहेऽपि द्वितीयेऽहनि प्रउग एषा, तामेतां सूक्ते प्रथमामृचमाह तीव्राः सोमास इति। हे वायो, इमे सोमास ऐन्द्रवायवग्रहादिरूपाः सोमाः सुता अभिषुतास्ते च तीव्राः प्रभूतत्वात्तर्पयितुं समर्थाः। आशीर्व्वन्त आशीर्युक्ताः। अतस्त्वमागहि अस्मिन् कर्म्मण्यागच्छ, प्रस्थितानुत्तरवेदिं प्रत्यानीतान्तान् सोमान् पिब। तीव्राः, तिज निशाने, औणादिको रक्प्रत्ययः, दीर्घत्वं, जकारस्य वकारः। सोमासः, अर्त्तिस्तुसित्यादिना मन्प्रत्यय औणादिकः नित्वादाद्युदात्तः, आज्जसेरसुक् ( पां ७ । १ । ५० । ) इत्यसुगागमः। गहि, मरुद्भिरग्न आगहीत्यत्रोक्तं। आशीर्वन्तः, श्रीञ् पाके, अपस्पधेथामानृचुरानृहुश्चिच्युषेतित्याजश्राताः श्रितमाशीराशीर्त्तः ( पां ६ । १ । ३६ । ) इति सूत्रे आङ्पूर्वस्य क्विपि शीरादेशो निपातितः, करणस्यापि श्रयणद्रव्यस्य स्वव्यापारे कर्तृत्वविवक्षया कर्त्तरि क्विप् न विरुध्यते, आशीरेषामस्तीत्याशीर्वन्तः, छन्दसीरः ( पां ८ । २ । १५ । ) इति मतुपो वत्वं। वायो, आमन्त्रिताद्युदात्तत्वं। प्रस्थितान्, प्रादिसमासे कृदुत्तरपदप्रकृतिस्वरं बाधित्वा व्यत्ययेनाव्ययपूर्वपदप्रकृतिस्वरत्वं ॥ १ ॥

पूर्वोक्त एव शस्त्रे उभा देवा दिविस्पृशेति द्वे, ऐन्द्रवायवतृचस्य प्रथमा द्वितीये, तथा च द्वितीयस्येति खण्डे सूत्रितं, उभा देवा दिविस्पृशेति द्वे इति, तयोः प्रथमां सूक्ते द्वितीयामृचमाह उभा देवेति। दिविस्पशा, द्युलोकवर्त्तिनौ उभा देवा उभौ देवाविन्द्रवायू हवामहे आह्वयामः, किमर्थं अस्य सोमस्य पीतये, असकृद्व्याख्यातं। उभा, देवा, सुपां सुलुक् ( पां ७ । १ । ३९ । ) इत्याकारः। दिविस्पशा, हृद्युभ्यां ङेरुपसङ्ख्यानमिति वार्त्तिकेन सप्तम्या अलुक्, कृदुत्तरपदप्रकृतिस्वरत्वं। इन्द्रवायू, इन्द्रश्च वायुश्चेति द्वन्द्वः, उभयत्र वायोः प्रतिषेधो वक्तव्य इत्यानङो निषेधः, देवताद्वन्द्वे च ( पां ६ । ३ । २६ । ) इति प्राप्तस्योभयपदप्रकृतिस्वरत्वस्य, नोत्तरपदेनुदात्तादौ ( पां ६ । २ । १४२ । ) इत्यादिना निषेधात् समासान्तोदात्तत्वमेव शिष्यते। हवामहे, ह्वेञ् स्पर्द्धायां शब्दे च, बहुलं छन्दसीति सम्प्रसारणं, सम्प्रसारणाच्च ( पां ६ । १ । १०८ । )

।३। इन्द्रवायू मनोजुवा विप्रा हवन्त ऊतये।
सहस्राक्षा धियस्पती॥
।४। मित्रं वयं हवामहे वरुणं सोमपीतये।
जज्ञाना पूतदक्षसा॥

इति परपूर्वत्वं, शप्, गुणावादेशौ, शपः पित्त्वादनुदात्तत्वं, तिङश्च लसार्वधातुकस्वरेण पदस्याद्युदात्तत्वे प्राप्ते, तिङ्ङतिङः (पां ८। १। २८।) इत्यष्टमिको निघातः। अस्य, ऊडिदं (पां ६। १। १७१।) इत्यादिना षष्ठ्या उदात्तत्वं,। पीतये, पा पाने, स्थागापापचोभावे (पां ३। ३। ९५।) इति भावे क्तिन्, घुमास्थागापाजहातिसां हलि (पां ६। ४। ६६।) इतीत्वं, व्यत्ययेनान्तोदात्तत्वं॥ २॥

तृतीयामृचमाह इन्द्रवायू इति। विप्रा मेधाविन ऋत्विग्यजमाना ऊतये रक्षणार्थं इन्द्रवायू हवन्त आह्वयन्ति। कीदृशाविन्द्रवायू, मनोजुवा मन इव वेगयुक्तौ। सहस्राक्षा सहस्रनयनयुक्तौ। यद्यपीन्द्र एव सहस्राक्षस्तथापि क्वचिन्न्यायेन वायुरपि तथोच्यते। धियस्पती, कर्म्मणो बुद्धेर्वा पालकौ। मनोजुवा, जवतिर्गतिकर्म्मा, मनोवज्जुवत इति मनोजुवा, मन इव वेगयुक्तौ, क्षदुत्तरपदप्रकृतिस्वरत्वं, सुपां सुलुक् (पां ७। १। ३९।) इत्याकारः। विप्रा, औणादिको रन्प्रत्ययान्त आद्युदात्तः। ऊतये, ऊति यूति जूति साति हेति कीर्त्तयश्च (पां ३। ३। ९७।) इति क्तिन्नुदात्तत्वं। सहस्राक्षा, सहस्रमक्षीणि ययोस्तौ, बहुव्रीहौ सक्थ्यक्ष्णोः स्वाङ्गात् षच् (पां ५। ४। ११३।) इति षच्, समासान्तः, बहुव्रीहिस्वरे प्राप्ते, षचः समासान्तप्रत्ययस्य सतिशिष्टत्वात्, चितः (पां ६। १। १६३।) इत्यन्तोदात्तत्वं। धियः, सावेकाचः (पां ६। १। १६८।) इति ङस उदात्तत्वं, षष्ठ्याः पतिपुत्र (पां ८। ३। ५३।) इति संहितायां विसर्ज्जनीयस्य सकारः, पतीत्याद्युदात्तः॥ ३॥

चतुर्विंशेऽहनि प्रातः सवने मैत्रावरुणशस्त्रे मित्रं वयं हवामह इति तृचः षडहस्तोत्रियः, चतुर्विंश इति खण्डे सूचितः, आनो मित्रावरुणा मित्रं वयं हवामह इति। अभिप्लवषडहे प्रातः सवने मैत्रावरुणस्यायं तृच आवापार्थः। अभिप्लवषडहानीति खण्डे सूचितं, परि-

१५१ ऋतेन यावृतावृधावृतस्य ज्योतिषस्पती ।
ता मित्रावरुणा हुवे ॥ ८ ॥

श्रिष्टानावापानुद्धृत्य मित्रं वयं हवामह इति मैत्रावरुणस्य मित्रं वयं हवामह इत्येषा प्रातःसवने प्रस्थितयाज्या, प्रणीस्त्रा ब्राह्मणाच्छंसीत्युपक्रम्य इदन्ते सौम्यं मित्रं वयं हवामह इति सूक्तितं, तामेतां सूक्ते चतुर्थीमृचमाह मित्रं वयमिति । वयमनुष्ठातारः सोमपीतये सोमपानार्थं मित्रं वरुणञ्चोभावाकूयामः । कीदृशावुभौ, जज्ञाना कर्म्मप्रदेशे प्रादुर्भवन्तौ। पूतदक्षसा शुद्धबलौ। वरुणं, वृञ् वरणे, छन्दस्युणादयो बहुलमित्यौणादिक उनन्प्रत्ययः, नित्त्वादाद्युदात्तः । सोमपीतये, दासीभारादित्वात् पूर्वपदप्रकृतिस्वरत्वं । जज्ञाना, जनी प्रादुर्भावे, छन्दसि लिट्, तस्य, लिटः कानज्वा ( पां ३ । २ । १०६ । ) इति कानजादेशः, गमहन जन खन घसां ( पां ६ । ४ । ९८ । ) इत्युपधालोपस्तस्य, अचः परस्मिन्पूर्वविधौ ( पां १ । १ । ५७ । ) इति स्थानिवद्भावाज्जनशब्दस्य द्विर्वचनं, स्तोःश्चुनाश्चुः ( पां ८ । ४ । ४० । ) इति नकारस्य ञकारः, चितः ( पां ६ । १ । १६३ । ) इत्यन्तोदात्तत्वं, पूर्ववदाकारः । पूतदक्षसा, पूञ् पवने, निष्ठा ( पां ३ । २ । १०२ । ) इति क्तः, श्युकः किति ( पां ७ । २ । ११ । ) इतीट्प्रतिषेधः, पूतं दक्षो ययोस्तौ, बहुव्रीहौ प्रकृत्या पूर्वपदं ( पां ६ । २ । १ । ) इति पूर्वपदप्रकृतिस्वरत्वं ॥ ४ ॥

पञ्चमीमृचमाह ऋतेन यावितिं । यौ मित्रावरुणौ ऋतेन सत्यवचनेन यजमानानुग्रहकारिणौ, ऋतावृधौ ऋतमवश्यम्भावितया सत्यं कर्म्मफलं तस्य वर्द्धकौ, ऋतस्य सत्यस्य प्रणीस्त्रस्य ज्योतिषः प्रकाशस्य पती पालकौ, श्रुत्यन्तरे मित्रावरुणयोरदितिपुत्रत्वेन श्रुतत्वात्, द्वादशादित्येष्वन्तर्भूतत्वेन ज्योतिः पालकत्वं युक्तं, श्रुत्यन्तरे चाष्टौ पुत्रासो अदितेरित्युपक्रम्य मित्रञ्च वरुणञ्चेत्यादिकमाम्नातं । ता मित्रावरुणा तथाविधौ मित्रावरुणौ हुवे आकूयामि । ऋतावृधौ, वृधु वृद्धौ, क्विप् च ( पां ३ । २ । ७६ । ) इति क्विप्, अन्येषामपि दृश्यते ( पां ६ । ३ । १३७ । ) इति दीर्घः, द्वादुत्तरपदप्रकृतिस्वरत्वं । ज्योतिषः, द्युतेरीसौ, द्युतेरिसिन् आदेश्च ज इति इसिन्प्रत्यय औणादिकः, नित्त्वादाद्युदात्तः, षष्ठ्याः पतिपुत्र ( पां ८ । ३ । ५३ । ) इति संहितायां विस-

१६१ वरुणः प्राविता भुवन्मित्रो विश्वाभिरूतिभिः ।
करतां नः सुराधसः ॥

र्ज्जनीयस्य सत्वं। मित्रावरुणा, देवताद्वन्द्वे च (पां ६।३।२६।) इति पूर्वपदस्यानङादेशः, देवताद्वन्द्वे च (पां ६।२।१४१।) इत्युभयपदप्रकृतिस्वरत्वं, सुपां सुलुक् पूर्वसवर्णा (पां ७।१।३९।) इति पूर्वसवर्णदीर्घ आकारः। हुवे, ह्वेञ आत्मनेपदोत्तमपुरुषैकवचने, सम्प्रसारणे, परपूर्वत्वे च कृते, बहुलं छन्दसीति शपो लुक्, टेरेत्वं, गुणे प्राप्ते, क्विङ्ति च (पां १।१।५।) इति निषिध्यते, उवङादेशः, तिङ्ङतिङः (पां ८।१।२८।) इति निघातः ॥ ५ ॥ इति प्रथमस्य द्वितीयेऽष्टमो वर्गः ॥ ८ ॥

षष्ठीमृचमाह वरुणः प्रावितेति । अयं वरुणोऽस्माकं प्राविता भुवत्, प्रकर्षेण रक्षको भवतु, मित्रश्च विश्वाभिरूतिभिः सर्वाभीरक्षाभिः प्राविता भुवत्, तावुभावपि नोऽस्मान् सुराधसः प्रभूतधनयुक्तान् करतां कुरुतां। अविता, तृचश्चित्त्वादन्तोदात्तत्वं, प्रादिसमासे कृदुत्तरपदप्रकृतिस्वरत्वेन तदेव शिष्यते । भुवत्, भू सत्तायां, लेटस्तिप्, लेटोऽडाटौ (पां ३ । ४ । ९४ ।) इत्यडागमः, इतश्चलोपः परस्मैपदेषु (पां ३ । ४ । ९७ ।) इति इकारलोपः, बहुलं छन्दसीति शपो लुक्, गुणे प्राप्ते, भूसुवोस्तिङि (पां ७ । ३ । ८८ ।) इति प्रतिषेधः उवङादेशः, तिङ्ङतिङ इति निघातः। विश्वाभिः, अशुप्लुषीत्यादिना क्वन्नन्तो विश्वशब्द आद्युदात्तः, टाप्सुपोरनुदात्तत्वात्तदेव शिष्यते। ऊतिभिः, ऊति यूति जूति साति हेति कीर्त्तयश्चेति क्तिन्नुदात्तः। करतां, डुकृञ् करणे, भौवादिकः, लोटस्तस्, तसस्तां, कर्त्तरि शप्, गुणोरपरत्वं, शपः पित्त्वादनुदात्तत्वं, तिङश्च लसार्वधातुकस्वरेण धातुस्वरः शिष्यते। सुराधसः, राध साध संसिद्धौ, राध्नोत्यनेनेति राधो धनं, शोभनं राधो येषां ते, बहुव्रीहौ प्रकृत्या पूर्वपदं (पां ६।२।१।) इति पूर्वपदप्रकृतिस्वरत्वे प्राप्ते, नञ्सुभ्यां (पां ६।२।१७२।) इत्युत्तरपदान्तोदात्तत्वं प्राप्तं, सोर्मन्नसी अलोमोषसी (पां ६।२।११७।) इत्युत्तरपदाद्युदात्तत्वेन बाध्यते ॥ ६ ॥

१७१ मरुत्वन्तं हवामह इन्द्रमा सोमपीतये १
सजूर्गणेन तृम्पतु ॥
१८१ इन्द्रज्येष्ठा मरुद्गणा देवासः पूषरातयः १
विश्वे मम श्रुता हवं ॥

सप्तमीमृचमाह मरुत्वन्तमिति, मरुत्वन्तं मरुद्भिर्युक्तमिन्द्रं, सोमपीतये सोमपानार्थं आह्वामहे आकारयामः, स चेन्द्रो गणेन मरुद्गणेन सजूः सह तृम्पतु तृप्तो भवतु। मरुत्वन्तं, मरुतोऽस्य सन्तीति मरुत्वान्, भयः (पां ८। २। १०।) इति मतुपो वत्वं, तसौ मत्वर्थे (पां १। ४। १९।) इति भसञ्ज्ञया बाधितत्वाज्ज्ञुत्वाभावः, मतुप्सुपौ पित्त्वादनुदात्तौ। ननु क्नसनुड्भ्यां मतुप् (पां ६। १। १७६।) इति मतुप उदात्तत्वेन भवितव्यं, खरविधौ व्यञ्जनमविद्यमानवदिति तकारस्याविद्यमानवत्त्वेन क्नसात् परत्वान्न क्नसनुड्भ्यामित्यत्र नुड्ग्रहणसामर्थ्यादविद्यमानपरिभाषा नाश्रियत इति वृत्तावुक्तं, अतो मरुच्छब्दस्य खर एव श्रिष्यते। सजूः, जुषी प्रीतिसेवनयोः, सम्पदादिलक्षणः क्विप्, समाना प्रीतिर्यस्येति बहुव्रीहिः, समानस्य छन्दसि (पां ६। ३। ८४।) इति सभावः, ससजुषोरुः (पां ८। २२। ६६।) इति रुत्वं, रोः, उपधायाश्च (पां ८। २। ७८।) इत्युपधादीर्घः, बहुव्रीहिखरे प्राप्ते त्रिचक्रादीनां छन्दसीत्युत्तरपदान्तोदात्तं। तृम्पतु, तृप तृम्प तृप्तौ, तुदादिभ्यः शः, श्लेमुचादीनां (पां ७। १। ५९।) इति नुमागमः॥ ७॥

अष्टमीमृचमाह इन्द्र ज्येष्ठा इति। हे देवासः, इन्द्रमरुद्गणाः, विश्वे सर्वे यूयं, मम ह्वमाह्वानं श्रुत शृणुत। कीदृशाः इन्द्रज्येष्ठाः, इन्द्रो ज्येष्ठो मुख्यो येषु तथाविधा मरुद्गणा मरुत्समूहरूपाः। पूषरातयः पूषाख्यो देवो रातिर्दाता येषामिन्द्रमरुतां ते पूषरातयः। इन्द्रज्येष्ठा, आमन्त्रिताद्युदात्तत्वं, पादादित्वादनिघातः। मरुद्गणाः, विभाषितं विशेषवचने बहुवचनं (पां ८। १। ७३।) इति पूर्वस्याविद्यमानवत्त्वादनिघातः। देवासः, पूषरातयः, पूर्ववत्। श्रुता, श्रु श्रवणे, लोण्मध्यमपुरुषबहुवचनं, तस्यस्मिपां ताम् तम् तामः (पां ३। ४। १०१।) इति तादेशः, व्यत्ययेन शप्, बहुलं छन्दसि (पां २। ४। ७३।) इति शपो लुक्। सार्वधातुकार्द्धधातुकयोः (पां ७। ३। ८४।)

१ ९ १ हत वृत्रं सुदानव इन्द्रेण सहसा युजा १
मा नो दुःशंस ईशत ॥
१ १० १ विश्वान्देवान्हवामहे मरुतः सोमपीतये १
उग्रा हि पृश्निमातरः ॥ ९ ॥

इति गुणे प्राप्ते, क्ङिति च ( पां १ । १ । ५ । ) इति प्रतिषेधः । ह्रचोऽतस्तिङः ( पां ६ । ३ । १३५ । ) इति दीर्घः । हवं, ह्वेञ् स्पर्द्धायां शब्दे च, भावेऽनुपसर्गस्य ( पां ३ । ३ । ७५ । ) इत्यप्, सम्प्रसारणं, परपूर्वत्वं, गुणावादेशौ, पित्त्वादनुदात्तत्वं, धातुस्वर एव शिष्यते ॥ ८ ॥

नवमीमृचमाह हत वृत्रमिति । हे सुदानवः शोभनदानयुक्ता मरुद्गणाः, सहसा बलवता युजा योग्येनेन्द्रेण वृत्रं शत्रुं हत नाशयत, दुःशंसो दुष्टेन शंसनेन कीर्त्तनेन युक्तो वृत्रो नोऽस्मान् प्रति मा ईशत समर्थो माभूत् । हत, हन हिंसागत्योः, लोट्, तस्थस्थमिपां ( पां ३ । ४ । १०१ । ) इत्यादिना तादेशः । अदिप्रभृतिभ्यः शपः ( पां २ । ४ । ७२ । ) इति शपो लुक् । अनुदात्तोपदेश ( पां ६ । ४ । ३७ । ) इत्यादिनानुनासिक न लोपः । सुदानवः, डुदाञ् दाने, दा भाभ्यां नु रित्यौणादिको नुः प्रत्ययः, प्रादिसमासे आमन्त्रित निघातः । युजा, युजिर् योगे, ऋत्विग्दधृक्स्रग्दिगुष्णिगञ्चुयुजिक्रुञ्चश्च ( पां ३ । २ । ५९ । ) इति क्विन्प्रत्ययः । सावेकाचस्तृतीयादिर् (पां ६ । १ । १६८ । ) इत्यादिना तृतीयैकवचनस्योदात्तत्वं । दुःशंसः, ईषद्दुःसुषुकृच्छ्राकृच्छ्रार्थेषु खल् ( पां ३ । ३ । १२६ । ) इति खल् प्रत्ययः । लिति ( पां ६ । १ । १९३ । ) इति प्रत्ययात् पूर्वस्योदात्तत्वं । ईशत, ईश ऐश्वर्ये, माङि लुङ् ( पां ३ । ३ । १७५ । ) इति लुङि प्राप्ते, छन्दसि लुङ्लङ्लिटः ( पां ३ । ४ । ६ । ) इति व्यत्ययेन लङ्, त आदेशः । बहुलं छन्दसि ( पां २ । ४ । ७३ । ) इति शपो लुगभावः । नमाङ्योगे ( पां ६ । ४ । ७४ । ) इत्यडागमाभावः, तिङ्ङतिङः ( पां ८ । १ । २८ । ) इति निघातः ॥ ९ ॥

दशमीमृचमाह विश्वान्देवानिति । मरुतो मरुत्संज्ञकान्, विश्वान् सर्वान् देवान्, सोमपीतये सोमपानार्थं, हवामहे आह्वयामः । ते मरुतः पृश्निमातरः, पृश्निर्नानाविधवर्णयुक्ताया भूमेः पुत्राः, हिः प्रसि-

१११ जयतामिव तन्यतुर्मरुतामेति धृष्णुया ।
यच्छुभं याथ ना नरः ॥
११२ हस्काराद्विद्युतस्पर्यतो जाता अवन्तु नः ।
मरुतो मृलयन्तु नः ॥

द्धर्थः, सा च प्रसिद्धिः उग्रा इति, एश्नेः पुत्रा इति मन्त्रान्तरादवगन्तव्या, एश्निर्माता येषान्ते एश्निमातरः । एश्निशब्दो पृश्निः एश्निरित्युणादावाद्युदात्तो निपातितः । बज्रवीर्हा पूर्वपदप्रकृतिस्वरत्वं ॥ १० ॥ इति प्रथमस्य द्वितीये नवमो वर्गः ॥ ९ ॥

एकादशीमृचमाह जयतामिवेति । मरुतां देवानां तन्यतुः शब्दो धृष्णुया धार्ष्ट्ययुक्तः सन्नेति गच्छति, केषामिव, जयतां विजयदुक्तानां शूराणां भटानामिव । हे नरः नेतारो मरुतः, यूयं यद्यदा शुभं शोभनं देवयजनं, ना याथ न प्राप्नुथ, तदा त्वदीयः शब्दो गच्छतीति पूर्वेणान्वयः । तन्यतुः, तनु विस्तारे, ऋतन्यञ्जीत्यादिना यतुच् प्रत्ययौणादिकः, प्रत्ययस्वरः । धृष्णुया, जिधृषा प्रागल्भ्ये, त्रसि गृधि धृषि क्षिपे क्नुः ( पां ३ । २ । १४० । ) इति क्नु प्रत्ययः, सुपां सुलुक्पूर्व ( पां ७ । १ । ३९ । ) इत्यादिना सोर्याजादेशः, चित्त्वादन्तोदात्तः याथ, तप्तनप्तनथनाश्च ( पां ७ । १ । ४५ । ) इति थनादेशः, यच्छब्दयोगान्निघाताभावः ॥ ११ ॥

द्वादशीमृचमाह हस्कारादिति । हस्कारादीषत्करादिद्युतो विशेषेण दीप्यमानात्, अतोऽन्तरिक्षात् परि जाताः सर्वत उत्पन्ना मरुतो नोऽस्मान् अवन्तु रक्षन्तु, तथाविधा मरुतः नोऽस्मान्मृलयन्तु सुखयन्तु । हस्कारात्, हसे हसने, अत्र तु प्रकाशमात्रे वर्त्तते । अस्मात्सम्पदादिलक्षणः क्विप्, तस्मिन्नुपपदे, डुकृञ् करणे इत्यस्मात्, कर्म्मण्यण् ( पां ३ । २ । १ । ) इत्यण्प्रत्ययः, तत्पुरुषे तुल्यार्थे ( पां ६ । २ । २ । ) इत्यादिना पूर्वपदप्रकृतिस्वरे प्राप्ते, गतिकारकोपपदात् ( पां ६ । २ । १३९ । ) इत्यादिना कृदुत्तरपदप्रकृतिस्वरत्वं, अतः कृकमि कंस ( पां ७ । ३ । ४९ । ) इत्यादिना विसर्ज्जनीयस्य सत्वं ॥ १२ ॥

११३१ आ पूषन् चित्रबर्हिषमाघृणे धरुणं दिवः १
आजा नष्टं यथा पशुं ॥
११४१ पूषा राजानमाघृणिरपगूल्हं गुहा हितं १
अविन्दच्चित्रबर्हिषं ॥
११५१ उतो स मह्यमिन्दुभिः षड्युक्ताँ अनुसेषिधत् १
गोभिर्यवं न चर्कृषत् ॥ १० ॥

त्रयोदशीमृचमाह आ पूषन्निति । हे पूषन्, चित्रबर्हिषं विचित्रैर्बर्हिर्भिर्युक्तं, धरुणं यागस्य धारकं सोमं, दिव आ, द्युलोकादाहरेति शेषः । अत्र पूषा विशेष्यते, आघृणे आगतदीप्तियुक्त, तत्र दृष्टान्तः, हे आज गमनशील, यथा लोके नष्टं पशुं मृगारण्यादावन्वीक्ष्य कश्चिदाहरति तद्वत् । आ घृणे, घृक्षरण दीप्तयोरित्यस्मात्, घृणि पृश्नि पार्ष्णिचूर्णिभूर्णिरित्यादिना औणादिको निप्रत्ययो निपातितः, ऋवर्णाच्चेति वक्तव्यमिति वार्त्तिकेन णत्वं, प्रादिसमासः, आमन्त्रिताद्युदात्तत्वं । धरुणं, धृञ् धारणे, अस्मादण्यन्ताद्धातोः अजेर्ण्यिलुक्चेति चकाराद्धृधातोरप्युनन्प्रत्ययः, व्यत्ययेन नित्स्वराभावे प्रत्ययस्वरः । दिवः, ऊडिदं ( पां ६ । १ । १७१ । ) इत्यादिना विभक्तेरुदात्तत्वं । आज, अज गतिक्षेपणयोः ॥ १३ ॥

चतुर्दशीमृचमाह पूषा राजानमिति । आघृणिः पूषा, राजानं सोममविन्दत् अलभत । कीदृशं राजानं, अपगूल्हं, अपगूढमत्यन्तगूढं । तच्च हेतुः, गुहाहितं गुहासदृशे दुर्गे द्युलोके स्थितं । तथा चित्रबर्हिषं । अपगूल्हं, गुह संवरणे, निष्ठा ( पां २ । २ । १०२ । ) इति कर्मणि क्तः, हो ढः ( पां ८ । २ । ३१ । ) इति हस्य ढत्वं । झषस्तथोर्धोऽधः ( पां ८ । २ । ४० । ) इति तस्य धकारः, ष्टुत्वढलोपदीर्घाः, समासे, गतिरनन्तरः ( पां ६ । २ । ४९ । ) इति गतेः प्रकृतिस्वरत्वं । गुहा, सुपां सुलुक् ( पां ७ । १ । ३९ । ) इत्यादिना सप्तम्या लुक् । हितं, निष्ठायां दधातेर्हिरादेशः ॥ १४ ॥

पञ्चदशीमृचमाह उतो स मह्यमिन्दुभिरिति । उतो अपि च, स पूषा, मह्यं यजमानाय, इन्दुभिर्यागहेतुभिः सोमैर्युक्तान् षट् वसन्तादीन्ऋतून्

१ १६ १ अम्बयो यन्त्यध्वभिर्जामयो अध्वरीयतां १
पृञ्चतीर्मधुना पयः ॥

सेषिधत्, अनुक्रमेण पुनः पुनर्नयन् वर्त्तत इति शेषः। अत्र दृष्टान्तः, गोभिर्बलीवर्दैर्यवं न चर्कृषत्, न शब्द उपमार्थः, यथा यवमुद्दिश्य भूमिं प्रतिवत्सरं पुनः पुनः कृषति तद्वत्। मह्यं, ङयि च (पां ६। १। २१२।) इत्याद्युदात्तत्वं। इन्दुभिः, उन्दी क्लेदने, उन्देरिच्चादेरित्यौणादिक उः प्रत्ययः, उकारस्येकारादेशश्च, निदित्यनुवृत्तेराद्युदात्तत्वं। युक्तान्, दीर्घादटिसमानपादे (पां ८। ३। ९।) इति संहितायां नकारस्य रुत्वं, आतोऽटिनित्यं (पां ८। ३। ३।) इति सानुनासिक आकारः। सेषिधत्, षिध गत्यां, धातोरेकाचः (पां ३। १। २२।) इति यङ्, यङोऽचि च (पां २। ४। ७४।) इति तस्य लुक्, प्रत्ययलक्षणेन, सन्यङोः (पां ६। १। ९।) इति द्विर्भावो हलादिशेषः, गुणो यङ्लुकोः (पां ७। ४। ८२।) इत्यभ्यासस्य गुणः, इण्कोः (पां ८। ३। ५२।) इति षत्वं, सनाद्यन्ता धातवः (पां ३। १। ३२।) इति धातुसञ्ज्ञायां, लटः शतृशानचावप्रथमासमानाधिकरणे (पां ३। २। १२४।) इति शतृ, कर्त्तरि शप्, चर्करीतं परस्मैपदमदादिवच्चेति वचनाच्छपो लुक्, नाभ्यस्ताच्छतुः (पां ७। १। ७८।) इति नुम्प्रतिषेधः, प्रत्ययस्वरे प्राप्ते, अभ्यस्तानामादिः (पां ६। १। १८९।) इत्याद्युदात्तत्वं, गोभिः, सावेकाचस्तृतीयादिः (पां ६। १। १६८।) इति भिस उदात्तत्वे प्राप्ते, न गोश्वन्साववर्ण (पां ६। १। १८२।) इत्यादिना प्रतिषेधः। चर्कृषत्, कृष विलेखने, यङ्लुकि, द्विर्भावहलादिशेषेरदत्वचर्त्वानि, रुग्रिकौ च लुकि (पां ७। ४। ९१।) इत्यभ्यासस्य रुगागमः, तस्माद्यङ्लुङन्ताल्लटस्तिप्, इतश्च लोपः परस्मैपदेषु (पां ३। ४। ९७।) इतोकारलोपः, लोटोऽडाटौ (पां ३। ४। ९४।) इत्यडागमः, आदिप्रभृतिभ्यः शपः (पां २। ४। ७२।) इति शपो लुक्, लघूपधगुणे प्राप्ते, नाभ्यस्ताच्चिपिति (पां ७। ३। ८७।) इत्यादिना निषेधः, तिङ्तिङः (पां ८। १। २८।) इति निघातः ॥ १५ ॥ इति प्रथमस्य द्वितीये दशमो वर्गः ॥ १० ॥

अपोनप्त्रीयैकधनासूयनीतासु स्वयमनुगच्छन्नम्बय इति द्वे अनुब्रूयात्, तृतीयया अपोदेवीरित्यनयैकधनासु हविर्धानं प्रविष्टासु स्वयमनुप्रविशेत्, तथैव सूचितं, अम्बयो यन्त्यध्वभिरिति तिस्र उत्तमयानुप्रयान्त इति, अस्मिंस्तृचे प्रथमां सूक्तौ षोडशीमृचमाह अम्बयो यन्तीति।

१७१ अमूर्या उप सूर्य्ये याभिर्वा सूर्य्यः सह।
ता नो हिन्वन्त्वध्वरं ॥

अध्वरीयतामध्वरमात्मन इच्छतामस्माकं अम्बयो मातृस्थानीया आपः, तथाच कौषीतकिब्राह्मणे समाम्नायते अम्बयो यन्त्यध्वभिरित्यापो वा अम्बय इति, ता आपः, अध्वभिर्देवयजनमार्गैर्यन्ति गच्छन्ति। कीदृश्य आपः, जामयो हितकारिण्यो बन्धवः। तथा मधुना माधुर्यरसेन युक्तं पयः एष्यतीर्गवादिषु योजयन्त्यः। अम्बयः, रबि लबि अबि शब्दे, एतस्मादचइरित्यौणादिक इ प्रत्ययप्रकरणेऽम्बशब्दा बाऽलकादिप्रत्ययान्तः, प्रत्ययस्वरः। अध्वभिः, अदेर्धत्वेति औणादिकः क्वनिप्, दकारस्य धकारश्च, पित्त्वात्प्रत्ययस्यानुदात्तत्वे प्राप्ते धातुस्वरः। जामयः, चमु क्षमु जमु अदने, बाऽलकादिः प्रत्ययः। अध्वरीयतां, अध्वरशब्दात्, सुप आत्मनः क्यच्(पां ३।१।८।) इति क्यच्, क्यचि च(पां ७।४।३३।) इति इत्वं, अपुत्रादीनामिति वक्तव्यमिति वचनात्, न छन्दस्यपुत्रस्य (पां ७।४।३५।) इति इत्वनिषेधाभावः, सर्वे विधयश्छन्दसि विकल्प्यन्त इति परिभाषया, क्यध्वरपतनस्य (पां ७।४।३९।) इत्यकारलोपोऽपि न भवति, क्यच्प्रत्ययान्तधातोर्लटः शतृ, शपः पित्त्वादनुदात्तत्वं, शतुश्च लसार्वधातुकस्वरेण तयोः क्यजा सहैकादेशः, एकादेश उदात्तेनोदात्तः (पां ८।२।५।) इत्यन्तोदात्तत्वे सति, शतुरनुमोनद्यजादी (पां ६।१।१७३।) इति षष्ठ्या उदात्तत्वं। एष्यतीः, एची सम्पर्के, लटः शतृ, रुदादिभ्यः श्नम्, श्नसोरल्लोपः (पां ६।१।१११।) इत्यकारलोपः, अनुस्वारपरसवर्णौ, उगितश्च (पां ४।१।६।) इति ङीप्, वा छन्दसि (पां ६।१।१०६।) इति पूर्वसवर्णदीर्घत्वं, शतुरनुमोनद्यजादी (पां ६।१।१७३। इति ङीप उदात्तत्वं ॥ १६ ॥

सप्तदशीमृचमाह अमूर्या इति। या अमूरापः सूर्ये उप समीपेनावस्थिताः, आपः सूर्ये समाहिता इति श्रुत्यन्तरात्, वा अथवा सूर्यो याभिरद्भिः सह वर्त्तते, पूर्वत्रागं प्राधान्यं, उत्तरत्रतु सूर्यस्येति विशेषः, तास्तादृश्य आपो, नो अस्मदीयमध्वरं यागं हिन्वन्तु प्रीणयन्तु। याभिः, सावेकाचः (पां ६।१।६८।) इत्यादिना प्राप्तस्य विभक्त्युदात्तस्य, न गोश्वन् सावर्ण (पां ६।१।१८२।) इत्यादिना प्रतिषेधः। शेषानुप्रक्रिया स्पष्टा ॥१७॥

१ १८ । अपो देवीरुपह्वये यत्र गावः पिबन्ति नः ।
सिन्धुभ्यः कर्त्वं हविः ॥
१ १९ । अप्स्वन्तरमृतमप्सु भेषजमपामुत प्रशस्तये ।
देवा भवत वाजिनः ॥
१ २० ॥ अप्सु मे सोमो अब्रवीदन्तर्विश्वानि भेषजा ।
अग्निञ्च विश्वशम्भुवमापश्च विश्वभेषजीः ॥ ११ ॥

अष्टादशीमृचमाह अपो देवीरिति । नोऽस्मदीया गावो, यत्र यास्वप्सु पिबन्ति पानं कुर्वन्ति, ता अपो देवीरुपह्वये आह्वयामि, सिन्धुभ्यः स्पन्दनशीलाभ्योऽद्भ्यो देवताभ्यो हविः कर्त्वं अस्माभिः कर्त्तव्यं। अपः, ऊडिदं (पां ६ । ४ । १७१ ।) इत्यादिना शस उदात्तत्वं। पिबन्ति, पा पाने, पा घ्रा ध्मा स्था म्ना दाण् (पां ७ । ३ । ७८ ।) इत्यादिना पिबादेशः, शपः पित्त्वादनुदात्तत्वं, तिङश्च लसार्वधातुकस्वरेणाद्युदात्तत्वं, निपातैर्यद्यदिहन्त (पां ८ । १ । ३० ।) इत्यादिना निघाताभावः। कर्त्वं, डुकृञ् करणे, कृत्यार्थेतवैकेन्केन्यत्वनः (पां ३ । ४ । १४ ।) इति कर्म्मणि त्वन् प्रत्ययः, गुणः, नित्स्वरेणाद्युदात्तत्वं ॥ १८ ॥

एकोनविंशीमृचमाह अप्स्वन्तरमिति । अप्सु जलेषु अन्तर्मध्येऽमृतं पीयूषं वर्त्तते, तस्याब्विकारत्वात्, अमृतं वा आपः इति श्रुत्यन्तराच्च, तथैवाप्सु भेषजमौषधं वर्त्तते, क्षुद्रोगनिवर्त्तकस्यान्नस्याप्कार्य्यत्वात्, उत अपि च, तादृशीनामपां देवतानां प्रशस्तये प्रशंसार्थं, हे देवा ऋत्विजादयो ब्राह्मणाः, एते वै देवाः प्रत्यक्षं यद्ब्राह्मणा इतिश्रुत्यन्तरात्, वाजिनो वेगवन्तो भवत, शीघ्रं स्तुतिं कुरुतेत्यर्थः। अप्सु, ऊडिदं (पां ६ । ४ । १७१ ।) इत्यादिना सप्तम्या उदात्तत्वं, संहितायां, उदात्तस्वरितयोर्यणः स्वरितोऽनुदात्तस्य (पां ८ । २ । ४ ।) इति स्वरितत्वं। अमृतं, नञो जरमरमित्रमृताः (पां ६ । २ । ११६ ।) इत्युत्तरपदाद्युदात्तत्वं। प्रशस्तये, तादौ च निति (पां ६ । २ । ५० ।) इत्यादिना गतेः प्रकृतिस्वरत्वं। भवत, आमन्त्रितं पूर्वमविद्यमानवत् (पां ८ । १ । ७१ ।) इति पूर्वस्यामन्त्रितस्याविद्यमानवत्त्वेन पादादित्वादनिघातः ॥ १९ ॥

कारीरेष्टावुत्तमाज्यभागस्याप्सु म इत्येषानुवाक्या, वर्षकामेष्टिःकारी-

१२१॥ आपः पृणीत भेषजं वरूथं तन्वे३ मम १
ज्योक् सूर्य्यं दृशे॥ २१॥

रीति खण्डेऽप्स्वग्ने सधिष्टव अप्सु मे सोमोऽब्रवीदिति सूत्रितं, तामेतां सूक्ते विंशीमृचमाह अप्सु म इति। अप्सु जलेषु अन्तर्मध्ये विश्वानि भेषजा सर्वाणि औषधानि सन्तीति, मे मह्यं मन्त्रदर्शिने मुनये सोमो देवोऽब्रवीत्, तथा विश्वशम्भुवं सर्वस्य जगतः सुखकरमेतन्नामकं चाग्निं चापसु वर्त्तमानं सोमोऽब्रवीत्, तथाच तैत्तिरियाः, अग्ने त्वयोज्यायांस इत्यनुवाके सोऽपः प्राविशदित्यग्नेरप्सु प्रवेशनमामनन्ति, लतागुल्मवृक्षमूलादीनामौषधानां वृष्टिजन्यत्वेन जलवर्त्तित्वं प्रसिद्धं, विश्वभेषजीर्विश्वानि भेषजानि यासु तथाविधा आपोऽब्रवीत्। भेषजा, सुपां सुलुक् (पां ७। १। ३९।) इत्यादिना आकारः। विश्वशम्भुवं, भवतेरन्तर्भावितण्यर्थात् क्विप्, व्यत्ययेन पूर्वपदप्रकृतिस्वरत्वं, यद्वा, विश्वे सर्वेऽपि व्यापाराः सुखकरा यस्येत्यस्मिन्विग्रहे, बहुव्रीहौ विश्वं सञ्ज्ञायां (पां ६। २।१०६।) इति पूर्वपदान्तोदात्तत्वं, आपः, कर्म्मणि शसि प्राप्ते व्यत्ययेन जस्, अप्नृन्तृच् (पां ६। ४।११।) इत्यादिनोपधादीर्घः। विश्वभेषजीः, विश्वशम्भुरिति वत्॥ २०॥ इति प्रथमस्य द्वितीये एकादशो वर्गः॥ ११॥

एकविंशीमृचमाह आपः पृणीतेति। हे आपो, मम तन्वे शरीरार्थं, वरूथं रोगनिवारकं भेषजमौषधं पृणीत पूरयत, च किञ्च ज्योक् चिरं सू दृशे द्रष्टुं, नीरोगा वयं शक्नुवामेति शेषः। पृणीत, पॄ पालनपूरणयोः, लोण्मध्यमपुरुषबहुवचनं थ, तस्य, तस्थस्थमिपान्ताम् तम् तामः (पां ३। ४। १०१।) इति तादेशः, क्र्यादिभ्यः श्ना, घादीनां ह्रस्वः, ईहल्यघोः (पां ६। ४।११३।) इति ईत्वं, ऋवर्णाच्चेति वक्तव्यमितिवार्त्तिकेन णत्वं, सतिशिष्टस्वरबलीयस्त्वमन्यत्र विकरणेभ्य इति परिभाषया तिङ्स्वरः शिष्यते, आप इत्यस्यामन्त्रितं पूर्वमविद्यमानवदित्यविद्यमानवत्त्वे पादादित्वान्निघाताभावः। वरूथं, वृञ् वरणे, जॄवृञ्भ्यामूथन्नित्यौणादिक ऊथन्प्रत्ययः, नित्त्वादाद्युदात्तः। तन्वे, ङिति ह्रस्वश्च (पां १। १। ६।) इति नदीसञ्ज्ञा, याड्डित्यडागमाभावः, उदात्तयणो हल्पूर्व्वात् (पां ६। १।१७४।) इति विभक्त्युदात्तत्वे प्राप्ते व्यत्ययेन, उदात्तस्वरितयोर्यणः (पां ८। २ । ४।) इत्यादिना स्वरितत्वं। दृशे, दृशेविख्ये च (पां ३। ४। ११।) इति तुमर्थे निपात्यते॥ २१॥

१२२॥ इदमापः प्रवहत यत्किञ्च दुरितं मयि।
यद्वाहमभिदुद्रोह यद्वा शेप उतानृतं॥
१२३॥ आपो अद्यान्वचारिषं रसेन समगस्महि।
पयस्वानग्न आगहि तं मा संसृज वर्चसा॥

पशौ मार्जने इदमापः प्रवहतेत्येषा विनियुक्ता, ऋतायां वपायामिति खण्डे सूचितं, इदमापः प्रवहतेति, एषैव अवभृतेष्टौ स्नाने विनियुक्ता, पत्नीसंयाजैश्चरित्वेति खण्डे इदमापः प्रवहत सुमिचियान आप ओषधयः सन्त्विति सूचितं, तामेतां सूक्ते द्वाविंशीमृचमाह इदमाप प्रवहतेति। मयि यजमाने यत्किञ्च दुरितं अज्ञाननिष्पन्नं, वा अथवा अहं यजमानः, अभिदुद्रोह सर्वतो बुद्धिपूर्वकं द्रोहं कृतवानस्मि, वा अथवा शेपे साधुजनं शप्तवानस्मि, इति यदस्ति, उत अपि च अनृतमुक्तवानिति यदस्ति, तदिदं सर्वमपराधजातं प्रवहत मत्तोऽपनीय प्रवाहेणान्यतो नयत। मयि, मपर्यन्तस्य, त्वमावेकवचने (पां ७।२।९७।) इति मादेशे कृते, ऋतो गुणे (पां ६।१।९७।) इति पररूपे च सति, योऽचि (पां ७।२।८९।) इति दकारस्य यकारादेशः, एकादेशस्वरेण मकारात् परस्याकारस्योदात्तत्वं। दुद्रोह, द्रुह जिघांसायां, णलि, गुणे, द्विर्वचनकखहलादिशेषाः, लिति (पां ६।१।१९३।) इति प्रत्ययात् पूर्वस्योदात्तत्वं, यदृत्तान्नित्यं (पां ८।१।६६।) इति यदृत्तयोगान्निघाताभावः। शेपे, शप आक्रोशे, लिटि व्यत्ययेन तङ्, उत्तमैकवचनमिट्, टेरेत्वं, अत एकहल्मध्येऽनादेशादेर्लिटि (पां ६।४।१२०।) इत्येत्वाभ्यासलोपौ, प्रत्ययस्वरेणान्तोदात्तत्वं, पूर्ववन्निघाताभावः॥ २२॥

पशावाहवनीयोपस्थाने आपो अद्यान्वचारिषमित्येषा, मनोतायै सम्मेधित इति खण्डे सूचितं, एत्योपतिष्ठन्ते आपो अद्यान्वचारिषमिति, तामेतां सूक्ते चयोविंशीमृचमाह आपो अद्यान्वचारिषमिति। अद्यास्मिन्दिने अवभृथार्थमापोऽन्वचारिषं जलान्यनप्रविष्टोऽस्मि, प्रविश्य च रसेन जलसारेण समगस्महि सङ्गताः स्मः, हे अग्ने, पयस्वान् जलेन वर्त्तमानत्वेन पयोयुक्तस्त्वमागहि अस्मिन् कर्म्मण्यागच्छ, तं मा तादृशं स्नातं मां वर्चसा तेजसा संसृज संयोजय। आपः, कर्म्मणि शपि

॥ २४ ॥ सं माग्ने वर्चसा सृज सं प्रजया समायुषा ।
विद्युर्मे अस्य देवा इन्द्रो विद्यात्सह ऋषिभिः॥ १२ ॥

प्राप्ते व्यत्ययेन जस् । अचारिषं, चर गत्यर्थः, लुङि, च्लेः सिच् ( पां ३ । १ । ४४ । ) इति च्लेः सिच्, आर्द्धधातुकस्येड्वलादेः ( पां ७ । २ । ३५ । ) इति इट्, नेटि ( पां ७ । २ । ४ । ) इति वृद्धिप्रतिषेधे प्राप्ते, तदपवादतया, अतो लान्तस्य ( पां ७ । २ । २ । ) इत्युपधाया वृद्धिः । अगस्महि, समोगमृच्छिभ्यां ( पां १ । ३ । २९ । ) इत्यात्मनेपदं, च्लेः सिच्, मन्त्रेघसक्षरन्यशदह ( पां २ । ४ । ८० । ) इत्यादिना च्लेर्लुगभावश्छान्दसः, एकाच उपदेशेऽनुदात्तात् ( पां ७ । २ । १० । ) इतीट्प्रतिषेधः, वागमः, ( पां १ । २ । १३ । ) इति सिचः कित्त्वात्, अनुदात्तोपदेशे वनतितनोत्यादीनां ( पां ६ । ४ । ३७ । ) इत्यादिनानुनासिकलोपः । गहि, लोटि गमेः सिपो हि, अपित्त्वेन ङित्त्वात्, अनुदात्तोपदेशेत्यादिनानुनासिकलोपः, अतोहेः ( पां ६ । ४ । १०५ । ) इति हेर्लुङ्न भवति, असिद्धवदङ्गाभात् ( पां ६ । ४ । २२ । ) इति मलोपस्यासिद्धत्वात् ॥ २३ ॥

चतुर्विंशीमृचमाह सं माग्न इति । हे अग्ने, वर्चःप्रजायुर्भिर्मां संयोजय, देवाः सोमपातारः, अस्य मे यजमानस्य विद्युरनुष्ठानं जानीयुः, किञ्च इन्द्रश्च ऋषिगणैः सह ममानुष्ठानं विद्याज्ज्ञानीयात् । विद्युः, विद ज्ञाने, लिङि झेर्जुस्, यासुट्, लिङः सलोपः ( पां ७ । २ । ७९ । ) इति सकारलोपः, उस्यपदान्तात् ( पां ६ । १ । ९६ । ) इति परूपत्वं, यासुट उदात्तत्वेनैकादेश उकारोऽप्युदात्तः । अस्य, इदमोऽन्वादेशेऽशनुदात्तस्तृतीयादौ ( पां ७ । १ । १२ । ) इत्यशनुदात्तः, विभक्तिरपि सुत्वेनानुदात्ता । सह ऋषिभिरित्यत्र, ऋत्यकः ( पां ६ । १ । १२८ । ) इति प्रकृतिभावः ॥ २४ ॥ इति प्रथमस्य द्वीतये द्वादशो वर्गः ॥ १२ ॥

---

## अथ षष्ठोऽनुवाकः।

### चतुर्विंशर्चसूक्तं।

१११ कस्य नूनं कतमस्यामृतानां मनामहे चारु देवस्य नाम १ को नो मह्या अदितये पुनर्दात् पितरञ्च दृशेयं मातरञ्च ॥

प्रथममण्डलस्य षष्ठेऽनुवाके सप्त सूक्तानि। तत्र कस्य नूनमिति पञ्चदशर्चं प्रथमं सूक्तं, अजीगर्त्तपुत्रस्य शुनःशेफस्यार्षं, त्रैष्टुभं, अभित्वा देवेति टचो गायत्रः, आद्यायाः कायीत्यभिनिरुक्तत्वात् प्रजापतिर्देवता, अग्नेर्वयमित्यस्याग्निः, अभित्वा देवेत्यस्य टचस्य सविता, भगभक्तस्येत्येषा भगदेवताका वा, शेषा वारुणः। तथा चानुक्रान्तं, कस्य पञ्चेनाजीगर्त्तिः शुनः शेफः सप्तर्चिमो वैश्वामित्रो देवरातो वारुणान्तु त्रैष्टुभमादौ काय्यामेय्यौ, सावित्रस्तृचो गायत्रोऽख्यान्याभागी वेति। राजसूयेऽभिषेचनीयेऽहनि मरुत्वतीये परिसमाप्ते सति एतदादिकं सूक्तसप्तकमभिषिक्तस्य पुत्रादिभिः परिवृतस्य राज्ञः पुरस्ताद्धोत्रा आख्यातव्यं, तथाच सूत्रेऽभिहितं, संस्थिते मरुत्वतीये दक्षिणत आहवनीयस्य हिरण्यकशिपावासीनोऽभिषिक्ताय पुत्रामात्यपरिवृताय राज्ञे शौनःशेफमाचक्षीतेति। ब्राह्मणमभवति, तदेतत् परं ऋक्शतगाथं शौनःशेफमाख्यानं तद्धोता राज्ञेऽभिषिक्तायाचष्टे, हिरण्यकशिपावासीन आचष्टे, हिरण्यकशिपावासीनः प्रतिगृणातीति। तस्मिन् सूक्ते प्रथमामृचमाह कस्य नूनमिति। कस्येत्यनयर्चा शुनःशेफो यूपे बद्धः कान्दिशीकः कन्देवमुपधावानीति विचिकित्सति, तथाचाम्नायते, हन्ताहं देवता उपधावानीति, स प्रजापतिमेव प्रथमं देवतानामुपससारेति, वयं शुनःशेफनामका अमृतानां देवानां मध्ये कतमस्य किञ्जीतीयस्य च देवस्य चारु शोभनं नाम मनामहे उच्चारयामः, को देवो मां मुमूर्षुं पुनरपि मह्यै महत्यै अदितये पृथिव्यै दात् दद्यात् तेन दानेनाहममृतः सन् पितरं मातरञ्च दृशेयं पश्येयं। कतमस्य, किं शब्दात्, वा बहूनां जाति परिप्रश्ने डतमच् (पां ५। ३। ९३।) इति डतमच् प्रत्ययः, चितः (पां ६। १। १५९।) इत्यन्तोदात्तत्वं, अमृतानां,

१२१ अग्नेर्वयं प्रथमस्यामृतानां मनामहे चारु देवस्य नाम १ स नो मह्या अदितये पुनर्दात्पितरञ्च दृशेयं मातरञ्च ॥

१३१ अभि त्वा देव सवितरीशानं वार्य्याणां १ सदावन्भागमीमहे ॥

नञ्सुभ्यां ( पां ६ । २ । १७१ । ) इत्युत्तरपदान्तोदात्तत्वे प्राप्ते, नञो-जरमरमित्रमृताः ( पां ६ । २ । ११६ । ) इत्युत्तरपदाद्युदात्तत्वं । मना-महे, मन ज्ञाने, व्यत्ययेन शप्, पादादित्वादनिघातः। मह्यै, उदात्तयणो-हल्पूर्वात् ( पां ६ । १ । १७४ । ) इति विभक्तेरुदात्तत्वं । दात्, गातिस्था ( पां २ । ४ । ७७ । ) इति सिचो लुक्, बहुलं छन्दस्यमाङ्यो-गेऽपि ( पां ६ । ४ । ७५ । ) इत्यडागमाभावः। दृशेयं, दृशिर् प्रेक्षणे, आशीर्लिङि मिपोऽम्, दृशेरग्वक्तव्य इति वार्त्तिकेनाक्प्रत्ययः, शपोऽप-वादः, कित्त्वाल्लघूपधगुणाभावः, लिङ्याशिष्यङ् ( पां ३ । १ । ८६ । ) इत्यङ् स हि, ऋदृशोऽङिगुणः ( पां ७ । ४ । १६ । ) इति गुणः स्यात्, यासु-ट्सलोपः, अतो येयः ( पां ७ । २ । ८० । ) इति इयादेशः, आद्गुणः ( पां ६ । १ । ८७ ) इति गुणः, यासुट्स्वरेणैकार उदात्तः । मातरञ्चे-त्यत्र चशब्दाद्दृशेयमित्यनुषज्यते, अतस्तदपेक्षयैषा तिङ्विभक्तिः प्रथ-मेति, चवायोगे प्रथमा ( पां ८ । १ । ५९ । ) इति न निहन्यते ॥ १ ॥

द्वितीयामृचमाह अग्नेर्वयमिति । इत्थं प्रथमयर्च्चा विचिकित्सां कृत्वा प्रजापतेः सकाशात् तन्देवमग्निन्निश्चित्यानया तुष्टाव । तथाच श्रूयते, तं प्रजापतिरुवाचाग्निर्देवानां नेदिष्ठस्तमेवोपधावेति, सोऽग्नि-मुपससाराग्नेर्वयं प्रथमस्यामृतानामित्येतयर्च्चेति पूर्ववद्योजना। दात्, ददातु, दृशेयं पश्यामीत्येवमाशीःपरत्वेन पदद्वयं योज्यं ॥ २ ॥

प्रथमे छन्दोमे वैश्वदेवशस्त्रे अभि त्वा देव सवितरिति सावित्र-स्तृचः सूक्तस्थानीयः । अथ छन्दोमा इति खण्डे अभित्वा देव सवितः प्रेतां यज्ञस्य शम्भुवेति सूत्रितं, अभित्वेत्येषा अग्निमन्थनेऽपि विनि-युक्ता, प्रातर्वैश्वदेवमिति खण्डे अभित्वादेवसवितर्मही द्यौः पृथिवी च न इति सूत्रितं । श्रूयते च, अभित्वा देव सवितरिति सावित्रीमन्वाहेति । तथा प्रवर्ग्येऽप्येषैव विनियुक्ता । अथोत्तर इति खण्डे ऽभित्वा देव

१४१ यश्चिद्धि त इत्था भगः शशमानः पुरा निदः १
अद्वेषो हस्तयोर्दधे ॥

सवितः समीवत्सन्नमाऽभिरिति सूचितं । तथा ग्रावस्तोत्रेऽपि एतस्मिन् काले ग्रावस्तुदिति खण्डे मध्यमखरेणेदं सवनमभित्वा देव-सवितरिति सूचितं, तामेतां सूक्ते तृतीयामृचमाह अभित्वा देव सवितरिति । अग्निना प्रेरितः सन् सवितारमभित्वेत्यनेन ऋचेन प्रार्थयते, तथैव श्रूयते तमग्निरुवाच सविता वै प्रसवानामीशे, तमे-वोपधावेति, सवितारमुपससारामित्वा देवसवितरित्यनेन ऋचेनेति। हे सदावन् सर्वदा रक्षक, हे सवितर्देव वार्याणां वरणीयानां धनाना-मीशानं स्वामिनं त्वां प्रति भागं भजनीयं धनं अभि सर्वत ईमहे याचामहे । ईशानं, ईश ऐश्वर्ये, लटः शानच्, तास्यनुदात्तेन्ङिद-दुपदेशात् ( पां ६ । १ । १८६ । ) इति लसार्वधातुकानुदात्तत्वे धातु-स्वरः। वार्याणां, वृञ् सम्भक्तौ, ऋहलोर्ण्यत् ( पां ३ । १ । १२४ । ) इति ण्यत्प्रत्ययः, ईडवन्दवशंसदुहांण्यतः ( पां ६ । १ । २१४ । ) इत्या-द्युदात्तत्वं। अवन्, आमन्त्रितनिघातः । भागं, कर्षात्वतः ( पां ६ । १ । १५६ । ) इति घञन्त उदात्तः ॥ ३ ॥

चतुर्थीमृचमाह यश्चिद्धि त इति । हे सवितर्यो भगो भजनीयो धनविशेषस्ते तव हस्तयोर्दधे धृतोऽभूत्, तद्धनविशेषमीमह इति पूर्वत्रान्वयः । चिच्छब्दः पूजार्थे, हिशब्दः प्रसिद्धौ, धनस्य पूज्यत्वं सर्वत्र प्रसिद्धं, तामेव पूज्यत्वप्रसिद्धिं विशदयति, इत्था शशमानोऽनेन प्रकारेण शस्यमानः स्तूयमानः, धनस्तुतिप्रकारश्च सर्वे जानन्ति। ननु स्वकीये धने वैरिभिरपहृते सति वैरिगृहीतं धनं सर्वो लोको निन्दति द्वेष्टि च, अतो धनस्तुतिर्न नियतेत्याशङ्क्याह निदःपुरा अद्वेषः, निन्दायाः पूर्वं स्वकीयत्वेन व्यवस्थिते सति तदानीं द्वेषरहितः, तस्मा-त्स्वकीयत्वाभिप्रायेण स्तूयमानत्वमुक्तमित्यर्थः । इत्था, प्रकारवचने, इदमस्थमुः ( पां ५ । ३ । २४ । ) इति थमुः, सुपां सुलुक् पूर्वसवर्णा (पां ७ । १ । ३९ ।) इत्यादिना विभक्तेर्डादेशः, टिलोपः, उदात्तनिवृत्ति-स्वरेणाकार उदात्तः। शशमानः, शशु स्तुतगतौ, इह स्तुत्यर्थः, ताच्छील्य-वयोवचनशक्तिषुचानश् (पां ३ । २ । १२९ ।) इति ताच्छीलिकश्चानश्, कर्तरि शप्, चितः ( पां ६ । १ । १६२ । ) इत्यन्तोदात्तत्वं। निदः,

१५१ भगभक्तस्य ते वयमुदशेम तवावसा १
मूर्द्धानं राय आरभे ॥ १३ ॥
१६१ न हि ते क्षत्रं न सहो न मन्युं वयश्च नामी पतयन्त
आपुः १ नेमा आपो अनिमिषं चरन्तीर्न ये
वातस्य प्रमिनन्त्यभ्वं ॥

णिदि कुत्सायां, सम्पदादिलक्षणः क्विप्, सावेकाचः (पां ६ । १ । ६८ ।) इत्यादिना पञ्चम्या उदात्तत्वं । अद्वेषः, न विद्यते द्वेषोऽस्येति बहुव्रीहौ, नञ्सुभ्यां (पां ६ । २ । १७२ ।) इत्युत्तरपदान्तोदात्तत्वं । दधे, कर्म्मणि लिट्, तस्यार्द्धधातुकत्वेन, अभ्यस्तानामादिः (पां ६ । १ । १८९ ।) इत्याद्युदात्तो न भवति, प्रत्ययस्वर एव शिष्यते, यद्वृत्तान्नित्यं (पां ८ । १ । ६६ ।) इति यद्वृत्तयोगान्निघाताभावः ॥ ४ ॥

पञ्चमीमृचमाह भगभक्तस्य त इति । हे सवितस्ते त्वदीया वयं शुनःशेफनामानो भगभक्तस्य धनेन संयुक्तस्य तवावसा रक्षणेन उदशेम उत्कर्षेण व्याप्नुमः, किं कर्त्तुं रायो धनस्य मूर्द्धानमुत्कर्षमारभे प्रारब्धुं धनिकत्वप्रसिद्ध्या व्याप्ता भूयामेत्यर्थः । भगशब्दो वृषादित्वादाद्युदात्तः, तृतीया कर्म्मणि (पां ६ । २ । ४८ ।) इति पूर्वपदप्रकृतिस्वरत्वं । अशेम, अशू व्याप्तौ, लिङ्, व्यत्ययेन परस्मैपदं शप् । रायः, ऊडिदम्पदाद्यप्पुम् (पां ६ । १ । १७१ ।) इत्यादिना षष्ठ्या उदात्तत्वं । आरभे, कृत्यार्थे तवैकेन् (पां ३ । ४ । १४ ।) इत्यादिना तुमर्थे केन्प्रत्ययः, नित्स्वरेणाद्युदात्तत्वं ॥ ५ ॥ इति प्रथमस्य द्वितीये त्रयोदशो वर्गः ॥ १३ ॥

षष्ठीमृचमाह न हि ते क्षत्रमिति । अथ सवित्रा प्रेरितः शुनःशेफः एतदादिसूक्तशेषेण उत्तरेण च सूक्तेन वरुणं तुष्टाव । तथाच श्रूयते तं सवितोवाच वरुणाय वै राज्ञे नियुक्तोऽसि तमेवोपधावेति, स वरुणराजानमुपससारात उत्तराभिराभिरेकत्रिंशतेति । हे वरुण पतयन्तः प्रौढे वियत्युत्पतन्तोऽमी दृश्यमाना वयश्चन श्येनादयः पक्षिणोऽपि ते क्षत्रं त्वदीयं शरीरबलं नह्यापुर्नैवप्राप्ताः, त्वत्सदृशं शरीरबलं पक्षिणामपि नास्तीत्यर्थः, तथा सहस्त्वदीयं पराक्रमं तव सामर्थ्यमपि नाप्रापुः, तथा मन्युं त्वदीयं कोपमपि नाप्रापुः, त्वयि क्रुद्धे सति सोढुमशक्ता इत्यर्थः । अनिमिषं सर्वदा चरन्तीः प्रवाहरूपेण गच्छन्त्य

१७१ अबुध्ने राजा वरुणो वनस्योर्ध्वं स्तूपं ददते पूतदक्षः। नीचीनाः स्थुरुपरि बुध्न एषामस्मे अन्तर्निहिताः केतवःस्युः॥

आपस्त्वदीयं बलं नाप्नुवन्, वातस्य वायोर्यं गतिविशेषास्त्वदीयमश्वं वेगं न प्रमिनन्ति न हिंसन्ति, अतिक्रमं कर्तुं न शक्ता इत्यर्थः, तेऽपि नाप्नुरिति पूर्वत्रान्वयः। पतयन्तः, पत्लृ गतौ, चुरादिरदन्तः, लटः शतृ, गुणायादेशौ, अदुपदेशाल्लसार्वधातुकानुदात्तत्वे शिच्स्वरः। आपुः, आप्लृ व्याप्तौ, लिट उसि द्विर्भावहलादिशेषौ, अत आदेः (पां ७। ४। ७०।) इत्यात्वं, अत्र न सहो न मन्युमित्यादिभिरापुरित्यस्य सम्बन्धात् तदपेक्षया प्राथम्याच्च, चादिलोपे विभाषा (पां ८। १। ६३।) इति प्रथमा तिङ्विभक्तिर्न निहन्यते। चरन्तीः, वाछन्दसि (पां ६। १। १०६।) इति पूर्वसवर्णदीर्घः। प्रमिनन्ति, मीञ् हिंसायां, क्र्यादिभ्यः श्ना श्नाभ्यस्तयोरातः (पां ६। ४। ११२।) इत्याकारलोपः, मीनातेर्निगमे (पां ७। ३। ८१।) इति ह्रस्वत्वं, प्रत्ययस्वरः, तिङि चोदात्तवति (पां ८। १। ७१।) इति गतिरनुदात्तः, यदुत्तान्नित्यं (पां ८। १। ६६।) इति यदुत्तयोगादनिघातः॥ ६॥

सप्तमीमृचमाह अबुध्ने राजेति। पूतदक्षः शुद्धबलो वरुणो राजा अबुध्ने मूलहरितेऽन्तरिक्षे तिष्ठन् वनस्य वननीयस्य तेजसस्तूपं सङ्घं ऊर्ध्वमुपरि देशे ददते धारयन्ति, नीचीनाः स्थुरूर्ध्वदेशे वर्त्तमानस्य वरुणस्य रश्मय इत्याध्याहार्य्यं, ते ह्यधोमुखास्तिष्ठन्ति, एषां रश्मीनां बुध्नो मूलं उपरि तिष्ठतीति शेषः, तथा सति केतवः प्रज्ञापकाः प्राणा अस्मे अस्मास्वन्तर्निहिताः स्थापिताः स्युर्मरणं न भविष्यतीत्यर्थः। अबुध्ने, न विद्यते बुध्नो मूलमस्येति बहुव्रीहौ, नञ्सुभ्यां (पां ६। २। १७२।) इत्युत्तरपदान्तोदात्तत्वं। स्तूपं ददते, ददातिर्भौवादिकः। नीचीनाः, निपूर्वादञ्चतेः, ऋत्विग्दधृक् (पां ३। २। ५९।) इति क्विन्, अनिदितां (पां ६। ४। २४।) इति नलोपः, न्यच्शब्दात्स्वार्थे, विभाषाञ्चेरदिक्स्त्रियां (पां ५। ४। ८।) इति खः, आयन्नेयीनीयियः (पां ७। १। २।) इत्यादिना तस्य ईनादेशः, आयन्नादिषु उपदेशिवद्वचनं स्वरसिद्ध्यर्थमिति वचनादीकार उदात्तः, अचः (पां ६। ४।

१८। उरु हि राजा वरुणश्चकार सूर्याय पन्थामन्वेतवा उ । अपदे पादा प्रतिधातवेऽकरुतापवक्ता हृदयाविधश्चित् ॥

१३८।) इत्यकारलोपे, चौ (पां ६ । ३ । १३८।) इति दीर्घत्वं । स्थुः, गातिस्थाघुपाभूभ्यः (पां २ । ४ । ७७।) इत्यादिना सिचो लुक्, आतः (पां ३ । ४ । ११०।) इति झेर्जुसादेशः, उस्य पदान्तात् (पां ६ । १ । ९६।) इति पररूपत्वं, बऋलं छन्दस्यमाङ्योगेऽपि (पां ६ । ४ । ७५।) इत्यडागमाभावः । अस्से, सुपांसुलुक् पूर्वसवर्णाच्छेयाडाड्यायाजालः (पां ७ । १ । ३९।) इति सप्तम्याः शे आदेशः । निहितः, गतिरनन्तरः (पां ६ । २ । ४९।) इति गतेः प्रकृतिस्वरत्वं । स्थुः, अस्तेर्लिङि, असोरल्लोपः (पां ६ । ४ । १११।) इत्यसोऽकारलोपः ॥ ७ ॥

अष्टमीमृचमाह उरुं हीति । वरुणो राजा सूर्याय सूर्यस्य पन्थां मार्गं उरुं विस्तीर्णं चकार । हिशब्दः प्रसिद्धौ, उत्तरायणाद्दक्षिणायनमार्गस्य विस्तारः प्रसिद्धः । किमर्थमेवं कृतवानिति तदुच्यते, अन्वेतवा उ, अनुक्रमेणोदयास्तमयौ गन्तुमेव, तथा अपदे पादरहितेऽन्तरिक्षे पादा प्रतिधातवे, पादौ प्रक्षेप्तुं अकः मार्गं कृतवान्, पूर्वत्र रथस्य मार्गः, अत्र पादयोरिति शेषः, यद्वा अपदे यूपे बद्धेन मया गन्तुमशक्ये भूप्रदेशे पादौ प्रक्षेप्तुमुपायं बन्धविमोचनरूपं करोत्वित्यर्थः । उत अपि च हृदयाविधश्चित् शत्रोरपि अपवक्ता अपवदिता निराकर्त्ता भवतु । चकारः, लित्स्वरेणाकारउदात्तः, हि च (पां ८ । १ । ३४।) इति निघातप्रतिषेधः । पन्थां, पथिमथ्यृभुक्षामात् (पां ७ । १ । ८५।) इति द्वितीयायामपि व्यत्ययेनात्वं, पथिन्शब्दस्य पतस्य चेति इनिप्रत्ययान्तत्वेनान्तोदात्तत्वे प्राप्ते, पथिमथोः सर्वनामस्थाने (पां ६ । १ । १९९।) इत्याद्युदात्तत्वं । अन्वेतवै, अनुपूर्वादेतेः, तुमर्थेसेसेन् (पां ३ । ४ । ९।) इति तवैप्रत्ययः, तवैचान्तश्चयुगपत् (पां ६ । २ । ५१।) इत्याद्यन्तयोरुदात्तत्वं । पादा, सुपां सुलुक् (पां ७ । १ । ३९।) इत्याकारः । प्रतिधातवे, दधातेस्तुमर्थे सेसेनित्यादिसूत्रेण तवेन्प्रत्ययः, तादौचनिति (पां ६ । २ । ५०।) इत्यादिना गतेः प्रकृतिस्वरत्वं । अकः, करोतेः, छन्दसिलुङ्लङ्लिटः (पां ३ । ४ । ६।)

१६१ शतन्ते राजन् भिषजः सहस्रमुर्वी गभीरा सुमतिष्टे अस्तु । बाधस्व दूरे निर्ऋतिं पराचैः कृतं चिदेनः प्रमुमुग्ध्यस्मत् ॥

इति लोडर्थे लुङ्, तस्य तिप्, मन्त्रेघसे ( पां २ । ४ । ८० । ) इत्यादिना च्लेर्लुक्, गुणो रपरत्वं, हलङ्याभ्यः ( पां ६ । १ । ६८ । ) इति तिपो लोपः, अडागमः । हृदयाविधः, हृञ् हरणे, वृक्षोः षुक्दुकौचेत्यौणादिकः कयन्प्रत्ययो दुगागमश्च, व्यध ताडने, क्विप्, नहिवृतिवृषिव्यधि ( पां ६ । ३ । ११६ । ) इत्यादिना पूर्वपदस्य दीर्घत्वं, कृदुत्तरपदप्रकृतिस्वरत्वं ॥ ८ ॥

नवमीमृचमाह शतन्ते राजन् भिषज इति । हे राजन् वरुण, ते तव शतं सहस्रं भिषजो बन्धनिवारकाणि शतसहस्रसङ्ख्यकान्यौषधानि वैद्या वा सन्ति, ते तव सुमतिरस्मदनुग्रहबुद्धिरुर्वी विस्तीर्णा गभीरा गाम्भीर्य्योपेता स्थिरास्तु, निर्ऋतिमस्मदनिष्टकारिणीं पापदेवतां पराचैः पराङ्मुखीं कृत्वा दूरेऽस्मत्तो व्यवस्थिते देशे स्थापयित्वा तां बाधस्व, कृतच्चिदस्माभिरनुष्ठितमपि एनः पापमस्मत् प्रमुमुग्धि प्रकर्षेण मुक्तं नष्टं कुरु । सुमतिष्टे, तादौ च निति ( पां ६ । २ । ५० । ) इति पूर्वपदप्रकृतिस्वरत्वे प्राप्ते, मनक्तिन् ( पां ६ । २ । १५१ । ) इत्यादिनोत्तरपदान्तोदात्तत्वं, संहितायां विसर्ज्जनीयस्य सकारस्य, युष्मत्तत्ततक्षुः ष्वन्तः पादं ( पां ८ । ३ । १०३ । ) इति षत्वं । बाधस्व, बाधृ विलोडने, श्नुप्रः पित्त्वादनुदात्तत्वं, तिङश्च सावधातुकस्वरेण धातुस्वर एव शिष्यते । निर्ऋतिं, तादौ च निति ( पां ६ । २ । ५० । ) इति गतेः प्रकृतिस्वरत्वं । मुमुग्धि, मुचॢ मोक्षणे, बहुलं छन्दसीति श्नुप्रः श्लुः, झमलभ्योर्हेर्धिः ( पां ६ । ४ । १०१ । ) इति हेर्धिरादेश्श्लुप्रस्यापित्त्वेन ङित्त्वादुणाभावः, चोः कुः ( पां ८ । २ । ३० । ) इति कुत्वं ॥ ९ ॥

१ १० १ अमी य ऋक्षा निहितास उच्चा नक्तं ददृश्रे कुहचिद्दिवेयुः १ अदब्धानि वरुणस्य व्रतानि विचाकशच्चन्द्रमा नक्तमेति ॥ १४ ॥

दशमीमृचमाह अमी य इति। अमी रात्रावस्माभिर्दृश्यमाना ऋक्षाः सप्त ऋषयः, तथाच वाजसनेयिन आमनन्ति, ऋक्षा इति ह स्म वै पुरा सप्त ऋषीनाचक्षत इति, यद्वा ऋक्षाः सर्वेऽपि नक्षत्रविशेषाः, ऋक्षास्त्रिभिरिति नक्षत्राणामिति यास्केनोक्तत्वात्, उच्चैरुपरि द्युप्रदेशे निहितासः स्थापिता ये सन्ति, ते ऋक्षा नक्तं रात्रौ ददृश्रे सर्वैरपि दृश्यन्ते, दिवा अहनि कुहचिदीयुः क्वापि गच्छेयुर्न दृश्यन्त इत्यर्थः। वरुणस्य राज्ञो व्रतानि कर्म्माणि नक्षत्रदर्शनादिरूपाणि अदब्धानि केनाप्यहिंसितानि, किञ्च वरुणस्याज्ञयैव चन्द्रमा नक्तं रात्रौ विचाकशत्, विशेषेण दीप्यमान एति गच्छति। निहितासः, आज्जसेरसुक् (पां ७।१।५०।) इत्यसुगागमः, थाथघञ् (पां ६।२।१४४।) इति थाथादिस्वरेणोत्तरपदान्तोदात्तत्वे प्राप्ते, गतिरनन्तरः (पां ६।२।४९।) इति गतेः प्रकृतिस्वरत्वं। ददृश्रे, दृशेर्लिटि, इरयोरे (पां ६।४।७६।) इति रे आदेशः व्यत्ययेनाद्युदात्तत्वं, यद्वृत्तान्नित्यं (पां ८।१।६६।) इति यद्वृत्तयोगादनिघातः। कुह, वाह चच्छन्दसि (पां ५।३।१३।) इति किं शब्दादुत्तरस्य त्रलो हादेशः, कुतिहोः (पां ७।२।१०४।) इति किं शब्दस्य कु आदेशः, स्थानिवद्भावाल्लित्स्वरेणाद्युदात्तत्वं। विचाकशत्, कशेर्दीप्त्यर्थाद्यङ्लुगन्ताच्छतृप्रत्ययः, अभ्यास्तानामादिः (पां ६।२।१८९।) इत्याद्युदात्तत्वं, समासे कृत्स्वरः, यद्वा काशतेर्वा व्यत्ययेनोपधाह्रस्वत्वं। चन्द्रमाः, चन्द्रेमोडिदित्यौणादिकसूत्रेण चन्द्रोपपदान्माङो असिः प्रत्ययस्तस्य डित्त्वेन टिलोपः, कृदुत्तरपदप्रकृतिस्वरत्वे प्राप्ते, गतिकारकोपपदयोः पूर्वपदप्रकृतिस्वरत्वञ्चेति पूर्वसूत्रात् पूर्वपदप्रकृतिस्वरत्वमनुवर्त्तते, तेन पूर्वपदप्रकृतिस्वरः, दासीभारादित्वाद्वा पूर्वपदप्रकृतिस्वरत्वं ॥ १० ॥ इति प्रथमस्य द्वितीये चतुर्द्दशो वर्षः ॥ १४ ॥

---

१११। तत्वा यामि ब्रह्मणा वन्दमानस्तदाशास्ते यजमानो हविर्भिः। अहेलमानो वरुणेह बोध्युरुशंस मा न आयुः प्रमोषीः॥

११२। तदिन्नक्तं तद्दिवा मह्यमाहुस्तदयं केतो हृद आविचष्टे। शुनःशेपो यमह्वदृभीतः सो अस्मान्राजा वरुणो मुमोक्तु॥

एकादशिनस्य वारुणस्य पशोर्वपामुरोडाशयोस्तत्त्वायामीति द्वे ऋचौ याज्ये, सूचितच्च, तत्त्वा यामि ब्रह्मणा वन्दमान इति द्वे अस्तभ्नाद्यामिति, वरुणप्रघासेषु वारुणस्य हविषो याज्या तत्त्वा यामीत्येषा, पञ्चम्यां पौर्णमास्यामिति खण्डे सूचितं इमं मे वरुण श्रुधि तत्त्वा यामि ब्रह्मणा वन्दमान इति। तामेतां सूक्ते एकादशीमृचमाह तत्त्वा यामीति। हे वरुण, मुमूर्षुरहं ब्रह्मणा वन्दमानो वेदेन स्तुवन्, त्वां प्रति तदायुर्याचे, सर्वत्र यजमानोऽपि हविर्भिस्तदायुराशास्ते प्रार्थयते, त्वच्चेह कर्म्मणि अहेलमानः, अनादरमकुर्वन् बोधि, अस्मदभेप्सितं बुध्यस्व, हे उरुशंस, बहुभिः स्तुत्य, नोऽस्मदीयमायुर्मा प्रमोषीः, प्रमुषितं मा कुरु। सप्तदशसङ्ख्यकेषु याज्याकर्म्मसु ईमहे यामीति पठितं, च शब्दलोपश्छान्दसः। अहेलमानः, हेडृ अनादरे, अदुपदेशाल्लसार्वधातुकानुदात्तत्वे सति धातुस्वरः शिष्यते, ततो नञ्समासे अव्ययपूर्वपदप्रकृतिस्वरत्वं। बोधि, बुध अवगमने, लोटः सेर्हिः, बहुलं छन्दसीति विकरणस्य लुक्, वा छन्दसि (पां २। ४। ९८।) इत्यपित्त्वाभावेन ङित्त्वाभावाल्लघूपधगुणः, ऊर्ध्वस्योर्हेर्धिः (पां ६। ४। १०१।) इति हेर्धिरादेशः, धातोरन्तलोपश्छान्दसः। मोषीः, मुष स्तेये, लोडर्थे छान्दसो लुङ्, वदव्रजहलन्तस्याचः (पां ७। २। ३।) इति प्राप्ताया वृद्धेः, नेटि (पां ७। २। ४।) इति प्रतिषेधे सति लघूपधगुणः, बहुलं छन्दस्यमाङ्योगेऽपि (पां ६। ४। ७५।) इत्यडभावः॥ ११॥

द्वादशीमृचमाह तदिन्नक्तमिति। तदित्तदेव वरुणविषयं स्तोत्रं, नक्तं रात्रौ, मह्यं शुनःशेपाय, आहुः, कर्त्तव्यत्वेनाभिज्ञाः कथयन्ति, तथा दिवापि तदेवाहुः, हृदस्तदीयमनसो निष्पन्नोऽयं केतः प्रज्ञाविशेषो

१ १३ १ शुनःशेपो ह्यह्वद्गृभीतस्त्रिष्वादित्यं द्रुपदेषु बद्धः १ अवैनं राजा वरुणः समृज्याद्विद्वाँ अदब्धो विमुमोक्तु पाशान् ॥

ऽपि तदेव कर्त्तव्यत्वेनाविचष्टे, सर्वतो विशेषेण प्रकाशयति। गृभीतो गृहीतो यूपबद्धः शुनःशेप एतन्नामको जनो यं वरुणमकृत् आह्वतवान्, स वरुणो राजा अस्मान् शुनःशेपान् मुमोक्तु, बन्धान्मुक्तान् करोतु। मन्त्रं, ऽयि च ( पां ६ । १ । २१२ । ) इत्याद्युदात्तत्वं। आऽह्वः, ह्वयः पञ्चानां ( पां ३ । ४ । ८४ । ) इत्यादिना ह्वयो लटि भेरुसादेशः, धातोराह्वादेशश्च । ह्वदः, यद्ह्नोमास्ह्वन्निश् ( पां ६ । १ । ६३ । ) इत्यादिना हृदयशब्दस्य ह्वदादेशः, ऊडिदम्पदादप्युम् ( पां ६ । १ । १७१ । ) इति पञ्चम्या उदात्तत्वं। शुनःशेपः, श्वन्नुक्षन्नित्यौणादिककनिन्प्रत्ययान्तः श्वन्शब्दः, दृङ्शीभ्यां रूपसाङ्ग्ययोः पुट्चेत्यौणादिकसपुडागमासुन्नन्तः शेपशब्दः, शुन इव शेपो यस्येति समासे, शेपपुच्छसाङ्गूलेषु शुनः सञ्ज्ञायां षधा अलुग्वक्तव्य इति वार्त्तिकेन षधा अलुक्, पूर्वपदप्रकृतिस्वरत्वे प्राप्ते, उभे वनस्पत्यादिषु युगपत् ( पां ६ । २ । १४० । ) इति पूर्वोत्तरपदयोर्युगपत्प्रकृतिस्वरत्वं। अकृत्, क्रेर्ज्ञोलुङि, लिपि सिचि कृच्च ( पां ३ । १ । ५३ । ) इति च्लेरङादेशः, आतो लोप इटि च ( पां ६ । ४ । ६४ । ) इत्याकारलोपः, अडागमः, उदात्तः, यदृत्तयोगादनिघातः । गृभीतः, हृग्रहोर्भश्छसीति ह्रस्य भत्वं। सो अस्मान्, प्रकृत्यान्तः पादमव्यपरे ( पां ६ । १ । ११५ । ) इति प्रकृतिभावः। मुमोक्तु, बज्झलं छन्दसीति विकरणस्य शुः ॥ १२ ॥

त्रयोदशीमृचमाह शुनःशेपो ह्यक्रदिति । गृभीतो बन्धनाय गृहीतस्त्रिसङ्ख्यकेषु द्रुपदेषु द्रोः काष्ठस्य यूपस्य पदेषु प्रदेशविशेषेषु बद्धः शुनःशेप आदित्यं अदितेः पुत्रं यं वरुणमक्रदाह्वतवान्, हि यस्मादेवं तस्मात् स वरुणो राजा एनं शुनःशेपमबसस्रज्यात्, अवस्रष्टं बन्धनादिमुक्तं करोतु। विमोकप्रकार एव स्पष्टीक्रियते, विद्वान् विमोकप्रकाराभिज्ञः, अदब्धः केनाप्यहिंसितो वरुणः, पाशान् बन्धनरज्जुविशेषान् विमुमोक्तु, विच्छिद्यैनं मुक्तं करोतु। त्रिषु, षट्त्रिचतुर्भ्यो हलादिः ( पां ६ । १ । १७९ । ) इति विभक्तेरुदात्तत्वं, संहितायां,

१ १४ १ अव ते हेलो वरुण नमोभिरवयज्ञेभिरीमहे हविर्भिः १ क्षयन्नस्मभ्यमसुर प्रचेता राजन्नेनांसि शिश्रथः कृतानि ॥

उदात्तस्वरितयोर्यणः स्वरितोऽनुदात्तस्य (पां ८।१।४।) इति पर आकारः स्वर्य्यते। सस्रज्यात्, सृज विसर्गे, प्रार्थनायां लिङ्, बहुलं छन्दसीति विकरणस्य श्लुः। विद्वान्, विद ज्ञाने, विदेः शतुर्वसुः (पां ७।१।३६।) इति शतुर्वसुरादेशः, उगिदचां (पां ७।१।७०।) इति नुम्, हल्ङ्यादिसंयोगान्तलोपौ, संहितायां, दीर्घादटिसमानपादे (पां ८।३।९।) इति नकारस्य रुत्वं, आतोऽटिनित्यं (पां ८।३।३।) इति सानुनासिक आकारः। अदब्धः, दम्भु दम्भे, निष्ठायां, अनिदितां हल उपधायाः क्ङिति (पां ६।४।२४।) इति नलोपे, झषस्तथोर्धोधः (पां ८।२।४०।) इति धत्वं, अव्ययपूर्वपदप्रकृतिस्वरत्वं ॥ १३ ॥

अवमृथे अवते हेड इति द्वे ऋचौ वारुणस्य हविषो याज्यानुवाक्ये, पत्नी संयाजैश्चरित्वेति खण्डे सूत्रितं, अवते हेडो वरुण नमोभिरिति द्वे इति, तयोराद्यां सूक्ते चतुर्द्दशीमृचमाह अवते हेड इति। हे वरुण, ते तव हेलः क्रोधं, नमस्कारैरवेमहे अवनयाम, तथा यज्ञैः साङ्गानुष्ठानेन युज्यैर्हविर्भिरवेमहे, वरुणं परितोष्य क्रोधमपनयामः। हे असुर, अनिष्टक्षेपणशील, प्रचेतः प्रकर्षेण प्रज्ञायुक्त, राजन् दीप्यमान, वरुण, अस्मभ्यमस्मदर्थं क्षयन् अस्मिन् कर्म्मणि निवसन्, कृतान्यस्माभिरनुष्ठितान्येनांसि पापानि शिश्रथः, श्लथितानि शिथिलानि कुरु। हेलः, असुनो नित्त्वादाद्युदात्तत्वं। यज्ञेभिः, बहुलं छन्दसीति भिस ऐसादेशाभावः। ईमहे, ईङ् गतौ, विकरणस्य लुक्। क्षयन्, क्षि निवासगत्योः, लटः शतृ, व्यत्ययेन शप आद्युदात्तत्वं। असुर, असुक्षेपणे, असेरुरन्नित्यौणादिकसूत्रेणोरन्प्रत्ययः, आमन्त्रिताद्युदात्तत्वं। शिश्रथः, श्लथ दौर्बल्ये, चुरादिरदन्तः, छान्दसे लुङि च्लिः, णिश्रिदुस्रुभ्यः कर्त्तरि चङ् (पां ३।१।४८।) इति च्लेश्चङ्, द्विर्भावहलादिशेषौ, अग्लोपित्त्वात् सन्वद्भावाभावेऽपि, बहुलं छन्दसीत्यभ्यासस्येत्वं, पूर्ववदडभावः ॥ १४ ॥

१ १५ १ उदुत्तमं वरुण पाशमस्मद्वाधमं वि मध्यमं श्रथाय १ अथा वयमादित्य व्रते तवानागसो अदितये स्याम ॥

पञ्चदशीमृचमाह उदुत्तममिति। हे वरुण, उत्तममुत्कृष्टं शिरसि बद्धं पाशं, अस्मदस्मत्तः उच्छ्रथाय उत्कृष्य शिथिलं कुरु, अधमं निकृष्टं पादेऽवस्थितं पाशं अवश्रथाय अवच्छाय शिथिली कुरु, मध्यमं नाभिप्रदेशगतं पाशं विश्रथाय वियुज्य शिथिलीकुरु। अथानन्तरं हे आदित्य अदितेः पुत्र वरुण, वयं सुनःशेपाः, तव व्रते त्वदीये कर्म्मणि, अदितये खण्डनहारित्याय, अनागसोऽपराधरहिताः स्याम भवेम। उत्तमं, तमपः पित्त्वादनुदात्तत्वेनाद्युदात्तत्वे प्राप्ते, उत्तमश्चत्तमौ सर्वत्रेत्युञ्छादिषु पाठात्, उञ्छादीनाञ्च ( पां ६ । १ । १६० । ) इत्यन्तोदात्तत्वं। अधमं, अवद्यावमाधमार्वरेफाः कुत्सित इति अवते रमच्प्रत्ययो निपातितः, वस्य धत्वञ्च। श्रथाय, श्रथ दौर्बल्ये, संहितायां छान्दसो दीर्घः। तव, युष्मदस्मदोर्ङसि ( पां ६ । १ । ११ । ) इत्याद्युदात्तत्वं। अनागसः, बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वं, नञ्सुभ्यां ( पां ६ । २ । १७२ । ) इति तु व्यत्ययेन न प्रवर्त्तते, यद्वा आगस्शब्दात्, अस्मायामेधा ( पां ५ । २ । १२१ । ) इत्यादिना मत्वर्थीयो विनिस्तस्य, विष्मतोर्लुक् ( पां ५ । ३ । ६५ । ) इति लुक्, नञ्समासे अव्ययपूर्वपदप्रकृतिस्वरत्वं ॥ १५ ॥ इति प्रथमस्य द्वितीये पञ्चदशो वर्गः ॥ १५ ॥

## पञ्चविंशसूक्तं।

१ १ १ यच्चिद्धि ते विशो यथा प्र देव वरुण व्रतं १
मिनीमसि द्यवि द्यवि ॥

१ २ १ मा नो वधाय हत्नवे जिहीलानस्य रीरधः १
मा हृणानस्य मन्यवे ॥

यच्चिदित्येकविंशत्यृचं द्वितीयं सूक्तं, तथाचानुक्रान्तं यच्चित्सैकेति, ऋषिश्चान्यस्मादिति परिभाषया शुनःशेप एव ऋषिः, आदौ गायत्रमिति परिभाषितत्वाद्गायत्रीछन्दः, वारुणन्त्विति पर्वत्रोक्तत्वात् तर्ह्यादिपरिभाषया वरुणो देवता, विनियोग उक्तः शौनःशेपोपाख्याने, विशेषविनियोगस्तु अभिप्लवषडहे इदं सूक्तं होत्रकशस्त्रे स्तोमनिमित्तमावापर्थः, अभिप्लवपृष्ठाहानीति खण्डे तथैव सूत्रितं, यच्चिद्धि ते विश इति वारुणमेतस्य तृचमावपेत मैत्रावरुण इति, तस्मिन् सूक्ते प्रथमामृचमाह यच्चिदिति। हे वरुण देव, यथा लोके विशः प्रजाः कदाचित् प्रमादं कुर्व्वन्ति, तथा वयमपि ते तव सम्बन्धि यच्चिद्धि यदेव किञ्चित् व्रतं कर्म्म द्यवि द्यवि प्रतिदिनं प्रमिनीमसि प्रमादेन हिंसितवन्तस्तदपि व्रतं प्रमादपरिहारेण साङ्गं कुर्व्वितिशेषः। यथा, लित्स्वरेणाद्युदात्तत्वे प्राप्ते, यथेति पादान्त इति फिट्सूत्रेण सर्वानुदात्तत्वं। मिनीमसि, मीञ् हिंसायां, इदन्तो मसिः (पां ७।१।४६।) इति मसिः, क्र्यादिभ्यः श्ना, मीनातेर्निगमे (पां ७।३।८१।) इति ह्रस्वत्वं, ईहल्यघोः (पां ६।४।११३।) इतीकारः, सतिशिष्टस्वरबलीयस्त्वमन्यत्र विकरणेभ्य इति वचनात् तिङ एव स्वरः शिष्यते, यद्वृत्तान्नित्यं (पां ८।१।६६।) इति यद्वृत्तयोगान्निघाताभावः ॥ १ ॥

द्वितीयामृचमाह मा न इति। हे वरुण, जिहीलानस्य अनादरं कृतवतो हत्नवे हत्नोः पापहननशीलस्य तव सम्बन्धिने त्वत्कर्तृकाय वधाय नोऽस्मान् मा रीरधः, संसिद्धान् विषयभूतान् मा कुरु। हृणानस्य हृणीयमानस्य क्रुद्धस्य तव मन्यवे क्रोधाय मा अस्मान् रीरधः। वधाय, हनश्चवधः (पां ३।३।७६।) इति अबन्तो वधशब्दः,

१३१ वि मृलीकाय ते मनो रथीरश्वं न सन्दितं १
गीर्भिर्वरुण सीमहि १
१४१ परा हि मे विमन्यवः पतन्ति वस्यइष्टये १
वयो न वसतीरुप ॥

उञ्छादिषु पाठादन्तोदात्तः । हत्नवे, हन हिंसागत्योः, कृहनिभ्यां क्नुरित्यौणादिक क्नुःप्रत्ययः, धातोर्नकारस्य तकारः। जिहीलानस्य, हेडृ अनादरे, अस्माल्लिटः कानच्द्विर्भावहलादिशेषाः, ह्रस्वचर्त्वजश्त्वानि, एकारस्य ईकारादेशश्छान्दसः, चितः ( पां ६ । १ । १६३ । ) इत्यन्तोदात्तत्वं । रीरधः, राध साध संसिद्धौ, चङि णिलोपः, उपधाह्रस्वत्वं, द्विर्वचनहलादिशेषह्रस्वत्वसन्वद्भावेत्वाभ्यासदीर्घाः, नमाङ्योगे ( पां ६ । ४ । ७४ । ) इत्यडभावः। हृणानस्य, हृणीङ् लज्जायां, अस्माच्छानचि पृषोदरादित्वादभिमतरूपसिद्धिः ॥ २ ॥

तृतीयामृचमाह वि मृलीकायेति । हे वरुण, मृलीकायास्मत्सुखाय ते तव मनो गीर्भिः स्तुतिभिर्विसीमहि विशेषेण बध्नीमः, प्रसादयाम इत्यर्थः, तत्र दृष्टान्तः, रथी रथस्वामी सन्दितं सम्यक् खण्डितं दूरगमनेन श्रान्तमश्वं न, अश्वमिव, यथा स्वामी श्रान्तमश्वं घासप्रदानादिना प्रसादयति तद्वत् । रथी, मत्वर्थीय ईकारः। सन्दितं, दो अवखण्डने, निष्ठा ( पां ३ । २ । १०२ । ) इति क्तः, द्यतिस्यतिमास्थामिति किति ( पां ७ । ४ । ४० । ) इति इकारादेशः, गतिरनन्तरः ( पां ६ । २ । ४९ । ) इति गतेः प्रकृतिस्वरत्वं। गीर्भिः, सावेकाचः ( पां ६ । १ । १६८ । ) इति भिस उदात्तत्वं । सीमहि, षिवु तन्तुसन्ताने, व्यत्ययेनात्मनेपदं, बहुलं छन्दसीति विकरणस्य लुक्, लोपो व्योर्वलि ( पां ६ । १ । ६६ । ) इति वलिलोपः, यद्वा षिञ् बन्धने, इत्यस्माद्विकरणस्य लुक्, दीर्घश्छान्दसः ॥ ३ ॥

चतुर्थीमृचमाह परा हीति । हे वरुण, मे मम शुनःशेपस्य विमन्यवः क्रोधरहिता बुद्धयः, वस्यइष्टये वसीयसोऽतिशयेन वसुमतो जीवितस्य प्राप्तये, परापतन्ति पराङ्मुखाः पुनरावृत्तिरहिताः प्रसरन्ति, हिशब्दोऽभिन्नेऽर्थे सर्वजनप्रसिद्धिमाह । परापतने दृष्टान्तः, वयो न पक्षिणो यथा वसतीर्निवासस्थानानि उप सामीप्येन प्राप्नु-

१५१ कदा क्षत्रश्रियं नरमा वरुणं करामहे १
मृळीकायोरुचक्षसं ॥ १६ ॥
१६१ तदित्समानमाशाते वेनन्ता न प्रयुच्छतः १
धृतव्रताय दाशुषे ॥

षन्ति तद्वत्। यतन्ति, अनुदात्तं सर्वमयादादौ (पां ८।१।१८।) इति यादादित्वादनिघातः। वस्य इष्टये, वसुमच्छब्दात्, विश्वतोर्लुक् (पां ५।३।६५।) इति मतुपो लुकि, ष्टिलोपे प्राप्ते, ईयसुनो यकारलोपश्छान्दसः। वसतीः, शतुरनुमोनद्यजादी (पां ६।१।१७३।) इति ङीप उदात्तत्वं ॥ ४ ॥

पञ्चमीमृचमाह कदा क्षत्रश्रियमिति। मृळीकायास्मत्सुखाय वरुणं कदा कस्मिन् काले आकरामहे अस्मिन् कर्मण्यागतं करवाम। कीदृशं, क्षत्रश्रियं बलसेविनं। नरं नेतारं। उरुचक्षसं बहूनां द्रष्टारं। क्षत्रश्रियं, क्षत्राणि श्रयतीति क्षत्रश्रीः, क्विब्वचिप्रच्छिश्रि इत्यादिनौणादिकः क्विप्, दीर्घश्च, क्षदुत्तरपदप्रकृतिस्वरत्वं। नरं, ऋदोरप् (पां ३।३।५७।) इत्यन्तत्वादाद्युदात्तः। करामहे, करोतेर्व्यत्ययेन शप्। उरुचक्षसं, चक्षेर्बहुलं शिचेत्यौणादिकोऽसुन्, शिद्भावात् ख्याजादेशाभावः ॥ ५ ॥ इति प्रथमस्य द्वितीये षोडशो वर्गः ॥ १६ ॥

षष्ठीमृचमाह तदिदिति। धृतव्रताय अनुष्ठितकर्म्मणे, दाशुषे हविर्दत्तवते जयमानाय, धेनन्ता कामयमानौ मित्रावरुणाविति शेषः, तावुभौ समानं साधारणं तदिदस्माभिर्दत्तन्तदेव हविराशाते अश्नुवाते, न प्रयुच्छतः, कदाचिदपि प्रमादं मा कुरुतः। आशाते, अश्नोतेर्लिटि द्विर्भावहलादिशेषौ, अत आदेः (पां ७।४।७०।) इत्यात्वं, अनित्यमागमशासनमिति वचनात्, अश्नोतेश्च (पां ७।४।७२।) इति नुडभावः। वेनन्ता, वेनतिः कान्तिकर्म्मा, सुपां सुलुक् (पां ७।१।३९।) इत्यादिना द्विवचनस्याकारः। प्रयुच्छतः, युच्छ प्रमादे। दाशुषे, दाशृ दान इत्यस्मात्। दाश्वान् साह्वान् मीढ्वाँश्च (पां ६।१।१२।) इति क्वसुप्रत्ययो निपातितः, वसोः सम्प्रसारणं (पां ६।४।१३१।) इति सम्प्रसारणं, ग्लासि वसि घसीनाञ्च (पां ८।३।६०।) इति षत्वं ॥ ६ ॥

१७१ वेदा योवीनां पदमन्तरिक्षेण पततां १
वेद नावः समुद्रियः ॥
१८१ वेद मासो धृतव्रतो द्वादश प्रजावतः १
वेदा य उपजायते ॥

सप्तमीमृचमाह वेदा य इति । अन्तरिक्षेण पततामाकाशमार्गेण गच्छतां वीनां पक्षिणां पदं यो वरुणो वेदा वेद जानाति, तथा समुद्रियः समुद्रेऽवस्थितो वरुणो नावो जले गच्छन्त्याः पदं वेद जानाति, सोऽस्माद्बन्धनान्मोचयतीति शेषः । वेद, विद ज्ञाने, विदो लटो वा (पां ३ । ४ । ८३ ।) इति तिपो णल्, णित्स्वरेणाद्युदात्तत्वं, ह्यचोऽतस्तिङः (पां ६ (१ । १३५ ।) इति संहितायां दीर्घः । वीनां, नामन्यतरस्यां (पां ६ । १ । १७७ ।) इति नाम उदात्तत्वं । पततां, शपः पित्त्वादनुदात्तत्वं । शतुश्च ससार्वधातुकस्वरेण धातुस्वरः । नावः, सावेकाचः (पां ६ । १ । २६८ ।) इति षष्ठ्या उदात्तत्वं । समुद्रियः, समुद्राभ्राद्वः (पां ४ । ४ । ११८ ।) इति भवार्थे घः प्रत्ययः ॥ ७ ॥

अष्टमीमृचमाह वेद मास इति । धृतव्रतः क्षीणतकर्म्मविशेषो यथोक्तमहिमोपेतो वरुणः, प्रजावतस्तदा तदोत्पद्यमानप्रजायुक्तान् द्वादश मासश्चैत्रादीन् फाल्गुणान्तान् वेद जानाति, यस्त्रयोदशोऽधिकमास उपजायते, संवत्सरसमीपे स्वयमेवोत्पद्यते, तमपि वेद, वाक्यशेषः पूर्ववत् । मासः, षड्भ्यो लुक् (पां ६ । १ । ६३ ।) इत्यादिना मासशब्दस्य मासित्यादेशः, ऊडिदम्पदाद्यप्पुभ्यैद्युभ्यः (पां ३ । १ । १७१ ।) इति शस उदात्तत्वं । द्वादश, द्वौ च दश चेति द्वन्द्वः, ह्रस्वनः सङ्ख्यायां (पां ६ । ३ । ४७) इत्यात्वं, सङ्ख्या (पां ६ । २ । ३५ ।) इति सूत्रेण पूर्वपदप्रकृतिस्वरत्वं । प्रजावतः, जनी प्रादुर्भावे, प्रपूर्वाज्जनेः, जन सन खन क्रम गमो विट् (पां ३ । २ । ६७ ।) इति विट् प्रत्ययः, विड्वनोः (पां ६ । ४ । ४१ ।) इत्यात्वं, कृदुत्तरपदप्रकृतिस्वरत्वं, प्रजा एषां सन्तीत्यर्थे, तदस्यास्त्यस्मिन् (पां ५ । २ । ९४ ।) इति मतुप्, मादुपधायाश्च (पां ८ । २ । ९ ।) इति मतुपो वत्वं । उपजायते, जनेः कर्म्मकर्त्तरि लटः कर्म्मवद्भावादात्मनेपदं यक्, जनादीनामुपदेश एवात्मनेपदं वक्तव्यमिति वचनात्, अचः ञ्णिति (पां ७ । २ । ११५ ।) इत्यादि-

१ ९ १ वेद वातस्य वर्त्तनिमुरोर्ऋष्वस्य बृहतः १
वेदा ये अध्यासते ॥
१ १० १ निषसाद धृतव्रतो वरुणः पस्त्यास्वा १
साम्राज्याय सुक्रतुः ॥ १७ ॥
१ ११ १ अतो विश्वान्यद्भुता चिकित्वाँ अभिपश्यति १
कृतानि या च कर्त्वा ॥

दात्तत्वं, तिङ्ङिचोदात्तवति ( पां ८ । १ । ७१ । ) इत्युपसर्गस्य निघातः, न च, तिङ्ङतिङः ( पां ८ । १ । २८ । ) इति निघातः, यदुक्तान्नित्यं ( पां ८ । १ । ६६ । ) इति प्रतिषेधात् ॥ ८ ॥

नवमीमृचमाह वेद वातस्येति । उरोर्विस्तीर्णस्य ऋष्वस्य दर्शनीयस्य बृहतो गुणैरधिकस्य वातस्य वायोर्वर्त्तनिं मार्गं वेद, वरुणो जानाति, ये देवा अध्यासते उपरि तिष्ठन्ति तानपि वेद जानाति । वातस्य, असिहसीत्यादिनौणादिकतन्प्रत्ययान्तो वातशब्दो नित्त्वादाद्युदात्तः । वर्त्तनिं, वर्त्ततेऽनेनेति वर्त्तनिः स्रोत्र इति स्रोत्रवाचकस्य वर्त्तनिशब्दस्यान्तोदात्तत्वसिद्ध्यर्थमुञ्छादिषुपाठादस्य प्रत्ययस्वरेण मध्योदात्तत्वे प्राप्तेऽन्तोदात्तत्वं । बृहतः, बृहन्महतोरुपसङ्ख्यानमिति ङस उदात्तत्वं । अध्यासते, ससार्वधातुकानुदात्तत्वे सति धातुस्वरः ॥ ९ ॥

दशमीमृचमाह निषसादेति । धृतव्रतः पूर्वोक्तो वरुणः पस्त्यासु दैवीषु प्रजासु आनिषसाद आगत्य निषण्णवान्, किमर्थं प्रजानां साम्राज्यसिद्ध्यर्थं । कीदृशः सः, सुक्रतुः शोभनकर्म्मा । आनिषसाद, सदेरप्रतेः ( पां ८ । ३ । ६६ । ) इति षत्वं । साम्राज्याय, सम्राजो भावः साम्राज्यं, गुणवचन ब्राह्मणादिभ्यः ( पां ५ । १ । १२४ । ) इति ष्यञ्, ञ्नित्यादिर्नित्यं ( पां ६ । १ । १९७ । ) इत्याद्युदात्तत्वं । सुक्रतुः, कृत्वादयश्च ( पां ६ । २ । ११८ । ) इत्युत्तरपदाद्युदात्तत्वं ॥ १० ॥ इति प्रथमस्य द्वितीये सप्तदशो वर्गः ॥ १७ ॥

एकादशीमृचमाह अतो विश्वानीति । अतोऽस्मादरुणाद्विश्वानि सर्वाण्यद्भुतान्याश्चर्य्याणि चिकित्वान् प्रज्ञावानभिपश्यति, सर्वतोऽवलो-

११२१ स नो विश्वाहा सुक्रतुरादित्यः सुपथा करत् ।
प्र ण आयूंषि तारिषत् ॥

कयति, या कृतानि यान्याश्चर्य्याणि पूर्वं वरुणेन सम्पदिताति च-कारादन्यानि यान्याश्चर्य्याणि कर्त्त्वा, इतः परं कर्त्तव्यानि, तानि सर्वा-ण्यभिपश्यतीति पूर्वत्रान्वयः। अद्भुता, शेश्छन्दसि बहुलं (पां ६।१।७०।) इति शेर्लोपः, प्रत्ययलक्षणेन, नपुंसकस्य झलचः (पां ७।१।७२।) इति नुम्, नुलोपः। चिकित्वाँ, कित ज्ञाने, लिटः क्वसुः, अभ्यासहलादिशेषचर्त्वानि, वस्वेकाजाद्घसां (पां ७।२।६७।) इति नियमादिडभावः, रुत्वानुनासिकावुक्तौ संहितायां। पश्यति, पा घ्रा ध्मा (पा ७।३।७८।) इत्यादिना दृशेः पश्यादेशः। कर्त्त्वा, कृत्यार्थेतवैकेन् (पां ३।४।१४।) इत्यादिना करोतेस्त्वन्, नित्त्वा-दाद्युदात्तत्वं, पूर्ववत् शेर्लोपः ॥ ११ ॥

द्वादशीमृचमाह स नो विश्वाहेति। सुक्रतुः शोभनप्रज्ञः स आदित्यो वरुणो विश्वाहा सर्वेष्वहःसु नोऽस्मान् सुपथा शोभन-मार्गेण सहितान् करत् करोतु, किञ्च नोऽस्माकमायूंषि प्रतारिषत् प्रवर्द्धयतु। सुपथा, स्वती पूजायामिति समासेन, पूजनात् पूजित मनुदात्तं (पां ८।१।६७।) इति समासान्तप्रतिषेधः, अव्ययपूर्व-पदप्रकृतिस्वरे प्राप्ते, परादिश्छन्दसि बहुलं (पां ६।२।१९९।) इत्युत्तरपदाद्युदात्तत्वं, क्रत्वादयश्च (पां ६।२।११८।) इत्येतन्न भवति अबहुव्रीहित्वात्, बहुव्रीहौ हि तद्विधीयते, आद्युदात्तं द्व्यच्छ-न्दसि (पां ६।२।११९।) इत्येतदपि न भवति, पथिन्शब्दस्यान्तो-दात्तत्वात्। करत्, करोतेर्लटि व्यत्ययेन शप्, शपो लुकि, लोटोऽडाटौ (पां ३।४।९४।) इत्यडागमः, इतश्च लोपः (पां ३।४।९७।) इतीकारलोपः। यद्वा छान्दसे लुङि च्लिः, कृमृदृरुहिभ्यश्छन्दसि (पां ३।१।५९।) इति च्लेरङादेशः, ऋदृशोऽङि गुणः (पां ७।४।१६।) इति गुणः, बहुलं छन्दस्यमाङ्योगेऽपि (पां ६।४।७५।) इत्यड-भावः। प्र णः, उपसर्गाद्बहुलमिति नसो णत्वं। तारिषत्, तारयते-र्लेट्यडागमः, सिब्बहुलं लेटि (पां ३।१।३४।) इति सिप्, आदेश प्रत्यययोः (पां ८।३।५९।) इति षत्वं ॥ १२ ॥

१ १३ १ बिभ्रद्वापिं हिरण्ययं वरुणो वस्त निर्णिजं १
परि स्पशो निषेदिरे ॥
१ १४ १ न यं दिप्सन्ति दिप्सवो न द्रुह्वाणो जनानां १
न देवमभिमातयः ॥

चयोदशीमृचमाह बिभद्वापिमिति । हिरण्ययं सुवर्णमयं द्रापिं कवचं बिभद्धारयन् वरुणो निर्णिजं पुष्टं स्वशरीरं वस्त आच्छादयति, स्पशो हिरण्यस्पर्शिनो रश्मयः परिनिषेदिरे सर्वतो निवसन्ति । बिभत्, बिभर्तेः, नाभ्यस्ताच्छतुः ( पां ७ । १ । ७८ । ) इति नुमभावः, अभ्यस्तानामादिः ( पां ६ । १ । १८९ । ) इत्याद्युदात्तत्वं । द्रापिं, द्रा कुत्सायां गतौ, द्रापयति इषून् कुत्सितां गतिं प्रापयतीति द्रापिः कवचं, अर्त्तिह्रीली ( पां ७ । ३ । ३६ । ) इत्यादिना पुगागमः, औणादिक इप्रत्ययो णिलोपः । हिरण्ययं, ऋत्व्यवास्त्यवास्त्वमाध्वीहिरण्ययानि छन्दसि ( पां ६ । ४ । १७५ । ) इति हिरण्यशब्दादिकारार्थे विहितस्य मयटो मशब्दलोपो निपातितः । वस्त, वस आच्छादने, लङि, अदादित्वाच्छपो लुक्, पूर्ववदडभावः । निर्णिजं, णिजिर् शौचपोषणयोः । स्पशः, स्पश बाधनस्पर्शनयोः, क्विप् च ( पां ३ । २ । ७६ । ) इति क्विप् । निषेदिरे, षद्लृ विशरणगत्यवसादनेषु, अस्मादृत्यर्थात् कर्म्मणि लिट्, एत्वाभ्यासलोपौ, सदिरप्तेः ( पां ८ । २ । ६१ । ) इति षत्वं ॥ १३ ॥

चतुर्दशीमृचमाह न यं दिप्सन्तीति । दिप्सवो हिंसितुमिच्छन्तो वैरिणो यं वरुणं प्रति न दिप्सन्ति, भीताः सन्तो हिंसितुमिच्छां परित्यजन्ति, जनानां प्राणिनां द्रुह्वाणो द्रोग्धारोऽपि यं वरुणं प्रति न द्रुह्यन्ति, अभिमातयः पाप्मानः, पाप्मा वा, अभिमातिरिति श्रुत्यन्तरात्, देवन्तं वरुणं न स्पृशन्ति । दिप्सन्ति, दम्भु दम्भे, अस्मात्सनि, सनीवन्तर्धभ्रस्ज ( पां ७ । २ । ४९ । ) इत्यादिना इडभावः, हलन्ताच्च ( पां १ । २ । १० । ) इत्यत्र हलग्रहणस्य जातिवाचित्वात् सनः कित्त्वात्, दम्भ इच्च ( पां ७ । ४ । ५६ । ) इति दकारात् परस्याकारस्येकारः, अनिदितां ( पां ६ । ४ । २४ । ) इति नलोपः, भषभावाभावश्छान्दसः, अत्र लोपोऽभ्यासस्य ( पां ७ । ४ । ५८ । ) इत्यभ्यासलोपः, द्रुपः

११५। उत यो मानुषेष्वा यशश्चक्रे असाम्या।
अस्माकमुदरेष्वा ॥ १८ ॥
११६। परा मे यन्ति धीतयो गावो न गव्यूतीरनु।
इच्छन्तीरुरुचक्षसं ॥

पित्त्वादनुदात्तत्वं, तिङश्चलसार्वधातुकस्वरेण सनो नित्त्वान्नित्स्वरेणाद्युदात्तत्वं, यद्वृत्तयोगादनिघातः। दिप्सवः, सनन्ताद्दम्भेः, सन्नाशंसभिक्ष उः (पां ३।२।१६८।) इत्युः प्रत्ययः, प्रत्ययस्वरः। द्रुह्वाणः, द्रुहजिघांसायां, अन्येभ्योऽपि दृश्यन्ते (पां ३।२।७५।) इति क्वनिप्, प्रत्ययस्य पित्त्वादनुदात्तत्वे धातुस्वरेणाद्युदात्तत्वं ॥ १४ ॥

पञ्चदशीमृचमाह उत य इति। उत अपि च, यो वरुणो मानुषेषु यशोऽन्नमाचक्रे, सर्वतः कृतवान्, स वरुणः कुर्वन्नपि आ सर्वतोऽसामि, सम्पूर्णञ्चक्रे, नतु न्यूनं कृतवान्, विशेषतोऽस्माकमुदरेषु आ सर्वतश्चक्रे। मानुषेषु, मनोर्जातावञ्यतौ षुक् च (पां ४।१।१६१।) इत्यञ्, षुगागमश्च, ञित्यादिर्नित्यं (पां ६।१।१९७।) इत्याद्युदात्तत्वं। यशः, अशेर्देवने युट्चेत्यौणादिक युडागमः। चक्रे, प्रत्ययस्वरः। असामि, अव्यये नञ्कृन्निपातानामिति वक्तव्यमित्यव्ययपूर्वपदप्रकृतिस्वरत्वं। उदरेषु, उदिदृणातेरजलौपूर्वपदान्त्यलोपश्चेत्यौणादिकोऽल्प्रत्ययः, लित्स्वरे प्राप्ते, गतिकारकोपपदात् (पां ६।२।१३९।) इति कृदुत्तरपदप्रकृतिस्वरत्वं ॥ १५ ॥ इति प्रथमस्य द्वितीयेऽष्टादशो वर्गः ॥ १८ ॥

षोडशीमृचमाह परा मे यन्तीति। उरुचक्षसं बहुभिर्दृष्टं वरुणमिच्छन्तीर्मे धीतयः शुनःशेपस्य बुद्धयः परायन्ति पराङ्मुखा निवृत्तिरहिता गच्छन्ति, तत्र दृष्टान्तः, गावो न, यथा गावो गव्यूतीरनु, गोष्ठान्यनुलक्ष्य गच्छन्ति तद्वत्। गव्यूतीः, गावोऽत्र यूयन्त इत्यधिकरणे क्तिन्, गोर्यूतौ छन्दस्युपसङ्ख्यानमिति वार्त्तिकेनावादेशः, दासीभारादित्वात् पूर्वपदप्रकृतिस्वरत्वं, यद्वा यूतिर्यवनं, गवां यवनमत्रेति बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वं। इच्छन्तीः, इषु इच्छायां, लटः शतृ, तुदादिभ्यः शः, इषु गमियमाञ्छः (पां ७।३।७७।) इति छत्वं, अदुपदेशाल्लसार्वधातुकानुदात्तत्वे विकरणस्वरः शिष्यते ॥ १६ ॥

११७। सं नु वोचावहै पुनर्यतो मे मध्वाभृतं।
होतेव क्षदसे प्रियं॥
११८। दर्शं नु विश्वदर्शतं दर्शं रथमधि क्षमि।
एता जुषत मे गिरः॥

सप्तदशीमृचमाह सन्विति। यतो यस्मात् कारणात् मे मज्जीवनार्थं मधु मधुरं हविराभृतं, अदःसोमाख्ये कर्म्मणि सम्पादितं, अतः कारणाद्धोतेव होमकर्त्तेव, त्वमपि प्रियं हविः क्षदसे अश्नासि, पुनर्हविःस्वीकारादूर्द्धं क्षत्रत्वं जीवन्नहञ्च नु अवश्यं संवोचावहै सम्भूय प्रियवार्त्तां करवावहै। वोचावहै, लोडर्थे छान्दसे लुङि, ब्रुवो वचिः (पां २। ४। ५३।) इति ब्रुवो वचिरादेशः, अस्यति वक्ति ख्यातिभ्योऽङ् (पां ३। १। ५२।) इति च्लेरङादेशः, वच उम् (पां ७। ४। २०।) इत्युमागमो गुणः, व्यत्ययेन टेरेत्वं, यद्वा लोट एव लुङादेशः, स्वानिवद्भावादेत्वं। आभृतं, हृग्रहोर्भश्छान्दसीति सूत्रवार्त्तिकेन हृधातोर्हकारस्य भकारादेशः, गतिरनन्तरः (पां ६। २। ४९।) इति गतेः प्रकृतिस्वरत्वं॥ १७॥

अष्टादशीमृचमाह दर्शन्विति। विश्वदर्शतं सर्वैर्दर्शनीयमस्मदनुग्रहार्थमत्राविर्भूतं वरुणं दर्शं नु अहं दृष्टवान् खलु, क्षमि क्षमायां भूमौ रथं वरुणसम्बन्धिनमधिदर्शमाधिक्येन दृष्टवानस्मि। एता उच्यमाना मे गिरो मदीयाः स्तुतीर्जुषत, वरुणः सेवितवान्। दर्शं, दृशेः, इरितो वा (पां ३। १। ५७।) इति च्लेरङादेशः, ऋदृशोऽङि गुणः (पां ७। ४। १६।) इति गुणः। विश्वदर्शतं, दृशेः, भ्रस्ज दृशि इत्यादिनाणादिकातच्प्रत्ययान्तो दर्शतशब्दो भरुद्दृधादित्वात् पूर्वपदान्तोदात्तत्वं, यद्वा विश्वन्दर्शनीयमस्येति बहुव्रीहिः, बहुव्रीहौ विश्वं संज्ञायां (पां ६। २। १०६।) इति पूर्वपदान्तोदात्तत्वं। क्षमि, आतो धातोः (पां ६। ४। १४०।) इत्यत्र आत इति योगविभागादाकारलोपः॥ १८॥

१ १९ १ इमं मे वरुण श्रुधी हवमद्या च मृळय १
त्वामवस्युराचके ॥
१ २० १ त्वं विश्वस्य मेधिर दिवश्च ग्मश्च राजसि १
स यामनि प्रतिश्रुधि ॥

वरुणप्रघासेषु इमं मे वरुणेति वारुणस्य हविषोऽनुवाक्या, पञ्चभ्यां पौर्णमास्यामिति खण्डे सूचितं, इमं मे वरुण श्रुधि तत्त्वायामि ब्रह्मणा वन्दमान इति, स्तामंतां सूक्ते एकोनविंशीमृचमाह इमं म इति। हे वरुण, मे मदीयमिमं हवमाह्वानं श्रुधि शृणु, किञ्चाद्यास्मिन्दिने मृळयास्मान् सुखय, अवस्युः रक्षणेच्छुरहं त्वां वरुणमा आभिमुख्येन चके, शब्दयामि स्तौमीत्यर्थः। श्रुधि, श्रु श्रवणे, लोटो हिः, श्रुशृणु-पृकृ हभ्यश्छन्दसि (सां ६।४।१०२।) इति हेर्धिरादेशः, बहुलं छन्दसीति विकरणस्य लुक्, अन्येषामपि दृश्यते (पां ६।३।१३७।) इति संहितायां दीर्घः। अवस्युः, अवस् शब्दात्, सुप आत्मनःक्यच् (पां ३।१।८।) इति क्यच्, क्याच्छन्दसि (पां ३।२।१७०।) इत्युः प्रत्ययः। आचके, कै गै शब्दे, अस्माल्लिटि, आदेच उपदेशेऽशिति (पां६।१।४५) इत्यात्वं, द्विर्भावचुत्वे, आतो लोप इटि च (पां ६।४।६४।) इत्याकारलोपः, तिङ्शितिङः (पां ८।१।२८। इति निघातः ॥ १९ ॥

विंशीमृचमाह त्वं विश्वस्येति। हे मेधिर मेधाविन् वरुण, त्वं दिवश्च द्युलोकस्यापि, ग्मश्च भूलोकस्यापि, एवमात्मकस्य विश्वस्य सर्वस्य जगतो मध्ये, राजसि दीप्यसे, स तादृशस्त्वं, यामनि क्षेमप्रापणे अस्मदीये प्रतिश्रुधि प्रतिश्रवणमाज्ञापनं कुरु, रक्षिष्यामीति प्रत्युत्तरं देहीत्यर्थः। दिवः, ऊडिदं (पां ६।१।१७१।) इत्यादिना षष्ठ्या उदात्तत्वं। ग्मः, ग्मेत्येतद्भूनामसु पठितं, आतो धातोः (पां ६।४।१४०।) इत्यत्र आत इति योगविभागात्, आतो लोप इटि च (पां ६।४।६४।) इति प्रतिषेधेऽपि व्यत्ययेनाकारलोपः, उदात्तनिवृत्तिस्वरेण विभक्तेरुदात्तत्वं। यामनि, या प्रापणे, आतोमनिन् क्वनिब्वनिपश्च (पां ३।२।७४।) इति मनिन्, नित्त्वादाद्युदात्तत्वं। श्रुधि, उक्तं ॥ २० ॥

१ २१ १ उदुत्तमं मुमुग्धि नो वि पाशं मध्यमं चृत १
अवाधमानि जीवसे ॥ १९ ॥

## षड्विंशसूक्तं ।

१ १ १ वसिष्ठा हि मियेध्य वत्राण्यूर्जाम्पते १
सेमं नो अध्वरं यज ॥

एकविंशीमृचमाह उदुत्तममिति । नोऽस्माकमुत्तमं शिरोगतं पाशं उन्मुमुग्धि, उत्कृष्य मोचय । मध्यममुदरगतं पाशं विचृत, वियुज्य नाशय । जीवसे जीवितुमधमानि मदीयान् पादगतान् पाशान् अवचृत, अवकृष्य नाशय, । उत्तमं, उच्चादिषु पाठादन्तोदात्तत्वं । मुमुग्धि, मुचॢ मोक्षणे, बहुलं छन्दसीति विकरणस्य श्लुः, द्विर्भावः, हलादिशेषः, झभञ्यो हेर्धिः ( पां ६ । ४ । १०१ । ) इति हेर्धिरादेशः, तिङ्ङतिङः ( पां ८ । १ । २८ । ) इति निघातः । चृत, चृती हिंसाग्रन्थनयोः, लोटो हिः, तुदादिभ्यः शः, अतो हेः ( पां ६ । ४ । १०५ । ) इति हेर्लुक् । जीवसे, जीव प्राणधारणे, तुमर्थेसेसेनसे ( पां ३ । ४ । ९ । इत्यसे प्रत्ययः, प्रत्ययस्वरः ॥ २१ ॥ इति प्रथमस्य द्वितीये एकोनविंशो वर्गः ॥ १९ ॥

वसिष्ठेति दशर्चं तृतीयसूक्तं, अत्रानुक्रम्यते, वसिष्ठदशाग्नेयं त्विति, शुनःशेप ऋषिर्गायत्रीच्छन्दः, इदमुत्तमञ्च सूक्तमाग्नेयं प्रातरनुवाक आग्नेये क्रतौ गायत्रे छन्दसि एतदादिसूक्तद्वयमनुवक्तव्यं, तथाच सूत्रितं, वसिष्ठा हीति, सूक्तयोरुत्तमामुद्धरेदिति, तस्मिन् सूक्ते प्रथमामृचमाह वसिष्ठा हीति । वरुणेनाग्निस्तुतौ प्रेरितः शुनःशेप एतदादिसूक्तद्वयेनाग्निमस्तौत्, तथाचाम्नायते, तं वरुण उवाच अग्निर्वै देवानां मुखं सुहृदयतमः, तन्नु स्तुहि अथ त्वोत्स्यामीति सोऽग्निं तुष्टाव अत उत्तराभिर्द्वाविंशत्येति । हे मियेध्य, मेधस्य यज्ञस्य योग्य, ऊर्ज्जाम्पते अन्नानाम्पालकाग्ने, वस्त्राण्याच्छादनानि तेजांसि वसिष्ठ आच्छादय, प्रज्वलितस्तेजसा भवेत्यर्थः, हि यस्मात् प्रज्वलितस्तस्मात् स तादृशस्त्वं नोऽस्मदीयमिममध्वरं यज निष्पादय । वसिष्ठ, वस आच्छादने, लेटि, थासस्से ( पां ३ । ४ । ८० । ) इति से आदेशः,

१२१ नि नो होता वरेण्यः सदा यविष्ठ मन्मभिः१
अग्ने दिवित्मता वचः॥
१३१ आ हि ष्मा सूनवे पितापिर्यजत्यापये॥
सखा सख्ये वरेण्यः॥

सवाभ्यां वामौ (पां ३।४।९१।) इत्येकारस्थाने व आदेशः, छन्दस्युभयथा (पां ३।४।११७।) इत्यार्द्धधातुकत्वात्, आर्द्धधातुकस्येड्वलादेः (पां ७।२।३५।) इतीडागमः, सलोपधातुकानुदात्तत्वे धातुस्वरः, अन्येषामपि दृश्यते (पां ६।३।१३७।) इति संहितायां दीर्घः। मियेध्य, मकारैकारयोर्मध्ये इयागमश्छान्दसः। उर्ज्जाम्यते, सुबामन्त्रिते पराङ्गवत्स्वरे (पां २।१।२।) इति पराङ्गवद्भावात् षष्ठ्यामन्त्रितसमुदायस्याष्टमिको निघातः। सेमं, सोऽचि लोपे चेत् पादपूरणं (पां ६।१।१३७।) इति सोर्लोपः॥ १॥

द्वितीयामृचमाह नि नो होतेति। सदा यविष्ठ, सर्वदा युवतम, हे अग्ने, वरेण्यो वरणीयस्त्वं नोऽस्माकं होता होमनिष्पादको भूत्वा दिवित्मता दीप्तिमता वचो वचसा स्तूयमानः सन् निषीदेति शेषः। कीदृशस्त्वं, मन्मभिर्ज्ञापकैस्तेजोभिर्युक्त इति शेषः। यविष्ठ, युवन्शब्दादिष्ठनि, स्थूलदूरयुवह्रस्व क्षिप्र (पां ६।४।१५६।) इत्यादिना यणादिपरस्य लोपः, पूर्वस्योकारस्य गुणश्च, अवादेशः, आमन्त्रितनिघातः। मन्मभिः, मन ज्ञाने, अन्येभ्योऽपि दृश्यन्ते (पां ३।२।७५।) इति मनिन्प्रत्ययः, नित्त्वादाद्युदात्तत्वं। दिवित्मता, दिवु क्रीडादौ, इक्त्तिपौ धातुनिर्देश इति इक्प्रत्ययः, तेन च धातुवाचिना दिविशब्देन धात्वर्थोदीप्तिर्लक्ष्यते, यद्वौणादिको भावे क्विप्प्रत्ययः, दिवि शब्दान्मतुपि तकारोपजनश्छान्दसः। वचः, सुपां सुलुक्(पां ७।१।३९।) इति तृतीयैकवचनस्य लुक्॥ २॥

तृतीयामृचमाह आ हि ष्मेति। हे अग्ने वरेण्यो वरणीयः पिता पितृस्थानीयस्त्वं, सूनवे पुत्रस्थानीयाय मह्यं, अभीष्टं देहीति शेषः। हि ष्मेति निपातद्वयं सर्वथेत्यमुमर्थमाचष्टे। अभीष्टदाने दृष्टान्तद्वयमुच्यते, यथा आपिर्बन्धुरापये बन्धवे आयजति हि ष्म, सर्वथा ददातीति शेषः। सखा प्रियः, सख्ये प्रियाय यथा ददाति तथा त्वमपि देहि।

१४१ आ नो बर्ही रिशादसो वरुणो मित्रो अर्यमा ॥
सीदन्तु मनुषो यथा ॥
१५१ पूर्व्य होतरस्य नो मन्दस्व सख्यस्य च ।
इमा *उषु श्रुधी गिरः ॥ २० ॥

ष्ठा सूनवे, निपातस्य च ( पां ६ । ३ । १३६ । ) इति दीर्घः। यजतीत्यस्य सखा सख्य इत्यत्राप्यनुषङ्गात्तदमेक्षयेयं प्रथमेति, चादिलोपे विभाषा ( पां ८ । १ । ६३ । ) इति नेह भवति, यद्वा, हि च ( पां ८ । १ । ६४ । ) इति निघातप्रतिषेधः । सख्ये, समाने ख्यश्चेोदात्त इति सखिशब्द औणादिक इप्रत्ययान्त आद्युदात्तः, सुयः पित्त्वादनुदात्तत्वे स एव शिष्यते ॥ ३ ॥

चतुर्थीमृचमाह आ नो बर्हिरिति । हे अग्ने, वरुणादयो देवास्त्वद्बन्धवस्त्वया प्रेरिता रिशादसो हिंसकानदन्तो नोऽस्मदीयं बर्हिर्यज्ञमासीदन्तु, तत्र दृष्टान्तः, यथा मनुषः प्रजापतेर्यज्ञमासीदति तद्वत् । बर्ही रिशादसः, विसर्ज्जनीयस्य रुत्वे कृते, रोरि ( पां ८ । ३ । १४ । ) इति रेफलोपः, ढ्रलोपे पूर्वस्य दीर्घोणः ( पां ६ । ३ । १११ । ) इति इकारस्य दीर्घत्वं । रिशादसः, रिश हिंसायां, रिशन्ति हिंसन्ति इति रिशाः शत्रवः, इगुपधज्ञाप्रीकिरः कः ( पां ३ । १ । १३५ । ) इति कः प्रत्ययस्तानदन्तीति रिशादसः, सर्वधातुभ्योऽसुन्नित्यौणादिको ऽसुन्प्रत्ययः, कृदुत्तरपदप्रकृतिस्वरत्वं। सीदन्तु, षद्लृ विशरणगत्यवसादनेषु, गा घ्रा ध्मा स्था म्ना दाण् ( पां ७ । ३ । ७८ । ) इत्यादिना सीदादेशः, शपः पित्त्वादनुदात्तत्वं, शतुश्च लसार्वधातुकस्वरेण धातुस्वरः शिष्यते। मनुषः, मन ज्ञाने, मन्यते जानातीति मनुः प्रजापतिः, जनेरसिर्निच्चेत्यनुवृत्तौ, बऊलमन्यत्रापीत्यौणादिक उसिः प्रत्ययः, नित्त्वादाद्युदात्तत्वं। यथा, यथेति पादान्त इति फिट्सूत्रेण सर्वानुदात्तत्वं ॥ ४ ॥

पञ्चमीमृचमाह पूर्व्य होतरिति । हे पूर्व्य अस्मदादेः पूर्वमुत्पन्न, होतर्होमनिष्पादकाग्ने, नोऽस्मदीयस्यास्य प्रवर्त्तमानस्य यज्ञस्य सख्यस्य चास्मदनुग्रहस्य च सिद्ध्यर्थं मन्दस्व, त्वं हृष्टो भव, इमा अस्माभिः

* ऊष इति दीर्घादि शब्दो लिखितपुस्तकपाठः ।

१६१ यच्चिद्धि शश्वता तना देवं देवं यजामहे १
त्वे इद्धूयते हविः ॥

प्रयुज्यमाना गिर उषु स्तुतिरूपवाचोऽपि श्रुधि शृणु । पूर्व्य, आमन्त्रिताद्युदात्तत्वं । होतरित्यस्य, नामन्त्रिते समानाधिकरणे ( पां ८ । १ । ७३ । ) इति पूर्वस्याविद्यमानवत्त्वादाष्टमिको निघातः । अस्य, ऊडिदं ( पां ६ । १ । १७१ । ) इत्यादिना षष्ठ्या उदात्तत्वं । मन्दस्व, मदि स्तुतिमोदमदस्वप्नकान्तिगतिषु, शपः पित्त्वादनुदात्तत्वं, तिङश्च सप्तम्यर्थधातुकस्वरेण धातुस्वरः, अनुदात्तं सर्वमपादादौ ( पां ८ । १ । १८ । ) इति सूत्रे अपादादाविति पर्य्युदासादाष्टमिकनिघाताभावः । सख्यस्य, सख्युः कर्म्म सख्यं, सख्युर्यः ( पां ५ । १ । १२६ । ) इति यः प्रत्ययः, यस्येति च ( पां ६ । १ । १७८ । ) इति इकारलोपे प्रत्ययस्वरः । उषु, सुञः ( पां ८ । ३ । १६० । ) इति षत्वं । श्रुधि, श्रु श्रवणे, श्रुशृणु पृकृहूभ्यश्छन्दसि ( पां ६ । ४ । १४२ । ) इति हेर्धिरादेशः, बहुलं छन्दसीति शपो लुक् ॥ ५ ॥ इति प्रथमस्य द्वितीये विंशो वर्गः ॥ २० ॥

षष्ठीमृचमाह यच्चिदिति । हे अग्ने, यच्चिद्धि यद्यपि, शश्वता शाश्वतेन नित्येन, तना विस्तृतेन, हविषा देवन्देवमन्यमन्यं वरुणेन्द्रादिरूपं नानाविधन्देवताविशेषं यजामहे, तथापि तद्धविःसर्वं त्वे इत् त्वय्येव हूयते, अतो देवतान्तरविषयो यागोऽपि त्वदीयैव सेवेत्यर्थः । तना, तनु विस्तारे, क्विप् च ( पां ३ । २ । ७६ । ) इति क्विप्, यङ्वा, यचायच्, सुपां सुलुक् ( पां ७ । १ । ३९ । ) इति तृतीयाया आकारः । देवन्देवं, नित्यवीप्सयोः ( पां ८ । १ । ४ । ) इति द्विर्भावः, तस्य परमाम्रेडितं ( पां ८ । १ । २ । ) इत्युत्तरस्याम्रेडितसञ्ज्ञायां, अनुदात्तत्वञ्च ( पां ८ । १ । ३ । ) इत्यनुदात्तत्वं । यजामहे, निपातैर्यद्यदिहन्त ( पां ८ । १ । ३० । ) इति निघातप्रतिषेधः । त्वे, युष्मच्छब्दात् सप्तम्येकवचनस्य, सुपां सुलुगिति शे आदेशः, त्वमावेकवचने ( पां ७ । २ । ९७ । ) इति मपर्य्यन्तस्य त्वादेशः, शेषे लोपः ( पां ७ । २ । ९० । इति लोपे, अतो गुणे ( पां ६ । १ । ९७ । ) इति परपूर्वत्वं, शे ( पां १ । १ । १३ । ) इति प्रगृह्यसञ्ज्ञायां, प्लुतप्रगृह्या अचि नित्यं ( पां ६ । १ । १२५ । ) इति प्रकृतिभावः । हूयते, अकृत्सार्वधातुकयोर्दीर्घः ( पां ७ । ४ । २५ । ) इति दीर्घः ॥ ६ ॥

१७१ प्रियो नो अस्तु विश्पतिर्होता मन्द्रो वरेण्यः१
प्रियाः स्वग्नयो वयं ॥
१८१ स्वग्नयो हि वार्यं देवासो दधिरे च नः १
स्वग्नयो मनामहे ॥
१९१ अथा न उभयेषाममृतमर्त्यानां१
मिथः सन्तु प्रशस्तयः॥

सप्तमीमृचमाह प्रियो नो अस्त्विति । विश्पतिर्विशां प्रजानां पालकः, होता होमनिष्पादकः, मन्द्रो हृष्टः, वरेण्यो वरणीयोऽग्निर्नोऽस्माकं प्रियोऽस्तु। वयमपि स्वग्नयः शोभनाग्नियुक्ताः सन्तस्तव प्रिया भूयास्मेति शेषः। विश्पतिः, पत्यावैश्वर्ये (पां ६।२।१८।) इति पूर्वपदप्रकृतिस्वरत्वे प्राप्ते, परादिश्छन्दसि बहुलं (६।२।१९९।) इत्युत्तरपदाद्युदात्तत्वं। वरेण्यः, वृञ एण्य इत्यौणादिक एण्यप्रत्ययः, वृषादित्वाद्युदात्तत्वं। स्वग्नयः, बहुव्रीहौ, नञ्सुभ्यां (पां ६।२।१७२।) इत्युत्तरपदान्तोदात्तत्वं ॥ ७ ॥

अष्टमीमृचमाह स्वग्नयो हीति। स्वग्नयः शोभनाग्नियुक्ता देवासो दीप्यमाना ऋत्विजो नोऽस्मदीयं वार्यं वरणीयं हविर्हि यस्माद्दधिरे धृतवन्तस्तस्माद्वयं स्वग्नयः शोभनाग्नियुक्ताः सन्तो मनामहे, त्वां याचामहे। वार्यं, वृञ् वरणे, वृङ् सम्भक्तौ, ऋहलोर्ण्यत् (पां३।१।१२४।) इति ण्यत्, ईड वन्द वृङ शंस दुहां ण्यतः (पां ६।१।११४।) इत्याद्युदात्तत्वं। दधिरे, इरेचश्चित्त्वादन्तोदात्तत्वं, हि च (पां ८।१।३४।) इति निघातप्रतिषेधः। मनामहे, मन ज्ञाने, व्यत्ययेन शप् ॥ ८॥

नवमीमृचमाह अथा न इति । हे अमृत, मरणरहितामे, अथ कर्मानुष्ठानानन्तरं, मर्त्यानां मनुष्याणां नोऽस्माकमस्मत्स्वामिनस्तवचोभयेषां मिथः परस्परं प्रशस्तयः प्रशंसारूपा वाचः सन्तु, सम्यगनुष्ठितमिति यजमानविषया प्रशंसा, सम्यगनुगृहीतमित्यग्निविषया। अथ, निपातस्य च (पां ६।३।१३६।) इति संहितायां दीर्घः, अपादादाविति पर्युदासात् षाष्ठिकमाद्युदात्तत्वं। मर्त्यानां, मृङ् प्राणत्यागे, असिहसीत्यादिना तन्प्रत्ययान्त औणादिको मर्तशब्दः, अस्मा-

११०१ विश्वेभिरग्ने अग्निभिरिमं यज्ञमिदं वचः १
चनो धा सहसो यहो ॥ ३१ ॥

## सप्तविंशसूक्तं।

१११ अश्वं न त्वा वारवन्तं वन्दध्या अग्निं नमोभिः १
सम्राजन्तमध्वराणां ॥

द्भावे, छन्दसि च (पां ५ । १ । ६७ ।) इहि यत्, यतोऽनावः (पां ६ । १ । २१३ ।) इत्याद्युदात्तः। सन्तु, अत्तेरिलोपः (पां ६ । ४ । १११ ।) इत्यकारलोपः। प्रशस्तयः, तादौच (पां ६ । २ । ५० ।) इति गतेः प्रकृतिस्वरत्वं ॥ ९ ॥

दशमीमृचमाह विश्वेभिरग्न इति। सहसो बलस्य यहो पुत्र, हे देवतारूपाग्ने, विश्वेभिरग्निभिः सर्वैरा हवनीयादिभिर्युक्तस्त्वं इममस्मदीयं यज्ञमिदमस्मदीयं वचः स्तोत्रञ्च सेवमानश्चनोऽन्नं धाः, अस्मभ्यं धेहि। विश्वेभिः, बहुलं छन्दसीति भिस ऐसादेशाभावः। चनः, चायृ पूजानिशामनयोः, चायेरन्ने कसश्चेत्यौणादिकोऽसुन्प्रत्ययस्तत्सन्नियोगेन नुडागमश्च, नित्त्वादाद्युदात्तत्वं। धाः, लुङि, गातिस्थाघुपाभूभ्यःसिचः, परस्मैपदेषु (पां २ । ४ । ७४ ।) इति सिचो लुक्, बहुलं छन्दस्यमाङ्योगेऽपि (पां ६ । ४ । ७५ ।) इत्यडागमाभावः। सहसो यहो इति, सुबामन्त्रिते पराङ्गवत्स्वरे (पां २ । १ । २ ।) इति पराङ्गवद्भावात्, आमन्त्रितस्य च (पां ८ । १ । १९ ।) इति षष्ठ्यामन्त्रितसमुदायो निहन्यते ॥ १० ॥ इति प्रथमस्य द्वितीये एकविंशो वर्गः ॥ २१ ॥

अश्वं न त्वेति त्रयोदशर्चं चतुर्थं सूक्तं, पूर्ववदृष्यादयः, त्रयोदशा नमो महद्भ्य इत्यस्यास्त्रिष्टुप्छन्दः, विश्वेदेवा देवता, तथाचानुक्रान्तं, अश्वं, सप्तो ना गायत्रेत्या दैवी त्रिष्टुबिति, प्रातरनुवाकाश्विनशस्त्रयोरुक्तमावर्जितस्य विनियोग उक्तः, तस्मिन् सूक्ते प्रथमामृचमाह, अश्वं नत्वेति। अध्वराणां यज्ञानां सम्राजन्तं सम्राट्स्वरूपं स्वामिनमग्निं त्वां नमोभिः स्तुतिभिर्वन्दध्यैर्वन्दितुं प्रवृत्ता इति शेषः। अत्र दृष्टान्तः, वारवन्तं वालयुक्तमश्वं न, अश्वमिव, अश्वो यथा वालैर्बाधकान् मशकमक्षिकादीन् परिहरति, तथा त्वमपि ज्वालाभिरस्मद्विरोधिनः

१२१ स घा नः सूनुः शवसा पृथुप्रगामा सुशेवः १
मीढ्वाँ अस्माकं बभूयात् ॥
१८३ १ स नो दूराच्चासाच्च नि मर्त्यादघायोः १
पाहि सदमिद्विश्वायुः ॥

परिहरसीत्यर्थः। वारवन्तं, मतुपः पित्त्वादनुदात्तत्वं, घञो जित्वादाद्युदात्तो वारशब्दः, कर्षात्वतो घञोऽन्त उदात्तः (पां ६।१।१५९।) इत्यन्तोदात्तत्वं व्यत्ययेन न प्रवर्त्तते। वन्दध्यै, वदि अभिवादनस्तुत्योः, इदितो नुम् धातोः (पां ७।१।५८।) इति नुम्, तुमर्थे सेसेन् (पां ३।४।९।) इत्यध्यै प्रत्ययः। सम्राजन्तं, शपः पित्त्वादनुदात्तत्वं, शतुश्च लसार्वधातुकस्वरेण धातुस्वरः शिष्यते, समासे ह्रदुत्तरपदप्रकृतिस्वरः। अध्वराणां, नञ्सुभ्यां (पां ६।२।१७२।) इत्युत्तरपदान्तोदात्तत्वं ॥ १ ॥

द्वितीयाम्रचमाह स घा न इति। स घ, स एवाग्निर्नोऽस्माकं सुशेवः सुमुखो भवत्विति शेषः। कीदृशः, शवसा बलस्य सूनुः पुत्रः। पृथुप्रगामा पृथुप्रगमनः। किञ्चास्माकं मीढ्वान् कामान् वर्षिता बभूयात् भवतु। स घा नः, ऋचि तुनुघमक्षुतङ्कुत्रोरुष्याणां (पां ६।३।१३३।) इति दीर्घः। शवसा, सुपां सुपो भवन्तीति ङसश्टादेशः। पृथुप्रगामा, प्रकर्षेण गमनं प्रगामः, हलश्च (पां ३।३।१२१।) इति घञ्, पृथुःप्रगामो यस्यासौ पृथुप्रगामा, सुपां सुलुक्पूर्वसवर्णा (पां ७।१।३९।) इत्यादिना पूर्वसवर्ण आकारः, बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वं। सुशेवः, शमीभ्यां वनिति शेवशब्दो वन्प्रत्ययान्त आद्युदात्तः, ततो बहुव्रीहौ, नञ्सुभ्यां (पां ६।२।१७२।) इत्युत्तरपदान्तोदात्तत्वे प्राप्ते, आद्युदात्तं द्यच्छन्दसि (पां ६।२।११९।) इत्युत्तरपदाद्युदात्तत्वं। मीढ्वाँ, मिह सेचन इत्ययं क्वसुप्रत्ययान्तो, दाखान् साक्षान् मीढ्वाँश्च (पां ६।१।१२।) इति निपातितः, बभूयात्, भवतेश्छान्दसस्य लिटः, लिटो लिङो भवन्तीति लिङादेशः, यासुट्, स्यानिवद्भावाच्छबभावः, द्विर्वचने, भवतेरः (पां७।४।७३।) इत्यत्वं, तिङ्ङतिङः (पां ८।१।२८।) इति निघातः ॥ २ ॥

तृतीयाम्रचमाह स नो दूरादिति। हे अग्ने, विश्वायुर्व्याप्तगमनः

१४१ इममू षु त्वमस्माकं सनिं गायत्रं नव्यांसं १
अग्ने देवेषु प्रवोचः ॥
१५१ आ नो भज परमेष्वा वाजेषु मध्यमेषु १
शिक्षा वस्वो अन्तमस्य ॥ २२ ॥

स त्वं, दूराच्च दूरेऽपि, आसाच्च आसन्नदेशेऽपि, अघायोः, अघं पापमनिष्टं कर्तुमिच्छतो मर्त्यान्मनुष्यान्वैरिणो नोऽस्मान् सदमित् सर्वदैव निपाहि, नितरां पालय। अघायोः, सुप आत्मनः क्यच् ( पां ३ । १ । ८ । ) इति क्यच्, अश्वाघ स्यात् ( पां ७ । ४ । ३७ । ) इत्यात्वं । पाहि, पादादित्वादनिघातः। विश्वायुः, इण्गतावित्यस्माद्भावे, इतेर्सिचेत्युसिः प्रत्यय औणादिकः, विश्वमयनं गमनं यस्येति बञ्व्रीहिः, बञ्व्रीहौ विश्वं सञ्ज्ञायां ( पां । ६ । २ । १०६ । ) इति पूर्वपदान्तोदात्तत्वं ॥ ३ ॥

चतुर्थीमृचमाह इममू ष्विति । हे अग्ने, त्वमस्माकमस्मत्सम्बन्धिनं इममू षु पुरोदेशेऽनुष्ठीयमानमपि सनिं हविर्दानं नव्यांसं नवतरं गायत्रं स्तुतिरूपवचोऽपि देवेषु देवानामग्रे प्रवोचः प्रब्रूहि। ऊषु, निपातस्य च ( पां ६ । ३ । १३६ । ) इति संहितायां दीर्घः, सुञः ( पां ८ । ३ । १०७ । ) इति षत्वं। नव्यांसं, नवशब्दादीयसुनि, ईकारलोपश्छान्दसः, ईयसुनो नित्त्वादादुदात्तत्वं। वोचः, छन्दसि लुङ् लङ् लिटः ( पां ३ । ४ । ६ । ) इति लोडर्थे प्रार्थनायां लुङि, अस्यति वक्ति ख्यातिभ्योऽङ् ( पां ३ । १ । ५२ । ) इति च्लेरङादेशः, वच उम् ( पां ७ । १ । २० । ) इत्युमागमः ॥ ४ ॥

पञ्चमीमृचमाह आ नो भजेति। हे अग्ने, परमेषूत्कृष्टेषु द्युलोकवर्त्तिषु वाजेष्वन्नेषु नोऽस्मानाभज, सर्वतः प्रापय। मध्यमेष्वन्तरिक्षलोकवर्त्तिषु वाजेष्वाभज। अन्तमस्यान्तिमस्यान्तिकतमस्य भूलोकस्य सम्बन्धीनि वस्वो वसूनि शिक्ष देहि। शिक्ष, शिक्ष विद्योपादाने, अयं पित्त्वाद्धातुस्वरः, द्यमोऽतस्तिङः ( पां ६ । ३ । १३५ । ) इति संहितायां दीर्घः। अन्तमस्य, अन्तिकतमस्य, तमेतादेश्चेति तिकशब्दलोपः। ॥ ५ ॥ इति प्रथमस्य द्वितीये द्वाविंशो वर्गः ॥ २२ ॥

१६१ विभक्तासि चित्रभानो सिन्धोरूर्मा उपाक आ१
सद्यो दाशुषे क्षरसि ॥
१७१ यमग्ने पृत्सु मर्त्यमवा वाजेषु यं जुनाः१
स यन्ता शश्वतीरिषः ॥
१८१ नकिरस्य सहन्त्य पर्येता कयस्य चित् १
वाजो अस्ति श्रवाय्यः ॥

षष्ठीमृचमाह विभक्तासीति । हे चित्रभानो विचित्ररश्मियुक्ताग्ने, विभक्ता विभिन्नस्य धनस्य प्रापयितासि । तत्र दृष्टान्त उच्यते, आकार उपमानार्थः, यथा सिन्धोर्नद्या उपाके समीपे ऊर्म्मा ऊर्म्मिन्तरङ्गोपलक्षितं कुल्यादिरूपं प्रवाहं विभजन्ति तद्वत्, दाशुषे हविर्दत्तवते यजमानाय सद्यस्तदानीमेव क्षरसि, कर्म्मफलभूतां वृष्टिं करोषि । सिन्धोः, स्यन्दू प्रस्रवणे, स्यन्देः सम्प्रसारणं धस्वेत्यौणादिक उःप्रत्ययः । ऊर्म्मा, अर्त्तेरूच्चेत्यौणादिक ऊत्प्रत्ययो मिच्च भवति । निदित्यनुवृत्तौ आद्युदात्तत्वं । दाशुषे, हृतव्रताय दाशुष इत्यत्रोक्तं ॥६॥

सप्तमीमृचमाह यमग्न इति । हे अग्ने, पृत्सु सङ्ग्रामेषु यं मर्त्यं यजमानमवा रक्षसि, यं पुरुषं वाजेषु सङ्ग्रामेषु जुनाः प्रेरयसि, स नरो यजमानः शश्वतीरिषः नित्यान्यन्नानि यन्ता नियन्तुं समर्थो भवति। पृत्सु, पद्दन्न आदिषु मांसपृतनासानूनां मांसपृत्सक्थो वाच्या इति वार्त्तिकेन पृतनाशब्दस्य पृदादेशः, सावेकाचः ( पां ६ । १ । १६८ । ) इति विभक्तेरुदात्तत्वं । अवः, आवः, अकारोकारयोर्विपर्य्ययः, यद्वा लेटि अडागमः, इतश्च ( पां ३ । ४ । १०० । ) इति सिप इकारस्य लोपः । जुनाः, जु इति गत्यर्थः सौत्रो धातुः, लङ्सिप्, क्र्यादिभ्यः श्ना, बहुलं छन्दसमाङ्योगेऽपि ( पां ६ । ४ । ७५ । ) इत्यडभावः, यदृत्तान्नित्यं ( पां ८ । १ । ६६ । ) इति यदृत्तयोगादनिघातः । यन्ता, तनो नित्त्वादाद्युदात्तत्वं । शश्वतीः, उगितश्च ( पां ४ । १ । ६ । ) इति ङीप् ॥ ७ ॥

अष्टमीमृचमाह नकिरस्येति । हे सहन्त्य शत्रूणामभिभवनशीलाग्ने, अस्य त्वद्भक्तस्य यजमानस्य कयस्य चित् कस्यापि पर्य्येता नकिः आक्रमिता नास्ति, किञ्चास्य यजमानस्य श्रवाय्यः श्रवणीयो वाजो

१९१ स वाजं विश्वचर्षणिरर्वद्भिरस्तु तरुता १
विप्रेभिरस्तु सनिता ॥
११० ॥ जराबोध तद्विविड्ढि विशे विशे यज्ञियाय १
स्तोमं रुद्राय दृशीकं ॥ २३ ॥

ऽस्ति बलविशेषोऽस्ति। कयस्य यकारोपजनश्छान्दसः। अवाय्यः, श्रुदक्षिस्पृहियजिभ्य आय्य इत्यौणादिक आय्यप्रत्ययः ॥ ८ ॥

नवमीमृचमाह स वाजमिति। विश्वचर्षणिः सर्वैर्मनुष्यैरुपेतः सोऽग्निरर्वद्भिरश्वैर्वाजं सङ्ग्रामं तरुता तारयितास्तु, विप्रेभिर्मेधाविभिर्ऋत्विग्भिः सहितः, सनिता फलस्य दातास्तु। विश्वचर्षणिः, विश्वे चर्षणयो मनुष्या यस्य, बहुव्रीहौ विश्वं संज्ञायां (पां ६। २। १०६।) इति पूर्वपदान्तोदात्तत्वं। अर्वद्भिः, ऋगतौ, अन्येभ्योऽपि दृश्यन्ते (पां ३। २। ७५।) इति वनिप्, भिसि, अर्वणस्त्रसावनञः (पां ६। ४। १२७।) इति नकारस्य टेरित्ययमादेशः। तरुता, तॄ प्लवनतरणयोः, अस्मात्, ग्रसित स्कभित (पां ७। २। ३४।) इत्यादौ टेन्नेत्वे निपातितः, निपातनादेवेकारस्योत्वं ॥ ९ ॥

अनोर्यामेहेतुरतिरिक्तोक्थे जराबोधतद्विविड्ढीति स्तोत्रियस्तृचः, यस्य पशवो नोपधावेरन्नितिखण्डे सूचितं, अतिरिक्तोक्थानि जराबोध तद्विविड्ढीति, तामेतां सूक्ते दशमीमृचमाह जराबोध तदिति। हे जराबोध जरया स्तुत्या बोधमानाग्ने, विशे विशे तत्तद्यजमानरूपप्रजानुग्रहार्थं, यज्ञियाय यज्ञसम्बन्ध्यनुष्ठानसिद्ध्यर्थं, देवयजनं विविड्ढि प्रविश, यजमानोऽपि रुद्राय क्रूरायाग्नये तुभ्यं, दृशीकं दर्शनीयं समीचीनं स्तोमं स्तोत्रं करोतीतिशेषः। अत्र यास्क एवं व्याख्यातवान्, जरा स्तुतिर्जरतेः स्तुतिकर्मणस्ताम्बोधयता बोधयितरिति वा तद्विविड्ढि तत्कुरु, मनुष्यस्य यज्ञियाय यजनाय स्तोमं रुद्राय दर्शनीयमिति। (निं १०। ८।) जराबोध, जॄष् वयोहानौ, अत्र स्तुत्यर्थः, षिद्भिदादिभ्योऽङ् (पां ३। ३। १०४।) इत्यङ् प्रत्ययः, ततष्टाप्, जरया स्तुत्या बोधो यस्यासौ जराबोधः, यद्वा जरया बुध्यत इति जराबोधः, कर्मणि घञ्, आमन्त्रिताद्युदात्तत्वं। विविड्ढि, विशप्रवेशने, लोटो हि, बहुलं छन्दसीति शपः श्लुः, अभ्यासहलादिशेषौ,

१ ११ १ स नो महाँ अनिमानो धूमकेतुः पुरुश्चन्द्रः १
धिये वाजाय हिन्वतु ॥
१ १२ १ स रेवाँ इव विश्पतिर्दैव्यः केतुः शृणोतु नः १
उक्थैरग्निर्बृहद्भानुः ॥

ऊभल्भ्योहेर्धिः ( पां ६ । ४ । १०१ । ) इति हेर्धिरादेशः, षत्वष्टुत्वे, यद्वा, विष्णु व्याप्तावित्यस्मात्लोण्मध्यमैकवचने अभ्यासस्य गुणाभावः। विष्णे विष्णे, सावेकाचः ( पां ६ । १ । १६८ । ) इति चतुर्थ्या उदात्तत्वं, अनुदात्तञ्च ( पां ८ । १ । ३ । ) इत्यामेडितानुदात्तत्वं । यज्ञियाय, यज्ञर्त्विग्भ्यां घखञौ ( पां ५ । १ । ७१ । ) इति घः । दृशीकं, अनि दृशिभ्यांडिचेत्यौणादिकः कीकन्प्रत्ययः, नित्त्वादाद्युदात्तः ॥ १० ॥ इति प्रथमस्य द्वितीये ऋचोर्विष्णो वर्गः ॥ २३ ॥

एकादशीमृचमाह स नो महानिति । सोऽग्निर्नोऽस्मान् धिये कर्म्मणे वाजायान्नाय च हिन्वतु प्रीणयतु, कीदृशः सः, महान् गुणाधिकः। अनिमानो निमानवर्जितः, अपरिच्छिन्न इत्यर्थः। धूमकेतुर्धूमेन ज्ञाप्यमानः। पुरुश्चन्द्रो बऽदीप्तियुक्तः। महाँ अनीत्यत्र संहितायां नकारस्य रुत्वानुनासिकावुक्तौ। अनिमानः, न विद्यते निमानोऽस्येति बऽव्रीहौ, नञसुभ्यां ( पां ६ । २ । १७२ । ) इत्युत्तरपदान्तोदात्तत्वं । धूमकेतुः, इषियुधीन्धिदधिभ्यो मक् इत्यौणादिको मक्प्रत्ययः, धूमः केतुर्यस्येति बऽव्रीहौ पूर्वपदप्रकृतिस्वरत्वं । पुरुश्चन्द्रः, चदि आह्लादने दीप्तौ च, अस्मात्, स्फायि तञ्चीत्यादिना कर्त्तरि औणादिको रक्प्रत्ययः, पुरुश्चासौ चन्द्रश्चेति समासान्तोदात्तत्वं, ऋक्षाचन्द्रोत्तरपादमन्त्रे ( पां ६ । १ । १५१ । ) इति सुट्, तस्यश्चुत्वेन शकारः । धिये, सावेकाच इति चतुर्थ्या उदात्तत्वं । हिन्वतु, हिविः प्रीणनार्थः, इदितो नुम् धातोः ( पां ७ । १ । ५८ । ) इति नुमागमः ॥ ११ ॥

द्वादशीमृचमाह स रेवाँ इवेति । सोऽग्निरुक्थैः स्तोत्रैर्युक्तान् नोऽस्मान् शृणोतु, तत्र दृष्टान्तः, रेवानिव, यथा लोके धनवान्राजा वन्दिनां स्तोत्रं शृणोति तद्वत् । कीदृशः सः, विश्पतिः प्रजापालकः । दैव्यः, देवानां सम्बन्धी, अग्निर्वै देवानां होतेति श्रुत्यन्तरात्, केतुर्दूतः पालकः, अग्निर्वै देवानां दूत आसीदिति श्रुतेः। बृहद्भानुः, प्रौढरश्मिः

१ १३ १ नमो महद्भ्यो नमो अर्भकेभ्यो नमो युवभ्यो नमो आशिनेभ्यः १ यजाम वेदान्यदि शक्नवाम मा ज्यायसः शंसमावृक्षि देवाः ॥ २४ ॥

स देवान्, एतत्तदोः सुलोपोऽकोऽरनञ् समासे हलि ( पां ६ । १ । १३२ । ) इति सोर्लोपः, रयेर्मतौ बह्वलमिति सम्प्रसारणं पूर्वत्वं, आदृगमः ( पां ६ । १ । ८१ । ) इति गुणः, छन्दसीरः ( पां ८ । २ । १५ । ) इति मतुपो वत्वं, अरिष्टशब्दाच्च मतुप उदात्तत्वं वक्तव्यमिति वार्त्तिकेन मतुप उदात्तत्वं । विष्णुतिः, परादिश्छन्दसि बहुलं ( पां ६ । २ । १९९ । ) इत्युत्तरपदान्तोदात्तत्वं । बृहद्भानुः, बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वं ॥ १२ ॥

दर्शपौर्णमासयोस्तु स्रुगादानात् पूर्वभाविनि जपे नमो महद्भ्य इत्येषा, ब्रह्मौदने प्राणिष्यमाण इति खण्डे सूर्य्यो नो दिवस्पातु नमो महद्भ्यो नमोऽर्भकेभ्य इति सूत्रितं, तामेतां चयोदशीमृचमाह नमो महद्भ्य इति । अग्निना प्रेरितः सुनःशेपो विश्वान् देवाननया तुष्टाव, तथाचाम्नायते, तमग्निरुवाच विश्वान् देवान् स्तुह्यथ लोत्स्यत्तामीति, स विश्वान् देवान् तुष्टाव, नमो महद्भ्यो नमो अर्भकेभ्य इत्येतयर्चेति । महान्तो गुणैरधिकाः, अर्भका गुणैर्न्यूनाः, युवानस्तरुणाः, आशिनो वयसा व्याप्ता वृद्धाः, यथोक्तचतुर्विधदेवयुक्तेभ्यो देवेभ्यो नमो नमोऽस्तु । यदि शक्नवाम कथञ्चिद्बलादिसम्पत्त्या शक्ताश्चेत्तदानीं देवान् यजाम, हे देवाः ज्यायसो ज्येष्ठस्य देवताविशेषस्य आ सर्वतः प्रस्तुतं शंसं स्तोत्रं आ वृक्षि, अहं विच्छिन्नं माकार्षं। आशिनेभ्यः, अशू व्याप्तौ, बहुलमन्यत्रापीत्यौणादिक इनच्प्रत्ययः, चितः ( पां ६ । १ । १६३ । ) इत्यन्तोदात्तत्वं, यजाम, शपः पित्त्वादनुदात्तत्वं, तिङश्चलसार्वधातुकस्वरेण धातुस्वरः । शक्नवाम, शक्लृ शक्तौ, आडुत्तमस्य पिच्च ( पां ३ । ४ । ९२ । ) इति तिङः पिद्वद्भावादनुदात्तत्वे सति विकरणस्वरः, निपातैर्यद्यदिहन्त ( पां ८ । १ । ३० । ) इत्यादिना निघातप्रतिषेधः । ज्यायसः, प्रशस्तशब्दादीयसुनि, ज्यश्च ( पां ६ । ४ । १५५ । ) इति ज्यादेशः, ज्यादादीयसः ( पां ६ । ४ । १६० । ) इति ईयसुन ईकारस्य आत्वं, नित्त्वादाद्युदात्तत्वं । शंसं, हृषश्च ( पां ३ । ३ । १२१ । ) इति

## अष्टाविंशऋक्तं।

१११ यत्र ग्रावा पृथुबुध्न ऊर्ध्वो भवति सोतवे।
उलूखलसुतानामवेद्विन्द्र जल्गुलः॥

घञ्। वृक्ति, ओव्रश्चू छेदने, व्यत्ययेनात्मनेपदेऽत्तमपुरुषैकवचनं, इट्, च्लेः सिच्, स्वरति सूति सूयति (पां ७। २। ४४।) इत्यादिना इडभावः, स्कोः संयोगाद्योरन्ते च (पां ८। २। २९।) इत्युपधाश्चकारलोपः, व्रश्च भ्रस्ज सृज मृज (पां ८। २। ३६।) इत्यादिना षत्वं, षढोः कः सि (पां ८। २। ४१।) इति कत्वं, आदेश्चप्रत्यययोः (पां ८। ३। ५९।) इति षत्वं, नमाङ्योगे (पां ६। ४। ७४।) इत्यडभावः॥ १२॥ इति प्रथमस्य द्वितीये चतुर्विंशो वर्गः॥ २४॥

यत्र ग्रावेति नवर्चं पञ्चमं सूक्तं, आदितः षडनुष्टुभः, आयजी इत्याद्यास्तिस्रो गायत्र्यः, आदितश्चतसृणामिन्द्रो देवता, ततो द्वे उलूखलदैवत्ये, तदनन्तरभाविन्यौ उलूखलमुसलदेवताके, अन्त्याया उच्छिष्टमित्यस्या हरिश्चन्द्राधिषवणचर्म्मसोमानामन्यतमो देवता, तथाच बृहद्देवतायामुक्तं, चर्म्माधिषवणीयं वा सोमं वान्त्या प्रशंसतीति, तदुक्तमनुक्रमण्यां। यत्र ग्रावा नव षडनुष्टुबादि, यच्चिद्धीलूखल्यौ, परे मौसल्यौ च, प्रजापतेर्हरिश्चन्द्रस्यान्त्या चर्म्मप्रशंसा वेति (निं अं २।) आद्याश्चतस्रोऽङ्गःसवे हेमे विनियुक्ताः, पञ्चम्याद्याश्चतस्रोऽभिषवे, अन्त्या द्रोणकलशे सोमावनयने, तथाच ब्राह्मणं, अथ हैनं श्रुनःशेपोऽङ्गःसवन्दर्शं, तमेताभिश्चतसृभिरभितुष्टाव यच्चिद्धि त्वं गृहे गृह इति, अथैनं द्रोणकलशमभ्यवनिनायोच्छिष्टं चम्वोर्भरेत्येतयार्चाथाह्यस्मिन्नवारब्धे पूर्वाभिश्चतसृभिः सखाहाकाराभिर्जुहवाञ्चकारेति, तत्र प्रथमामृचमाह यत्र ग्रावेति। हे इन्द्र, यत्र यस्मिन्नङ्गःसवे कर्म्मणि, सोतवे अभिषवार्थं, ग्रावा पाषाणः, पृथुबुध्नः स्थूलमूलः, ऊर्द्ध उन्नतो भवति, तस्मिन् कर्म्मणि उलूखलसुतानां उलूखलेनाभिषुतानां रसं अवेत् स्वकीयत्वेनावगत्यैव जल्गुलो भक्षय। पृथुबुध्नः, बञ्चतेर्हो पूर्वपदप्रकृतिस्वरत्वं, निपातैर्यद्यदिहन्त (पां ८। १। ३०।) इति निघातप्रतिषेधः। सोतवे, षुञ् अभिषवे, तुमर्थेसेसेन् (पां ३। ३। ९।) इति तवेन्प्रत्ययः, नित्त्वादाद्युदात्तत्वं। उलूखलसुतानां, उलूखलेन

१२१ यत्र द्वाविव जघनाधिषवण्या कृता १ उलू० ॥
१३१ यत्र नार्यपच्यवमुपच्यवं च शिक्षते १ उलू० ॥
१४१ यत्र मन्थां विबध्नते रश्मीन्यमितवा इव १ उलू० ॥

सुतानां, तृतीयाकर्म्मणि (पां ६ । २ । ४८ ।) इति पूर्वपदप्रकृतिस्वरत्वं । जघुलः, गल अदने, अस्माद्यङ्लुकि, लोण्मध्यमैकवचने, लेटोऽडाटौ (पां ३ । ४ । ९४ ।) इत्यडागमः, इतश्चलोपः परस्मैपदेषु (पां ३ । ४ । ९७ ।) इकारलोपः, उपधाया उत्वं, हलादिशेषाभावश्च एषोदरादित्वात् ॥ १ ॥

द्वितीयामृचमाह यत्र द्वाविवेति । यत्र यस्मिन् कर्म्मणि, अधिषवण्या उभे अभिषवणफलके द्वाविव जघना द्वौ जघनप्रदेशाविव । जघनं जघंन्यत इति यास्कः । कृता विस्तीर्णीकृते सम्पादिते, अन्यत् पूर्ववत् । जघना, हन्तेः शरीरावयवे हेचेत्यौणादिकसूत्रेण हनधातोरच्प्रत्ययः, ह्वित्वं, कर्दमादित्वान्मध्योदात्तः, सुपां सुलुक् (पां ७ । १ । ३९ ।) इत्याकारः । अधिषवण्या, षुञ् अभिषवे, ल्युट्, भवेश्छन्दसि (पां ४ । ४ । ११० ।) इति यत्, उपसर्गात्सुनोति (पां ८ । ३ । ६५ ।) इति षत्वं, तित्स्वरितं (पां ६ । १ । १८५ ।) इति स्वरितः, नच, यतोऽनावः (पां ६ । १ । ११३ ।) इत्याद्युदात्तं, तच्च हि, निष्ठा च द्यजनात् (पां ६ । १ । २०५ ।) इत्यस्यानुवृत्तेर्ऋक्सस्यैव तदिति । कृता, पूर्ववदाकारः ॥ २ ॥

तृतीयामृचमाह यत्र नार्यपच्यवमिति । यत्र यस्मिन् कर्म्मणि नारी पत्नी अपच्यवं शालाया निर्गमनं, उपच्यवं च शालाप्राप्तिं, शिक्षते अभ्यासं करोति, अन्यत् पूर्ववत् । अपच्यवं, च्युङ् गतौ, ऋदोरप् (पां ३ । ३ । ५७ ।) इत्यप्, गुणावादेशौ, थाथादिनोत्तरपदान्तोदात्तत्वं, एवमुपच्यवं । शिक्षते, शिक्ष विद्योपादाने, अदुपदेशाल्लसार्वधातुकानुदात्तत्वे धातुस्वरः, निपातैर्यद्यदिहन्त (पां ८ । १ । ३० ।) इति निघातप्रतिषेधः ॥ ३ ॥

चतुर्थीमृचमाह यत्र मन्थामिति । यत्र यस्मिन् कर्म्मणि मन्थामाग्निरमथनहेतुं मन्थानं विबध्नते विबध्नन्ति, तत्र दृष्टान्तः, रश्मीन् अश्वबन्धनार्थान् प्रग्रहान् यमितवा इव नियन्तुमिव, अन्यत् पूर्व-

१५१ यच्चिद्धि त्वं गृहे गृह उलूखलक युज्यसे ।
इह द्युमत्तमं वद जयतामिव दुन्दुभिः ॥ २५ ॥

वत्। मन्थां, पथिमथ्यृभुक्षामात् ( पां ७ । १ । ८५ । ) इति द्वितीयायामपि व्यत्ययेनात्वं, प्रातिपदिकस्वरेणान्तोदात्तत्वे प्राप्ते, पथि मथोः सर्वनामस्थाने ( पां ६ । १ । १६६ । ) इत्याद्युदात्तत्वं, यद्वा मथ्यतेऽनयेति मन्था, मथिविलोडन इत्यस्मात्, हलश्च ( पां ३ । ३ । १२१ । ) इति करणे घञ्, ततष्टाप्, जित्त्वादाद्युदात्तत्वं। विबध्नते, बन्ध बन्धने, क्र्यादिभ्यः श्ना, अनिदितां ( पां ६ । ४ । २४ । ) इति नलोपः, श्नाभ्यस्तयोरातः ( पां ६ । ४ । ११२ । ) इत्याकारलोपः प्रत्ययस्वरः, तिङि-चोदात्तवति ( पां ८ । १ । ७१ । ) इति गतेर्निघातः । यमितवै, यमु उपरमे, तुमर्थेसेसेनसेन् ( पां ३ । ४ । ९ । ) इति तवैप्रत्ययः, इडागमश्छान्दसः, यद्वा ण्यन्तात् तवै प्रत्ययस्येडागमे सति णिलोपश्छान्दसः, अन्तश्चतवैयुगपत् ( पां ६ । १ । २०० । ) इत्याद्यन्तयोरुदात्तत्वं ॥ ४ ॥

अभिधवे विनियुक्तां चतसृषु प्रथमां सूक्ते पञ्चमीमृचमाह यच्चिद्धि त्वमिति । हे उलूखलक यच्चिद्धि यद्यपि त्वं अवघातार्थं गृहे गृहे युज्यसे, यथापीह वैदिके कर्मणि तीव्रमुसलप्रहारेण द्युमत्तमं अतिशयेन दीप्तं प्रभूतध्वनियुक्तं शब्दं वद, तत्र दृष्टान्तः, जयतामिव दुन्दुभिर्यथा युद्धे जयं प्राप्नुवतां राज्ञां दुन्दुभिर्महान्तं ध्वनिं करोति तद्वत्। उलूखलशब्दं यास्क एवं व्याख्यातवान्, उलूखलमुरुकरं वोर्द्धखं वोर्करं वोरुमे कुर्वित्यब्रवीत्तदुलूखलमभवदुरूकरं वै तत्तदुलूखलमित्याचक्षते परोक्षेणेति च ब्राह्मणमिति ( निं ९ । २ । १० । ) उलूखलक, अपादादाविति पर्युदासादाद्यन्तिकनिघाताभावे षाष्ठिकमाद्युदात्तत्वं। युज्यसे, अदुपदेशाल्लसार्वधातुकानुदात्तत्वे यक् स्वरः शिष्यते, न च तिङ्तिङः ( पां ८ । १ । २८ । ) इति निघातः, निपातैर्यद्यदिहन्त ( पां ८ । १ । ३० । ) इति निषेधात्, द्युमत्तमं, दीव्यतेर्दीप्त्यर्थस्य सम्पदादिलक्षणः क्विप्, दिव उत् ( पां ६ । १ । १३१ । ) इत्युत्वं, यणादेशे; ऋक्षगुडभ्यां मतुप् ( पां ६ । १ । १७६ । ) इति मतुप्, तस्य उदात्तत्वं, ननु दिव उदित्यत्र प्रातिपदिकं गृह्यते, न धातुरित्युक्तत्वात्, अच्चधुरित्यादाविवात्राप्यूठा भवितव्यं, एवं तर्हि दीप्तिमत् स्वर्गवाच-

१६१ उत स्म ते वनस्पते वातो विवात्यग्रमित् १
अथो इन्द्राय पातवे सुनु सोममुलूखल ॥
१७१ आयजी वाजसातमा ता ह्युच्चा विजर्भृतः १
हरी इवान्धांसि बप्सता ॥

केन दिवुप्रातिपदिकेन दीर्घेर्लक्ष्यत इत्युक्तं भविष्यति ॥ ५ ॥ इति प्रथमस्य द्वितीये पञ्चविंशो वर्गः ॥ २५ ॥

षष्ठीमृचमाह उत स्म त इति। उत अपिच हे वनस्पते, उलूखलरूपवृक्ष, ते अग्रमित् तव पुरत एव वातो विवाति स्म त्वरोपेतमुसलप्रहारैर्वार्यविशेषेण प्रसरति खलु, अथोऽनन्तरं हे उलूखल, इन्द्रोपकारार्थं पातवे पातुं सोमं सुनु, सोमाभिषवं त्वं कुरु। वनस्पते, पारस्करादित्वात् सुट्कार्यकारणशब्दः। पातवे, पा पाने, तुमर्थेसेसेनसे ( पां ३ । ४ । ९ । ) इति तवेन् प्रत्ययः, ञ्नित्यादिर्नित्यं ( पां ६ । १ । १९७ । ) इत्याद्युदात्तत्वं । सुनु, उतश्च प्रत्ययादसंयोगपूर्वात् ( पां ६ । ४ । १०६ । ) इति हेर्लुक्, विकरणस्वरेणाद्युदात्तत्वं, पादादित्वाद निघातः । उलूखल, ऊर्द्धं खमस्येत्युलूखल● एषोदरादित्वादाकृतिगणः ॥ ६ ॥

सप्तमीमृचमाह आयजी वाजसातमेति। ये उलूखल मुसले आयजी सर्वतो यज्ञसाधने वाजसातमा अतिशयेनान्नप्रदे, ता हि ते खलु उच्चा प्रौढध्वनिर्यथा भवति तथा विजर्भृतो विशेषेण पुनः पुनर्विहारं कुरुतः। तत्र दृष्टान्तः, अन्धांस्यन्नानि यवसकादीनि खाद्यानि बप्सन्तौ भक्षयन्तौ हरी इव चन्द्रस्याश्वाविव। अत्र यास्क एवं व्याचख्यौ, आयजी आयष्टव्ये अन्नानां सम्भक्ततमे ते ह्युच्चैर्विजर्भृतेते हरी इवान्धांसि भक्षयन्ताविति ( निं ९ । ४ । २ । ) आयजी, यजेरौणादिकः करणे इञ्प्रत्ययः, कृदुत्तरपदप्रकृतिस्वरत्वं। वाजसातमा, वाजं सनोतीति वाजसाः, षणु दाने, जन सन खन क्रमगमो विट् ( पां ३ । २ । ६७ । ) इति विट्प्रत्ययः, विड्वनोरनुनासिकः स्यात् ( पां ६ । ४ । ४१ । ) इत्यात्वं, कृदुत्तरपदप्रकृतिस्वरत्वे आतिशायनिकरूपम्, सुपां सुलुक् (पां ७ । १ । ३९ ।) इत्यादिना पूर्वसवर्णदीर्घः । विजर्भृतः, हृञ् हरणे, अस्माद्यङ्लुकि, अभ्यासहलादिशेषेषोरदन्तेषु कृतेषु, रुग्रिकौ च लुकि

१८१ ता नो अद्य वनस्पती ऋष्वावृष्वेभिः सोतृभिः १
इन्द्राय मधुमत्सुतं ॥
१९१ उच्छिष्टं चम्बोर्भर सोमं पवित्र आसृज १
निधेहि गोरधि त्वचि ॥ २६ ॥

( पां ७ । ४ । ९१ । ) इति रुगागमः, ततः प्रत्ययलक्षणेन धातुसञ्ज्ञायां, लिटि, द्विवचनं तस्, चर्करीतं परस्मैपदमदादिवच्चेति वचनाच्छपो लुक्, गुणे प्राप्ते, क्ङिति च ( पां १ । १ । ५ । ) इति प्रतिषेधः, हृग्रहोर्भश्छन्दसीति वार्त्तिकेन भत्वं, प्रत्ययस्वरः, हि च ( पां ८ । १ । ३४ । ) इति निघात प्रतिषेधः। बप्सता, भस भक्षणदीप्त्योः, लटःशतृ, जुहोत्यादिभ्यः श्लुः ( पां २ । ४ । ७५ । ) इति श्लुः, घसिभसोर्हलि च ( पां ६ । ४ । १०० । ) इत्युपधालोपः, नाभ्यस्तात् ( पां ७ । १ । ७८ । ) इति नुम्प्रतिषेधः, अभ्यस्तानामादिः ( पां । ६ । १ । १८९ । ) इत्याद्युदात्तत्वं ॥ ७ ॥

अष्टमीमृचमाह ता नो अद्येति। अद्यास्मिन् कर्म्मणि, हे वनस्पती उलूखलमुसलरूपौ तौ युवां, ऋष्वेभिर्दर्शनीयैः, सोतृभिरभिषवहेतुभिः सह, ऋष्वौ तौ दर्शनीयौ भूत्वा, इन्द्राय, इन्द्रार्थं, मधुमत्, माधुर्य्योपेतं सोमद्रव्यं नोऽस्मदीयं सुतं अभिषुणुतं। ता, सुपां सुलुगित्याकारः। नो अद्य, प्रकृत्यान्तः पादं ( पां ६ । १ । ११५ । ) इत्यादिना प्रकृतिभावः। वनस्पती, उभयपदप्रकृतिस्वरे प्राप्ते, आमन्त्रितस्य च ( पां ८ । १ । १९ । ) इति सर्वानुदात्तत्वं, प्लुतप्रगृह्या अचि ( पां ६ । १ । १२५ । ) इति प्रकृतिभावः। सुतं, षुञ् अभिषवे, बहुलं छन्दसीति विकरणस्य लुक्, निघातः ॥ ८ ॥

सोमावनयने विनियुक्तां सूक्ते नवमीमृचमाह उच्छिष्टमिति। हे ऋत्विग्विशेष, हरिश्चन्द्रदेवतापक्षे हरिश्चन्द्रेति वा, चम्बोः सोमस्य भक्ष्यत्वसम्पादकयोरधिफलकयोः शिष्टमभिषवराहित्येनावशिष्टं सोमं उद्भर, शकटोपरि हर, सोममभिषुतं सोमं पवित्रे दशापवित्रे आसृज, आनीय प्रक्षिप, प्रक्षिप्ते सत्यवशिष्टं सोमं, गोस्त्वचि आनडुहे चर्म्मणि, अधिनिदेहि, अध्यारोप्य स्थापय। चम्बोः, चमु अदने, चम्यते भक्ष्यत इति चमूः, कृषि चमीत्यादिना औणादिक ऊःप्रत्ययः, प्रत्ययस्वरः सप्तमीद्विवचनस्य, उदात्तस्वरितयोर्यणः ( पां ८ । २ । ४ । ) इति स्वरि-

## ऊनत्रिंशत्सूक्तं ॥

१११ यच्चिद्धि सत्य सोमपा अनाशस्ता इव स्मसि ।
आतू न इन्द्र शंसय गोष्वश्वेषु शुभ्रिषु सहस्रेषु तुवीमघ १

तत्वं, उदात्तयणो हलपूर्वात् ( पां ६ । १ । १७१ । ) इति व्यत्ययेन न भवति । भर, हृग्रहोर्भच्छन्दसीति सूत्रवार्त्तिकेन हकारस्य भत्वं । धेहि, ध्वसोरेद्धावभ्यासलोपश्च ( पां ६ । ४ । ११९ । ) इत्येकारादेशस्तत्सन्नियोगेनाभ्यासलोपश्च न भवति, निघातः । त्वचि, सावेकाचस्तृतीयादिः ( पां ६ । १ । १९८ । ) इति विभक्तेरुदात्तत्वं ॥ ९ ॥ इति प्रथमस्य द्वितीये षड्विंशो वर्गः ॥ २९ ॥

यच्चिद्धि सत्य सोमपा इति सप्तर्चं षष्ठं सूक्तं शुनःशेपस्यार्षं पाङ्क्तमैन्द्रं, अनुक्रमणिका च, यच्चित् सप्त पाङ्क्तमिति । एष षडहस्य पञ्चमेऽहनि माध्यन्दिने सवने होत्रका यच्चिद्धीति सप्तर्चं सूक्तं त्रींस्तृचान् कृत्वा स्वशस्त्रमेकैकं तृचमावपेरन्, चतुर्थेऽहनीति खण्डे यच्चिद्धि सत्य सोमपा इत्येकैकमेवेति सूचितं, तत्र प्रथमामृचमाह यच्चिद्धीति । विश्वेदेवैः प्रेरितः शुनःशेप एतदादिकाभिर्द्वाविंशतिसङ्ख्काभिर्ऋग्भिरिन्द्रं तुष्टाव, तथा च ब्राह्मणं, तं विश्वेदेवा ऊचुरिन्द्रो वै देवानामोजिष्ठो बलिष्ठः सहिष्ठः सत्तमः पारयिष्णुतमस्तं नु स्तुह्यथ त्वोत्स्रक्ष्याम इति, स इन्द्रं तुष्टाव यच्चिद्धि सत्य सोमपा इत्यनेन सप्तर्चेन सूक्तेन चोत्तरस्य पञ्चदशभिरिति । हे सोमपा, सोमस्य पातः, सत्यवादिन्निन्द्र, यच्चिद्धि यद्यपि, वयं अनाशस्ता इव स्मसि अप्रशस्ता इव भवामस्तथापि हे तुवीमघ बहुधनेन्द्र, त्वं गोष्वश्वेषु शुभ्रिषु शोभनेषु सहस्रसङ्ख्केषु च निमित्तभूतेषु नोऽस्मान् क्षिप्रं आशंसय सर्वतः प्रशस्तान् कुरु, अस्मद्दोषमनपेक्ष्य गवादीन् प्रयच्छेत्यर्थः । सोमपा, विजन्तः, आमन्त्रितनिघातः । अनाशस्ता इव, शंसुस्तुतौ, निष्ठा ( पां ३ । २ । १०२ । ) इति क्तः, यस्य विभाषा ( पां ७ । २ । १५ । ) इतीट्प्रतिषेधः, नञा बहुव्रीहौ, नञ्सुभ्यां ( पां ६ । २ । १७२ । ) इत्युत्तरपदान्तोदात्तत्वं । स्मसि, इदन्तो मसिः ( पां ७ । १ । ४९ । ) इति मसिः । तू, ऋचि तुनुघमक्षुतङ्कुचोरुष्याणां ( पां ६ । ३ । १३३ । ) इति दीर्घः । गोषु, सावेकाचः ( पां ६ । १ । १९८ । ) इति

१ २ १ शिप्रिन्वाजानाम्पते शचीवस्तव दंसना १
आ तू न० ॥
१ ३ १ निधापय मिथूदृशा सस्तामबुध्यमाने १
आ तू न० ॥

विभक्तुदात्तत्वस्य, नगोश्वन् स्तावर्ण ( पां०६ । १ । १८२ । ) इति प्रतिषेधः । अश्नेषु, अश्नुतेऽध्वानमित्यश्वः, असिएधीत्यादिना क्वन्प्रत्ययः, नित्त्वादाद्युदात्तत्वं । सुभिषु, सुभ दीप्तौ, अदिभ्रुदिभ्रुसुभिभ्यः क्रिन्निन्नौणादिकः क्रिन्प्रत्ययः, व्यत्ययेनान्तोदात्तत्वं ॥ १ ॥

द्वितीयाम्टचमाह शिप्रिन् वाजानामिति । हे शचीवः, शक्तिमन्, शिप्रिन् शोभनहनूयुक्त, वाजानाम्पते अन्नानाम्पालक, तव दंसना कर्म्मविशेषोऽनुग्रहरूपः सर्वदा वर्त्तते, अन्यत् पूर्ववत् । शिप्रिन्, शिप्रे हनूनासिकेवेति यास्कः, अत इनिठनौ (पां ४ । २ । ११५ ।) इति मत्वर्थीय इनिः प्रत्ययः, आमन्त्रिताद्युदात्तत्वं । वाजानाम्पते, सुबामन्त्रिते पराङ्गवत्स्वरे ( पां २ । १ । २ । ) इति पराङ्गवत्त्वात् षष्ठ्यामन्त्रितसमुदायनिघातः, नच आमन्त्रितं पूर्वमविद्यमानवत् ( पां ८ । १ । ७२ ।) इति शिप्रिन्नित्यस्याविद्यमानवत्त्वेन पदादपरत्वात्, पादादित्वाच्च निघातः, नामन्त्रिते समानाधिकरणे सामान्यवचनं ( पां ८ । १ । ७३ । ) इत्यविद्यमानवत्त्वप्रतिषेधात् । शचीवः, छन्दसीरः ( पां ८ । २ । १५ ।) इति मतुपो वत्वं, मतुवसोरु सम्बुद्धौ छन्दसि (पां ८ । ३ । १ ।) इति रुत्वे, खरवसानयोः ( पां ८ । ३ । १५ । ) विसर्ज्जनीयः, पादादित्वादामन्त्रितनिघाताभावः ॥ २ ॥

तृतीयाम्टचमाह निष्षापयेति । मिथूदृशा परस्परं सङ्गतत्वेन दृश्यमाने यमदूतौ निष्षापय नितरां सुप्ते कुरु, ते चास्मान्मारयितु मबुध्यमाने सत्यौ सस्तां, निद्रां प्राप्नुतां । अन्यत्पूर्ववत् । निष्षापय, सुषामादित्वात् षत्वं, अन्येषामपि दृश्यते ( पां ६ । ३ । २३७ । ) इति दीर्घः । मिथूदृशा, मिथूनतया युगलरूपेण पश्यत इति मिथूदृशा, क्विप्च ( पां ३ । २ । ७६ । ) इति दृशेः कर्त्तरि क्विप्, छन्दुत्तरपदप्रकृतिस्वरत्वं, पूर्ववत् पूर्वपदस्य दीर्घत्वं, सुपां सुलुक् (पां ७ । १ । ३९ ।) इति विभक्तेराकारः। सस्तां, वस स्वप्ने, लोटि तसस्तां, अदिप्रभृतिभ्यः

१४ १ ससन्तु त्या अरातयो बोधन्तु शूर रातयः १
आ तू न० ॥

१५ १ समिन्द्र गर्दभं मृण नुवन्तं पापयामुया १
आ तू न० ॥

१६ १ पताति कुण्डृणाच्या दूरं वातो वनादधि १
आ तू न० ॥

शपः ( पां २ । ४ । ७२ । ) इति शपो लुक्, प्रत्ययस्वरः, पादादित्वान्निघाताभावः । अबुध्यमाने, नेति नञ्समासेऽव्यपूर्वपदप्रकृतिस्वरत्वं ॥३॥

चतुर्थीमृचमाह ससन्तु त्या इति । त्या अस्माभिरदृश्यमानाः परोक्षास्ता अरातयोऽदानशीलाः शत्रवः ससन्तु निद्राम्प्राप्नुवन्तु, हे शूर शौर्य्ययुक्तेन्द्र, रातयो दानशीला बन्धवो बोधन्तु अस्मान् बुध्यन्तां । अन्यत् पूर्ववत् । ससन्तु, प्रत्ययस्वरः । अरातयः, रा दाने, मन्त्रे वृष (पां ३ । ३ । ९९ । ) इत्यादिना भावे क्तिन्, न विद्यते रातिरेष्विति बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वं, नञ्सुभ्यां ( पां ६ । २ । १७२ । ) इति तु सर्वे विधयश्छन्दसि विकल्पन्त इति परिभाषया न भवति, यद्वा क्तिचक्तौ च सञ्ज्ञायां ( पां ३ । ३ । १७४ । ) इति कर्त्तरि क्तिच्, नञ्समासेऽव्ययपूर्वपदप्रकृतिस्वरत्वं । बोधन्तु, पादादित्वात्, तिङ्ङतिङः (पां ८ । १ । २८ । ) इति निघाताभावः ॥ ४ ॥

पञ्चमीमृचमाह समिन्द्र गर्द्दभमिति । हे इन्द्र अमुया अनयास्माभिः श्रूयमाणया पापया निन्दारूपया वाचा नुवन्तं स्तुवन्तं अपकीर्त्तिं प्रकटयन्तमित्यर्थः, तादृशं गर्द्दभं गर्द्दभसमानवैरिणं संमृण सम्यङ्मारय, यथा गर्दभः श्रोतुमशक्यं परुषं शब्दं करोति, तथा शत्रुरपि । अन्यत् पूर्ववत् । गर्द्दभं, नर्द्द गर्द्द शब्दे, कॄ गॄ शॄ शलिगर्द्दिभ्योऽभच् इत्यौणादिकोऽभच्प्रत्ययः, चितः ( पां ६ । १ । १६३ । ) इत्यन्तोदात्तत्वं । मृण, मृण हिंसायां, तौदादिकस्यशस्य ङित्त्वाद्गुणाभावः । नुवन्तं, णु स्तुतौ, शतरि, अदिप्रभृतित्वाच्छपो लुक्, शतुर्ङित्त्वाद्गुणाभावे उवङादेशः, प्रत्ययाद्युदात्तत्वं ॥ ५ ॥

षष्ठीमृचमाह पताति कुण्डृणाच्येति । वातोऽस्मत्प्रतिकूलो वायुः, कुण्डृ-

१७१ सर्वं परिक्रोशं जहि जम्भया कृकदाश्वं १
आ तू न॰॥ २७ ॥

णाच्या कुटिलगत्या, सत्वस्मान् प्रति परित्यज्य वनादधि घोरारण्यादप्यधिकं दूरदेशं पतति, पततु। अन्यत् पूर्ववत्। पतति, लेटि-अडागमः। कुगृणाच्या, कुडि दाहे, इदितो नुम् धातोः (पां ७।१।५८।) इति नुमागमः, अस्मान् कुगृते, कुगृनशब्दे, डकारात्परस्याकारस्य ऋकारश्छान्दसः, ऋवर्णाच्चेति वक्तव्यमिति वार्त्तिकेन णत्वं, तदस्यतीति कुगृणाची, ऋत्विक् (पां ३।२।५९।) इत्यादिना क्विन्, अनिदितां हलः (पां ६।४।२४।) इति नलोपः, चौ (पां ६।३।१३८।) इति पूर्वपदस्य दीर्घत्वं, अञ्चतेश्चेति वक्तव्यमिति वार्त्तिकेन ङीप्, चौ (पां ६।१।२२२।) इत्याकारस्योदात्तत्वं ॥ ६ ॥

सप्तमीमृचमाह सर्वम्परिक्रोशमिति। परिक्रोशमस्मद्विषये सर्वतआक्रोशकर्त्तारं पुरुषं जहि मारय, कृकदाश्वं अस्मद्विषये हिंसाप्रदंशुं जम्भय मारय। अन्यत्पूर्ववत्। परिक्रोशं, क्रुश आह्वाने रोदने च, परितः क्रोशयतीति परिक्रोशः, पचाद्यच्, कृदुत्तरपदप्रकृतिस्वरत्वं। जहि, हन हिंसागत्योः, हन्तेर्जः (पां ६।४।३६।) इति जादेशः, तस्य, असिद्धवदत्राभात् (पां६।४।२२।) इत्यसिद्धत्वात्, अतोहेः (पां ६।४।१०५।) इति हेर्लुङ्भवति। जम्भय, जम्भि नाशने, चुरादित्वात् स्वार्थिको णिच्, शपः पित्त्वादनुदात्तत्वे णिच एव स्वरः शिष्यते। कृकदाश्वं, कृणु हिंसायां, कृदाधारार्चिकलिभ्यः कन्निलौणादिकः कन्प्रत्ययः, किदित्यनुवृत्तेर्गुणाभावः, तथाच कृको हिंसा, तां दाशति प्रयच्छतीति कृकदाशुः, बहुलग्रहणाद्दाशतेरपि कृक उपपदे, कृकेवचः कस्येत्यौणादिक उण्प्रत्ययः, प्रत्ययस्वरेणोदात्तः, द्वितीयायामपि पूर्वरूपत्वे प्राप्ते, वा छन्दसि (पां ६।१।१०६।) इति तस्य बाधितत्वाद्यणादेशः, उदात्तस्वरितयोर्यणः (पां ८।२।४।) इत्यादिना विभक्तेः स्वरितत्वं ॥ ७ ॥ इति प्रथमस्य द्वितीये सप्तविंशो वर्गः ॥ २७ ॥

## त्रिंशत्सूक्तं।

### १११ आ व इन्द्रं क्रिविं यथा वाजयन्तः शतक्रतुं १ मंहिष्ठं सिञ्च इन्दुभिः ॥

आ व इन्द्रमिति द्वाविंशत्यृचं सप्तमं सूक्तं, शुनःशेपस्यार्षं गायत्रं, अस्माकमित्येषा पादनिचृद्गायत्रीत्रयः सप्तकाः पादानिचृदित्युक्तत्वात्, शश्वदिन्द्र इत्येषा त्रिष्टुप् आदितः षोडशर्चं ऐन्द्र्याः, आश्विनावश्वावत्येत्याद्यास्तिस्र आश्विन्यः, कस्त उष इत्याद्यास्तिस्र उषोदेवताकाः तथाचानुक्रमणिका, आवोद्यधिकास्माकं पादनिच्छश्वत्त्रिष्टुप् परौ ह्वचावाश्विनौषस्यावितिः। प्रथमाष्टचमाह आ व इन्द्रमिति। वाजयन्तोऽन्नमिच्छन्तो वयं शुनःशेपाः, हे ऋत्विग्यजमाना वो युष्माकं सम्बन्धिनमिममिन्द्रं इन्दुभिः सोमैरासिञ्चे सर्वतः सिञ्चामहे तर्पयामः। कीदृशं, शतक्रतुं शतसङ्ख्यककर्म्मोपेतं। मंहिष्ठमतिशयेन प्रवृद्धं, सेचने दृष्टान्तः, यथा येन प्रकारेण क्रिविमवटं जलेन पूरयति तद्वत्। क्रिविं, दृशपाद्यां पच्चपाद्यां कृविशब्द ऋकारवान् साधनिकया भवति, अत्रापि च क्रिविशब्दोऽवटः। काट इत्यादिषु चतुर्दशसु कूपनामसु क्रिविः कूपः सूद इति पठितं। डुकृञ्करणे, क्रिविडागमश्च निपात्यत इति निघण्टुभाष्यं। वस्तुतस्तु क्रिवि कृति च्छेदने, कृत्यत इति कृविः, कृविदृम्भिच्छविस्यवि किकीदिवि इत्यौणादिकसूत्रे क्विन् प्रत्ययान्तो निपातितः, अत एव तशब्दलोपः, नित्त्वादाद्युदात्तत्वं। यथा, यथेति पादान्तेति फिट्सूत्रेण सर्वानुदात्तत्वं। वाजयन्तः, वाजमात्मन इच्छन्तः, सुप आत्मनः क्यच् (पां ३। १। ८।) इति क्यच्, न छन्दस्यपुत्रस्य (पां ७। ४। ३५।) इति ईत्वदीर्घत्वयोः प्रतिषेधः, अश्वाघस्यात् (पां ७। ४। ३७।) इति पुनर्दीर्घविधानानुज्ञापनात्। मंहिष्ठं, मह्हि वृद्धौ, अतिशयेन मंहिता मंहिष्ठः, तुश्छन्दसि (पां ५। ३। ५९।) इति वृजन्तादिष्ठन्प्रत्ययः, तुरिष्ठेमेयः सु (पां ६। ४। १५४।) इति वृलोपः, इष्ठनो नित्त्वादाद्युदात्तत्वं। सिञ्चे, षिचिर् क्षरणे, धात्वादेः षः सः (पां ६। १। ६४।) इति षस्य सत्वं, व्यत्ययेनैकवचनं, श्नेमुचादीनां (पां ७। १। ५९।) इति नुमागमः॥ १॥

१२१ शतं वा यः शुचीनां सहस्रं वा समाशिरां ।
एदु निम्नं न रीयते ॥

१३१ सं यन्मदाय शुष्मिण एना ह्यस्योदरे ।
समुद्रो न व्यचो दधे ॥

१४१ अयमु ते समतसि कपोत इव गर्भधिं ।
वचस्तच्चिन्न ओहसे ॥

द्वितीयामृचमाह शतं वा य इति। य इन्द्रः शुचीनां शुद्धानां सोमानां शतं वा शतसङ्ख्याकं समूहं वा, समाशिरां समीचीनेनाशिराख्येन श्रपणद्रव्येणोपेतानां सोमानां सहस्रं सहस्रसङ्ख्याकं समूहं वा एदुरीयते आगच्छत्येव, सोऽस्माननुगृह्णात्विति शेषः। सोमप्राप्तौ दृष्टान्तः, निम्नं न, निम्नमिव, यथा निम्नदेशं आपः आप्नुवन्ति तद्वत्। समाशिरां, श्रीञ् पाक इत्यस्य समाङ्पूर्वकस्य क्विपि, अपस्पृधेथामानृचुः (पां ६।१।३६।) इत्यादिनाशिरादेशो निपातितः, बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वं। रीयते, रीञ् श्रवणे, दिवादिभ्यः श्यन् ॥ २ ॥

तृतीयामृचमाह सं यन्मदायेति। तत्पूर्वोक्तं शतं सहस्रं वा, शुष्मिणो बलवत इन्द्रस्य, मदाय मदार्थं, संयत् सङ्गतं भवति, एना हि अनेनैव, शतेन सहस्रेण च, अस्येन्द्रस्योदरे, व्यचो व्याप्तिर्दधे धृता भवति। तत्र दृष्टान्तः, समुद्रो न समुद्र इव, यथा समुद्रमध्ये जलं व्याप्तं तद्वत्। एना, सुपां सुलुक् (पां ७।१।३९।) इति तृतीयाया डाच् आदेशः। व्यचः, व्यचेः कुटादित्वमनसीति परिभाषया ङिद्वद्भावस्य प्रतिषिद्धत्वात्, ग्रहिज्या (पां ६।१।१६।) इत्यादिना सम्प्रसारणं न भवति, असुनो नित्त्वादाद्युदात्तत्वं। दधे, दधातेः कर्म्मणि अभ्यासह्रस्वजश्त्वेषु कृतेषु, आतो लोप इटि च (पां ६।४।६४।) इत्याकारलोपः, प्रत्ययस्वरेणान्तोदात्तत्वं, हि च (पां ८।१।३४।) इति प्रतिषेधान्निघाताभावः ॥ ३ ॥

चतुर्थीमृचमाह अयमु त इति। हे इन्द्र, अयमु अयमपि दृश्यमानः सोमस्ते त्वदर्थं सम्पादितः, यं सोमं समतसि सम्यक् सातत्येन प्राप्नोषि, तत्र दृष्टान्तः, कपोत इव, यथा कपोताख्यः पक्षी गर्भधिं

१५१ स्तोत्रं राधानां पते गिर्वाहो वीर यस्य ते १
विभूतिरस्तु सूनृता ॥ २८ ॥
१६१ उद्वंस्तिष्ठा न उतयेऽस्मिन्वाजे शतक्रतो १
समन्येषु ब्रवावहै ॥

गर्भधारिणीं कपोतीं प्राप्नोति तद्वत्। तच्चित् तस्मादेव कारणान्नोऽस्मदीयं वच ओहसे प्राप्नोषि। अतसि, अत सातत्यगमने। कपोत इव, कवेरोतच् पश्चेत्यौणादिक ओतच् प्रत्ययः, वस्य पत्वच्च, व्यत्ययेन मध्योदात्तः, अथवा अयुत्पन्न एव, लघावन्ते द्वयोश्च बङ्कचो गुरुरिति फिट्सूत्रेण गुरूदात्तः। गर्भधिं, गर्भोऽस्यां धीयत इति गर्भधिः, कर्मण्यधिकरणे च (पां ३। ३। ९३।) इति किःप्रत्ययः, क्षदुत्तरपदप्रकृतिस्वरत्वं। ओहसे, तुहिर् दुहिर् उहिर् अर्दने, व्यत्ययेनात्मनेपदं ॥ ४ ॥

पञ्चमीमृचमाह स्तोत्रं राधानामिति। हे इन्द्र, राधानां धनानाम्पते धनानाम्पालक, गिर्वाहो गीर्भिरुह्यमान, वीर प्रशस्तैर्युक्त, यस्य ते तव स्तोत्रमीदृशं भवति. तस्य तव विभूतिर्लक्ष्मीः सूनृता प्रियसत्यरूपास्तु। स्तोत्रं, ष्टुञ् स्तुतौ, इत्यस्मात्, दाम्नीशसयुयुजस्तु (पां ३। २। १८२।) इत्यादिना ष्ट्रन्प्रत्ययः, पश्चादर्श आद्यच्, अथवा स्तोतुरिदमित्यर्थेऽण्, सञ्ज्ञापूर्वको विधिरनित्य इति परिभाषया वृद्धिर्न भवति। राधानाम्पते, राध साध संसिद्धौ, राध्नुवन्त्येभिरिति राध्नानि धनानि, सुबामन्त्रिते पराङ्गवत्स्वरे (पां २। १। २।) इति पराङ्गवद्भावात् षष्ठ्यामन्त्रितसमुदायस्य निघातः। गिर्वाहः, वह प्रापणे, वहिहाधाञ्भ्यश्छन्दसीति कारकपूर्वकस्यापि वहतेरसुन्प्रत्ययः, गतिकारकयोरपि पूर्वपदप्रकृतिस्वरत्वं चेत्युक्तत्वात्, णिदित्यनुवृत्तेरुपधावृद्धिः, पूर्वपदस्य, र्वोरुपधाया दीर्घ इकः (पां ८। २। ७६।) इति दीर्घाभावश्छान्दसः, षाष्ठिकमामन्त्रितायुदात्तं। विभूतिः, तादौ च निति (पां ६। २। ५०।) इत्यादिना गतेः प्रकृतिस्वरत्वं ॥ ५ ॥ इति प्रथमस्य द्वितीयेऽष्टाविंशो वर्गः ॥ २८ ॥

षष्ठीमृचमाह ऊर्द्वस्तिष्ठा न इति। हे शतक्रतो शतसङ्ख्यककर्मोपेत, अस्मिन् प्रसक्ते वाजे सङ्ग्रामे नोऽस्माकमूतये रक्षणाय ऊर्द्ध उन्नत उत्युत्कृष्टः भव, त्वच्चाहच्च मिलित्वान्येषु कार्य्यान्तरेषु सम्ब्रवावहै सम्य-

१७१ योगे योगे तवस्तरं वाजे वाजे हवामहे १
सखाय इन्द्रमूतये ॥
१८१ आ घा गमद्यदि श्रवत्सहस्रिणीभिरूतिभिः १
वाजेभिरुप नो हवं ॥

विचारयामः । तिष्ठ, द्व्यचोऽतस्तिङः ( पां ६ । ३ । १३५ । ) इति संहितायां दीर्घः । ऊतये, ऊति यूति जूति साति हेति कीर्त्तयश्च ( पां ३ । ३ । ९७ । ) इति क्तिन उदात्तत्वं । अस्मिन्, ऊडिदम्पदाद्यप्पुम् ( पां ६ । १ । १७१ ) इत्यादिना सप्तम्या उदात्तत्वं ॥ ६ ॥

सप्तमीमृचमाह योगे योग इति । योगे योगे प्रवेशे प्रवेशे तत्तत्कर्म्मोपक्रमे, वाजे वाजे कर्म्मविघातिनि तस्मिंस्तस्मिन् सङ्ग्रामे, तवस्तरमतिशयेन बलिनमिन्द्रं, ऊतये रक्षार्थं, सखायः सखिवत् प्रिया वयं, हवामहे आह्वयामः । योगे योगे, युजिर् योगे, हलश्च ( पां ३ । ३ । १२१ । ) इति घञ्, चजोः कुघिण्यतोः ( पां ७ । ३ । ५२ । ) इति कुत्वं, घञो ञित्त्वादाद्युदात्तत्वं, नित्यवीप्सयोः ( पां ८ । १ । ४ । ) इति वीप्सायां द्विर्भावे सति आम्रेडितानुदात्तत्वं । तवस्तरं, तवस्शब्दात्, अस्मायामेधास्रजो विनिः ( पां ५ । २ । १२१ । ) इति विनि प्रत्ययः, विन्मतोर्लुक् ( पां ५ । ३ । ६५ । ) इति तस्य छान्दसो लुक् ॥ ७ ॥

अष्टमीमृचमाह आ घा गमदिति । यदि अवत् यद्ययमिन्द्रो नोऽस्मदीयं हवमाह्वानं शृणुयात्, तदानीं स्वयमेव सहस्रिणीभिरूतिभिबहुभिः पालनैर्वाजैरन्नैश्च उप समीपे, आ घ अवश्यमागमदागच्छेत् । घ, क्वचि तु नु घ ( पां ६ । ३ । १३३ । ) इति संहितायां दीर्घः । गमत्, लिङर्थे लेट् ( पां ३ । ४ । ७ । ) इति लिङर्थे लेट्, लेटोऽडाटौ ( पां ३ । ४ । ९४ । ) इत्यडागमः, इतश्च लोपः परस्मैपदेषु ( पां ३ । ४ । ९७ । ) इतीकारलोपः, यद्वा छान्दसे लुङि, पुषादिद्युताद्लृदितः परस्मैपदेषु ( पां ३ । १ । ५५ । ) इति च्लेरङादेशः, बहुलं छन्दस्यमाङ्योगेऽपि ( पां ६ । ४ । ७५ । ) इत्यडभावः । अवत्, अव अवणे, पूर्ववल्लेट्यडागमः । वाजेभिः, बहुलं छन्दसीति भिसऐसादेशाभावः । हवं, भावेऽनुपसर्गस्य ( पां ३ । ३ । ७५ । ) इति ह्वयतेरप्, सम्प्रसारणञ्च, अपः पित्त्वादनुदात्तत्वे धातुस्वरेणाद्युदात्तत्वं ॥ ८ ॥

१९१ अनु प्रत्नस्यौकसो हुवे तुविप्रतिं नरं ।
यं ते पूर्वं पिता हुवे ॥
११०१ तं त्वा वयं विश्ववारा शास्महे पुरुहूत ।
सखे वसो जरितृभ्यः ॥ २९ ॥

नवमीमृचमाह अनुप्रत्नस्येति । प्रत्नस्य पुरातनस्यौकसः स्थानस्य स्वर्गरूपस्य सकाशात्, तुविप्रतिं बहून् यजमानान् प्रतिगन्तारं, नरं पुरुषमिन्द्रं अनुहुवे अनुक्रमेण कर्म्मस्वाह्वयामि । यं ते त्वामिन्द्रं पिता मदीयो जनकः, पूर्वं पुरा स्वकीयानुष्ठानकाले हुवे आहूतवान्, तमाह्वयामीति पूर्व्वत्रान्वयः । ओकसः, नब्विषयस्यानिसन्तस्येति फिट्सूत्रेणाद्युदात्तत्वं । हुवे, ह्वेञ् स्पर्द्धायां शब्दे च, इटि बहुलं छन्दसीति सम्प्रसारणं, परपूर्वत्वं, गुणे प्राप्ते, क्ङिति च (पां १।१।५।) इति प्रतिषेधः, उवङादेशः, प्रत्ययस्वरेणान्तोदात्तत्वं, पादादित्वादनिघातः । तुविप्रतिं, तुवीनां बहूनां प्रति गन्तारं, अत्र प्रतिशब्दो भीमसेनो-भीम इति वत् प्रतिगन्तृशब्दं लक्षयित्वा तद्द्वारा तदर्थं लक्षयति, अतः, प्रतिः प्रतिनिधिप्रतिदानयोः (पां १।४।९२।) इतिवत् सत्ववचनत्वेन निपातत्वादनव्ययत्वेन, पूरणगुण (पां २।२।११।) इत्यादिना षष्ठी-समासनिषेधः । हुवे, ह्वेञो लिटि, बहुलं छन्दसीति पूर्ववत् सम्प्रसारणपरपूर्वत्वे, द्विर्वचनप्रकरणे, छन्दसि चेति वक्तव्यमिति वार्त्तिकेन द्विर्वचनाभावः, यद्वृत्तान्नित्यं (पां ८।१।६६।) इति यद्वृत्तयोगादनिघातः ॥ ९ ॥

दशमीमृचमाह तं त्वा वयमिति । हे विश्ववार, सर्वैर्वरणीय, पुरुहूत बहुभिः स्वस्वकर्म्मण्याहूत, सखे सखिवत्प्रिय, वसो निवासहेतो, इन्द्र, तं पूर्वोक्तगुणयुक्तं त्वां, जरितृभ्यः स्तोतॄणामनुग्रहार्थं, वयं आशास्महे प्रार्थयामहे । आशास्महे, आङ्पूर्व्वकशासु इच्छायां, अदि-प्रभृतिभ्यः शपः (पां २।४।७२।) इति शपो लुक् । वसो, नामन्त्रिते समानाधिकरणे सामान्यवचनं (पां ८।१।७३।) इति पूर्वस्याविद्यमानवत्त्वप्रतिषेधात् पराङ्गवद्भावे सति, शेषनिघातेन वा आमन्त्रितनिघातेन वा सर्वानुदात्तत्वं । जरितृभ्यः, जरतिः स्तुतिकर्म्मा, तृचश्चित्त्वादन्तोदात्तत्वं ॥ १० ॥ इति प्रथमस्य द्वितीये एकोनत्रिंशो वर्गः ॥ २९ ॥

१ १११ अस्माकं शिप्रिणीनां सोमपाः सोमपावां १
सखे वज्रिन्त्सखीनां ॥
१ १२१ तथा तदस्तु सोमपाः सखे वज्रिन्तथा कृणु १
यथा त उश्मसीष्टये ॥

एकादशीमृचमाह अस्माकं शिप्रिणीनामिति। हे सोमपाः सोमस्य पातः, सखे सखिवत्प्रिय, वज्रिन् वज्रयुक्तेन्द्र, सखीनां सखिवत्प्रियाणां, सोमपावां सोमस्य पातॄणामस्माकं, शिप्रिणीनां दीर्घाभ्यां हनूभ्यां नासिकाभ्यां वा युक्तानां, गवां समूहस्त्वत्प्रसादादस्तिशेषः। शिप्रिणीनां, ऋन्नेभ्यो ङीप् (पां ४। १। ५।) इति ङीप्, तस्य पित्त्वादनुदात्तत्वेसति प्रत्ययस्वरः शिष्यते। सोमपाः, आमन्त्रितस्य सतिशिष्टत्वादामन्त्रिताद्युदात्तत्वं। सोमपावां, आतो मनिन् (पां ३। २। ७४।) इति वनिप्, अन्नोपोऽनः (पां ६। ४। १३४।) इत्यनोऽकारलोपः ॥ ११ ॥

द्वादशीमृचमाह तथा तदिति। हे सोमपाः सखे वज्रिन्, इष्टये ऽभिलषितार्थं, ते तवानुग्रहं, यथा येन प्रकारेण, उश्मसि वयं कामयामहे, त्वं तथा कुरु, त्वत्प्रसादात्तदभीष्टं तथास्तु। कृणु, कृवि हिंसाकरणयोश्च, इदित्वान्नुम्, धिन्विकृण्व्योर च (पां ३। १। ८०।) इत्युप्रत्ययस्तत्सन्नियोगेन वकारस्याकारः, अतो लोपः (पां ६। ४। ४८।) इति तस्य लोपः, स्थानिवद्भावान्नलघूपधगुणाभावः, उतश्चप्रत्ययादसंयोगपूर्वात् (पां ६। ४। १०६।) इति हेर्लुक्। उश्मसि, वश कान्तौ इदन्तो मसिः, अदादित्वाच्छपो लुक्, ग्रहि ज्या (पां ६। १। १६।) इति सम्प्रसारणं, प्रत्ययस्वरः, यङ्वृत्तयोगादनिघातः। इष्टये, इषु इच्छायां, क्तिनि कृते, तितुत्रतथसिसुसरकसेषु च (पां ७। २। ९।) इति इट्प्रतिषेधः, यद्वा यजतेः क्तिनि, वच्यजिपियजादीनां (पां ६। १। १५।) इत्यादिना सम्प्रसारणं, व्रश्चादिना षत्वे कृत्वं, पूर्वस्मिन् पक्षे, मन्त्रेष्वेषपचमनविद (पां ३। ३। ९६।) इति क्तिन् उदात्तत्वं, द्वितीये तु व्यत्ययेन ॥ १२ ॥

११३१ रेवतीर्नः सधमाद इन्द्रे सन्तु तुविवाजाः १
क्षुमन्तो याभिर्मदेम ॥
११४१ आ घ त्वावान्त्मनाप्रः स्तोतृभ्यो धृष्णवियानः १
ऋणोरक्षं न चक्र्योः ॥

चयोदशीमृचमाह रेवतीर्न इति । क्षुमन्तोऽन्नवन्तो वयं, याभिर्गोभिः सह मदेम हृष्येम, इन्द्रे सधमादे, अस्माभिः सह हर्षयुक्ते सति, नोऽस्माकं, ता गावो, रेवतीः क्षीराज्यादिधनवत्यः, तुविवाजाः प्रभूतबलाश्च, सन्तु । रेवतीः, रयिशब्दान्मतुपि, रयेर्मतौ बज्झलमिति वार्त्तिकेन सम्प्रसारणं, परपूर्वत्वं, छन्दसीरः ( पां ८ । २ । १५ । ) इति मतुपो वत्वं, वाछन्दसि ( पां ६ । १ । १०६ । ) इति पूर्वसवर्णदीर्घः, आ रेशब्दाच्च मतुप उदात्तत्वं वक्तव्यमिति वार्त्तिकेन रेशब्दादुत्तरस्यापि भवतीति पूर्वमेवोक्तं । सधमादे, मद तृप्तियोगे, चौरादिकः, सह मादयतीति सहमादः, पचाद्यच्, सधमादस्थयोश्छन्दसि बज्झलं ( पां ६ । ३ । ९६ । ) इति सहशब्दस्य सधादेशः, थाथघञ्क्ताजबित्रकाणां ( पां ६ । २ । १४४ । ) इत्युत्तरपदान्तोदात्तत्वं । तुविवाजाः, तु इति सौत्रो धातुः, अच इरित्यौणादिक इः प्रत्ययः, सञ्ज्ञापूर्वकत्वाद्गुणो न भवति, बज्झबीह्रौ पूर्वपदप्रकृतिस्वरत्वं । क्षुमन्तः, क्षु शब्दे, असात् क्विपि, तुगभावश्छान्दसः, ऋक्षनुड्भ्यां मतुप् ( ६ । १ । १७६ । ) इति मतुप उदात्तत्वं । मदेम, मदी हर्षे, श्यत्ययेन शप्, अदुपदेशाल्लसार्वधातुकानुदात्तत्वे शपः पित्त्वादनुदात्तत्वं, ततो धातुस्वरः शिष्यते ॥ १३ ॥

चतुर्दशीमृचमाह आ घ त्वावानिति । हे वृषो धार्ष्ट्ययुक्तेन्द्र, त्वावान् त्वत्सदृशो देवताविशेषः त्मनाप्तः त्वदनुग्रहवशात् स्वयमेवाप्तः सन्, इयानोऽस्माभिर्याच्यमानः, स्तोतृभ्यः स्तोतृणामनुग्रहाय, तदभीष्टमर्थं, घ अवश्यं, आऋणोः, आनीय प्रक्षिपतु, तत्र दृष्टान्तः, चक्र्योः रथस्य, चक्रयोरक्षं न, यथा अक्षं प्रक्षिपति तद्वत् । त्वावान्, वतुप्प्रकरणे, युष्मदस्मद्भ्यां छन्दसि सादृश्य उपसङ्ख्यानमिति वार्त्तिकेन वतुप्, प्रत्ययोत्तरपदयोश्च ( पां ७ । २ । ९८ । ) इति मपर्य्यन्तस्य त्वादेशः, आ सर्वनाम्नः ( पां ६ । ३ । ९१ । ) इति टकारस्यात्वं, वतुपः पित्त्वा-

१ १५ १ आ यद्दुवः शतक्रतवा कामं जरितॄणां १
ऋणो रक्षं न शचीभिः ॥ ३० ॥
१ १६ १ शश्वदिन्द्रः पोप्रथद्भिर्जिगाय नानदद्भिः शाश्व-
सद्भिर्धनानि १ स नो हिरण्यरथं दंसनावान्त्स
नः सनिता सनये सनो ऽदात् ॥

दनुदात्तत्वे प्रातिपदिकस्वरः शिष्यते । त्मना, मन्त्रेष्वाङ्यादेरात्मनः ( पां ६ । ४ । १४१ । ) इत्याकारलोपः । धृषो, जिधृषा प्रागल्भ्ये, चसिग्रहिधृषिक्षिपेः क्नुः ( पां ३ । २ । १४० । ) इति क्नुःप्रत्ययः, आमन्त्रितादुदात्तत्वं । इयानः, ईङ्,गतौ, छन्दसि लिट्, तस्य, लिटःकानज्वा ( पां ३ । २ । १०६ । ) इति कानजादेशः, अचिश्नुधातु ( पां ६ । ४ । ७७ । ) इत्यादिना इयङादेशः, द्विर्वचनप्रकरणे, छन्दसि वेति वक्तव्यमिति वचनाद्भ्यासो न क्रियते, चितः ( पां ६ । १ । १६३ । ) इत्यन्तोदात्तत्वं । ऋणोः, ऋण गतौ लङि व्यत्ययेन तिपः सिपि, इतश्च ( पां २ । ४ । १०० । ) इति इकारलोपः, तनादिकृञ्भ्य उः ( पां ३ । १ । ७९ । ) इत्युः प्रत्ययः, सार्वधातुकोगुणः, बञ्ङिति छन्दस्यमाङ्योगेऽपि ( पां ६ । ४ । ७५ । ) इत्यडागमाभावः, विकरणस्वरेणान्तोदात्तत्वं । अक्षं, अक्षस्यादेवनस्येति णिट्सूत्रेणाद्युदात्तत्वं । चक्ष्वोः, अकारस्येकारश्छान्दसः ॥ १४ ॥

षष्ठदशीमृचमाह आ यद्दुव इति । हे शतक्रतो इन्द्र, यत् दुवो धनं कामितार्थरूपं, आस्तोट्टभिराप्तव्यमस्ति, तं कामं जरितॄणां स्तोतॄणामनुग्रहाय आऋणोः, आनीय प्रक्षिपसि, तत्र दृष्टान्तः शचीभिः कर्मभिः शकटोचितव्यापारविशेषैः अक्षं न, यथा अक्षं प्रक्षिपन्ति तद्वत् । शचीभिः, शचीशब्दः शारङ्गरवादिर्ङीनन्त आद्युदात्तः ॥ १५ ॥ इति प्रथमस्य द्वितीये त्रिंशो वर्गः ॥ ३० ॥

षोडशीमृचमाह शश्वदिन्द्र इति । तुष्टेनेन्द्रेण दत्तं हिरण्यरथं अनयार्चा प्रतिजग्राह, तथाच ब्राह्मणं, तस्मादिन्द्रः स्तूयमानः प्रीतो मनसा हिरण्यरथं ददौ तमेतयार्चा प्रतीयाय शश्वदिन्द्र इतीति । इन्द्रः शश्वत् सर्वदा धनानि वीरसम्बन्धीनि जिगाय जितवान्,

१ १७ १ आश्विनावश्वावत्येषा यातं शवीरया १
गोमद्दस्रा हिरण्यवत् ॥

अश्वैरितिशेषः, । कीटृशैस्तैरश्वैः, मेाप्रुथद्भिः, घासभक्षणानन्तरभाविनमेाष्ठशब्दं कुर्वद्भिः। नादद्भिः, नादमास्यगतं क्ष्वेषाशब्दं कुर्वद्भिः। श्वास्वसद्भिः, पुनः पुनर्भृशं वा श्वसद्भिः, । दंसनावान् कर्म्मवान् सनिता दाता स इन्द्रो, मेाऽस्माकं सनये सम्भजनार्थं, हिरण्यरथं सुवर्णनिर्म्मितं रथमदात् दत्तवान्, सनः सनः सन इति चिरक्तिरादरार्थं। मेाप्रुथद्भिः, प्रेाथृ पर्य्याप्तौ, अस्माद्यङ्लुकि, अभ्यासह्लादिशेषौ, क्रस्वः ( पां ७ । ४ । ५९ । ) इति क्रस्वत्वे कृते, गुणो यङ्लुकोः ( पां ७ । ४ । ८२ । ) इति गुणः, धातोरुपधाया उत्वं छान्दसं, अस्माद्यङ्लुगन्ताच्छतरि, अभ्यस्तानामादिः ( पां ६ । १ । १८९ । ) इत्याद्युदात्तत्वं । जिगाय, जि जये, लिटो, णलि, वृद्धिः, द्विर्वचनेऽचि ( पां १ । १ । ५९ । ) इति स्थानिवद्भावाज्जि इत्यस्य द्विर्वचनं, सन्लिटोर्जेः ( पां ७ । ३ । ५७ । ) इत्यभ्यासादुत्तरस्य कुत्वं । नानदद्भिः, णद अव्यक्तशब्दे, पूर्ववद्यङ्लुकि, दीर्घोऽकितः ( पां ७ । ४ । ८३ । ) इति अभ्यासस्य दीर्घः, पूर्वपदाद्युदात्तत्वं । श्वास्वसद्भिः, श्वस प्राणने, अन्यत् सर्वं पूर्ववत् । हिरण्यरथं, समासस्य ( पां ६ । १ । २२३ । ) इत्यन्तोदात्तत्वं । अदात्, दाति स्था ( पां २ । ४ । ७७ । ) इति सिचो लुक् । दंसनावान्, अग्रो दंसो वेध इति कर्म्मनामसु पठितो दंसशब्दः, दंस एव दंसना, तदस्यास्तीति मतुप्, दस्यतेऽनेनेति दंसना ॥ १६ ॥

प्रातरनुवाके आश्विने क्रतौ गायत्रे छन्दसि आश्विनावश्वावत्येति-ट्चः, अथाश्विन इति खण्डे अश्विना यज्वरीरिष आश्विनावश्वावत्येति सूक्तं, तस्मिंस्तृचे प्रथमां सूक्ते सप्तदशीमृचमाह आश्विनावश्वावत्येति । इन्द्रेण प्रेरितः शुनःशेपोऽश्विनौ तुष्टाव, तथाच ब्राह्मणं, तमिन्द्र उवाचाश्विनौ वै देवानामिभिषजौ तौ नु स्तुहि, अथ त्वात्सुच्यामीति स तुष्टाव ता उत्तरेण ट्चेनेति । अश्वावती बहुभिरश्वैर्युक्तौ हे अश्विनौ, शवीरया प्रेर्य्यमाणया इषा अन्नेन सह आयातं, अस्मिन् कर्म्मण्यागच्छतं, हे दस्रौ अश्विनौ, युवयोः प्रसादात्, गोमत् बहुभिर्गोभिर्युक्तं, हिरण्यवद्बहुना हिरण्येन युक्तमस्मदीयं गृहं अश्विनिशेषः। अश्वावत्यौ, मन्त्रे सोमाश्वेन्द्रियविश्वदेव्यस्यमतौ ( पां ६ । ३ । १३१ । )

११८। समानयोजनो हि वां रथो दस्रावमर्त्यः।
समुद्रे अश्विनेयते ॥

११९। न्यघ्न्यस्य मूर्द्धनि चक्रं रथस्य येमथुः।
परि द्यामन्यदीयते ॥

१२०। कस्त उषः कधप्रिये भुजे मर्त्तो अमर्त्ये।
कं नक्षसे विभावरि ॥

इति दीर्घत्वं। इषा, सावेकाचस्तृतीयादिर्विभक्तिः (पां ६।१।१६८।) इति तृतीयाया उदात्तत्वं। यातं, या प्रापणे, लोटि तसस्तं, अदादित्वाच्छपो लुक्। शवीरया, शु गतौ, कृश्रृपृकटिपटिशौटिभ्य ईरन्नित्यौणादिक ईरन्प्रत्ययो बहुलवचनादस्मादपि भवति, नित्त्वादाद्युदात्तत्वं ॥ १७ ॥

अष्टादशीमृचमाह समानयोजन इति। हे दस्रावश्विनौ, वां युवयोः सम्बन्धी रथः समानयोजनो युवयोर्द्वयोरेकरथारूढत्वादुभयार्थं सकृदेव युज्यते, युक्तः सरथः, अमर्त्यो विनाशरहितः, अप्रतिहतगतिरित्यर्थः, अत एव हे अश्विनौ, हि यस्मात् समुद्रवन्त्यस्मात् समुद्रेऽन्तरीक्षे ईयते गच्छति। अन्तरिक्षनामसु पठितं समुद्रशब्दं यास्क एवं व्याचख्यौ, समुद्रः कस्मात् समुद्रवन्त्यस्मादापः समभिद्रवन्त्येनमापः सम्मोदन्तेऽस्मिन् भूतानि समुद्रको भवति समुन्नतीति। समानयोजनः, बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वं। ईयते, ईङ्गतौ, अदुपदेशाल्लसार्वधातुकानुदात्तत्वे, श्यनो नित्त्वादाद्युदात्तत्वं, हि च (पां ८।१।३४।) इति तिघातप्रतिषेधः ॥ १८ ॥

एकोनविंशीमृचमाह न्यघ्न्यस्येति। हे अश्विनौ, युवां, अघ्न्यस्य हन्तुं विनाशयितुमशक्यस्य दृढस्य पर्वतस्य, मूर्द्धनि उपरि, रथस्य चक्रं भवदीयरथसम्बन्धि एकं चक्रं, नियेमथुर्नियमितवन्तौ, अन्यच्चक्रं परि द्यां द्युलोकस्य परित ईयते गच्छति। अघ्न्यस्य, अहननमघ्नं, घञर्थे कविधानं, स्थाम्नापाव्यधिहनियुध्यर्थमित्यौणादिकसूत्रेण हन्तेः कप्रत्ययः, अघ्नमर्हत्यघ्न्यः, छन्दसि च (पां ६।१।६७।) इति यत्प्रत्ययः, प्रत्ययस्वरेणान्तोदात्तत्वं। येमथुः, यमु उपरमे, किति लिटि, अत एकहल्मध्येऽनादेशादेर्लिटि, (पां ६।४।१२०।) इत्येत्वाभ्यासलोपौ ॥ १९ ॥

प्रातरनुवाके आश्विनशस्त्रे उषस्ये क्रतौ गायत्रे छन्दसि कस्त उष

१२१। वयं हि ते अमन्मह्यान्तादापराकात्।
अश्वे न चित्रे अरुषि॥

इति तृचः, अथोषस्येति खण्डे कस्त उष इति तिस्र इति सूत्रितं, तस्मिंस्तृचे प्रथमां सूक्ते विंशीमृचमाह कस्त उष इति। अश्विभ्यां प्रेरितः शुनः शेप उषसं तुष्टाव, तथाच ब्राह्मणं, तमश्विनावूचतुरुषसं नु स्तुह्यथ त्वोत्स्रक्ष्याव इति, स उषसं तुष्टावात उत्तरेण तृचेनैतस्य हस्मव्यर्च्युक्तायां विपाशो मुमुचे कनीय ऐक्ष्वाकस्योदरं भवत्युत्तरस्यामेवर्च्युक्तायां विपाशो मुमुचे गद ऐक्ष्वाक आसेति॥ हे कधप्रिये स्तुतिप्रिये, अमर्त्ये मरणरहिते, उष एतच्छब्दाभिधेये, उषः कालाभिमानिनि देवते, भुजे तव भोगाय, मर्त्यो मनुष्यः को विद्यते, हे विभावरि विशेषप्रभायुक्ते उषो देवि, कं पुरुषं नक्षसे प्राप्नोषि, तवोचितं भोगं दातुं न कोऽपि मनुष्यः समर्थः, अत एव त्वं कमपि पुरुषं भोगापेक्षया न प्राप्नोषि, ईदृशस्तव महिमेत्यर्थः। ते, ते मयावेकवचनस्य (पां ८।१।२२।) इति युष्मच्छब्दस्य ते आदेशः, सर्वानुदात्तः। कधप्रिये, कथ वाक्यप्रबन्धे, चुरादिरदन्तः, णौ, अतोलोपस्य स्थानिवद्भावादुपधावृद्ध्यभावः, चिन्ति पूजिकथिकुम्बिचर्चश्च (पां ३।३।१०५।) इत्यङ्प्रत्ययः, णेरनिटि (पां ६।४।५१।) इति णिलोपः, ततष्टाप्, षष्ठीसमासे, ङ्यापोः सञ्ज्ञाछन्दसोर्बहुलं (पां ६।३।६३।) इति ह्रस्वत्वं, थकारस्य धकारश्छान्दसः, आमन्त्रिताद्युदात्तत्वं। भुजे, भुज पालनाभ्यवहारयोः, सम्पदादिलक्षणः क्विप्, सावेकाचः (पां ६।१।१६८।) इति विभक्तेरुदात्तत्वं। मर्त्यः, असिहसि मृगृण्वमिदमिलूपूधूर्विभ्यस्तन्नित्यौणादिकस्तन्प्रत्ययः, नित्त्वादाद्युदात्तः,। नक्षसे, नक्षुतक्षु णक्षुगतौ। विभावरि, भा दीप्तौ, विपूर्व्वादस्मात्, आतोमनिन् क्वनिब्वनिपश्च (पां ३।२।७४।) इति वनिप्, वनोरच (पां ४।१।७।) इति ङीप्, तत्सन्नियोगेन नकारस्य रेफादेशः, अम्बार्थनद्योर्ह्रस्वः (पां ७।३।१०७।) इति ह्रस्वः॥ २०॥

एकविंशीमृचमाह वयं हि त इति। अश्वे व्यापनशीले, चित्रे चायनशीले, अरुषि आरोचमाने, उषः कालाभिमानिनि देवते, ते तव स्वरूपं आन्तात् समीपपर्य्यन्तं, आपराकात् दूरपर्य्यन्तं, वयं मनुष्या नामन्महि न बोद्धुं समर्थाः, हिशब्दः प्रसिद्धौ, देवतामहिम्नः पारा-

१२२१ त्वं त्येभिरागहि वाजेभिर्दुहितर्दिवः १
अस्मे रयिं निधारय ॥ ३१ ॥

## एकत्रिंशसूक्तं।

१११ त्वमग्ने प्रथमो अङ्गिरा ऋषिर्देवो देवानाम-
भवः शिवः सखा १ तव व्रते कवयो विद्मनाप-
सोऽजायन्त मरुतो भ्राजदृष्टयः ॥

वारयोरज्ञानमस्मासु प्रसिद्धमित्यर्थः । अमन्महि, मन ज्ञाने, बहुलं छन्दसीति बहुलवचनाच्छ्यनो लुक्, लुङ्लङ्लृङ्क्ष्वडुदात्तः (पा ६। ४। ७१।) इत्यडागम उदात्तः, हि च (पां ८। १। ३४।) इति निघातप्रतिषेधः। अश्वे, अशू व्याप्तौ, अशिप्रुषिलटिकणिखटिविशिभ्यः, क्वन्नित्यौणादिकः क्वन्प्रत्ययः, आमन्त्रिताद्युदात्तत्वं ॥ २१ ॥

द्वाविंशीमृचमाह त्वं त्येभिरिति । हे दिवो दुहितः द्युदेवतायाः पुत्रि उषो देवि, त्येभिर्वाजेभिस्तैरन्नैः सह, त्वमागहि अत्रागच्छ, अस्मे अस्मासु, रयिन्धनं, निधारय नितरां स्थापय। त्येभिः, बहुलं छन्दसीति त्यद्शब्दाद्भिस एसादेशाभावः । गहि, असकृदुक्तं । दुहितर्दिवः, परस्यापि दिव इत्यस्य दिवो दुहितरित्यन्वये सति पूर्वत्वात्, सुबामन्त्रिते पराङ्गवत्स्वरे (पां २। १। २।) इति पराङ्गवद्भावेन षष्ठ्यामन्त्रितसमुदायस्य सर्वानुदात्तत्वं, यद्वा कार्य्यकालं सञ्ज्ञापरिभाषमिति न्यायेन, सुबामन्त्रित इत्यस्य, आमन्त्रितस्य च (पां ८। १। १९।) इत्याष्टमिकेन योगेनैकवाक्यत्वे सति, परत्वात् पराङ्गवद्भावे सति सर्वानुदात्तत्वं, कृत्स्वरयोः षष्ठ्यामन्त्रितयोः पश्चात्, व्यत्ययो बहुलं (पां ३। १। ८५।) इति व्यत्यस्तप्रयोगः। अस्मे, सुपांसुलुक् पूर्वसवर्णात् (पां ७। १। ३९।) इति सप्तम्याः शे आदेशः ॥ २२ ॥ इत्येकत्रिंशो वर्गः ॥ ३१ ॥ इति सायनाचार्य्यविरचिते माधवीये वेदार्थप्रकाशे प्रथमे मण्डले षष्ठोऽनुवाकः ॥ ६ ॥

सप्तमेऽनुवाके पञ्चसूक्तानि, तत्र त्वमग्ने प्रथम इति प्रथमं सूक्तमष्टादशर्चं, आङ्गिरसो हिरण्यस्तूपऋषिः, अष्टमी षोडश्यष्टादश्य-

१२१ त्वमग्ने प्रथमो अङ्गिरस्तमः कविर्देवानां परिभूषसि व्रतं । विभुर्विश्वस्मै भुवनाय मेधिरो द्विमाता शयुः कतिधाचिदायवे ॥

स्त्रिष्टुभः, शिष्टास्त्रिष्टुबन्तपरिभाषया जगत्यः, अग्निर्देवता, तथानुक्रमणिका, त्वमग्ने द्युना हिरण्यरूप आग्नेयं त्रिष्टुबन्त्यमष्टमीषोडश्यौ चेति । प्रातरनुवाके आग्नेये क्रतौ आश्विनशस्त्रे च त्वमग्ने प्रथम इति सूक्तं, अथैतस्यारात्रेरिति खण्डे त्वमग्ने प्रथमोऽङ्गिरा ऋषिर्नृचित्सहोजा अमर्तोनितुन्दत इति सूचितं । अभिप्लवषडहस्य तृतीयेऽहनि आग्निमारुते शस्त्रे इदं सूक्तं जातवेदस्य निविद्धानीयं, तथाच तृतीयस्य अर्य्यमेति खण्डे सूचितं, त्वमग्ने प्रथमोऽङ्गिरा इत्याग्निमारुतमिति । वाजपेयेऽप्याग्निमारुत एतत् सूक्तं जातवेदस्य निविद्धानं तृतीयेनाभिप्लविकेनोक्तं, तृतीयस्य सवनमित्यतिदिष्टत्वात्, अस्मिन् सूक्ते प्रथमाग्नेयमाह त्वमग्न इति, हे अग्ने, त्वं प्रथम आद्यः, आङ्गिरसानामृषीणां सर्वेषां जनकत्वात्तादृशोऽङ्गिरोनामक ऋषिरभवः, तथाच ब्राह्मणं, योऽङ्गारा आरुस्तेऽङ्गिरसोऽभवन्निति । तथाच स्वयन्देवो भूत्वा देवानामन्येषां शिवः शोभनः सखा अभवः । तव व्रते त्वदीये कर्म्मणि, कवयो मेधाविनः, विप्रनामसो ज्ञानेन व्याप्नुवाना ज्ञातकर्म्माणो वा, भ्राजदृष्टयो दीप्यमानायुधाः, मरुतो मरुत्सञ्ज्ञका देवा अजायन्त । विप्रनामसः, विद ज्ञाने, विद्यो वेदनं, बहुलग्रहणादौणादिको मक्प्रत्ययः, तदस्यास्तीति मादादिलक्षणो नः, प्रत्ययस्वरेणान्तोदात्तत्वं, विप्रनान्यपांसि येषान्ते विप्रनामसः, पूर्वपदस्य, अन्येषामपि दृश्यते ( पां ६ । ३ । १३७ । ) इति दृष्टिग्रहणादवग्रहसमयेऽपि दीर्घत्वं । अजायन्त, जनी प्रादुर्भावे, तस्य शपि, व्यत्ययो बहुलं ( पां ३ । १ । ८५ । ) इति जादेशः । भ्राजदृष्टयः, भ्राज्ट दीप्तौ, व्यत्ययेन शप्, तस्य लसार्वधातुकानुदात्तत्वे धातुस्वरः, ऋष गतावित्यस्मात्, क्विच् क्वौच् सञ्ज्ञायां ( पां ३ । २ । १७४ । ) इति क्विजन्त ऋष्टिशब्दस्ततो बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वं ॥ १ ॥

द्वितीयामृचमाह त्वमग्न इति । हे अग्ने, त्वं प्रथम आद्यः अङ्गिरस्तमः अतिशयेनाङ्गिरा भूत्वा, कविर्मेधावी सन् देवानामन्येषां व्रतं

१३१ त्वमग्ने प्रथमो मातरिश्वन आविर्भव सुक्रतूया विवस्वते । आरेजेतां रोदसी होतृवूर्येऽसघ्नोर्भारमयजो महो वसो ॥

कर्म्म परिभूषसि परितः सर्वतोऽलङ्करोषि । कीदृशस्त्वं, विश्वस्मै भुवनाय समस्तलोकानामनुग्रहार्थं, विभुर्बहुविध आहवनीयाद्यनेकरूपधारीत्यर्थः, मेधिरो मेधावान्, द्विमाता द्वयोररण्योरुत्पन्नः, यद्वा द्वयोर्लोकयोर्निर्म्माता, आयवे मनुष्यार्थं, कतिधाचित् कतिभिः प्रकारैः, सर्वत्र शयुः शयानः, तत्तन्मनुष्यगृहेऽवस्थितस्य तव प्रकारा इयन्त इति न केनापि ज्ञायन्त इत्यर्थः। भूषसि, भूष अलङ्कारे, भौवादिकः। विभुः, विप्रसम्भ्योड्वसञ्ज्ञायां (पां ३।२।१८०।) इति विपूर्वाद्भवतेर्डुःप्रत्ययः, कृदुत्तरपदप्रकृतिस्वरत्वं। भुवनाय, भूसूधूभ्रस्जिभ्यश्छन्दसीत्यौणादिकः क्युन्प्रत्ययः, युवोरनाकौ (पां ७।१।१।) इति योरनादेशे नित्स्वरेणाद्युदात्तत्वं। मेधिरः, मेधृ सङ्गमे च, अस्माद्बाहुलक इरन्प्रत्ययः, नित्स्वरः। द्विमाता, द्वौ मातरौ यस्यासौ द्विमाता, नद्यृतश्च (पां ५।४।१५३।) इति कप्प्रत्ययो न भवति, मातृ मातृकयोर्भेदेनोपादानान्नद्यृतश्चेति कबपि विभाष्यत इति, तस्य मातृशब्दविषये पाक्षिकत्वोक्तेः, त्रिचक्रादित्वादुत्तरपदान्तोदात्तत्वं, यद्वा द्वयोर्माता द्विमाता, समासस्य (पां ६।१।२२३।) इत्यन्तोदात्तत्वं। शयुः, शीङ् स्वप्ने, भृमृशीत्यादिनौणादिक उःप्रत्ययः। कतिधा, डत्यन्तस्य किम्शब्दस्य, बहुगणवतुडतिसङ्ख्या (पां १।१।२३।) इति सङ्ख्यासञ्ज्ञायां, संख्यायाविधार्थे धा (पां ५।३।४२।) इति धाप्रत्ययः। आयवे, छन्दसीण इत्यौणादिक उण्प्रत्ययः ॥ २ ॥

तृतीयामृचमाह त्वमग्ने प्रथम इति। हे अग्ने, त्वं मातरिश्वनः प्रथमो मुख्यो भूत्वा वर्त्तसे, अग्निर्वायुरादित्य इति वाय्वपेक्षया सर्वत्र मुख्यत्वावगमात्, तादृशस्त्वं, सुक्रतूया शोभनकर्म्मेच्छया, विवस्वते परिचरते यजमानाय, आविर्भव प्रकटो भव, तव सामर्थ्यं दृष्ट्वा रोदसी द्यावापृथिव्यौ आरेजेतां आकम्पेतां। भ्यसते रेजत इति भयवेपनयोरिति यास्कः। होतृवूर्य्ये होतृवरणयुक्ते कर्म्मणि भारं भरणं असघ्नः ऊढवानसि, हे वसो निवासहेतो वह्ने, महः पूज्यान्देवान-

यजः इष्टवानसि । मातरिश्वनः, निर्म्माणहेतुत्वान्मातान्तरिक्षं, तत्र श्वसिति प्राणितीति मातरिश्वा वायुः, श्वन्नुक्षन्नित्यादौ मातरिश्वन् शब्द औणादिककन्प्रत्ययान्तो निपातितः। सुक्रतूया, सुक्रतुमात्मन इच्छति, सुप आत्मनः क्यच् (पां ३।२।८।) इति क्यच्, अकृत्सार्वधातुकयोर्दीर्घः (पां ७।४।२५।) इति दीर्घः, क्यजन्तस्य धातुसञ्ज्ञायां, अप्रत्ययात् (पां ३।३।१०२।) इति अकारःप्रत्ययः, ततष्टाप्, सुपां सुलुक् (पां ७।१।३९।) इति तृतीयैकवचनस्य डादेशः, टिलोपे उदात्तनिवृत्तिस्वरेण तस्योदात्तत्वं, संहितायां, अन्येषामपि दृश्यते (पां ६।३।१३७।) इति पूर्वपदस्य दीर्घत्वं। विवस्वते, विवासतिः परिचरणकर्म्मा, अस्मात् सम्पदादिलक्षणः क्विप्, व्यत्ययेनोपधाह्रस्वत्वं, तदस्यास्त्यस्मिन्निति मतुप् (पां ५।२।९४।) इति मतुप्, मादुपधायाश्च (पां ८।२।९।) इति मतुपो वत्वं, तसौमत्वर्थे (पां १।४।१९।) इति भत्वेन पदत्वाभावात् रुत्वाभावः, मतुपः पित्त्वादनुदात्तत्वं, धातुस्वरः शिष्यते। रोदसी, वा छन्दसि (पां ६।१।१०६।) इति पूर्वसवर्णदीर्घत्वं। होतृवूर्य्ये, होत्रा व्रियत इति होतृवूर्य्यो यज्ञः, वृञ् वरणे, बहुलग्रहणादौणादिकः क्यप्, उदोष्ठ्यपूर्वस्य (पां ७।१।१०२।) इत्युत्वं, हलि च (पां ८।२।७७।) इति दीर्घः, यद्वा वृञ् वरण इत्यस्मात्, एति स्तु शास्वृदृजुषः क्यप् (पां ३।१।१०९।) इति क्यप्प्रत्ययः। अनित्यमागमशासनमिति तुगभावः। अकृत्सार्वधातुकयोर्दीर्घः (पां ७।४।२५।) इति दीर्घः। अथवा पूर्ववदुत्वदीर्घौ। प्रत्ययस्य पित्त्वादनुदात्तत्वे धातुस्वरः, कृदुत्तरपदप्रकृतिस्वरत्वेन स एव शिष्यते। असघ्नः, सघ हिंसायां, अत्र तु वहनार्थः, स्वादिभ्यः श्नुः (पां ३।१।७३।) इति श्नुप्रत्ययः। पादादित्वादनिघातः, अयजः, भारमित्यस्य पूर्वपदस्य वाक्यान्तरगतत्वात्तदपेक्षया अस्य निघातो न भवति, समानवाक्ये निघातयुष्मदस्मदादेशा वक्तव्या इति वचनात्। महः, मह पूजायां, क्विप् च (पां ३।२।७६।) इति क्विप्, सुपां सुपो भवन्तीति वक्तव्यमिति वार्त्तिकेन शसो ङसादेशः, सावेकाचस्तृतीयादिः (पां ६।१।१६८।) इत्यादिना तस्योदात्तत्वं। यद्वा शसि महच्छब्दस्य अच्छब्दलोपश्छान्दसः, बृहन्महतो रुपसङ्ख्यानमिति वार्त्तिकेन शस उदात्तत्वं॥ ३॥

१४१ त्वमग्ने मनवे द्यामवाशयः पुरूरवसे सुकृते सुकृत्तरः १ श्वात्रेण यत्पित्रोर्मुच्यसे पर्य्यात्वा पूर्वमनयन्नापरं पुनः ॥

१५१ त्वमग्ने वृषभः पुष्टिवर्धन उद्यतस्रुचे भवसि श्रवाय्यः १य आहुतिं परिवेदा वषट्कृतिमेकायुरग्ने विश आविवाससि ॥ ३२ ॥

चतुर्थीमृचमाह त्वमग्ने मनव इति । हे अग्ने, त्वं मनवे मनोरनुग्रहार्थं, द्यां द्युलोकं, अवाशयः शब्दितवानसि, पुण्यकर्म्मभिः साधो द्युलोक इति प्रकटितवानसि, सुकृते तव परिचरणङ्कर्वते पुरूरवसे पुरूरव एतन्नामकस्य राज्ञोऽनुग्रहार्थं, सुकृत्तरः, अतिशयेन शोभनफलकार्य्यभूः, यद्यदा पित्रोररणोः श्वात्रेण क्षिप्रमथनेन परिमुच्यसे परिमुक्तो भवसि उत्पद्यस इत्यर्थः, तदानीं त्वा अरणोरुत्पन्नं त्वां पूर्व्वं वेद्याः पूर्वदेशे आनयन् आहवनीयत्वेन स्थापितवन्तः । पुनः पश्चादपरं पश्चिमदेशं, आनयन् गार्हपत्यरूपेण धारितवन्त इत्यर्थः । अवाशयः, वाशृ शब्दे । पुरूरवसे, पुरु रौतीति पुरूरवः, रुशब्दे, असुन्, पुरसिच, पुरूरवा इत्यौणादिकसूत्राभ्यां पुरुशब्दस्य दीर्घो रौतेरसिच्च निपात्यते । सुकृते, सुकर्म्मयापमन्त्रपुण्येषु क्रञः ( पां ३ । २ । ८९ । ) इति क्विप्प्रत्ययः, ततस्तुक् । पित्रोः, उदात्तयणो हल्पूर्वात् ( पां १ । १ । ७४ । ) इति विभक्तेरुदात्तत्वं । मुच्यसे, कर्तरि सार्वधातुकानुदात्तत्वं, यद्यपि सतिशिष्टस्वरबलीयस्त्वमन्यत्र विकरणेभ्य इति वचनाद्विकरणस्वरः, सति शिष्टेऽपि तसार्वधातुकस्वरस्य बाधको न भवति, तथापि धातुस्वरं बाधत एव । धातुस्वरं आस्वर इत्युक्तत्वात्, अतो यक एव स्वरे प्राप्ते व्यत्ययेनाद्युदात्तत्वं ॥ ४ ॥

पञ्चमीमृचमाह त्वमग्ने वृषभ इति । हे अग्ने, त्वं वृषभः कामानां वर्षिता, पुष्टिवर्धनो यजमानस्य धनादिपुष्ट्यभिवृद्धिहेतुः, उद्यतस्रुचे उद्यतया स्रुचा युक्ताय यजमानाय, तदनुग्रहार्थं श्रवाय्यः, मन्त्रैः श्रवणीयो भवसि, यो यजमानो वषट्कृतिं वषट्कारयुक्तां आहुतिं परिवेद परितो जानाति समर्पयतीत्यर्थः । एकायुर्मुख्यान्नेत्वमग्ने

१६१ त्वमग्ने वृजिनवर्तनिं नरं सक्मन्पिपर्षि विदथे विचर्षणे। यः शूरसाता परितक्म्ये धने दभ्रेभिश्चित्समृता हंसि भूयसः ॥

प्रथमं तं यजमानं, तदनुविशस्तदनुकूलाः प्रजाः आविवासन्ति सर्वतः प्रकाशयसीत्यर्थः। पृथिवर्धनः, वृधु वृद्धौ, अस्मात्सिजन्तात्, नन्द्यादित्वात् ल्युः, लित्स्वरेणोत्तरपदस्याद्युदात्तत्वं, क्तादुत्तरपदप्रकृतिस्वरत्वेन स एव शिष्यते। उद्यतस्रुचे, यम उपरमे, अस्मात् उत्पूर्वात्, निष्ठा (पां ३। २। १०२।) इति क्तप्रत्यये, अनुदात्तोपदेश (पां ६। ४। २७।) इत्यादिना अनुनासिकलोपः, गतिरनन्तरः (पां ६। २। ४९।) इति गतेः प्रकृतिस्वरत्वं, उद्यता स्रुक् येनेति बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वं। वेद, ह्वचोऽतस्तिङः (पां ६। ३। १३५।) इति संहितायां दीर्घत्वं ॥ ५ ॥ इति प्रथमस्य द्वितीये द्वाविंशो वर्गः ॥ ३२ ॥

षष्ठीमृचमाह त्वमग्ने वृजिनवर्तनिमिति। हे विचर्षणे विशिष्टज्ञानयुक्ताग्ने, त्वं वृजिनवर्तनिं विस्तृतमार्गं सदाचाररहितं नरं पुरुषं, सक्मन् सचनीये समवेतुं योग्ये, विदथे योग्ये कर्मणि, पिपर्षि पाजयसि पूरयसि वा, सत्कर्मानुष्ठानयुक्तं करोषीत्यर्थः। यस्त्वं परितक्म्ये परितो गन्तव्ये धने, धनवच्छूराणां प्रियतमे, शूरसाता शूरैः सम्भजनीये युद्धे, दभ्रेभिश्चित् अल्पैरपि शौर्यरहितैः पुरुषैः, दभ्र मर्भकमल्पस्येति यास्कः, समृता सम्यग्योद्धुमाप्ते सति मदनुग्रहार्थं भूयसः प्रौढान् प्रतिपक्षिणः शत्रून् हंसि मारयसि, ईदृशस्त्वं महिमेत्यर्थः। वृजिनवर्तनिं, वृजिना वर्तनिर्यस्येति बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वं। सक्मन्, षच समवाये, अन्येभ्योऽपि दृश्यन्ते (पां ३। २। ७५।) इति मनिन्, ज्वरत्वर इति (पां ७। २। ८।) इतीट्प्रतिषेधः, न्यङ्क्वादित्वात्कुत्वं। सुपां सुलुक् (पां ७। १। ३९।) इत्यादिना सप्तम्या लुक्। पिपर्षि, पॄ पालनपूरणयोः, सिपि, श्नाभ्यस्तयोरातः, आर्धधातुकस्येड्वलादेः, अर्तिपिपर्त्योश्च (पां ७। ४। ७७।) इत्यभ्यासस्येत्वं। शूरसाता, शॄ गतौ, सुसूचिमोनान्दीर्घश्चेत्योणादिकस्त्रन् प्रत्ययान्त आद्युदात्तः, वनषनसमक्तावित्यस्मात् क्तिन्नन्तः सातिशब्दः, जनसनखनां सञ्झलोः (पां ६। ४। ४२।) इत्यात्वं, शूराणां सातिः

१७। त्वं तमग्ने अमृतत्व उत्तमे मर्तं दधासि श्रवसे दिवे दिवे। यस्तातृषाण उभयाय जन्मने मयः कृणोषि प्रय आ च सूरये॥

१८। त्वं नो अग्ने सनये धनानां यशसं कारुं कृणुहि स्तवानः। ऋध्याम कर्म्मापसा नवेन देवैर्द्यावा-पृथिवी प्रावतं नः॥

सम्भजनमत्रेति बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वं, सुपां सुलुगित्यादिना सप्तम्या डादेशः। परितक्मे, तक हसने, अस्मादौणादिको भावे मक्, तदर्हतीत्यस्मिन्नर्थे, छन्दसि च (पां ५। १। ६७।) इति यत् प्रत्ययः। प्रादयो गताद्यर्थे प्रथमयेति सूत्रवार्त्तिकेन समासे ऽव्ययपूर्वपदप्रकृतिस्वरत्वं। दभ्रेभिः, दम्भु दम्भे, स्फायि तञ्चीत्यादिना औणादिको रक्, बहुलं छन्दसीति भिस ऐसादेशाभावः। समृता, गतिरनन्तरः (पां ६। २। ४९।) इति गतेः प्रकृतिस्वरत्वं, पूर्ववदाकारः। हंसि, हन्तेः सिपि, नश्चापदान्तस्य झलि (पां ८। ३। २४।) इत्यनुस्वारः। यद्वृत्तयोगादनिघातः। भूयसः, बहोर्लोपो भू च बहोः (पां ६। ४। १५८।) इति बहुशब्दादुत्तरस्य ईयसुन ईकारलोपो बहोर्भूभावश्च, नित्त्वादाद्युदात्तत्वं॥ ६॥

सप्तमीमृचमाह त्वं तमग्न इति। हे अग्ने, त्वं तं मर्तं तथाविधं त्वत्सेविनं मनुष्यं, दिवे दिवे प्रतिदिनं, श्रवसे अन्नार्थं, उत्तमे अमृतत्वे उत्कृष्टे मरणरहिते पदे, दधासि धारयसि। यो यजमानः उभयाय जन्मने द्विविधजन्मार्थं, द्विपदाञ्चतुष्पदाञ्च लाभायेत्यर्थः, तातृषाणो ऽतिशयेन तृष्णायुक्तो भवति, तस्मै सूरये अभिज्ञाय यजमानाय, मयः सुखं, यद्वै सुखं तन्मय इति श्रुत्यन्तरात्, प्रयश्च अन्नमपि, आकृणोषि सर्वतः करोषि। तातृषाणः, ञितृषा पिपासायां, लिटः कानज्वा (पां ३। २। १०६।) इति लिटः कानजादेशः, चित्त्वादन्तोदात्तत्वं, संहितायां दीर्घश्छान्दसः। कृणोषि, कृवि हिंसाकरणयोश्च, धिन्विकृण्व्योरच (पां ३। १। ८०।) इति उः प्रत्ययः, चादिलोपे विभाषा (पां ८। १। ६३।) इति निघातप्रतिषेधः॥ ७॥

अष्टमीमृचमाह त्वं नो अग्न इति। हे अग्ने, स्तवानः स्तूयमानस्त्वं

१९१ त्वं नो अग्ने पित्रोरुपस्थ आ देवो देवेष्वनवद्य जागृविः। तनूकृद्बोधि प्रमतिश्च कारवे त्वं कल्याण वसु विश्वमोपिषे॥

नोऽस्माकं, धनानां सनये दानार्थं, यज्ञसं यज्ञोयुक्तं, कारुं कर्मणाङ्कर्त्तारं पुत्रं, क्षणुहि कुरु। नवेन नूतनेन अपसा प्राप्तेन त्वदीयेन पुत्रेण, कर्म यागदानादिरूपं, ऋध्याम वर्द्धयामहे, द्यावापृथिवी उभे देवते, देवैरन्यैः सह, नोऽस्मान् प्रावतं प्रकर्षेण रक्षतं। यज्ञसं, अर्श-आदित्वादच्प्रत्ययः, व्यत्ययेन प्रत्ययात् पूर्वस्योदात्तत्वं, यद्वा सर्वप्रातिपदिकेभ्यः विब्वा वक्तव्य इति वार्त्तिकेन यज्ञस्यज्ञब्दात् क्विप्, तस्य प्रत्ययान्तस्य सनाद्यन्तत्वात् धातुसञ्ज्ञायां, क्विप् च (पां ३। १। ७६।) इति क्विप्प्रत्ययान्तधातोः सति शिष्टत्वात्, धातोः (पां ६। १। १६२।) इत्यन्तोदात्तत्वं। क्षणुहि, उतश्चप्रत्ययाच्छन्दो वा वचनमिति सूत्रवार्त्तिकेन हेर्लुगभावः। स्तवानः, उणादयो बहुलमिति बहुलवचनात् सम्यानचः स्तुव इत्यौणादिकसूत्रेण केवलस्तौतेरप्यानचप्रत्ययः, वृषादित्वादाद्युदात्तत्वं। ऋध्याम, ऋधु वृद्धौ, बहुलं छन्दसीति विकरणस्य लुक्, यासुट उदात्तत्वं। द्यावापृथिवी, दिवो द्यावा (पां ६। ३। २९।) इति द्यावादेशः, आमन्त्रिताद्युदात्तत्वं॥ ८॥

नवमीमृचमाह त्वन्नो अग्न इति। हे अनवद्य दोषरहिताग्ने, देवेषु सर्वेषु मध्ये, जागृविर्जागरूकत्वं, पित्रोर्मातापितृरूपयोर्द्यावापृथिव्योरुपस्थे समीपस्थाने वर्त्तमानः सन्, नोऽस्माकं तनूकृत् पुत्ररूपशरीरकारी देवो भूत्वा, आबोधि बुध्यस्व अनुगृहाणेत्यर्थः। तथा कारवे कर्मकर्त्रे यजमानाय, प्रमतिश्च अनुग्रहरूपप्रकृष्टमतियुक्तश्च भवेति शेषः। हे कल्याण मङ्गलरूपाग्ने, त्वं विश्वं वसु सर्वमपि धनं, ओपिषे यजमानार्थमावपसि। उपस्थ, सुपि स्थः (पां ३। २। ४।) इति तिष्ठतेः कः प्रत्ययः, आतो लोप इटि च (पां ६। ४। ६४।) इत्याकारलोपः, मरुद्भृधादीनां छन्दस्युपसङ्ख्यानमिति वार्त्तिकेन पूर्वपदान्तोदात्तत्वं। जागृविः, जागृ निद्राक्षये, जॄष् सु जागृभ्यः क्विन्नित्यौणादिकसूत्रेण क्विन्प्रत्ययः, नित्त्वादाद्युदात्तत्वं। बोधि, बुध अवगमने, बहुलं छन्दसीति शपः लुक्, ना छन्दसि (पां ३। ४। ८८।) इति

११०१ त्वमग्ने प्रमतिस्त्वं पितासि नस्त्वं वयस्कृत्तव जामयो वयं १ सं त्वा रायः शतिनः सं सहस्त्रिणः सुवीरं यन्ति व्रतपामदाभ्य ॥ ३३ ॥

१११ त्वामग्ने प्रथममायुमायवे देवा अकृण्वन्नहुषस्य विश्पतिं १ इलामकृण्वन्मनुषस्य शासनीं पितुर्यत्पुत्रो ममकस्य जायते ॥

हेरपित्त्वस्य विकल्पितत्वेन पित्त्वादङित्त्वे सति, अङितश्च ( पां ६ । ४ । १०३ । ) इति हेर्धिरादेशः, लघूपधगुणः, धातोरन्त्यलोपश्छान्दसः । प्रमतिः, मन ज्ञाने, क्तिनि, अनुदात्तोपदेश वनति ( पां ६ । ४ । ३७ । ) इत्यनुनासिकलोपः, प्रकृष्टा मतिर्यस्येति बऋव्रीहौ पूर्वपदप्रकृतिस्वरत्वं । ओपिषे, टुवप् बीजतन्तुसन्ताने, छान्दसे लिटि, थासः से ( पां ३ । ४ । ८० । ) इति से आदेशः, वचिस्वपियजादीनाङ्किति ( पां ६ । १ । १५ । ) इति सम्प्रसारणपरपूर्वत्वे, द्विर्भावहलादिशेषौ, क्रादिनियमादिट् ॥ ९ ॥

दशमीमृचमाह त्वमग्ने प्रमतिरिति । हे अग्ने, त्वं प्रमतिरस्मदनुग्रहरूपप्रकृष्टमतियुक्तोऽसि, तथा त्वं नोऽस्माकं पिता पालकोऽसि, तथा त्वं वयस्कृत् आयुष्यप्रदोऽसि, वयमप्यनुष्ठातारस्तव जामयो बन्धवः, हे अदाभ्य केनाप्यहिंसनीयाग्ने, सुवीरं शोभनपुरुषयुक्तं व्रतपां कर्मणः पालकं त्वां, शतिनः शतसङ्ख्यायुक्ता रायो धनानि संयन्ति सम्यक् प्राप्नुवन्ति, तथा सहस्त्रिणः सहस्रसङ्ख्काः रायो धनानि संयन्ति प्राप्नुवन्ति । सुवीरं, बऋव्रीहौ, नञ्सुभ्यां ( पां ६ । २ । १७२ । ) इत्युत्तरपदान्तोदात्तत्वे प्राप्ते, वीरवीर्य्यौ च ( पां ६ । २ । १२० । ) इत्युत्तरपदाद्युदात्तत्वं । अदाभ्य, दभिः प्रकृत्यन्तरमस्तीति केचिदाहुः, दमेश्चेति वक्तव्यमिति वार्त्तिकेन ण्यत् ॥ १० ॥ इति प्रथमस्य द्वितीये चयस्त्रिंशो वर्गः ॥ १३ ॥

एकादशीमृचमाह त्वामग्न इति । हे अग्ने, त्वां प्रथमं पुरा देवा आयवे, आयोर्मनुष्यरूपस्य नऋषस्य एतन्नामकराजविशेषस्य आयुं मनुष्यरूपं विश्पतिं सेनापतिं अकृण्वन् कृतवन्तः, तथा मनुषस्य मनोः

१ १२ १ त्वं नो अग्ने तव देव पायुभिर्मघोनो रक्ष तन्वश्च वन्द्य १ त्राता तोकस्य तनये गवामस्य-निमेषं रक्षमाणस्तव व्रते ॥

इलां एतन्नामधेयामुत्तरां शासनीं धर्म्मोपदेशकर्त्रीं अक्षण्वन् कृतवन्तः, तथाच तैत्तिरीयैराम्नायते, इडा वै मानवी यज्ञानुकाशिन्यासीदिति। वाजसनेयिनोऽप्येवमामनन्ति प्रयाजानूयाजानां मध्ये मामवकल्पय मया सर्वानवाप्स्यसि कामानिति सामनुमन्वशादिति। यत् यदा ममकस्य मदीयस्य हिरण्यरूपसम्बन्धिनो यः पिताङ्गिरास्तस्य पितुः पुत्रो जायते, तदानीं हे अग्ने, त्वमेव पुत्ररूप आसीरिति शेषः। आयवे, षष्ठ्यर्थे चतुर्थी वक्तव्येति वार्त्तिकेन चतुर्थी। नञ्छस्य, नह-बन्धने, नहिकलिहन्यर्त्तिलसिभ्य उषजित्यौणादिकसूत्रेण उषच्प्रत्ययः, वृद्धादित्वादाद्युदात्तत्वं। विश्पतिं, परादिश्छन्दसि बहुलं (पां ६। २। १९९।) इत्युत्तरपदाद्युदात्तत्वं। मनुषस्य, * मनोर्जातावञ्यतौ षुक् च (पां ४। १। १६१।) इति मनोरञ्प्रत्ययः, षुगागमश्च, आदिवृद्धौ प्राप्तायां सत्यां, सर्वे विधयश्छन्दसि विकल्पन्त इति परिभाषया बाहुलकाद्वृद्ध्य-भावः, पूर्वपदाद्युदात्तत्वं। शासनीं, शिष्यतेऽनयेति शासनी, करणाधि-करणयोश्च (पां ३। ३। ११७।) इति करणे ल्युट्, टिड्ढाणञ्द्वयसज्दघ्नञ् (पां ४। १। १५।) इति ङीप्, ल्युरेणाद्युदात्तत्वं। ममकस्य, मम-देमित्यर्थे, तस्येदं (पां ४। ३। १२०।) इत्यणि कृते, तवकममकावेक-वचने (पां ४। ३। ३।) इत्यस्मच्छब्दस्य ममकादेशः, सञ्ज्ञापूर्वको विधि-रनित्य इति परिभाषया वृद्ध्यभावः, व्यत्ययेनाद्युदात्तत्वं ॥ ११ ॥

द्वादशीमृचमाह त्वं नो अग्न इति। हे वन्द्य वन्दनीयाग्ने देव, त्वं, तव पायुभिस्त्वदीयैः पालनैर्मघोनो धनयुक्तान् नोऽस्मान् रक्ष, तथा तन्वश्च तन्वः पुत्रदेहानपि रक्ष, तोकस्यास्मदीयपुत्रस्य यस्तनयोऽस्मत्पौत्रादिस्तव व्रते त्वदीये कर्म्मणि अनिमेषं निरन्तरं रक्षमाणः सावधानो वर्त्तते, तस्मिन् वा गावः सन्ति तासां गवां त्राता रक्षकोऽसि, ईदृशस्य तवास्मद्रक्षणे किमु वक्तव्यमित्यर्थः। मघोनः,

* मनेर्निदित्युषच् नित्वादाद्युदात्तत्वं, संकां। मनेर्निदित्युषच् बाहुलकाद्वृद्ध्यभावः पूर्वपदाद्युदात्तत्वं, सं। उक्तरूपेणपदसिद्धिः पाणिनिसम्मता।

११३१ त्वमग्ने यज्यवे पायुरन्तरोऽनिषङ्गाय चतुरक्ष इध्यसे । यो रातहव्योऽवृकाय धायसे कीरेश्चिन्मन्त्रं मनसा वनोषि तं ॥

ग्रसि, स्वयुवमघोनामतद्धिते ( पां ६ । ४ । १३३ । ) इति सम्प्रसारणं । तन्वः, सुपां सुपो भवन्तीति वक्तव्यमिति वार्त्तिकेन ग्रसो जसादेशः । प्रथमयोः पूर्वसवर्णः ( पां ६ । १ । १०१ । ) इति पूर्वसवर्णदीर्घस्य, दीर्घाज्जसि च ( पां ६ । १ । १०५ । ) इति प्रतिषेधः, उदात्तस्वरितयोर्यणः स्वरितोऽनुदात्तस्य ( पां ८ । २ । ४ । ) इत्यादिना स्वरितत्वं, ग्रसि हि, उदात्तयणो हल्पूर्वात् ( पां ६ । १ । १७४ । ) इति विभक्त्युदात्तत्वं स्यात् ॥ १२ ॥

चतुर्दशीमृचमाह त्वमग्ने यज्यव इति । हे अग्ने, त्वं यज्यवे यज्योर्यजमानस्य पायुः पालकः, अन्तरः समीपवर्त्ती सन्, अनिषङ्गाय रज्जुभिरसम्बन्धाय यज्ञाय चतुरक्षः दिक्चतुष्टयेऽपि इन्द्रियस्थानीयज्वालायुक्त इध्यसे दीप्यसे, अवृकाय अहिंसकाय धायसे पोषकाय तुभ्यं, रातहव्यो दत्तहविर्यो यजमानोऽस्ति, कीरेश्चित् स्तोतुरेव सतस्तस्य सम्बन्धिनं मन्त्रं त्वदीयस्तोत्ररूपं, मनसा त्वदीयेन चित्तेन, वनोषि याचसि । यज्यवे, यजिमनिशुन्धिदसिजनिभ्यो युच् इत्यौणादिक युच्प्रत्ययः, वृषादित्वादाद्युदात्तत्वं । पायुः, क्षुवापाजिमिस्वदिसाध्यशूभ्य उण् इत्यौणादिक उण्प्रत्ययः, आतोयुक्चिण्कृतोः ( पां ७ । ३ । १२८ । ) इति युगागमः । अनिषङ्गाय, षञ्ज सङ्गे, न विद्यते सङ्गो यस्येति बहुव्रीहौ, नञ्सुभ्यां ( पां ६ । २ । १७२ । ) इत्युत्तरपदान्तोदात्तत्वं । चतुरक्षः, चत्वार्यक्षीणि ज्वालारूपाणि यस्यासौ चतुरक्षः । बहुव्रीहौ, सक्थ्यक्ष्णोः खाङ्गात्षच् ( पां ५ । ४ । ११३ । ) इति समासान्तः षच्प्रत्ययः, चित्त्वादन्तोदात्तत्वं । धायसे, वहिहाधाभ्यश्छन्दसीत्यौणादिको ऽसुन् प्रत्ययः, णिदित्यनुवृत्तेः, आतोयुक्चिण्कृतोः (पां ७ । ३ । १९८ ।) इति युगागमः । कीरेः, क्षत संशब्दे, अस्मात् ण्यन्तादच इरित्यौणादिक इरप्रत्यये, णिलोपे, धातोरन्त्यलोपश्चान्दसः । मन्त्रं, मन्त्रि गुप्तभाषणे, पचाद्यचि, वृषादिषु पाठादाद्युदात्तत्वं । वनोषि, वनु याचने, तनादिकस्य उः ( पां ३ । १ । ७९ । ) इत्युप्रत्ययः, प्रत्ययस्वरः ॥ १२ ॥

११४१ त्वमग्न उरुशंसाय वाघते स्पार्हं यद्रेक्णः परमं वनोषि तत् । आध्रस्य चित्प्रमतिरुच्यसे पिता प्र पाकं शास्सि प्र दिशो विदुष्टरः ॥

चतुर्दशीमृचमाह त्वमग्ने उरुशंसायेति । हे अग्ने, त्वं उरुशंसाय बहुभिः स्तोतव्याय वाघते ऋत्विजे, तदुपकारार्थं स्पार्हं स्पृहणीयं परममुत्तमं यद्रेक्णो धनमस्ति, तद्धनं वनोषि अनुष्ठाता लभतामिति कामयसे, तथा त्वं आध्रस्य चित् सर्वतो धारणीयस्य दुर्बलस्य यजमानस्यापि प्रमतिः प्रकृष्टबुद्धियुक्तः पिता पालक इत्यभिरुच्यसे, तथा विदुष्टरोऽतिशयेनाभिज्ञस्त्वं पाकं शिशुं, पोतः पाकोऽर्भको डिम्भ इत्यभिधानात्, यास्कोऽप्येवमाह पाकः पक्वो भवति, तथाविधं यजमानं प्रशास्सि प्रकर्षेणानुशिष्टं करोषि, तथा दिशः प्राच्यादिकाः प्रशास्सि त्वदीयशासनाभावे अनुष्ठातॄणां विभ्रमः स्यात्, तथाच श्रूयते, देवा वै देवयजनमध्यवसाय दिशो न प्राजानन्निति सम्भ्रमो दक्षिणादिग्गतोऽग्निनानिवर्त्तते। तदपि तथैवाम्नातं,पथ्यां स्वस्तिमयजन्प्राचीमेव तथा दिशं प्राजानन्नग्निना दक्षिणां सोमेन प्रतीचीं सवित्रोदीचीमिति । ऐतरेयिणापि तथैवाम्नातं, अथो एतं वरमवृणीत मयैव प्राचीन्दिशमाजानन्नग्निना दक्षिणामिति । उरुशंसाय, शंसु स्तुतौ, शंस्यत इति शंसः, कर्म्मणि घञ्, जित्स्वरेणाद्युदात्तत्वं, ह्रस्वोत्तरपदप्रकृतिस्वरत्वेन स एव शिष्यते। स्पार्हं, स्पृहासम्बन्धि, तस्येदं ( पां ४ । ३ । १२० । ) इत्यण्प्रत्ययः । रेक्णः, रिचिर् विरेचने, रिचेर्धनेधिचेत्यौणादिकोऽसुन्प्रत्ययः, चकारात्प्रत्ययस्य नुडागमः, चजोःकुघिण्ण्यतोः ( पां ७ । ३ । ५२ । ) इति कुत्वं । आध्रस्य, ध्रै तृप्तौ, आतश्चोपसर्गे ( पां ३ । १ । १३६ । ) इति कप्रत्ययः, आदेच उपदेशे शिति (पां ६ । १ । ४५ ।) इत्यात्वं । शास्सि, शासु अनुशिष्टौ, अदादित्वाच्छपो लुक्, सिपः पित्त्वादनुदात्तत्वे धातुस्वरः, पाकश्च प्रशास्सीति, अत्र चार्थो गम्यते, अतः, घादिलोपे विभाषा ( पां ८ । १ । ६३ । ) इति प्रथमा तिङ्विभक्तिर्न निहन्यते । विदुष्टरः, विद्वच्छब्दात्तरपि, अयस्मयादीनि छन्दसि ( पां १ । ४ । २० । ) इति भसञ्ज्ञायां, वसोः सम्प्रसारणं ( पां ६ । ४ । १३१ । ) इति सम्प्रसारणं, परपूर्वत्वं, शासिवसिघसीनाञ्च ( पां ८ ।

१ १५१ त्वमग्ने प्रयतदक्षिणं नरं वर्मेव स्यूतं परि-
पासि विश्वतः १ स्वादुक्षद्मा यो वसतौ स्योनकृज्जी-
वयाजं यजते सोमपा दिवः ॥ ३४ ॥

३ । ६० । ) इति षत्वं, तस्यः पित्त्वादनुदात्तत्वे वसोः सरेर्योकार उदात्तः ॥ १४ ॥

पञ्चदशीमृचमाह त्वमग्ने प्रयतदक्षिणमिति । हे अग्ने, त्वं प्रयतदक्षिणं येन यजमानेन ऋत्विग्भ्यो दक्षिणा दत्ता, तादृशं नरं पुरुषं यजमानं, विश्वतः सर्वतः, परियासि सम्यक् पालयसि, तत्र दृष्टान्तः, स्यूतं निश्छिद्रत्वेन सूचीभिः सम्यङ्निष्पादितं वर्मेव, यथा कवचं युद्धे पालयति तद्वत् । स्वादुक्षद्मा स्वादन्नवान्, वसतौ निवासभूते स्वगृहे, स्योनकृत् अतिथीनां सुखकारी यो यजमानो जीवयाजं जीवयजनसहितं यज्ञं, यद्वा जीवनिष्पाद्यं यज्ञं यजते अनुतिष्ठति, स यजमानो दिवः स्वर्गस्योपमा दृष्टान्तो भवति, यथा स्वर्गोऽनुष्ठातॄन् सुखयति, तथा त्वमप्यृत्विगादीनित्यर्थः । स्यूतं, षिवु तन्तुसन्ताने, निष्ठा ( यां ३ । २ । १०२ । ) इति क्तः, यस्य विभाषा ( यां ७ । २ । १५ । ) इति इट्प्रतिषेधः, ष्ठ्युः स्यूडनुनासिके च ( यां ६ । ४ । १९ । ) इति वकारस्य ऊठादेशः । स्वादून् क्षदतीति स्वादुक्षद्मा, क्षदतिर्दत्तिकर्मा, अन्येभ्योऽपि दृश्यन्ते ( यां ३ । २ । ७५ । ) इति मनिन्, नित्त्वादाद्युदात्तत्वे क्षदुत्तरपदप्रकृतिस्वरत्वं बहुव्रीहौ व्यत्ययेन । जीवयाजं, जीवान्ऋत्विज इज्यन्ते दक्षिणाभिः पूज्यन्त इत्यधिकरणे घञ्, कुत्वाभावश्छान्दसः, यद्वा जीवैः पशुभिर्याजनं जीवयाजः, याजयतेर्घञ्, णेरनिटि ( यां ६ । ४ । ५१ । ) इति णिलोपस्य, अचः परस्मिन् ( यां १ । १ । ५७ । ) इति स्थानिवद्भावात्, चजोःकुघिण्यतोः ( यां ७ । ३ । ५२ । ) इति कुत्वाभावः, थाथादिस्वरेणोत्तरपदान्तोदात्तत्वं । सोमपा, सोऽचि लोपे चेत् पादपूरणं ( यां ६ । १ । १३४ । ) इति संहितायां सोर्लोपः । दिवः, ऊडिदं ( यां ६ । १ । १७१ । ) इति विभक्तेरुदात्तत्वं ॥ १५ ॥ इति प्रथमस्य द्वितीये चतुस्त्रिंशो वर्गः ॥ ३४ ॥

११६१ इमामग्ने शरणिं मीमृषो न इममध्वानं यमगाम दूरात् । आपिः पिता प्रमतिः सोम्यानां भूमिरस्यृषिकृन्मर्त्यानां ॥

११७१ मनुष्वदग्ने अङ्गिरस्वदङ्गिरो ययातिवत्सदने पूर्ववच्छुचे । अच्छ याह्यावहा दैव्यं जनमासादय बर्हिषि यक्षि च प्रियं ॥

इमामग्न इत्यनया अनाहिताग्निरार्त्विज्यं कृत्वा स्वाम्नावाज्रतिं जुहुयात्, ऋत्विजो वृणीतेति खण्डे एवमनाहिताग्निर्गृह्य इमामग्ने शरणिं मीमृषो न इति सूक्तितं, तामेतां सूक्ते षोडशीमृचमाह इमामग्न इति । हे अग्ने, त्वं नोऽस्मत्सम्बन्धिनीमिमामिदानीं निष्पादितां शरणिं हिंसां व्रतलोपरूपां, मीमृषः क्षमस्व, तथाग्निहोत्रादिरूपां त्वदीयसेवां परित्यज्य दूराद्दूरदेशं यममध्वानमगाम गतवन्तस्तमपि क्षमस्वेति शेषः । सोम्यानां, सोमार्हाणामनुष्ठातॄणां मर्त्यानां त्वमाप्यादिगुणयुक्तोऽसि, आपिः प्रापणीयः, पिता पालकः, प्रमतिः प्रकृष्टमननयुक्तः, भूमिर्धामकः कर्मनिर्वाहक इत्यर्थः, ऋषिकृद्दर्शनकारी अनुजिघृक्षया प्रत्यक्षो भवसीत्यर्थः । शरणिं, शृ हिंसायामित्यस्मादौणादिकोऽनिः प्रत्ययः । मीमृषः, मृष तितिक्षायां, अस्मात्सौचङि गुणे प्राप्ते, नित्यं छन्दसि ( पां ७ । ४ । ८ । ) इत्युपधाऋकारस्य ऋकारादेशः, णिलोपे द्विर्भावहलादिशेषेऽदभ्यस्तसन्वद्भावेत्वदीर्घत्वानि, तिङ्शितिङः ( पां ८ । १ । २८ । ) इति निघातः । अगाम, इण् गतौ, इणो गा लुङि ( पां २ । ४ । ४५ । ) इति गादेशः, गातिस्थाघुपाभूभ्यः ( पां २ । ४ । ७७ । ) इति सिचो लुक्, अडागम उदात्तः । भूमिः, भमु अनवस्थाने, भमेः सम्प्रसारणेत्यौणादिक इन्प्रत्ययः, सम्प्रसारणे परपूर्वत्वं, इगुपधात् किदित्यनुवृत्तेः, कित्त्वादगुणप्रतिषेधः, नित्त्वादाद्युदात्तत्वं ॥ १६ ॥

सप्तदशीमृचमाह मनुष्वदग्न इति । हे शुचे शुद्धियुक्ताङ्गिरोऽङ्गनशील इविरानयनाय तत्र तत्र गमनशीलाग्ने, अच्छ आभिमुख्येन, सदने देवयजनदेशे याहि गच्छ, तत्र चत्वारो दृष्टान्ताः, मनुष्वत्, यथा मनु-

१ १८ १ एतेनाग्ने ब्रह्मणा वावृधस्व शक्ती वा यत्ते चकृमा विदा वा १ उत प्रणेष्यभिवस्यो अस्मान्त्सं नः सृज सुमत्या वाजवत्या ॥ ३५ ॥

रनुष्ठानदेशे गच्छति, अङ्गिरस्वत्, यथा चाङ्गिरा गच्छति, ययातिवत्, यथा ययातिर्नाम राजा गच्छति, पूर्ववदन्ये च, पूर्वपुरुषा यथा गच्छन्ति; अथवा, मन्वादीनां यज्ञे यथा त्वं गच्छसि तद्वत्। गत्वा च दैव्यं देवतासमूहरूपं जनमावह, अस्मिन् कर्म्मण्यानय, आनीय बर्हिषि आस्तीर्णदर्भे आसादय तान्देवानुपवेशय, उपवेश्य च प्रियमभीष्टं हविर्यच्चि च देहि। मनुष्वत्, तेन तुल्यं क्रियाचेद्वतिः (पां ५। १। ११५) इति प्रथमार्थे वतिः, तत्र तस्येव (पां ५। १। ११६।) इति षष्ठ्यर्थे वा वतिः, अयस्मयादित्वेन भत्वाद्भुत्वाद्यभावः। प्रत्ययस्वरः, एवमङ्गिरस्वदित्यादिषु। वह, ह्यचोऽतस्तिङः (पां ६। ३। १३५।) इति संहितायान्दीर्घः। यच्चि, लोटि, बहुलं छन्दसीति श्लुप्रो लुक्, सेर्ह्यपिच्च (पां ३। ४। ८७।) इति सेर्हेरभावश्छान्दसः, यत्वकत्वे ॥ १७ ॥

साग्निचयने क्रतौ उखासम्भरणीयायामिष्टौ अग्नेर्ब्रह्मणस्पतेः पुरोऽनुवाक्या एतेनाग्न इत्येषा, । दर्शपूर्णमासाभ्यामिष्ट्वेति खण्डे एतेनाग्ने ब्रह्मणा वावृधस्व ब्रह्म च ते जातवेदो नमस्येति सूचितं, तामेतां सूक्तोऽष्टादशीमृचमाह एतेनाग्ने ब्रह्मणेति। हे अग्ने, एतेनास्मत्प्रेरितेन ब्रह्मणा मन्त्रेण वावृधस्व अभिवृद्धो भव, शक्ती वा, विदा वा, अस्मदीयशक्त्या चास्मदीयज्ञानेन च, ते तव, यत् स्तोत्रं, चकृम वयं कृतवन्तः, एतेन ब्रह्मणेति पूर्वेणान्वयः। उत अपि च, अस्मान् अनुष्ठातॄन्, अभिवस्यो वसुमत्तरत्वलक्षणं श्रेयः, प्रणेषि प्रकर्षेण प्रापयसि, नोऽस्मान्, वाजवत्या प्रभूतान्नयुक्तया, सुमत्या अनुष्ठानविषयया शोभनबुद्ध्या, संसृज संयोजय। वावृधस्व, वृधु वृद्धौ, लेट्याडागमः, बहुलं छन्दसीति श्लुप्रः श्लुः, द्विर्भावहलादिशेषोरदत्वानि, अभ्यासस्य संहितायां दीर्घश्छान्दसः। शक्ती, शक्तृ शक्तौ, क्तिन्, सुपां सुलुक् (पां ७। १। ३९।) इत्यादिना तृतीयायाः पूर्वसवर्णदीर्घत्वं, क्तिनो निघातादायुदात्तत्वं। विदा, सावेकाचः (पां ६। १। १६८।) इत्यादिना तृतीयाया उदात्तत्वं। प्रणेषि, णीञ् प्रापणे, बहुलं छन्दसीति श्लुप्रो लुक्, उपसर्गादसमासेऽपि

## द्वाचिंशत्सूक्तं।

१११ इन्द्रस्य नु वीर्याणि प्रवोचं यानि चकार प्रथमानि वज्री। अहन्नहिमन्वपस्ततर्द प्र वक्षणा अभिनत्पर्वतानां॥

योपदेशस्य (पां ८। ४। १४।) इति णत्वं। सुमत्वा, मनधातोः क्विन् प्रत्ययः, मन्क्विन्व्याख्यान (पां ६। २। १५१।) इत्यादिनोत्तरपदान्तोदात्तत्वं प्रथमाध्याये प्रपञ्चितं, उदात्तयणो हल्पूर्वात् (पां ६। १। १७४।) इति विभक्तेरुदात्तत्वं॥ १८॥ इति प्रथमस्य द्वितीये पञ्चचिंशो वर्गः॥

इन्द्रस्य नु वीर्याणीति पञ्चदशर्चं सूक्तं, आङ्गिरसो हिरण्यस्तूप ऋषिः, त्रिष्टुप्छन्द इन्द्रो देवता, इन्द्रस्य पञ्चेनेत्यनुक्रमणिका, अग्निष्टोमे माध्यन्दिनसवने निष्केवल्यशस्त्रे इन्द्रस्य नु वीर्याणि प्रवोचमिति निविद्धानीयसूक्तं। निष्केवल्यस्येतिखण्डे इन्द्रस्य नु वीर्याणीत्येतस्मिन्नैन्द्री निविदन्दध्यादिति। विषुवत्यपि तस्मिन् शस्त्रे एतद्विनियुक्तं, विषुवान्दिवा कीर्त्य इति खण्डे सूचितं इन्द्रस्य नु वीर्याणीत्येतस्मिन्नैन्द्री निविदं शस्त्रेति। मरुत्वतीये निष्केवल्येऽप्येतदेव विनियुक्तं। रायन्तरे दक्षिणाः पञ्च इति खण्डे चतस्रः स्तुतीः षड्डृतीः करोतीन्द्रस्य नु वीर्याणि प्रवोचमिति। तत्र प्रथमामृचमाह इन्द्रस्य त्विति। वज्री वज्रयुक्तेन्द्रः, प्रथमानि पूर्वसिद्धानि यानि मुख्यानि, वीर्याणि पराक्रमयुक्तानि कर्माणि चकार, अस्येन्द्रस्य, तानि वीर्याणि, नु क्षिप्रं, प्रवोचं प्रब्रवीमि, कानि वीर्याणि, तदुच्यते, अहिं मेघं अहन् हतवान्, तदेतदेकं वीर्यं। अनु पश्चात्, अपो जलानि ततर्द हिंसितवान्, भूमौ पातितवानित्यर्थः, इदं द्वितीयं वीर्यं। पर्वतानां पर्वतसम्बन्धिनीः, वक्षणाः प्रवहनशीला नदीः, प्राभिनत्, भिन्नवान्, कूलद्वयसङ्घर्षणेन प्रवाहितवानित्यर्थः, इदं तृतीयं वीर्यं। एवमुत्तरत्रापि द्रष्टव्यं। वीर्याणि, शूर वीर विक्रान्तौ, गुणात्, अचो यत् (पां ३। १। ९७।) इति यत् प्रत्ययः, योरनिटि (पां ६। ४। ५१।) इति लोपः, तित्स्वरितं (पां ६। १। १८५।) इति स्वरितत्वं, यतोऽनावः (पां ६। १। २१३।) इत्याद्युदात्तत्वं न भवति, आद्युदात्तत्वे हि नु शब्देन बज्रवीहौ, आद्युदात्तं ह्यच् छन्दसि

१२। अहन्नहिं पर्वते शिश्रियाणं त्वष्टास्मै वज्रं स्वर्यं ततक्ष। वाश्रा इव धेनवः स्यन्दमाना अंजः समुद्रमवजग्मुरापः॥

(पां ६।२।११९।) इत्यनेनैवोत्तरपदाद्युदात्तस्य सिद्धत्वात्, वीरवीर्य्यौच (पां ६।२।१२०।) इति पुनस्तद्विधानमनर्थकं स्यात्, अतोऽवगम्यते यतोऽनाव इत्याद्युदात्तत्वं वीरशब्देन प्रवर्त्तत इति, अतः परिशेषात् तित्स्वरितमिति प्रत्ययस्य स्वरितत्वमेव, चकारेण णित्स्वरेण प्रत्ययात्पूर्वस्योदात्तत्वं। वोचं, अस्यतिवक्तिख्यातिभ्योऽङ् (पां ३।१।५२।) इति च्लेरङादेशः, बहुलं छन्दस्यमाङ्योगेऽपि (पां ६।४।७५।) इत्यडभावः, यद्वृत्तयोगादनिघातः। अहन्, हनहिंसागत्योः, हन्तेर्लङि, अडागमे, लङस्तिबादेशे, इतश्च (पां ३।४।१००।) इति इकारलोपे, हल्ङ्याभ्योदीर्घात्सुतिस्यपृक्तंहल् (पां ६।१।६८।) इति तकारलोपः। अहिं, आङ्पूर्वाद्धन्तेः, आङि श्रिहनिभ्यां ह्रस्वश्चेत्यौणादिक इण्प्रत्ययः, आङोह्रस्वत्वञ्च, वातेर्डिच्च, समाने ख्यश्चोदात्त इत्यौणादिकसूत्राभ्यां डित्वं, पूर्वपदोदात्तञ्चानुकृष्यते, ततष्टिलोपे पूर्वपदस्योदात्तत्वं। ततर्द, ऊ तृदिर् हिंसानादरयोः, तिङ्ङतिङः (पां ८।१।२८।) इति निघातः॥ १॥

द्वितीयामृचमाह अहन्नहिमिति। पर्वते, शिश्रियाणं आश्रितं, अहिं मेघं, अहन् हतवान्, अस्मै इन्द्राय, स्वर्यं सुष्ठु प्रेरणीयं, यद्वा, शब्दनीयं स्तुत्यं, त्वष्टा विश्वकर्म्मा, वज्रं, ततक्ष आहृतवान्, तेन वज्रेण मेघे भिन्ने सति, स्यन्दमानाः प्रस्रवणयुक्ता आपः, समुद्रं, अंजः सम्यक् अवजग्मुः प्राप्ताः, तत्र दृष्टान्तः, वाश्रा इव धेनवः, वत्सं प्रति हम्भारवोपेता धेनव इव, यथा धेनवः सहसा वत्सगृहे गच्छन्ति तद्वत्। शिश्रियाणं, श्रिञ् सेवायां, लिटः कानच्, द्विर्भावहलादिशेषेयङादेशाः, चितः (पां ६।१।१६३।) इत्यन्तोदात्तत्वं। स्वर्यं, ऋ गतौ, अस्मात्सुपूर्वात्, ऋहलोर्ण्यत् (पां ३।१।१२४।) इति ण्यत्, सञ्ज्ञापूर्वको विधिरनित्य इति वृद्ध्यभावः, यद्वा स्वृ शब्दोपतापयोरित्यस्मात् ण्यति पूर्व्ववद्वृद्ध्यभावः, तित्स्वरितं (पां ६।१।१८५।) इति स्वरितत्वं। वाश्राः, वाश्यन्त इति वाश्राः, वाशृ शब्दे, स्फायितञ्ची-

१३१ वृषायमाणोऽवृणीत सोमं त्रिकद्रुकेष्वपिबत्सुतस्य १ आ सायकं मघवादत्त वज्रमहन्नेनं प्रथमजामहीनां॥

१४१ यदिन्द्राहन्प्रथमजामहीनामान्मायिनाममिनाः प्रोत मायाः १ आत्सूर्यं जनयन्द्यामुषासं तादीत्ना शत्रुं न किला विवित्से॥

त्यादौनादिको रक्प्रत्ययः । जग्मुः, उसि, गमहन० (पां ६। ४। ९८।) इत्यादिनोपधालोपः ॥ २ ॥

तृतीयामृचमाह वृषायमाण इति । वृष इव आचरन्निन्द्रः, सोमं, अवृणीत वृतवान्, त्रिकद्रुकेषु ज्योतिष्टोम गोष्टोम आयुष्टोम इत्येतन्नामकास्त्रयो यागास्त्रिकद्रुका उच्यन्ते, तेषु सुतस्य अभिषुतस्य, सोमं सोमस्यांशं, अपिबत् पीतवान्। मघवा धनवानिन्द्रः, सायकं वज्रं, आदत्त स्वीकृतवान्, तेन वज्रेण अहीनां मेघानां मध्ये, प्रथमजां प्रथमोत्पन्नं एनं मेघं, अहन् हतवान्। वृषायमाणः, वृष इव आचरन्, कर्तुः क्यङ्सलोपश्च (पां ३। १। ११।) इति क्यङ्प्रत्ययः, अकृत्सार्वधातुकयोर्दीर्घः (पां ७। ४। २५।) इतिदीर्घः, अदुपदेशाद्धातोरन्तोदात्तत्वे क्यङन्ताद्धातोरन्तोदात्तत्वं। सायकं, षिञ् बन्धने, सिनोतीति सायकः, ण्वुल्, लित्स्वरेणाद्युदात्तत्वं। प्रथमजां, प्रथमं जायत इति प्रथमजाः, जन सन खनक्रमगमोविट् (पां ३। २। ६७।) इति विट्प्रत्ययः, विड्वनोरनुनासिकस्यात् (पां ६। ४। ४१।) इत्यात्वं ॥ ३ ॥

चतुर्थीमृचमाह यदिन्द्रेति । उत अपिच, हे इन्द्र, यत् यदा, अहीनां मेघानां, प्रथमजां प्रथमोत्पन्नं मेघं, अहन् हतवानसि, आत् तदनन्तरं, मायिनां मायोपेतानां असुराणां सम्बन्धिनीर्मायाः, प्रामिनाः प्रकर्षेण नाशितवानसि। आत् अनन्तरं, सूर्यं, उषासं उषः कालं, द्यामाकाशञ्च, जनयन्नुत्पादयन्, आवरकमेघनिवारणेन प्रकाशयन् वर्त्तसे। तादीत्ना तदानीं, आवरकान्धकाराभावात् शत्रुं घातकं वैरिणं, न विवित्से किल, त्वं न लब्धवान् खलु। अहन्, हन्तेर्लङि अडागमे, सिजलुपि, इतश्च (पां ३। ४। १००।) इति इकारलोपे,

१५१ अहन्वृत्रं वृत्रतरं व्यंसमिन्द्रो वज्रेण महता वधेन। स्कन्धांसीव कुलिशेनाविवृक्णाहिःशयत उपपृक् पृथिव्याः॥ ३६॥

हस्त्याभ्यो दीर्घात्सुतिस्यपृक्तं हल् (पां ६। १। ६८।) इति तकारलोपः, अडागम उदात्तः, यङ्लुक्तयोगादनिघातः। मायिनां, मायाशब्दस्य व्रीह्यादिषु पाठात्, व्रीह्यादिभ्यश्च (पां ५। २। ११६।) इति मत्वर्थीय इनिः। अमिनाः, मीञ् हिंसायां, क्रैयादिकः, मीनातेर्निगमे (पां ७। ३। ८१।) इति ह्रस्वत्वं। तादीत्ना, तदानीमित्यस्य एषोदरादित्वाद्वर्णविपर्ययः। किल, निपातस्य च (पां ६। ३। १६।) इति दीर्घत्वं। विवित्से, विद्लृ लाभे, क्रादिनियमप्राप्त इट् व्यत्ययेन न भवति॥ ४॥

पञ्चमीमृचमाह अहन्वृत्रमिति। अयमिन्द्रो, वज्रेण, महता वधेन वज्रेण सम्पादितो यो महान् वधस्तेन वज्रेण, वृत्रतरं अतिशयेन लोकानामावरकं अन्धकाररूपं, यद्वा, वृत्रैरावरणैः सर्वान् शत्रूनतरत्, तं वृत्रं एतन्नामकं असुरं, व्यंसं विगतांसं, छिन्नबाहुर्यथा भवति तथा अहन् हतवान्। व्यंसच्छेदे दृष्टान्तः, कुलिशेन कुठारेण आविवृक्णा विशेषतश्छिन्नानि स्कन्धांसीव, यथा वृक्षस्कन्धाश्छिन्ना भवन्ति तद्वत्, तथा सति, अहिर्वृत्रः, पृथिव्याः पृथिव्युपरि, उपपृक् सामीप्येन सम्पृक्तः, शेते शयनङ्करोति, छिन्नकाष्ठवद्भूमौ पततीत्यर्थः। वृत्रतरं, वृतु वर्त्तने, रक्षायितच्वीत्यादिना भावे औणादिक रक्प्रत्ययान्तो वृत्रशब्दः, वृत्रेणावरणेन सर्वं तरतीति वृत्रतरः, तरतेः पचाद्यच्, परादिश्छन्दसि बहुलं (पां ६। २। १९९।) इत्युत्तरपदान्तोदात्तत्वं, तरपि तु व्यत्ययेन। व्यंसं, बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वे प्राप्ते, उदात्तस्वरितयोर्यणः स्वरितोऽनुदात्तस्य (पां ८। २। ४।) इति स्वरितत्वं, वधेन, हनश्च वधः (पां ३। ३। ७६।) इति भावे अप्, तत्सन्नियोगेन धातोर्वधादेशः, स चान्तोदात्तः, अन्त्यस्याकारस्य, अतो लोपः (पां ६। ४। ४८।) इति लोपे, उदात्तनिवृत्तिस्वरेण प्रत्ययस्योदात्तत्वं। विवृक्णा, ओ व्रश्चू छेदने, कर्म्मणि निष्ठार्थे क्तप्रत्ययः, यस्य विभाषा (पां ७। २। १५।) इति इट्प्रतिषेधः। ओदितश्च (पां ८। २।

१६१ अयोद्वेव दुर्मद आ हि जुह्वे महावीरं तुविबाधमृजीषं १ नातारीदस्य समृतिं वधानां सं रुजानाः पिपिष इन्द्रशत्रुः ॥

४५।) इति परत्वान्निष्ठानत्वं, ततो, व्रश्चभ्रस्जसृजमृज० (पां ८। २। ३६।) इत्यादिना षत्वे प्राप्ते, निष्ठादेशषत्वखरप्रत्ययेष्विधिष्वसिद्धो वक्तव्य इति वार्त्तिकेन झल्परत्वाभावात् षत्वं न भवति, कुत्वे कर्त्तव्ये तदसिद्धमेवेति, चोः कुः (पां ८। २। ३०।) इति कुत्वं, शेश्छन्दसि बहुलं (पां ६। १। ७०।) इति शेर्लोपः, गतिरनन्तरः (पां ६। २। ४७।) इति गतेः प्रकृतिस्वरत्वं। शृणते, बहुलं छन्दसि (पां २। ४। ७३।) इति शृणो लुगभावः। पृथिव्याः, उदात्तयणो हल्पूर्वात् (पां ६। १। १७१।) इति विभक्तेरुदात्तत्वं॥ ५॥ इति प्रथमस्य द्वितीये षट्त्रिंशो वर्गः॥ ३६॥

षष्ठीमृचमाह अयोद्वेवेति। दुर्मदो दुष्टमदोपेतो दर्पयुक्तो वृत्रः, अयोद्वेव योद्धृरहित इव, इन्द्रं आहिजुह्वे आह्वान् खलु, कीदृशमिन्द्रं महावीरं, गुणैर्महान् भूत्वा शौर्य्योपेतं। तुविबाधं बहूनां बाधकं। ऋजीषं शत्रूणामपार्जकं। अस्येदृशस्येन्द्रस्य सम्बन्धिनो ये शत्रुवधाः सन्ति तेषां वधानां, समृतिं सङ्गमं नातारीत्, पूर्वोक्तो दुर्मदस्तरीतुं नाशक्नोत्। इन्द्रशत्रुः, इन्द्रः शत्रुर्घातको यस्य वृत्रस्य तादृशो वृत्रः, इन्द्रेण हतो, नदीषु पतितः सन्, रुजानाः नदीः सम्पिपिषे सम्यक् पिष्टवान्, सर्वान् लोकानावृखतो वृत्रदेहस्य पातेन नदीनां कूलानि, तत्रत्यं पाषाणादिकञ्च चूर्णीभूतमित्यर्थः। अयोद्वेव, न विद्यते योद्धास्येति बहुव्रीहौ, नञ्सुभ्यां (पां। ६। २। १७२।) इत्युत्तरपदान्तोदात्तत्वं, समासान्तविधेरनित्यत्वात्, नद्यृतश्च (पां ५। ४। १५३।) इति कबभावः। जुह्वे, ह्वेञ् स्पर्द्धायां शब्दे च, अभ्यस्तस्य च (पां ६। १। ३३।) इति सम्प्रसारणं, उवङादेशाभावश्छान्दसः, यद्वा, छन्दस्युभयथा (पां ३। ४। ११७।) इति सार्वधातुकसञ्ज्ञायां, ऊ श्रुवोः सार्वधातुके (पां ६। ४। ८७।) इति यणादेशः, अत्र लक्षणप्रतिपदोक्तपरिभाषया लक्ष्यानुरोधान्नाश्रीयते, इतरथा हि आजुह्वानः सप्रतीक इत्यादिषु यणादेशो न स्यात्। न चैवं सति, सातये

१७ १ अपादहस्तो अपृतन्यदिन्द्रमास्य वज्रमधि सानौ जघान १ वृष्णो वध्रिः प्रतिमानं बुभूषन्पुरुत्रा वृत्रो अशयद्व्यस्तः ॥

ऊवे वामित्यादावपि तथा स्यादिति वाच्यं, अनेकाजाभावात्, एरनेकाचोऽसंयोगपूर्वस्य (पां ६।४।८२।) इति सूत्रात्, अनेकाच इति हि तत्रानुवर्त्तते, प्रत्ययस्वरेणान्तोदात्तत्वं। हि च (पां ८।४।३४।) इति निघातप्रतिषेधः। महावीरं, महांश्चासौ वीरश्चेति महावीरः, आन्महतः (पां ६।३।४६।) इत्यादिना आत्वं। तुविबाधं, तुवीन् बहून् बाधत इति तुविबाधः, बाधृ विलोडने, पचाद्यच्, कृदुत्तरपदप्रकृतिस्वरत्वं। समृतिं, तादौचनितिकृत्यतौ (पां ६।२।५०।) इति गतेः प्रकृतिस्वरत्वं। रुजानाः, रुजो भङ्गे, रुञ्जन्ति कूलानीति रुजानाः नद्यः। रुजाना नद्यो भवन्ति रुजन्ति कूलानीति यास्कः। व्यत्ययेन शानच्, तुदादिभ्यः शः (पां ३।१।७७।) इति शप्रत्ययः, तुगभावश्छान्दसः, अदुपदेशाल्लसार्वधातुकानुदात्तत्वे विकरणस्वरः। पिपिषं, पिषॢ सञ्चूर्णने, व्यत्ययेन लिट्, इन्द्रशत्रुः, बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वं ॥ ६ ॥

सप्तमीमृचमाह अपादहस्त इति। अपात् वज्रेण छिन्नत्वात् पादरहितः, अहस्तो हस्तरहितो वृत्रः, इन्द्रमुद्दिश्य, अपृतन्यत् पृतनां युद्धं ऐच्छत्, दोषाधिक्येन बहुधा विद्धोऽपि युद्धं न परित्यक्तवानित्यर्थः, अस्य हस्तपादहीनस्य वृत्रस्य, सानौ पर्वतसानुसदृशे प्रौढस्कन्धे, अधि उपरि, वज्रं आजघान इन्द्र आभिमुख्येन प्रक्षिप्तवान्। अशक्तस्यापि युद्धेच्छायां दृष्टान्तः, वध्रिश्छिन्नमुष्कः पुरुषः, वृष्णो रेतःसेचनसमर्थस्य पुषान्तरस्य प्रतिमानं सादृश्यं बुभूषन् प्राप्तुमिच्छन्, यथा न शक्नोति तद्वदयमिति शेषः। स वृत्रः, पुरुत्रा बहुष्ववयवेषु, व्यस्तः विविधं क्षिप्तस्ताडितः सन्, अशयत् भूमौ पतितवानित्यर्थः। अपात्, बहुव्रीहौ पादशब्दस्यान्तलोपश्छान्दसः। अहस्तः, बहुव्रीहौ, नञ्सुभ्यां (पां ६।२।१७२।) इत्युत्तरपदान्तोदात्तत्वं अपृतन्यत्, सुप आत्मनः क्यच् (पां ३।१।८।) इति क्यच्प्रत्ययः, कव्यध्वरपृतनस्यर्चिलोपः (पां ७।४।३९।) इति पृतनाशब्दसम्बन्ध्याकारलोपः।

१८। नदं न भिन्नममुया शयानं मनोरुहाणा अति-
यन्त्यापः। याश्चिद्वृत्रो महिना पर्यतिष्ठत्तासामहिः
पत्सुतः शीर्बभूव॥

बुभूषन्, सनिग्रहगुहोश्च (पां ७।२।७२।) इति इट्प्रतिषेधः। पुरुत्रा, देवममुष्यपुरुषपुरुमर्त्येभ्यो द्वितीयासप्तम्योर्बहुलं (पां ५।४।५६।) इति सप्तम्यर्थे त्राप्रत्ययः। अशयत्, व्यत्ययेन परस्मैपदं, बहुलं छन्दसीति शपो लुगभावः। व्यस्तः, असु क्षेपण इत्यस्मात्कर्म्मणि क्तः, यस्य विभाषा (पां ७।२।१५।) इति इट्प्रतिषेधः, गतिरनन्तरः (पां ६।२।४९।) इति गतेः प्रकृतिस्वरत्वं, संहितायां, उदात्तस्वरितयोर्यणः स्वरितोऽनुदात्तस्य (पां ८।२।४।) इति परस्यानुदात्तस्य स्वरितत्वं॥ ७॥

अष्टमीमृचमाह नदं नभिन्नमिति। अमुष्यां पृथिव्यां, शयानं पतितं मृतं वृत्रं, आपो जलानि, अतियन्ति अतिक्रम्य गच्छन्ति, तत्र दृष्टान्तः, भिन्नं बहुधा भिन्नं कूलं नदं न सिन्धुमिव, यथा वृष्टिकाले प्रभूता आपो नद्याः कूलं भित्वा अतिक्रम्य गच्छन्ति तद्वत्। कीदृशा आपः, मनोरुहाणा नॄणाञ्चित्तमारोहन्त्यः, पुरा वृत्रे जीवति सति तेन निरुद्धा मेघाः स्थित्वा आपो भूमौ वृष्टा न भवन्ति, तदानीं नॄणां मानसः खिद्यते, मृते तु वृत्रे निरोधरहिता आपो वृत्रशरीरमुल्लङ्घ्य प्रवहन्ति, तदा वृष्टिलाभेन मनुष्यास्तुष्यन्तीत्यर्थः, तदेतदुत्तरार्द्धेन स्पष्टीक्रियते, वृत्रो जीवनदशायां, महिना स्वकीयेन महिम्ना, याश्चित् या एव, मेघगता आपः, पर्यतिष्ठत् परिवृत्य स्थितवान्, अहिर्वृत्रो मेघस्तासामपां पत्सुतःशीः, पादस्याधः शयानो बभूव, यद्यप्यपां पादो नास्ति, तथाप्यद्भिर्वृत्रस्याभिलङ्घितत्वात्पादस्याधःशयनमुपपद्यते। भिन्नं, भिदेः, रदाभ्यां निष्ठातो नः पूर्वस्य च दः (पां ८।२।४२।) इति दकारस्य नकारः। अमुया, सुपां सुलुक् (पां ७।२।३९।) इत्यादिना सप्तम्या याजादेशः। शयानं, शीङः सार्वधातुकगुणे धातोर्ङित्वाल्लसार्वधातुकानुदात्तत्वे धातुस्वरः। रुहाणाः, रुहबीजजन्मनि प्रादुर्भावे च, व्यत्ययेन शानच्, कर्त्तरि शपि प्राप्ते, व्यत्ययेन शः, अनित्यमागमशासनमिति वचनान्मुमभावः, अदुपदेशाल्लसार्वधातुकानु-

१९१ नीचावया अभवद्वृत्रपुत्रेन्द्रो अस्या अव वधर्जभार १ उत्तरा सूरधरः पुत्र आसीद्दानुः शये सहवत्सा न धेनुः ॥

दात्तत्वेन विकरणस्वरे प्राप्ते व्यत्ययेन धातुस्वरः । महिना, मह-पूजायां, सर्वधातुभ्य इन् इत्यौणादिक इन्प्रत्ययः, व्यत्ययेन विभक्तेरुदात्तत्वं । यद्वा महिना महिम्ना, महच्छब्दस्य पृथ्वादिषु पाठात् तस्य भाव इत्येतस्मिन्नर्थे, पृथ्वादिभ्य इमनिज्वा (पां ५ । १ । १२२ ।) इति विकल्पेन इमनिच् प्रत्ययः । टेः (पां ६ । ४ । १५५ ।) इति टिलोपः । चितः (पां ६ । १ । १६३ ।) इत्यन्तोदात्तत्वं, टतीयैकवचने ञ्नलोपे सति उदात्तनिवृत्तिस्वरेण तस्योदात्तत्वं, मकारलोपश्छान्दसः । पत्सुतःशीः, पादस्याधः शेत इति पत्सुतःशीः, क्विप् च (पां ८ । २ । ७६ ।) इति क्विप्, शसि, पद्दन्नोमास्हृन्निशसन्यूदोषन्यकक्लुकक्लुदन्नासञ्छस्प्रभृतिषु (पां ६ । ३ । ६३ ।) इति पादशब्दस्य पदादेशः, अस्मिन्सूत्रे शसप्रभृतिष्वित्युक्तत्वेनात्र प्रभृतिशब्दः प्रकारवचने, तेन शसादेषणोत्त्वापि दोषन्नादेशो भवतीत्युक्तत्वात्, मध्ये सु इतिशब्दोपजनश्छान्दसः, यद्वा पादशब्दस्य सप्तमीबहुवचने पदादेशे कृते, इतराभ्योऽपि दृश्यन्ते (पां ५ । ३ । १४ ।) इति सप्तम्यर्थे तसिल्प्रत्ययस्तस्य लुगभावश्छान्दसः ॥ ८ ॥

नवमीमृचमाह नीचावया इति । वृत्रपुत्रा वृत्रः पुत्रो यस्या मातुः सेयं माता वृत्रपुत्रा, नीचावया न्यग्भावमापन्ना हता अभवत्, पुत्रं प्रहारान्क्षितुं देहस्योपरि तिरश्ची पतितवतीत्यर्थः, तदानीमयमिन्द्रः, अस्या मातुः, अव अधोभागे, वृत्रस्योपरि वधर्हननसाधनमायुधं, जभार प्रहृतवान्, तदानीं, सूर्माता उत्तरा उपरिस्थिता आसीत्, पुत्रः पुत्रस्तु अधरोऽधोभागस्थित आसीत्, सा च दानुर्दानवी वृत्रमाता शये स्वप्नं कृतवती, तत्र दृष्टान्तः, धेनुर्लोकप्रसिद्धा गौः सहवत्सा न यथा वत्ससहिता शयनङ्करोति तद्वत्। नीचावयाः, वेतिर्वादतीति वयो वायुरौणादिको असि प्रत्ययः, न्यञ्चो वयसो यस्याः सा नीचावयाः, न्यञ्चशब्दादुत्तरस्या विभक्तेः, सुपां सुपो भवन्तीति वचनात् टतीयैकवचनादेशः, अचः, (पां ६ । ४ । १३८ ।) इत्याकारलोपे, चौ (पां ६ । ३ । १३८ ।)

॥ १०१ अतिष्ठन्तीनामनिवेशनानां काष्ठानां मध्ये निहितं शरीरं१ वृत्रस्य निण्यं विचरन्त्यापो दीर्घं तम आशयदिन्द्रशत्रुः ॥ ३७ ॥

इति दीर्घत्वं, अचेश्छन्दस्यसर्वनामस्थानं (पां ६ । १ । १७० ।) इति तस्योदात्तत्वं, समासे लुगभावश्छान्दसः, बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वं, यद्वा, नीचा निकृष्टा वयसो यस्याः सा, पूर्वपदस्य दीर्घश्छान्दसः। वधः, हन्यतेऽनेनेति वधः, असुनि हन्तेर्वधादेशः, निघ्वादाद्युदात्तत्वं। जभार, हृग्रहोर्भश्छन्दसीति सूत्रवार्त्तिकेन भत्वं। सूः, षूङ् प्राणगर्भविमोचने, सूते गर्भं विमुञ्चतीति सूर्माता, क्विप् च (पां ८ । २ । ७६ ।) इति क्विप्। दानुः, दो अवखण्डने, दाभाभ्यांनुरित्यौणादिको नुः प्रत्ययः, निदित्यपकर्षणादाद्युदात्तः। शये, शीङ् स्वप्ने, लटस्त आदेशे, टित आत्मनेपदानां टेरे (पां ३ । ४ । ७९ ।) इत्येत्वं, लोपस्त आत्मनेपदेषु (पां ७ । १ । ४१ ।) इति तलोपे, शीङः सार्वधातुके गुणः (पां ७ । ४ । २१ ।) इति गुणे अयादेशः ॥ ९ ॥

दशमीमृचमाह अतिष्ठन्तीनामिति । वृत्रस्य शरीरं, आपो विचरन्ति विशेषेण उपर्य्याक्रम्य प्रवहन्ति, कीदृशं शरीरं निण्यं निर्नामधेयं, अप्सु मग्नत्वेन गृहत्वात्केनापि न ज्ञायते, एतदेव स्पष्टीक्रियते, काष्ठानामयां मध्ये निहितं निक्षिप्तं, कीदृशानां काष्ठानां अतिष्ठन्तीनां अवस्थितिरहितानां, अनिवेशनानां स्थानरहितानां, प्रवहणस्वभावत्वादेतासां मनुष्यवन्न क्वापि स्थितिः सम्भवति। इन्द्रशत्रुर्वृत्रो जलमध्ये शरीरे प्रक्षिप्ते सति, दीर्घं तमो दीर्घनिद्रात्मकं मरणं यथा भवति तथा आशयत् सर्वतः पतितवान्। अतिष्ठन्तीनां, अव्ययपूर्वपदप्रकृतिस्वरत्वं। अनिवेशनानां, निविशन्त्यस्मिन्निति निवेशनं स्थानं, करणाधिकरणयोश्च (पां ३ । ३ । ११७ । इत्यधिकरणे ल्युट्, तद्रहितानां, बहुव्रीहौ, नञ्सुभ्यां (पां ६ । २ । १७२ ।) इत्युत्तरपदान्तोदात्तत्वं। क्रान्त्वा स्थिता इति काष्ठाः पृषोदरादिः। निक्षिप्तं, गतिरनन्तरः (पां ६ । २ । ४९ ।) इति गतेः प्रकृतिस्वरत्वं। यद्वा यास्कः, अतिष्ठन्तीनां अनिवेशनानामित्यस्थावराणां काष्ठानां मध्ये निहितं शरीरं मेघः, शरीरं शृणातेः शसातेर्वा वृत्रस्य निण्यं निर्नामं विचरन्ति विजानन्त्यापो दीर्घं आशयते

१११ दासपत्नीरहिगोपा अतिष्ठन्निरुद्धा आपः पणिनेव गावः। अपां बिलमपिहितं यदासीद्वृत्रं जघन्वाँ अप तद्ववार॥

स्तमस्तनोतेराशयदाशेत इन्द्रशत्रुस्तत्को वृत्रो मेघ इति नैरुक्तास्त्वासुर इत्यैतिहासिका इति॥१०॥ इति प्रथमस्य द्वितीये सप्तत्रिंशोवर्गः॥ ३७॥

एकादशीमृचमाह दासपत्नीरिति। दासपत्नीर्दासो विश्वोऽपक्षयणहेतुर्वृत्रः पतिः स्वामी यासान्ताः दासपत्नीः, अतएवाहिगोपाः अहिर्वृत्रो गोपा रक्षको यासान्ताः, गोपनं नाम स्वच्छन्देन यथा न प्रवहन्ति तथा निरोधनं। एतदेव स्पष्टीक्रियते, आपो निरुद्धा अतिष्ठन्निति। तत्र दृष्टान्तः, पणिनेव गावः, पणिनामकोऽसुरो गा अपहृत्य बिले स्थापयित्वा बिलद्वारमाच्छाद्य यथा निरुद्धवांस्तथेत्यर्थः। अपां यत् बिलं प्रवहणद्वारं अपिहितं वृत्रेण निरुद्धं आसीत्, तद्बिलं प्रवहणद्वारं, वृत्रं जघन्वान् हतवानिन्द्रः, अपववार अपावृतमकरोत्, वृत्रकृतमपां निरोधं परिहृतवानित्यर्थः। अत्र यास्कः, दासपत्नीर्दासाधिपत्यो दासो दस्यतेरुपदासयति कर्म्मण्यहिगोपा अतिष्ठन्नहिना गुप्ता अहिरयनादेत्यन्तरिक्षे ऽयमपीतरो ऽहिरेतस्मादेव निर्द्धंसितोपसर्ग आहन्तीति, निरुद्धा आपः पणिनेव गावः, पणिर्वणिग्भवति, पणिः पणनाद्वणिग्वण्यन्तेऽनेनेति, अपां बिलमपिहितं यदासीत्, बिलं भरं भवति विभर्त्तेः, वृत्रं जघन्वाँ जघ्निवान्, अप तद्ववार, तद्वृत्रो वृणोतेर्वा वर्त्ततेर्वा वर्द्धतेर्वा यदवृणोत्तद्वृत्रस्य वृत्रत्वमिति विज्ञायते, यदवर्त्तत तद्वृत्रस्य वृत्रत्वमिति विज्ञायते, यदवर्द्धत तद्वृत्रस्य वृत्रत्वमिति विज्ञायत इति। दासपत्नीः, दसु उपक्षये, दासयतीति दासो वृत्रः, पचाद्यच्, चितः (पां ६।१।१६३।) इत्यन्तोदात्तत्वं, दासः पतिर्यासां, विभाषासपूर्वस्य (पां ४।१।३४।) इति ङीप्, तत्सन्नियोगेन इकारस्य नकारः, बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वं, यद्वा दासस्य पालयित्र्यः, पत्यावैश्वर्ये (पां ६।२।१८।) इति पूर्वपदप्रकृतिस्वरत्वं। अहिगोपाः, गुपू रक्षणे, गोपायतीति गोपाः, आयादय आर्धधातुके वा (पां ३।२।३१।) इत्यायःप्रत्ययः। ततः क्विप्, अतो लोपः (पां ६।४।४८।) इत्यलोपः,

११२१ अश्व्यो वारो अभवस्तदिन्द्र सृके यत्त्वा प्रत्य-
हन्देव एकः१ अजयो गा अजयः शूर सोममवा-
सृजः सर्तवे सप्त सिन्धून्॥

वेरपक्तलोपाद्धलिलोपो बलीयानिति परिभाषया पूर्वं यकारलोपः, नच, अचः परस्मिन्पूर्वविधौ ( पां १ । १ । ५७ । ) इति अतो लोपस्य स्थानिवत्त्वं, नपदान्तद्विर्वचनवरेय लोप० ( पां १ । १ । ५८ । ) इत्यादिना स्थानिवत्त्वनिषेधात् । अहिगोपाः, अहिर्गोपा यासां पूर्ववत्स्वरः । निरुद्धाः, रुधिर् आवरणे, निष्ठार्थे क्तः, झषस्तथोर्धोधः ( पां ८ । २ । ४० । ) इति निष्ठातकारस्य धकारः, गतिरनन्तरः ( पां ६ । २ । ४२ । ) इति गतेः प्रकृतिस्वरत्वं । जघन्वान्, हन्तेर्लिटः क्वसुः, अभ्यासाच्च ( पां ७ । ३ । ५५ । ) इत्यभ्यासादुत्तरस्य हकारस्य कुत्वं । क्वादिनियमप्राप्तस्य इटो, विभाषागमहनविदविशां ( पां ७ । २ । ६८ । ) इति विकल्पविधानादभावः, संहितायां नकारस्य रुत्वानुनासिकावुक्तौ॥ ११ ॥

द्वादशीमृचमाह अश्व्यो वार इति । हे इन्द्र, एके वध्ये, एको एक इति वधनामसु पठितत्वात् । देवो दीप्यमानः सर्वायुधकुशलः । एको ऽद्वितीयो वृत्रः, यत् यदा, त्वा त्वां, प्रत्यहन् प्रतिकूलत्वेन प्रहृतवान्, तत् तदानीं, अश्व्यो वारः अश्वसम्बन्धी वालोऽभवः, यथा ऽश्वस्य वालो ऽनायासेन मक्षिकादीन् वारयति तद्वत् वृत्रमगणयित्वा निराकृतवानित्यर्थः । किञ्च गाः पणिनाऽपहृतास्त्वमजयः जितवान् । हे शूर शौर्ययुक्तेन्द्र, सोमं अजयो जितवान्, तथाच तैत्तिरीयाः, त्वष्टा हतपुत्र इत्यस्मिन्नुपाख्याने समामनन्ति, त्वष्टा हतपुत्रो वीन्द्रं सोममाहरन्तमिन्द्र उपहवमैच्छत तन्नोपाशृणोत पुत्रम्मेऽवधीरिति सयज्ञवेश्मसङ्कल्पा प्रासहा सोममपिबदिति । सप्त सिन्धून्, इमम्मे गङ्गे इत्यस्यामृचामाम्नाता गङ्गाद्याः सप्तसङ्ख्यका नद्यः सर्तवे सर्तुं प्रवाहरूपेण गन्तुं अवाहजः त्यक्तवान्, वृत्रकृतम्प्रवाहनिरोधं निराकृतवानित्यर्थः । अश्व्यः, अश्वे भवः अश्व्यः, भवेश्छन्दसि ( पां ४ । ४ । ११० । ) इति यत्, यतो ऽनावः ( पां ६ । १ । ११३ । ) इत्याद्युदात्तत्वं, वारयति दंशमशकानिति वारः, पचाद्यच्, कपिलकादित्वाल्लत्वविकल्पः. वृषादित्वादा-

११३१ नास्मै विद्युन्न तन्यतुः सिषेध न यां मिहमकिरद्ध्रादुनिं च१ इन्द्रश्च यद्युयुधाते अहिश्चोतापरीभ्यो मघवा विजिग्ये॥

११४१ अहेर्यातारं कमपश्य इन्द्र हृदि यत्ते जघ्नुषो भीरगच्छत्१ नव च यन्नवतिं च स्रवन्तीः श्येनो न भीतो अतरो रजांसि॥

द्युदात्तत्वं। प्रत्यहन्, यदृत्तान्नित्यं (पां ८।१।६६।) इति निघातप्रतिषेधः, तिङ्ङतिङः (पां ८।१।२८।) इति निघातो न भवति, समानवाक्ये निघातयुष्मदस्मदादेशा वक्तव्या इति वचनात्। सर्त्तवे, तुमर्थे सेसेनसेऽसेन् (पां ३।४।९।) इत्यादिना तवेन्प्रत्ययः, नित्त्वादाद्युदात्तत्वं॥ १२॥

त्रयोदशीमृचमाह नास्मै विद्युदिति। इन्द्रं निषेद्धुं वृत्रो यान् विद्युदादीन् मायया निर्म्मितवान्, ते सर्वेऽप्येनं निषेद्धुमशक्ताः, सोऽयमर्थोऽनेन मन्त्रेणोच्यते, अस्मै इन्द्रार्थं निर्म्मिता विद्युत् नासिषेध इन्द्रं न प्राप्नोत्, तथा तन्यतुर्गर्जनं यां मिहं सेचनं यां वृष्टिं अकिरत्, वृत्रो विच्छिन्नवान्, सापि वृष्टिर्न सिषेध, ह्रादुनिञ्च अग्निमपि यां वृत्रः प्रयुक्तवान्, सापि न सिषेध, इन्द्रश्च अहिश्च इन्द्रवृत्रावुभावपि यत् यदा युयुधाते युद्धं कृतवन्तौ, तदानीं विद्युदादयो न प्राप्ता इति पूर्वत्रान्वयः। उत अपिच मघवा धनवान् इन्द्रः, अपरीभ्योऽपराभ्योऽन्यासामपि वृत्रनिर्म्मितानां मायानां सकाशात् विजिग्ये विशेषेण जितवान्। सिषेध, षिधु गत्यां। मिहं, मिह सेचने, मेहति सिञ्चतीति मिहृष्टिः, क्विप् च (पां ८।२।७६।) इति क्विप्। अकिरत्, कृ विक्षेपे, तुदादिभ्यः शः (पां ३।१।७७।) इति श प्रत्ययः। च्लेः सिचः (पां ७।१।१००।) इति इत्वं, अडागम उदात्तः, यदृत्तयोगादनिघातः। युयुधाते, युध सम्प्रहारे, लिटि प्रत्ययस्वरः। जिग्ये, जि जये, सन्लिटोर्जेः (पां ७।३।५।) इति अभ्यासादुत्तरस्य जकारस्य कुत्वं॥ १३॥

चतुर्दशीमृचमाह अहेर्यातारमिति। हे इन्द्र, जघ्नुषो वृत्रं हत-

१ १५ १ इन्द्रो यातोऽवसितस्य राजा शमस्य च शृङ्गिणो वज्रबाहुः १ सेदु राजा क्षयति चर्षणीनामरान्न नेमिः परि ता बभूव ॥ ३८ ॥

॥ इति प्रथमाष्टके द्वितीयोऽध्यायः ॥

वतस्तव हृदि चित्ते यत् यदि भीरगच्छत् हतवानस्मीति बुद्ध्या भयम्प्राप्नुयात्, तर्हि अहेर्वृत्रस्य यातारं हन्तारं कमपश्यः, त्वत्तोऽन्यं कं पुरुषं दृष्टवानसि, तादृशस्य पुरुषान्तरस्याभावात्, माभूत्तव भयमित्यर्थः, यद्यस्मात्कारणात् नव च नवतिञ्च स्रवन्तीः एकोनशतसङ्ख्यका प्रवहन्तीर्नदीः प्राप्य रजांसि तत्रत्यान्युदकानि अतरस्तीर्णवानसि। तत्र दृष्टान्तः, श्येनो न श्येननामको बलवान् पक्षीव, दूरगमनात् तव भयमासीत् इति गम्यते, तद्भयं माभूदित्यभिप्रायः। तच्च दूरगमनं ब्राह्मणे समाम्नातं, इन्द्रो वै वृत्रं हत्वा नस्तृषीति मन्यमानः पराः परावतोऽगच्छदिति, तैत्तिरीयाश्चामनन्ति इन्द्रो वृत्रं हत्वा परां परावतमगच्छदपाराधमिति मन्यमान इति। हृदि, पद्दन्नोमास्हृन्निशसन् (पां ६।१।१७३।) इत्यादिना हृदयशब्दस्य हृदादेशः, ऊडिदं पदाद्यप्पुम्रैद्युभ्यः (पां ६।१।१७१।) इति विभक्तेरुदात्तत्वं। जघ्नुषः, इन्तेर्लिटः क्वसुः, षष्ठ्येकवचने, वसोः सम्प्रसारणं (पां ६।४।१३१।) इति सम्प्रसारणपरपूर्वत्वे, शासिवसिघसीनाञ्च (पां ८।३।६०।) इति षत्वं,। नच षत्वतुकोरसिद्धत्वेन एकादेशस्यासिद्धत्वात् षत्वं न प्राप्नुयादिति वाच्यं, सम्प्रसारणस्य ङीप्सुप्रतिषेधो वक्तव्य इति वार्त्तिकेन असिद्धवद्भावस्य प्रतिषिद्धत्वात्, गमहनजनखनघसां लोपः क्ङित्यनङि (पां ६।४।९८।) इत्युपधालोपः,। नचासिद्धवदत्राभात् (पां ६।४।२२।) इति सम्प्रसारणस्यासिद्धवद्भावः, भिन्नाश्रयत्वात्, सम्प्रसारणं हि षष्ठ्येकवचने, उपधालोपस्तु स्यादेवेति भिन्नाश्रयत्वं। स्रवन्तीः, स्रु गतौ, शप्श्यनोर्नित्यं (पां ७।१।८१।) इति नुमागमः, शपः पित्त्वादनुदात्तत्वं, शतुश्च लसार्वधातुकस्वरेणाद्युदात्तत्वं। अतरः, यद्वृत्तयोगादनिघातः ॥ १४ ॥

पञ्चदशीमृचमाह इन्द्रो यात इति। वज्रबाहुरिन्द्रः, शत्रौ हते सति, निःसपत्नो भूत्वा यातो गच्छतो जङ्गमस्यावसितस्य एकत्रैव स्थितस्य

स्थावरस्य, शमस्य शान्तस्य, शङ्करादित्येन प्रहरणादावप्रदत्तस्याश्वगर्दभादेः, शङ्किनः शङ्कोपेतस्योग्रस्य महिषबस्तीवर्दादेश्च राजा अभूत्। सेदु स एवेन्द्रस्वर्यणीनां मनुष्याणां राजा भूत्वा क्षयति निवसति, ता, तानि पूर्वोक्तानि जङ्गमादीनि सर्वाणि परिबभूव व्याप्तवान्,। तत्र दृष्टान्तः, अराइव नेमिर्यथा रथचक्रस्य परितो वर्त्तमाना नेमिः अरान् नाभौ कीलितान् काष्ठविशेषान् व्याप्नोति तद्वत्। यातः, या प्रापणे, याति गच्छतीति यात्, लटः शतृ, सावेकाचः ( पां ६। १। १६८।) इत्यादिना विभक्तेरुदात्तं। सेदु इत्यत्र, स इत्यस्य, सोऽचिलोपेचेत्पादपूरणं ( पां ६। १। १३४।) इति संहितायां सोर्लोपः,। ता, शेश्छन्दसि बहुलं ( पां ६। १। ७०।) इति सोर्लोपः, बभूव, भवतेर्लिटो णलि, भवतेरः ( पां ७। ४। ७३।) इत्यभ्यासस्य अत्वं, क्ङिताङ्गतप्रसङ्गितया वुगागमस्य नित्यत्वाद्वृद्धेः पूर्वं वुगागमः। यद्वा, इन्धिभवतिभ्याञ्च ( पां १। २। ६।) इति लिटः कित्त्वाद्वृद्ध्यभावः। नच, असिद्धवदत्राभात् ( पां ६। ४। २२।) इति तस्यासिद्धत्वादुवङादेशः शक्यः, वुग्युटावुवङ्यणोः सिद्धौ वक्तव्याविति वार्त्तिकेन तस्य सिद्धत्वात्, तिङ्शितिङः ( पां ८। १। २८।) इति निघातः॥ १५॥

इति प्रथमस्य द्वितीयेऽष्टचिंशो वर्गः॥ ३८॥

वेदार्थस्य प्रकाशेन तमो हार्दं निवारयन्। पुमर्थांश्चतुरो देयाद्विद्यातीर्थमहेश्वरः॥ इति श्रीमद्राजाधिराजपरमेश्वरवैदिकमार्गप्रवर्त्तकश्रीवीरबुक्काभूपालसाम्राज्यधुरन्धरेण सायनाचार्येण विरचिते माधवीये वेदार्थप्रकाशे ऋक्संहिताभाष्ये प्रथमाष्टके द्वितीयोऽध्यायः।

(ॐ तत् सत्॥)

00047294

Digitized with financial assistance from the
Government of Maharashtra
on 10 February, 2016